चान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम्

डा० हर्षनाथ मिश्रः

चान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम्

संस्कृतविद्यापीठग्रन्थमालायाद्वाविंशं प्रसूनम्

चान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम्

A CRITICAL STUDY OF CHANDRA VYAKARAN VRITTI

(दिल्ली-विश्वविद्यालयेन पी-एच्० डी० इत्युपाधये स्वीकृतः शोधप्रबन्धः)

प्रस्तावनालेखकः—

श्री देवनन्दन प्रसाद यादवः

उपमन्त्री, केन्द्रीय-शिक्षा-समाज-कल्याण-मन्त्रणालयस्य

तथा

अध्यक्षः, राष्ट्रियसंस्कृतसंस्थानस्य शासिपरिषदः

प्रधानसम्पादकः—

डा० मण्डन मिश्रः—प्राचार्यः

श्रीलालबहादुरशास्त्रीकेन्द्रीय-संस्कृत-विद्यापीठम्,

नई-दिल्ली

लेखकः—

डा० हर्षनाथ मिश्रः

व्याकरणसाहित्याचार्यः M.A. (संस्कृतहिन्दीविषययोः)

वरिष्ठो व्याख्याता,

श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठम्

नई-दिल्ली

श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठम्

नई-दिल्ली

प्रकाशकः—

डा० मण्डन मिश्रः—प्राचार्यः
श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठम्,
१/६ शान्तिनिकेतनम्, नई दिल्ली-२१
दूरभाषाङ्काः—६७१४३०

प्रथमं संस्करणम् ५५० प्रतयः
विजयदशमी, २०३१
२५, अक्टूबर १९७४

मूल्यम्—रूप्यकाणि

©श्रीलालबहादुरशास्त्रीकेन्द्रिय-संस्कृत-विद्यापीठस्य
तत्त्वावधाने प्रकाशितम्

मुद्रकः—
अमर प्रिण्टिङ्ग प्रेस (श्याम प्रिण्टिङ्ग एजेन्सी) ८।२५, विजयनगरम्, दिल्ली-९

प्रस्तावना

श्री लाल बहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ ने १९६८ में अंग्रेजी में व्याकरण के प्रसिद्ध विद्वान् स्वर्गीय श्री के० माधवकृष्ण शर्मा द्वारा लिखित 'पाणिनि, कात्यायन एण्ड पतंजलि' नामक ग्रन्थ का प्रकाशन किया था। आज उसी शृंखला में विद्यापीठ के वरिष्ठ व्याख्याता, विद्या और विनय से संपन्न विद्वान् डा० हर्षनाथ मिश्र द्वारा लिखित द्वितीय ग्रन्थ 'चान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम्' की प्रस्तावना करते हुए मुझे बहुत हर्ष हो रहा है।

किसी भाषा के अध्ययन में व्याकरण का अपना एक महत्व है। विशेषकर संस्कृत भाषा की तो आत्मा ही व्याकरण है। इस भाषा में अनेक वैयाकरणों ने उज्ज्वल पथ प्रशस्त किये, जिनमें पाणिनि, कात्यायन और पतंजलि ये तीन मुनि विशेष रूप से सम्मानित हुए। इन तीनों मुनियों द्वारा प्रवर्तित व्याकरण की स्वस्थ परम्परा को आगे बढ़ाने का काम पाँचवी शताब्दी के बौद्ध विद्वान् चन्द्रगोमी ने किया।

सौभाग्य से पाणिनीय व्याकरण के अध्ययन-अध्यापन का इस देश में बहुत प्रचार रहा। उसके दिव्य प्रकाश में अन्य व्याकरणों की ओर विशेष ध्यान नहीं दिया गया। यद्यपि आठ व्याकरणों में चान्द्र का नाम भी लिया जाता रहा है; परन्तु उनकी कृति बहुत दिनों तक यहाँ अनुपलब्ध रही। लिविश ने इसे जर्मनी में सर्वप्रथम रोमन लिपि में प्रकाशित किया। बाद में १९६१ ई० में डेक्कन कालेज, पूना से वृत्ति सहित इस ग्रन्थ का प्रकाशन हुआ। १९६७ ई० में राजस्थान प्राच्य विद्या प्रतिष्ठान ने चन्द्रगोमी की सम्पूर्ण व्याकरण कृतियों के मूलभाग का प्रकाशन किया।

डा० मिश्र ने इस शोध प्रबन्ध में वृत्ति को माध्यम बनाकर चान्द्र व्याकरण से पूर्व और पश्चात् लिखित संस्कृत व्याकरणों के तारतम्य को, पाणिनीयतन्त्र के रहने पर भी नूतन व्याकरण के निर्माण की प्रेरणा देने वाले कारणों को, चान्द्र व्याकरण की नई नई देनों को, और महापण्डित राहुल सांकृत्यायन के द्वारा तिब्बत से लायी गयी पूर्णचन्द्र की टीका चान्द्रपंजिका के प्रामाण्य से प्रकाशित नूतन रहस्यों को स्पष्ट करने का प्रयत्न किया है। ग्रन्थ की सफलता का निर्णय तो अधिकारी विद्वान् ही करेंगे। मैं तो इतना ही कह सकूंगा कि आज राष्ट्र को कालिदास के—

'पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्'

इस वचन के अनुसार समन्वयात्मक प्रवृत्ति की अत्यन्त आवश्यकता है। सभी व्याकरणों को महत्त्वपूर्ण, उपादेय, एक दूसरे का पूरक तथा भाषा-जगत के विविध तत्वों का प्रकाशक मानकर लेखक ने जिस समन्वयात्मक प्रवृत्ति का

परिचय दिया है; वह वस्तुतः स्तुत्य है। आशा है, इस प्रकाशन से चान्द्र तथा यहाँ चर्चित अन्य व्याकरण सम्प्रदायों का परिचय प्राप्त कर पाठकों की जिज्ञासा और शोधपिपासा अवश्य जागृत होगी।

इस ग्रन्थ पर दिल्ली विश्वविद्यालय ने डा० मिश्र को पी-एच्० डी० की उपाधि प्रदान कर इसके महत्व पर अपनी मोहर लगा दी है। मैं तो इस प्रयास की सफलता के लिए श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ और इसके लेखक डा० हर्षनाथ मिश्र को बधाई देता हूँ और राष्ट्रिय संस्कृत संस्थान की शासी परिषद् के अध्यक्ष के रूप में यह ग्रन्थ विद्वानों को उनके चिन्तन और मनन के लिए अर्पित करता हूँ।

गणेशचतुर्थी, २०३१
दिनाङ्क १९-९-१९७४.

देवनन्दन प्रसाद यादव

प्रकाशकीयम्

शिष्टप्रयुक्तानां सर्वेषामेव शब्दानामन्वाख्यानं व्याकरणकार्यम्। एतदर्थं व्याकरणनिर्माणकाले वैयाकरणस्य सूत्रादिकारस्य बुद्धौ तादृशानामध्ययनविश्लेषणीयानां सर्वेषामेव शब्दानां समुपस्थितिरपेक्ष्यते। मुनेरपि मानवत्वान्मानवमतेश्च सीमितत्वाच्छब्दब्रह्मणश्च व्यापकत्वादेकेन सीमितप्रकाशेनासीमस्य पूर्णतः प्रकाशनमसम्भवमेव। अतोऽत्र भारते दर्शनशास्त्रे यथा क्रमशो विकासो जातः स्तुतश्च सः, तथैव व्याकरणतन्त्रेऽपि। एकेनादृष्टस्य शब्दस्य लोके शास्त्रे च स्थितस्य गतिश्चिन्तिता परवर्तिना द्वितीयेनाचार्येण। अतएव "स्थितस्य गतिश्चिन्तनीयेति वैयाकरणै र्मन्त्रवज्जप्यते यथोत्तरं मुनीनाञ्च प्रामाण्यं मन्यते। उक्तानुक्तदुरुक्तचिन्तनात्मकानां वार्तिकानां पातञ्जलानां वचनानां प्रयोगाणाञ्च प्रामाण्यमुदाहरणञ्चाङ्गीकृत्य बहवः पाणिनिनाऽनवलोकिताः प्रयोगा अत्र संसाधिता निराकृताश्चाष्टाध्यायीलक्षणेष्वापतन्तोऽव्याप्त्यादयो दोषाः। इयमुदारा परम्परा शब्दब्रह्मावगमयितुमेव प्रवर्तिता, न तु पूर्वाचार्यदोषपरिगणनद्वाराऽऽत्मानं प्रख्यापयितुम्। पाणिनिनाऽपि बहूनि स्वपूर्वाचार्यवचनानि सदोषत्वान्निरस्तानि, बहूनि च बुद्धिनिकषपाषाणे परीक्ष्योपात्तानि, तत्रापि स एव हेतुः। एतेनैव संस्कृतव्याकरणशास्त्रमिदमुत्तरोत्तरमुपात्तोपादेयतत्त्वं निर्मुक्तप्रमादञ्च जातम्।

मुनित्रयोद्भावितस्य परिवर्तनपरिवर्धनात्मकविकासाख्यजीवनस्य निदर्शनमिदं चान्द्रव्याकरणम्। अस्य कर्त्रा भाष्योद्धारकेण चन्द्रगोमिना विकासबीजं तद्वपनरीतिञ्च पूर्वस्मादाचर्यान्मुनित्रयादवाप्य स्वव्याकरणक्षेत्रे तथोप्तं यथा तन्न केवलमङ्कुरितं पुष्पितं किन्तु फलितमपि जातम्। भोजराजान्तेषु वैयाकरणेषु दृष्टा चन्द्रानुकृतिरेवैतस्य व्याकरणस्य महत्त्वं गायतीति नात्र किमपि पृथङ्मानमपेक्ष्यते।

अजेर्व्यघञपोः (अष्टा० २।४।५६) इति सूत्रस्य भाष्ये "एवं हि कश्चिद् वैयाकरण आह—कोऽस्य रथस्य प्रवेता इति। सूत आह—अहमायुष्मन्नस्य रथस्य प्राजिता इति। वैयाकरण आह—अपशब्द इति। प्राप्तिज्ञो देवानांप्रियः, न त्विष्टिज्ञः, इष्यत एतद्रूपमिति। वैयाकरण आह—अहो नु खल्वेतेन दुरुतेन बाध्यामह इति। सूत आह—न खलु वेत्रः सूतः, सुवतेरेव सूतः। यदि सुवतेः कुत्सा प्रयोक्तव्या, दुःसूतेनेति वक्तव्यम्" इतीदृशेन वैयाकरणसूतसम्वादेन पतञ्जलिनापि प्राप्तिज्ञो निन्दित इष्टिज्ञश्चाभिनन्दितः। चन्द्रगोमिनेष्टिमधीत्य तद्विश्लेषणेन तथा लक्षणानि निर्मितानि, येनेष्टिप्राप्त्योः पूर्वोक्तं वैयधिकरण्यं विलीनं सामानाधिकरण्यञ्च प्रादुर्भूतम्। शोधप्रबन्धस्योपसंहारे लिखितं वाक्यमिदं नितरां याथार्थ्यप्रतिपादकम् "व्यापकत्वादनन्तप्रयोगविषयत्वाद् ब्रह्मपदवीमधिगच्छतः शब्दस्य समस्तं स्वरूपं न केनाप्येकेन व्याकरणेनाधिगमयितुं प्रभूयते, मिलितेनान्योन्यपूरकेण व्याकरणवृन्देन माध्यमीकृतेनैव तत्स्वरूपस्य निकटं यथाकथञ्चिद् गन्तुं शक्यते शब्दजिज्ञासुभिरिति।

"चान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम्" इति ग्रन्थस्यास्य लेखका डा० हर्षनाथ मिश्राः परम्परीणपरोवरीणोभयपद्धत्याऽधीतविद्याः सकलासु परीक्षासु प्राप्तप्रथमश्रेणीकाः व्याकरणसाहित्याचार्याः संस्कृतहिन्दी विषयावधिकृत्य 'एम० ए०' परीक्षोत्तीर्णाः राजस्थानीयजयपुरमण्डलान्तर्गतामरसरस्थ श्रीसीताराम संस्कृतविद्यालये

सप्तवर्षाणि कृतप्रधानाध्यापककार्या दक्षिणहैदराबादे बेगमबाजारीयमारवाड़ीविद्यालये त्रयोदशवर्षाणि, तत्रैव तिरिमलगिरीयकेन्द्रीयविद्यालये त्रीणि वर्षाणि चाध्यापितसंस्कृतहिन्दीविषयाः सर्वत्र निष्पादितपरश्शतसुयोग्यच्छात्रा हैदराबादीयहिन्दीप्रचारसभायास्तन्नगरस्थहिन्दुस्तानीप्रचारसभायाश्च द्वादशवर्षाणि यावत् सम्मानिताध्यापकाः साम्प्रतमस्यैव विद्यापीठस्य वरिष्ठव्याख्यातारो मधुबनीमण्डलान्तर्गतगजहराग्रामजन्मानो मैथिलाः।

प्रारम्भादेव विद्यापीठमिदं स्वकीयासु बहुविधासु साधनासु प्रकाशनकृतिमप्यन्यतमां महत्वपूर्णाञ्च मत्वा तयापि वाग्देवीमाराधयति। अस्या आराधनमालाया इदं प्रकाशनं द्वाविंशं प्रसूनम्। प्रकाशनमालाया एतस्या विषयवैविध्यं माध्यमीभूतभाषावैविध्यं च प्रकृत्या बहुरुचिसम्पन्नत्वाद् बहुजनसुखाय बहुजनहिताय च सम्पन्नमिति परमसन्तोषास्पदम्। तत्रापि पाणिनीयेतरव्याकरणपरिचायकत्वादस्य प्रकाशनस्य वर्ततेकोऽपि नूतनोत्कर्ष इति शम्।

विजयदशमी, २०३१
२५, अक्तूबर, १९७४

—मण्डन मिश्रः

भूमिका

दिल्लीविश्वविद्यालयेन 'पी-एच्० डी०' इत्युपाधये स्वीकृतो दत्तप्रकाशनानुमतिः "चान्द्रव्याकरणवृत्तेः समालोचनात्मक मध्ययनम्" (A Critical Study of Chndravyakaran-vritti) इत्याख्यः शोध-प्रबन्धोऽयं साम्प्रतं प्रकाश्यते।

व्याकरणाध्ययनसमये सर्वदा मम मानसे प्रादुर्भवन्ती, समुचितं प्रोत्साहनादिकं शम्बलमप्राप्नुवन्त्यपि न केवलं जीवन्ती किन्तु शुक्लपक्षीया चन्द्रिकेव पुष्टिं गच्छन्ती, वैयाकरणसिद्धान्तानां सिद्धान्त-कौमुदी-प्रौढमनोरमा-शब्दकौस्तुभ-शेखरप्रभृतिषु ग्रन्थेषु वर्णितानां मूलस्रोतोविषयिणी जिज्ञासैव मामस्मिन् गवेषणाकार्ये प्रावीवृतत्।

सिद्धान्तकौमुद्यादिषु प्रवहतां शब्दानुशासननियमानां मूलान्वेषणप्रवृत्तेन मयानुभूतं यत् त्रिमुनि-पल्लवितोऽयं व्याकरणशास्त्राक्षयवटवृक्षो बौद्धवैयाकरणानां श्रमशीकरेण सिक्त एव विशालतामुपेतः। तानवगत्य साम्प्रतिक-शब्दानुशासनं न कोऽपि पूर्णतो मूलतो वा ज्ञातुं प्रभवेत्।

यथा बौद्धसंस्कृतिमुपेक्ष्य भारतीयसंस्कृतेरवगमनप्रयासोऽपार्थ एव स्यात्, तथैव बौद्धवैयाकरणानां चन्द्र-गोमिप्रभृतीनां ग्रन्थान्, तेषामेतस्य संस्कृतशब्दानुशासनस्य विकासे कृतान् सहयोगान्, तेषां व्यापकदृष्टीरुदारान् विचारान्, नवनवा उद्भावनाश्चानवगत्य त्रिमुनिव्याकरणस्य समयेन सह विकासं गतस्य रहस्यमवगन्तुं न कोऽप्यर्हति। यथा किल भारतीयन्यायदर्शनस्य सूत्रपाते विकासात्मके च विधौ अक्षपादवात्स्यायनवाचस्पत्युदनाचार्यगङ्गेशोपा-ध्यायादयो बद्ध-परिकरा दत्त-ग्रन्थारत्नाः परमप्रतिष्ठितमास्पदं भजन्तो वन्दनीयाः कृतज्ञभावेन दार्शनिकानां स्मरणीया-श्च सन्ति तथा नागार्जुनवसुबन्धुदिङ्नागधर्मकीर्तिप्रज्ञाकरगुप्त-ज्ञानश्रीप्रभृतयोऽपि चिन्तन-विचारपरिस्पन्दन-जगति क्रान्तिकारिणः सर्वेषामस्माकमभिनन्दनीयाः।

साहित्येऽपि अश्वघोषो महाकविर्न कालिदासात् परवर्ती। रामायणादनन्तरं संस्कृते यत् प्रथमं महाकाव्यद्वय-मुपलभ्यते तदस्ति बौद्धाश्वघोषरचितं बुद्धरचितं सौन्दरानन्दं चेति। खिस्तस्य पञ्चम्यां षष्ठ्यां वा शताब्द्यां विद्यमानेन चन्द्रगोमिना[1] लोकानन्दनाटकमलेखि शिष्यलेख इति च तस्यैव काव्यम्। संस्कृतकोशग्रन्थेषु सांप्रतमपि प्रसिद्ध-तमस्यामरकोशस्य रचयिताऽमरसिंहोऽपि बौद्धः। आयुर्वेदस्यानुसन्धानं नागार्जुनस्य बौद्धस्य महत्वं गायति।

भारतीय मूर्तिकलातः सांची-भरहुत-गन्धार-मथुरा-मरावती कलाः कः निष्कासयितुं कामयिष्यते? अजन्ता-एलोरा-अलचीसुमराचित्रकलाः कस्या अपि चित्रकलाया उत्कृष्टतमस्वरूपेषु परिगणयितुं शक्यन्ते। भारतीय-मूर्ति-चित्र-कलाविकासविधौ बौद्धानां सहयोगोऽद्य नितरां प्रशस्यते पुरातत्वमर्मज्ञैर्ललितकलापरीक्षकैः। वास्तुकलाऽपि बौद्धानां चिरकृतज्ञा। एलोरा-अजन्तादिपर्वतान् भेदं भेदं भव्यगृहप्रासादानां निर्मातारो बौद्धा एवाऽसन्निति मन्यन्ते वास्तुकलेतिहासज्ञाः।

इत्थं न कोऽपि भारतीयसंस्कृतेः शास्त्रस्य च भाग एतादृशो विलोक्यते, यो न बौद्धैरघमर्णीकृतः।

पूर्वचर्चितानां बौद्धचिन्तककलाकार-विद्वद्दत्तानां दानानां विधीयमानं विहितं च मूल्याङ्कनमस्माकमौदार्यस्य विचारस्वातन्त्र्यस्य चिह्नमिति कृत्वा यत्र लभ्यते प्रमोदावसरः कश्चन, तत्रैव साम्प्रतमपि स्वतन्त्रेऽपि भारते चिरादागता बौद्धवैयाकरणानां कीर्तनीयकार्याणां पाठ्यमानव्याकरणप्राणायितरचनानामुपेक्षा तदवस्थेति विचारः कं न दुःखा-करोति?

---

१. चन्द्रगोमिनेत्यादौ णत्वाभावस्य कारणमस्यैव शोधप्रबन्धस्य १२६ तमे पृष्ठे प्रतिपादितम्।

संस्कृतव्याकरणविकासस्य बौद्धाः प्राणायिताः। पाणिनिकात्यायनपतञ्जलीति प्रधानाचार्यत्रयानन्तरं चन्द्रगोमिन एव नामात्र व्याकरणाकाशे देदीप्यमानं वर्तते। चान्द्रव्याकरणं संस्कृतव्याकरणेषु सरलतायां पूर्णतायां चाद्वितीयम्। लौकिकशब्दानुशासनं यथा चान्द्रं परिपूर्णं तथा नान्यद्। यद्यपि चान्द्रसूत्रवृत्तौ समुपलब्धैरनेकैः प्रमाणैरनुमितायाश्चान्द्रव्याकरणे स्वरवैदिकसत्तायाः साक्षादनुभूतिश्चान्द्रपञ्जिकायां सांकृत्यायनमहाभागेन त्रिविष्ठपात् (तिब्बतात्) चित्रीकृतानीतहस्तलेखायां कतिपयानां छान्दसानां सूत्राणामुपलब्धेः क्रियते, तथापि सम्पूर्णस्य छान्दसभागस्य साम्प्रतं लुप्तत्वादनुपलब्धेस्तद्वैशिष्ट्यविषये सविश्वासं न किमपि शक्यते वक्तुम्।

अद्दश्याध्यायद्वयमपीदं स्वविच्छित्तिशक्त्या तथैव चमत्करोति यथाऽनवलोक्यकलाद्वयः शुक्लपक्षीयस्त्रयोदशीचन्द्रः।

व्याकरणसूत्रेषु साम्प्रतं या या वृत्तय उपलभ्यन्ते तत्र सर्वत्र चन्द्रगोमिनो वृत्तेरनुकरणं स्पष्टं चकास्ति। इत्थं वृत्तिलेखनश्रेयःप्राथम्यमपि तमेवानुगच्छति।

सूत्रतद्वृत्युदाहरणप्रत्युदाहरणवाक्याध्याहारादिवार्तिक-भाष्यादयुपयोगिरहस्यानामेकत्र संकलनेन पाणिनीयाष्टाध्याय्या वस्तुतो व्याकरणत्वं बौद्धवैयाकरणैरेव सम्पादितम्। पाणिनीयकात्यायनपतञ्जलीति त्रिमुनितोऽनन्तरं काशिकाकारो जयादित्योन्यासकारो जिनेन्द्रबुद्धिश्च सरलसरलं व्याकरणसिद्धान्तमुपस्थापयन्तौ यत् कार्यमत्र क्षेत्रेऽपि कृतवन्तौ तन्नान्येन केनापि वैयाकरणेन कृतम्। तत्थ्यंत्विदमस्ति यत् परवर्तिनां सर्वेषां वैयाकरणानां कृते काशिकान्यासावेवाधारग्रन्थौ बभूवतुः। जातुचिदेतत् प्रसिद्धमासीत् यत् पाणिनीयव्याकरणं बौद्धवैयाकरणानां करगतमभूदिति।[1]

पाणिनेर्भाषासूत्राण्यधिकृत्य भाषावृत्तिविधायकः पुरुषोत्तमदेवोऽपि बौद्ध एवासीत्। पुरुषोत्तमदेवस्य सर्वतोमुखप्रतिभाप्रकाशेन न केवलं पाणिनीयलौकिकप्रयोगपरकाणि सूत्राण्यपि तु श्रुतपालस्य कुण्डलीसदृशः महाभाष्यसिद्धान्तगाम्भीर्यसूचको ग्रन्थोऽपि प्रकाशितः। तेन कारककारिका, दुर्घटवृत्तिः, परिभाषावृत्तिः, ज्ञापकसमुच्चयः उणादिवृत्तिः कारकचक्रं चेत्यादयो व्याकरणग्रन्था लिखिताः।

भागवृत्तिकारो विमलमतिः दुर्घटवृत्तिकारः शरणदेवः लिङ्गानुशासनस्य कर्ता वामनस्तन्त्रप्रदीपकारो मैत्रेयरक्षितः सर्वे बौद्धा एवासन्। एतेषां कृतय एव यथायथं दीक्षितनागेशादिग्रन्थानां साम्प्रतं प्रायः पठनीयमननीयतां गतानां मूलभूताः सन्ति। वृक्षस्य मूलारोहणं विना शाखारोहणं यथाऽसम्भवमस्वाभाविकं च तथैव चन्द्रप्रभृतीन् बौद्धवैयाकरणान् तद्ग्रन्थांश्च तिरस्कृत्य नव्यव्याकरणग्रन्थानामध्ययनमस्वाभाविकं पर्याप्तफलाजनकं चेति।

अतो बौद्धवैयाकरणानामेषां वैलक्षण्यप्रकाशनं परमावश्यकम्।

या किल कौमुदीपद्धतिरुच्यते साम्प्रतं, तस्या व्याकरणस्य नवीनायाः प्रयोगप्रधानाया वर्तमानशिक्षापद्धत्या अपि आविष्कारको 'रूपावतार' कारो वैयाकरणो धर्मकीर्तिरपि बौद्ध एव।

इत्थं सकलमिदं व्याकरणचिन्तनविवेचनजगत्तपस्विनां बौद्धाचार्याणां वैयाकरणानां श्रमाम्बुशीकरैः सिक्तं भूत्वैवोर्वरतामवापेति तेषां चिरागतोपेक्षा 'वचने गुणगृह्यविपश्चितां समाजेऽस्मिन् न शोभते विशेषतोस्यां विंश्यां शताब्द्यां ज्ञान-विज्ञान-दीप्ति-स्वलीकृतसम्प्रदायविशेषदुष्पक्षपातध्वान्तप्रभावायाम्।

शास्त्रचर्चैव विदुषां वस्तुतः सम्मानमुच्यते। विद्वद्भि र्यच्छास्त्रं लिखितं तस्य सुबुद्ध्या सद्बुद्ध्या चाध्ययनं, तदीयरहस्योद्घाटनं, निष्पक्षपातया धिया तद्गतगुणदोषाणां समीक्षणमेवंविधमन्यच्च तत्कृतिमहत्वाङ्कनमेव तेषां समादरः सम्भवति।

---

१. बौद्धसंस्कृति-राहुल सांकृत्यायन-अध्याय-४ पृ० ३२। द्र०—शोधप्रबन्धस्यास्य दशमं पृष्ठम्।

देशेऽस्मिन् कालविशेषे सम्प्रदायविशेषपक्षपातान्न केवलं बौद्धदर्शनमुपेक्षितमभवत्, अपितु बौद्धैर्लिखितमन्यदपि शास्त्रं वेद-बाह्य-लिखितत्वादुपेक्षणीयतामगमत्। भट्टोजिदीक्षितस्य प्रौढमनोरमायां मुद्गलाच्छन्दसीति वार्तिकव्याख्यायां जिनेन्द्रबुद्धिर्वेदवाह्य इत्याख्यायोपेक्षितः।[1] उदयनाचार्यस्य-आत्मतत्वालोक-ग्रन्थेना[2]ऽपि ज्ञायते यत् तत्समये वैयाकरणै र्गुणैकपक्षपातिभि र्व्याकरणरहस्यज्ञानाय बौद्धव्याकरणविरचितग्रन्थानां विधीयमानमधिकाधिकाश्रयणं विलोक्य वर्गविशेषोऽतितरां क्षुब्ध आसीदिति। भट्टोजिदीक्षितस्य पुत्रेण भानुजिदीक्षितेनामरकोशस्य स्वीयटीकायां रामाश्रम्यां[3] बुद्धस्य शौद्धोदनेर्नामव्याख्यासन्दर्भे लिखितम्—"यद्यपि वेदविरुद्धार्थानुष्ठातृत्वाज्जिनशाक्यौ नरकवर्गे वक्तुमुचितौः तथापि देवविरोधित्वेन बुद्ध्युपारोहादत्रैव (स्वर्गवर्ग एव) उक्ताविति।"

अस्मिन् सन्दर्भे विद्वेषस्य निम्नातिनिम्नस्थितिर्विलोक्यते। उपेक्षाया दुष्परिणामादेव यथा बौद्धो धर्मो भारतान्निगत्य विदेशे शरणमलभत तथैव बौद्धानाममूल्या ग्रन्था अपि विदेशमेव शरणीकृतवन्तः।

चान्द्रव्याकरणस्यैकस्यापि हस्तलेखस्य विशालेऽत्र देशेऽनुपलब्धिरुपेक्षायाः परांकाष्ठां सूचयति। त्रिविष्टपात् (तिब्बतात्) प्राप्तस्यास्य ग्रन्थस्य प्रकाशनं 'लिविश'स्य सत्प्रयत्नेन जर्मनीतः सम्पन्नमित्येतादृशान् ग्रन्थान् प्रत्यस्माकमुपेक्षाभावस्य स्पष्टं प्रमाणमस्ति। काशिका चिरकालं यावद्दुर्लभाऽऽसीत्। भाषावृत्तेः परिभाषावृत्ते र्दुर्घटवृत्तेश्चेयमेव दुर्दशाऽऽसीत् भागवृत्तिस्त्विदानीमपि दुर्लभैव वर्तते। अत्र सर्वत्र विदेशि-प्रभुत्वमपि कारणं प्रभवति; परन्तु न खलु सर्वो दोषस्तस्यैव; अस्माभिरप्यल्पं नात्रापराद्धम्। अस्तु

राज्यशासने परिवर्तिते, बौद्धसंस्कृतिदर्शनकलाप्रभृतीनामध्ययन-मनन-समीक्षण-मूल्याङ्कनानि तु प्रारब्धानि किन्तु बौद्धवैयाकरणास्तत्कृतयश्च न केनापि पर्यालोचिताः।

रोमनलिपौ कृतं लिविशप्रकाशनमाधारीकृत्य पूनास्थेन स्नातकोत्तरसहित-शोधसंस्थानेन दक्षिणमहाविद्यालयेन सपरिभाषा-वर्णसूत्रं चन्द्रोपज्ञवृत्तिसहितं चान्द्रव्याकरणं देवनागर्यां लिप्यां प्रकाश्य महदुपकृतं व्याकरणजगत्। अथ च लिविशप्रकाशनमेवाधिकृत्य जोधपुरस्थराजस्थानप्राच्यविद्याप्रतिष्ठानेन चान्द्रधातुवर्ण-परिभाषोणादिसूत्रसहितं वृत्तिरहितमपि चान्द्रव्याकरणमेकत्र प्रकाश्य समुपेक्षितबौद्धवैयाकरणकृतिम्प्रति किमप्यौत्सुक्यं जागरितं तथापि सर्वेषां बौद्धवैयाकरणविरचितानां ग्रन्थानां विविधमहत्व-परिपूर्णानां **समीक्षणपूर्वकतत्प्रधाना**चार्यस्य चन्द्रगोमिनो व्याकरणस्य साङ्गोपाङ्गाध्ययनं तत्समालोचनं च महत्वपूर्णमपि विश्लेषणीयमपि न केनापि प्रस्तुतम्। विशेषतो महापण्डितेन राहुलसांकृत्यायनेन लेखचित्रीकृत्य प्राणपणेनानीतायाश्चान्द्रपञ्जिकायाश्चान्द्रव्याकरणतद्वृत्तिविषये नवनवरहस्योद्घाटनदक्षाया न्याससमकक्षाया अध्ययनं पूर्णतोऽवशिष्टमेवासीत्।

तथाकथितोपेक्षा दूरं यातु तत्र निर्दिष्टानि रहस्यानि प्रकाशमायान्तु, एषामध्ययनेऽपि विद्वांसः प्रवर्तन्तामितीदृशेच्छया स्वाधीतसिद्धान्तकौमुद्यादिग्रन्थानां परममूलजिज्ञासया च प्रेरितोऽहमत्र पवित्रे कार्ये प्रवृत्तः।

विशालोऽयं विषयः विशेषतश्चान्द्रपञ्जिकाऽध्ययनमत्यन्तदीर्घसमय-श्रम-साध्यम्। लिपेः प्राचीनत्वात्तत्रापि नीतचित्रस्यात्यन्तास्पष्टत्वात्कदापि कदाप्यादिवसं प्रयस्यापि पङ्क्त्यर्धादधिकं पठितुं न पार्यते। सुदीर्घसमयश्रमसाध्याध्ययनाप्यतीवोपयोगिनी पञ्जिका येन केन प्रकारेणावश्याध्येतव्या। यदेयं सम्पूर्णा प्रत्यक्षरमधीता

---

१. काशिकाभूमिका पृ० ८५।

२. कथं पुनः सुगताद्यागमेषु अनादरश्छान्दसानाम्। वेदविद्वेषिदर्शनान्तःपातिपुरुषप्रणीतत्वादिति मा शङ्किष्ठाः, जिनेन्द्रजगदिन्द्रप्रणीतेष्वप्यादरात् तत्कस्य हेतोः, महाजनपरिगृहीतपूर्वागमाविरुद्धतया तदनुसारित्वात्। (परिभाषावृत्ति-ज्ञापकसमुच्चयकारकचन्क भूमिका पृ० ५)।

३. श्री भानुजिदीक्षितटीका—सहितामरकोश पृ० ९।

४. लिबिशेनास्य १८१५, १९०२, १९१८, १९२०, १९२८ तमेषु ख्रिष्टाब्देषु चान्द्रव्याकरणस्य प्रकाशनानि कृतानि।

भविष्यति तदा नूनं चान्द्रव्याकरण-विषयकाणि बहूनि नवानि नवानि ज्ञातव्यानि ज्ञातानि भविष्यन्ति। तदध्ययन-प्रयासोऽक्षुण्णश्चलति। दीर्घसमयश्रमसाध्यं तत्कार्यं, स्वस्य व्याकरणजगतश्च हिताय पश्चात्प्रस्तोष्यते। अत्र प्रबन्धे यावत्तदुपादानमेपेक्षितमासीत्तावदेव चर्चितम्।

पुरुषस्यान्तःकरणं तदीयैव वाक् प्रकाशयितुमलम्भवति, तथा ग्रन्थकारस्य मानसं रहस्यं तद्विरचितैव वृत्तिः स्फोटयितुं प्रभवति। अतो मया चान्द्रवृत्तिमधिकृत्य चान्द्रव्याकरणस्य समीक्षां कर्तुं तथा प्रयतितम् यथाऽस्य पाणिनि-कात्यायनपतञ्जलिप्रोक्तव्याकरणेन सह यथार्थसम्बन्धः, परवर्तिषु वैयाकरणेष्वस्य प्रभावः एतस्य नवीनोद्भावना, लघुत्वेऽपि स्पष्टता सम्पूर्णता एवं विधमन्यच्च महद् वं प्रकाशमुपेयुः। किंच पाणिनीयतन्त्रस्य यानि दूषणानि दृष्ट्वा चन्द्रेण स्वीयमन्यद् व्याकरणं लिखितं तेषामुद्घाटनेन सह मयास्मिन् शोधप्रबन्धे चान्द्रव्याकरणदोषा अपि दर्शिताः।

चन्द्राचार्यप्रभृतिभि र्बौद्धै र्वैयाकरणै र्लिखितेषु ग्रन्थेषु त्रिमुनिस्वीकृतव्याकरणस्वभावस्य निर्वाहो यथा दृश्यते न तथा भट्टोजिप्रभृतिभि र्विरचितेषु व्याकरणग्रन्थेषु। बौद्धवैयाकरणानां ग्रन्थेष्वेव तादृशा नियमाः पद्धतयश्च तथा-विधा, उपलभ्यन्ते, यैस्त्रिमुन्यदृष्टा अनेके शब्दा निष्पादिता जायन्ते। इत्थं संस्कृतव्याकरणस्याव्याप्त्यतिव्याप्तिदोषाणां निवारयितारो बौद्धा वैयाकरणाः स्तुत्याः। तद्ग्रन्थाश्चाध्येतव्या मन्तव्याश्चावश्यम्। व्याकरणशास्त्रस्य स्वभावेन, शब्दान् प्रति तत्कर्तव्येन, नदीप्रवाह इव भाषाप्रवाहे, जलानामिव निरन्तरमागतमिश्रितानां शब्दानां गतिविधिना च यथेमे बौद्धा वैयाकरणाः भृश-परिचितास्तथामुनित्रयातिरिक्तः कोऽपि वैयाकरणः परिचितः परिचयप्रयत्नवान्वासी-दिति नैव दृश्यते प्रायः।

पाणिनिसूत्रेषु मानवस्वभावसुलभप्रमादवशादागता दोषाः कात्यायनेन विलोकिताः समाहिताश्च ते यावच्छक्यं वार्तिकनिर्माणपद्धत्या। पतञ्जलिनाऽपि ताभ्यां निर्मितानां नियमानां गुणदौषौ परीक्ष्य प्रमेयो निश्चितः। निश्चयेऽस्मिन् तेन क्वापि पाणिनेः क्वापि च कात्यायनस्य नियमः प्रत्याख्यातः, कुत्रचिच्च स्वीयं मतपार्थक्यमपि दर्शितम्। प्रयोगा-नुसारिनियमपरिवर्तनपरिवर्धनपद्धतिः, या कात्यायनपतञ्जलिदर्शितानुमोदिता चासीत्, चन्द्राचार्येण स्वरचनाया-मक्षुण्णं निर्व्यूढा। पाणिनीयकात्यायनपतञ्जल्यदृष्टानामनेकेषां शब्दानां साधुत्वोपाय एव न चन्द्राचार्येण दर्शितः, किन्तु त्रिमुनिरचितनियमेषु विविधान् दोषान्—अव्याप्त्यतिव्याप्तिनिरर्थकत्व-विधेयाविमर्शापुष्टत्व-च्युतसंस्कृति-क्लिष्ट-त्व-विशेष-परिवृत्त-सामान्यपरिवृत्तासमर्थत्वादीन् विचिन्त्य दर्शयता स्वकीयं व्याकरणं त्रिमुनिव्याकरणाधारेण निर्मायापि तत्तद्दोषनिर्मुक्तमिवावस्थापयितुं प्रायत्यत।

इत्थं चान्द्रव्याकरणं लघु विस्पष्टसम्पूर्ण-निर्दुष्टशब्दलक्षणत्वस्त्येव किन्तु तदस्ति पूर्ववैयाकरणादृष्ट-शिष्ट-प्रयुक्तशब्दान्वाख्यानपथप्रदर्शकमपि।

सूत्रमात्रं नोच्यते व्याकरणम्, सूत्रमात्रेण शब्दान्वाख्यानादर्शनात्। उदाहरणप्रत्युदाहरणवाक्याध्याहारादि-सहितसूत्रतात्पर्याख्यानात्मकव्याख्यानेन शब्दान्वाख्यानं जायमानं विलोक्य तादृशव्याख्यानसहितं सूत्रं व्याकरणमुच्यते। अतः व्याकरणग्रन्थे निर्दुष्टसूत्रैः सह तेषां वृत्युदाहरणप्रत्युदाहरणानां सूत्रतात्पर्यावगमनाय तेषां यथोचितलक्ष्यसंगमनाय च वर्णसूत्र-गणपाठ-धातुपाठोणादिसूत्र-परिभाषासूत्राणामेकत्र समावेशः परमावश्यकः। चन्द्राचार्येणैव सर्वप्रथमं पूर्वोक्तसर्वविधसमावेशसम्पन्नो ग्रन्थो लिखितः। सर्वप्रथमं व्याकरणस्य साङ्गोपाङ्गमेकत्र निरूपणं बौद्धवैया-करणानामेव कार्यम्।

व्याकरणशिक्षणस्य काशिकापद्धतिः कौमुदीपद्धतिरिति पद्धतिद्वयमुपलभ्यते। सापि पद्धतिद्वयी बौद्धाचार्यो-द्भावितैव दृश्यते।

काशिकाशैली—यत्र प्रथमं लक्षणं पश्चाच्च लक्ष्यं प्रस्तूयते, यत्र च लक्षणाल्लक्ष्याभिमुखप्रवृत्ति र्जायते, यां लक्षणैकचक्षुष्कपद्धतिमपि वदन्ति शिक्षाशास्त्रिणः, बौद्धाचार्यजयादित्योद्भाविता[1] मन्यते विद्वद्भिः ।

कौमुदीपद्धतिः, यत्र लक्ष्यं प्रधानं भवति, लक्ष्याल्लक्षणाभिमुखं गम्यते, यत्र च रूपमालाप्रक्रियाकौमुदी । सिद्धान्तकौमुद्यादि-नागेशरचितग्रन्थान्ता ग्रन्थाः परिगण्यन्ते, यां च नव्यव्याकरणं कथयन्ति, बौद्धवैयाकरणधर्मकीर्त्ते-रुद्भावनाऽस्ति । सर्वप्रथमं तेनैव पद्धतिमिमामुद्भाव्य तयैव पद्धत्या स्वीयो "रूपावतारो" लिखितः ।

चन्द्रजयादित्यपुरुषोत्तमदेवशरणदेवाः सर्वे प्रचलितशिष्टप्रयोगाणामसंग्रहं व्याकरणदोषमजीगणन् । अत एतन्निर्मितव्याकरणे नूतननियमैः सह प्राचीनसूत्राणां नवा विवृतयोऽपि प्राप्यन्ते । इत्थमङ्गीकृतासाधुत्वा अपि बहवः शब्दाः साधवो जाताः व्याकरणं चाव्याप्तिदोषनिर्मुक्तमभवत् । यद्ययं पन्थाः परवर्त्तिभि र्वैयाकरणैरवरुद्धो नाभविष्यत् तर्हि संस्कृतभाषा विप्रकृष्टभाषा नाभविष्यत् ।

व्याकरणं न केवलं वेदानामङ्गं मुखम्वाऽपितु सकलभाषाङ्गम् इत्येव बौद्धवैयाकरणानां विचारः । तै र्व्याकरणं वेदाङ्गम् मत्वा तत्क्षेत्रं संकुचितं कर्तुनाकाम्यत । अतएव पदमञ्जर्य्यां यथा महाभाष्योक्तयो रक्षोहयोर्वेदपरक-व्याख्या दृश्यते न तथा न्यासग्रन्थे ।[2]

संक्षेपेण बौद्धवैयाकरणानां ता उपलब्धयोऽत्र दीयन्ते याभिराकृष्टोऽयं जनस्तन्महत्वोद्घाटनलोभं संवरीतु-मक्षमः शोधप्रबन्धमिमं लिखितुं सन्नद्धोऽभवत् ।

१. त्रिमुनिव्याकरणस्य परिवर्तनपरिवर्धनसंशोधनद्वारकं लघुविस्पष्टसरलीकरणम् ।

२. वार्तिकमहाभाष्यसंशोधनानां सूत्ररूपतासम्पादनेन तेषां पृथक् पृथगध्ययनजन्यक्लेशनिराकरणम् व्याकरणे संक्षेपैकरूपताऽऽकलनं च ।

३—व्याकरणरहस्यावगमायावश्यज्ञातव्यानां परिभाषा-वर्णसूत्र-गणपाठधातुपाठोणादिसूत्रोदाहरणप्रत्युदा-हरण-वृत्ति-शङ्कासमाधानानामेकत्रोपस्थापनेन व्याकरणस्य साङ्गोपाङ्गनिरूपणम् ।

४—सरलया शैल्या लोक-प्रसिद्धानां सततं प्रयुज्यमानानामुदाहरणप्रत्युदाहरणानां संकलनेन लोकभाषा-व्याकरणयो र्विद्यमानस्य घनिष्ठसम्बन्धस्य जागरणम् ।

५—काव्यशास्त्रेभ्यः समुचितानि पद्यगद्यखण्डान्युद्धृत्योदाहरणदानेन नीरसस्य व्याकरणविषयस्यापि सरसता-सम्पादनमुखेन सरुच्यध्ययनप्रयासः ।

६—बहूनामपाणिनीयप्रयोग-वर्ग-प्रवेशितानां पाणिनीयपक्षपातदूषितविवेकवैयाकरणगर्हणीयानां शब्दानां पाणिनीयीकरणम् एतत्प्रयोजनोपलब्धये तत्प्रस्तुताः सूत्राणां नवा व्याख्याः पाठकानां मनसि गवेषणाबुद्धिं प्रादु-र्भावयन्ति तत्प्रवृत्तिं च जनयन्ति ।

७—अनेकेषां ज्ञाताज्ञातानां प्रसिद्धाप्रसिद्धानां लेखकानां ग्रन्थानां च नामानि उद्धरणानि च दत्वा तेषां सम्बन्धे जिज्ञासाजागरणम् । अन्ये वैयाकरणा विना नामग्रहणमन्यदीयवस्तुग्रहणदीक्षादीक्षिता दृश्यन्ते; ते खण्डनकाले एवान्यदीयं नाम गृह्णन्ति प्रायः, तत्रापि 'यत्तु केचिदित्यादिनिगूढशब्दानेव प्रयुञ्जते । एतादृशी प्रवृत्तिरितिहाससाधनं न किंचन प्रस्तौति न वा गवेषणाबुद्धिं जागरयति । परन्तु बौद्धा वैयाकरणा यथासम्भवमधिकाधिकमन्यदीयमतं सनामग्रहणं प्रस्तुवन्ति । इदं वैलक्षण्यं तस्य महदौदार्यं सूचयति उपकरोति च शास्त्र-शास्त्रकारेतिहासलेखकान्

१. विलोक्यताम्—काशिकाकारौ जयादित्यवामनाविति प्रकरणम् पृ० ८-१३ ।

२. काशिका न्यासपदमञ्जरीसहिता पृ० १४ शब्दानुशिष्टिरस्य प्रयोजनमिति । एतच्च साक्षात् प्रयोजनम्, पारम्पर्येण वेदरक्षणादीनि प्रयोजनानि—न्यासः ।

गवेषणाकार्यसंलग्नान् विद्यार्थिनश्च समुत्कयति शोधबुद्धिविलसितान् जिज्ञासुकाँस्तत्तद्ग्रन्थान्वेषणाय, अन्वेषणानन्तरं च तन्निष्ठवस्तुतत्वपरिशीलनाय ।

८—एषां व्याकरणग्रन्थे व्याकरणदर्शनस्य परम्परागतसिद्धान्ता एव प्रतिपादिताः, बौद्धदर्शनसम्बन्धिमान्यतानामारोपः प्रायो न दृश्यते ।

९—व्याकरणं न केवलं वेदाङ्गमपि च तत् सकलशास्त्राङ्गम् ।

१०—व्याकरणे प्रसृतानामनेकविधभ्रान्तधारणानामपाकरणप्रमाणप्रस्तुतीकरणम् (यथा प्रत्याहारसूत्रं शिवसूत्रं पाणिनिसूत्रंवेति अथ शब्दानुशासनमिति वचनं महाभाष्यकृत इत्यादीनां निराकरणप्रमाणमिह दृश्यते) ।

११—इमे वैयाकरणाः पाणिनीयव्याकरणसिद्धरूपैः सहान्यव्याकरणनिष्पादितरूपाण्यपि स्वीकुर्वन्ति यथा त्र्यम्बकचूडादिरूपैः सह त्रियम्बकचूलादिरूपाण्यपीह साधितानि ।

१२—लौकिकोच्चारणमधीत्य तदनुसारेण श्रुतानां शब्दानां साधुतासम्पादनप्रयत्नोऽप्यत्र विलोक्यते यथा अफ्सरा, अप्स्सरा, अप्सरा, वाक्क्, वाक्, भवथ्सु भवत्थ्सु इत्यादयुदाहरणेन ज्ञायते ।

१३—अनन्तोऽयं शब्दसागरः । सर्वं व्याकरणं गोष्पदतुल्यं 'न तज्जलं सकलमात्मन्यन्तर्भावयितुमर्हती'त्यतो व्याकरणनियमे शिष्टप्रयोगानुसारेण विकासस्य संकोचस्य चावसरः शिष्यत एवेति मान्यताप्रस्तुतीकरणम् ।

इमास्त्रयोदश एवं विधा अन्याश्चोपलब्धयो विषयस्य महत्वं साधयन्ति ।

तथ्यन्तु त्रिकालाबाधितं भवति । किन्तु तत्तिरोहितं तिष्ठति ।[1] । तिरोहितस्य तस्योद्योतनमेव समालोचककार्यम् । अतो मया नात्र कस्याप्यसतो वस्तुनः प्रतिपादनस्यासम्भवस्य मुधा चेष्टा कृता, किन्त्वाचार्यग्रन्थस्थितैरैव प्रमाणैस्तत्र निहितान्येव तत्वानि प्रकटीकृतानि । यथा कश्चिद् गृहसेवको गृहस्वामिन एव, गृहे पूर्वतो विद्यमानमेव दीपमुद्दृयोत्य गृहस्थितान् गृहस्वामिन एव पदार्थान् दर्शयति तथाऽहमपि विद्यमानमेव रहस्यं तत्रैव विद्यमानै विद्यमानमूलैर्वा प्रमाणैः प्रकाशयितुं प्रायतिषि । केवलं प्रमाणोद्योतनं तथाऽकार्षम् यथा प्रकाशमयूखास्तत्थ्ये निपत्य तदुद्योतयेयुः । छायातपौ मिलितौ मिथोऽधिकं रोचयतः । अतोऽत्र मया सा तुलनात्मकरीतिरङ्गीकृता, यत्र समविपरीतस्वभावौ प्रतिपाद्यौ सहागत्यान्योन्यमधिकाधिकमुद्भासयतः ।

चन्द्राचार्येण वृत्तौ क्वापि स्वकृतस्य त्रिमुनिनियमपरिवर्तनसंशोधनादेः कारणसंकेतो दत्तः, क्वापि च विना कारणाख्यानं संशोधितस्वरूपमेव निरूपितम् । मया पुनः सर्वत्र कारणं स्पष्टयितुं प्रयतितम् ।

इत्थमत्र मया यानि रहस्यानि दृष्टानि तानि सन्तिः—

१—न किमप्येकं व्याकरणं पूर्णं, सर्वं मिलित्वैव तत् व्यापकस्य (ब्रह्मणः) शब्दस्य यथाकथञ्चिद् ज्ञापकं भवितुमर्हति । अतः इदमेव व्याकरणं **वेदाङ्गम्**[2] एतदेव साम्प्रतमुपास्य[3] मित्यादिसंकुचितविचारं विहाय गुणग्रहणधिया रागद्वेषरहितनिर्मलेन मानसेन च सर्वेषां पिपठिषा विधेया ।

---

१. हिरण्मयेन पात्रेण सत्यस्या पिहितं मुखम् (ईशोपनिषद् मं० १५) ।

२. शब्देन्दुशेखरे अस्यैव वेदाङ्गत्वम् इति संज्ञाप्रकरणे (पृ० ६) नागेशः ।

३. मुनित्रयमतेनैवेदानीं साध्वसाधुविभागः तस्यैवेदानींतनशिष्टै र्वेदाङ्गतया परिगृहीतत्वात् दृश्यन्ते हि नियतकालाः स्मृतयः । यथा कलौ पाराशरी स्मृतिरिति शब्दकौस्तु० १।१।२७ ।

२—अइउण् इत्यादिप्रत्याहारसूत्राणि न शिवसूत्राणि नवा पाणिनिकृतानीमानि ।

३—चान्द्रव्याकरणे वृत्तिग्रन्थोद्धरणेनानुमिता स्वरवैदिकप्रकरणसत्ता **चान्द्रपञ्जिका**ध्ययनेन तत्र मिलित-सूत्रकलेवरोद्धरणेन च निश्चयप्रचीकृता ।

४—साम्प्रतम् पाठ्यमानानां संस्कृतव्याकरणानां प्रत्यक्षरं बौद्धवैयाकरणानां कृतयोऽन्तःसमाविष्टाः विद्यन्ते ।

५—व्याकरणं सरलं सरुच्यध्येतव्यं चास्त्वितीष्यते चेत्किमपि बौद्धवैयाकरणनिर्मितव्याकरणपुस्तक-मन्यद्वा तदाधारेण संकलितं तथाविधं पुस्तकं पाठ्यपुस्तकायितमस्तु ।

इतीदृशानि बहूनि नवनवानि तत्वानि यथास्थानमिह प्रतिपादितानि स्वयं दृष्टिगोचराणि भविष्यन्तीत्यलं पिष्टपेषणव्यापारेण ।

शोधप्रबन्धोऽयं भागद्वयं बिभर्त्ति । प्रथमे-भागे बौद्धवैयाकरणानां तद्रचनानां च सामान्यपरिचयो दत्तः । इत्थमत्र भागे चन्द्राचार्यादयो नव बौद्धवैयाकरणाश्चर्चिताः ।

भागोऽयं बौद्धवैयाकरणकार्याणां शब्दचित्रं समक्षयति तत्र सर्वत्र चन्द्रगोमिप्रभावं च ज्ञापयति । चान्द्र-व्याकरणस्य भावनायाः पद्धत्याश्च तारतम्यावधारणाय भागोऽयं किमपि महत्वमावहति । भागेनानेनाधीतेनैव तद्बौद्ध-वैयाकरणहृदयं ज्ञातुं शक्यते यत्र च प्राणा इव चान्द्रव्याकरणमर्माणि स्पदन्ते । इत्थमनेन भागेन बौद्धवैयाकरणानां संस्कृतव्याकरणं प्रति कृतस्य योगदानस्य संक्षिप्तं चित्रणं प्रस्तूय **द्वितीये भागे** विशेषेण निरूपणीये चान्द्रव्याकरणं तद्वृत्तिश्च समीक्षिते ।

त आचार्या वन्दनीया येषां ग्रन्थाध्ययनमननाभ्यामुपलब्धेन ज्ञानोपादानेन ममेदं विचारजगन्निर्मितम् । ज्ञानाञ्जनशलाकयाऽज्ञानतिमिरान्धस्य मम नयनोन्मीलकाः **श्री मुरलीधर झा** महानुभावा गुरुवरा विद्वांसो, गुणै-र्गरीयांसो महीयांसो महनीयचरितैः स्तपःस्वाध्यायनिरताः सविनयं प्रणम्यन्ते । ततः परं येषां परामर्शप्रकाशेन सर्व-मिदमुद्योतितन्तेऽकारणकारुणिका विद्वत्तल्लजा **डा० रामचन्द्रपाण्डेयमहोदया** वस्तुतत्त्वसूक्ष्मदर्शिनो भारतीयपाश्चात्यो-भयविधसमीक्षाविचक्षणा बौद्धदर्शनविभागाध्यक्षाः दिल्लीविश्वविद्यालयस्य साम्प्रतं दर्शनविभागप्रमुखाः कलासंकाय-प्रधानाधिकारिणः (The Deam of Arts Faculty) सप्रश्रयं भूयोभूयोऽभिवाद्याः । प्रतिसप्ताहं शोधपरिषदा-योजकाः तत्र च माद्दशान् शोधच्छात्रानाकार्य तेषु शोधस्य बुद्धिं प्रवृत्तिमुत्साहञ्च प्रबलयन्तश्छात्राणां सौविध्याय-सर्वदा सर्वथा च सन्नद्धाः सरलमृदुव्यवहारा बौद्धदर्शनविभागप्रवाचकाः **श्री केवलकृष्णमित्तल**महाभागा अन्ये च तस्यां परिषदि समुपस्थापितस्वीयविचारा विद्वांसः सादरभरं मे धन्यवाद्याः ।

डा० रामकरणशर्ममहोदयानां परम्परीणपरोवरीणविद्यानिष्णातानां शास्त्रचर्चाव्यसनिनां कामेश्वरसिंह-दरभंगासंस्कृतविश्वविद्यालयस्योपकुलपतीनां राष्ट्रियसंस्कृतसंस्थानस्य तात्कालिकनिदेशकानामहमतिकृतज्ञोऽस्मि, यैरधीतशोधप्रबन्धैरत्र यथास्थानं समुचितसंशोधनसम्मत्या तदनन्तरं च प्रकाशनसंस्तुत्या जनोऽयमतितरामुपकृतः । संस्कृतसंस्थानस्य साम्प्रतिकानां निदेशकानां श्री **प्रभातचन्द्र** शर्मणां कृतानुग्रहाय कृतज्ञतोरीक्रियते ।

सदा सर्वदा च संस्कृतप्रचारप्रसाराय कृतक्रियमाणभगीरथप्रयत्नो मण्डनमिश्रायमाणाः डा० मण्डन मिश्र-महोदयाः श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठस्य प्राचार्यपदमलङ्कुर्वन्तो मे सर्वविधसमृद्धेः प्रतिकरणं वर्तमाना स्तदर्थाय च सर्वतोभावेन यतमानाः शतशो धन्यवाद्याः, येषां प्रेरणया कार्यमिदं प्रारब्धं प्रकाशनञ्चास्य यदीयसहयोगेन पूर्णतामुपेतम् ।

स्वर्गीय **धीरानन्दमिश्रस्य** मित्रवर्यस्य पाण्डुलेखाध्ययनकृतसाहाय्योपकारः सदा स्मरणीयः ।

महामहोपाध्यायपरमेश्वरानन्दशास्त्रिणाममूल्यैर्विचारैस्तैस्तैरुपकृतेन मया साम्प्रतं दिवंगता अपिते सादरमभिवन्दनीयाः। दिल्लीविद्यापीठस्य भूतपूर्वप्राचार्यान् **डा० पुष्पेन्द्रकुमारशर्मणः** प्रदत्तप्रकाशनादेशान् धन्यान् वदता मयास्मिंश्चर्चितोद्धृतग्रन्थकारेभ्यो यथाकथञ्चिदपि कृतसहयोगेभ्यः सर्वेभ्यो विद्वद्वरेभ्यो धन्यवादा उदीर्यन्ते। येषां सौजन्येन चान्द्रपञ्जिका प्राप्ता, ते पटनास्थजायसवाल शोधसंस्थानाधिकारिणोऽपि भूयोभूयस्तुत्याः। अस्य विद्यापीठस्य शोधविभागप्रवाचकाः **डा० रुद्रदेवत्रिपाठिनो** दत्तयथावसरसहयोगा भृशं धन्यवादार्हाः। शोधप्रबन्धस्य टङ्कनकार्याय श्री **सतीशकीलावत**महोदयाः प्रकाशनाय श्यामप्रिण्टिङ्गएजेंसीमुद्रणालयाधिकारिणश्च भूरि भूरि प्रशस्याः। प्रकाशनव्ययं वहन्तो विद्यापीठस्य संस्थानस्य च प्रकाशनविभागास्तदीयाधिकारिणश्च शतशः स्तवनीयाः।

श्रीमतां देवनन्दनप्रसादयादवमहाभागानां केन्द्रीयसर्वकारशिक्षोपमन्त्रिणां राष्ट्रियसंस्कृतसंस्थानस्य शासिपरिषदोऽध्यक्षपदमलंकुर्वाणानां प्रस्तावनालेखनानुग्रहाय हृदा कृतज्ञताङ्गीक्रियते।

भ्रान्तयो मानवस्वभावसिद्धाः। मुद्रणदोषादज्ञानात् प्रमादात् सीमितज्ञानादिदोषाद्वाऽऽगतानां भ्रान्तीनां परिहाराय करबद्धक्षमाप्रार्थनातो नान्यन्मे शरणम् शुभमिति।

—हर्षनाथ मिश्रः

विषय-सूची

१. प्रस्तावना	(v)
२. प्रकाशकीयम्	(vii—viii)
३. भूमिका	(ix—xvi)
४. प्रथमो भागः	(१—९०)
(क) चन्द्रगोमिपरिचयः	१—७
(ख) काशिकाकारौ—जयादित्यवामनौ	८—१५
(ग) बौद्धवैयाकरणो विमलमतिस्तस्य कृति र्भागवृत्तिश्च	१६—२१
(घ) न्यासकारो जिनेन्द्रबुद्धिः	२२—२७
(ङ) वामनः—लिङ्गानुशासनस्य कर्ता	२८—३४
(च) मैत्रेयरक्षितः	३५
(छ) पुरुषोत्तमदेवः	३६-४६
(ज) बौद्धोवैयाकरणः शरणदेवस्तस्य दुर्घटवृत्तिश्च	४७—७०
(झ) धर्मकीर्त्तेरूपावतार—नव्यव्याकरणस्य प्रथमो ग्रन्थः	७१—९०
५. द्वितीयोभागः	(९१—२६९)
प्रथमोध्यायः—चन्द्रोपज्ञमसंज्ञकं व्याकरणम्	९३—११२
द्वितीयोध्यायः—लाघवम्	११३—१३४
तृतीयोऽध्यायः—विस्पष्टता	१३५—१४०
चतुर्थोध्यायः	(१४१—१९५)
(क) वृत्तिरपि चन्द्रस्य	१४१—१४७
(ख) चान्द्रव्याकरणे स्वरवैदिकाध्यायौ याविदानीं न प्राप्येते	१४८—१५७
(ग) चान्द्रवर्णसूत्राणि	१५८—१६८
(घ) चान्द्रपरिभाषासूत्राणि	१६५—१७३
(ङ) चान्द्रोणादिसूत्राणि	१७४—१८३
(च) चान्द्रधातुसूत्राणि	१८४—१९०
(छ) चान्द्रव्याकरणे गणपाठः	१९१—१९५
पञ्चमोऽध्यायः—पाणिनीयसूत्रेषु दोषाः	१९६—२०५
षष्ठोऽध्यायः—चान्द्रव्याकरणे दोषाः	२०६—२१५

सप्तमोऽध्यायः—वैमत्यम् २१३—२२७
अष्टमोऽध्यायः—प्रत्याहारे भ्रान्तितमिस्रानाशनदक्षश्चन्द्राचार्यः २२८—२४२
नवमोऽध्यायः चान्द्रव्याकरणस्य नूतनानि सूत्राणि २४३—२५७
दशमोऽध्यायः—चान्द्रवृत्तेष्टीका—चान्द्रपञ्जिका—किं किं दधते २५८—२६७
एकादशोऽध्यायः—उपसंहारः २६८—२६९
६. उद्धृतानां मुख्यग्रन्थानां सूची २७०—२७२
७. उद्धृतपाण्डुलिपि (Manuscript) पत्रचित्रपरिशिष्टम् । २७३

प्रथमोभागः

चन्द्रगोमिपरिचयः

व्याकरणस्य पाणिनीयादितरसम्प्रदायाः

व्याकरणशास्त्रस्यापणिनीयपरम्परायां बहवः सम्प्रादायाः प्रादुर्भूताः । तेषु सम्प्रदायेषु—

(क) चान्द्रसम्प्रदायः
(ख) जैनेन्द्रसम्प्रदायः
(ग) शाकटायनसम्प्रदायः
(घ) हैमसम्प्रदायः
(च) कातन्त्रसम्प्रदायः
(छ) सारस्वतसम्प्रदायः
(ज) बोपदेवसम्प्रदायः
(झ) क्रमदीश्वरसम्प्रदायः
(ट) सौपद्मसम्प्रदायः

इतीमे साम्प्रतमपि जीवन्ति । एषु सम्प्रदायेषु मुख्यतमस्य चान्द्रसम्प्रदायस्य प्रवर्तकः चन्द्रगोम्याचार्यः ।

चन्द्रगोमिपरिचयः—

चन्द्रगोमिवंशविषये न किमपि स्पष्टं ज्ञानमस्ति । तथापि स तस्यैवान्वयस्य प्ररोहः यस्य प्ररोहः श्रीरक्रिलगोमी काव्यालङ्कारस्य कर्तुर्भामहस्य पिता ऽऽसी[1]दिति संभाव्यते ।

आचार्यश्चन्द्रगोमी सर्वतोमुखप्रतिभासम्पन्नः विद्वानासीत् । सोऽयं संस्कृतसाहित्यनिधिं स्वरचितैरनेकैर्ग्रन्थरत्नैः संवर्धयामास । एकतस्त्वनेन नीरससंस्कृतव्याकरणमधिकृत्य लघुः किन्तु विस्पष्ट अथ च सम्पूर्णो ग्रन्थमणी रचितः यस्यानुकारेण जयादित्यवामनौ विख्यातौ जातौ, अन्यतश्च सरसं मनोहारि काव्यं नाटकं च लिलेख । संस्कृतसाहित्याध्येतारस्तस्य यथा महावैयाकरणस्वरूपेण परिचितास्तथा न तस्य कव्यात्मना । त्रिमुनिव्याकरणे सत्यपि चन्द्रगोमिना तस्मिन् विषये किमपि नवं नवरीत्या च वक्तुमावश्यकतामन्वभूयत । परम्परामतिक्रम्य गत्वरस्य तस्यायं पदक्रमः साहसपूर्ण एवासीत् । व्याकरणजगति तेन नूतनानां नियमानां नवानां भव्यसरलपद्धतीनां नवीनानां शब्दरूपाणां नवनवानां प्रयोगाणांच निर्वाणं चक्रे । एतेनैव चान्द्रव्याकरणनामा नूतनः सम्प्रदायः प्रादुरभवत् । पाणिनिनियोमेनासिद्धाः कात्यायनपतञ्जलिभ्यामदृष्टाश्च शब्दाश्चन्द्रगोमिना निष्पादिता इति गुणज्ञैः संस्कृतज्ञैस्तत्कृतज्ञैर्भूयते ।[2]

'गोमिन्' इति बुद्धशिष्येष्वन्यतमस्य नामासीत्[3] गोमिनूशब्दश्चन्द्राचार्येण पूज्यार्थे निपातितः ।[4] पाणिनिनाऽपि शब्दोऽयं निपातनेन निष्पादितः किन्तु मत्वर्थे[5] । एतेन 'गोमिन्' वंशस्य बौद्धमतावलम्बिनोपत्यं चन्द्राचार्य इति सिद्धयति । अस्य वंशस्य सत्ता कश्मीरेऽवर्तत । अतोऽयं जन्मना काश्मीरमलंचकारेति' तर्क्यते ।

---

१. अवलोक्य मतानि सत्कवीनामवगम्य स्वधिया च काव्यलक्ष्म ।
सुजनावगमाय मामहेन ग्रथितं रक्रिलगोमिसूनुनेदम् ॥ काव्यालङ्कारः ६।६४ ।
२. सं० साहित्य का संक्षिप्त इतिहास । (गैरोला) पृ० ३४१ ।
३. भारतीय साहित्य शास्त्रे १४३ तमे पृष्ठे बलदेव उपाध्यायः ।
४. गोमिन् पूज्ये चा० ४।२।१४४ ।
५. ज्योत्स्नातमिस्राशृङ्गिणोर्जस्वलगोमिनमलिनमलीमसाः (पा० ५।२।११४) ।

चान्द्रचार्योऽयं बौद्धः । अत्र प्रमाणानि—

(१) चान्द्रव्याकरणस्य प्रारम्भे स मंगलश्लोके बुद्धं नमति-तथाहि—

"सिद्धं प्रणम्य सर्वज्ञं सर्वीयं जगतो गुरुम् ।
लघु विस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम्" ॥

"सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ॥१।१।१३ इत्यमरकोशे सर्वज्ञशब्दो बुद्धार्थे योगरूढः । सर्वेभ्यो हितं सर्वीम् इति सर्वण्णो वा (चा० ४।१।१३) सूत्रेण सिद्धं सर्वीयमिति पदमपि बुद्धमेव विशिनष्टि । तस्यैव देवस्य सकलप्राणिहितकरत्वात् पशुहिंसानिषेधकत्वात् । सर्वज्ञो यद्यपि शिवोऽपि कथ्यते तथापि सर्वज्ञशब्दः प्रकरणादिं बिना यथा बुद्धस्य बोधकस्तथा न शिवस्य ।

(२) चान्द्रवर्णसूत्रप्रारम्भे 'नमो मञ्जुघोषाय' इति 'नमो मृत्युजिते इति च बुद्धमेव प्रत्याययति । चान्द्र-धातु-पाठारम्भोक्तेन 'नमो बुद्धाय' इत्यनेन सह तदैव सामञ्जस्यं जायेत ।

(३) चान्द्रोणादिसूत्रस्य प्रारम्भे 'नमो मञ्जुघोषाय' समाप्तौ च 'शुभमस्तु सर्वजगताम्' इति वाक्यद्वयप्रतिपादित व्यापकं हितं सर्वजनहितकरवचनं च तथागतमेव स्मारयति ।

(४) चान्द्रधातुपाठस्य प्रारम्भे 'नमो बुद्धाय' इति नमस्कारवचने स्पष्टतया बुद्धो नतः ।

(५) चान्द्रधातुपाठे प्रथमगणस्य भूवा[1]दीति नामाऽपि तस्य तत्परम्परासम्बन्धित्वं साधयति यया किल जिनेन्द्रबुद्धिः पुरुषोत्तमदेवश्च सम्बद्धौ । बौद्धैरेव प्रथमगणस्य भूवादीति यण् व्यवहितं नाम चक्रे । स्वीचक्रे 'इकां यण् भिः व्यवधानं व्याडिगालवयोरिति वचनम् पुरुषोत्तमदेवेन इकोयणचि (पा० ६।१।७७) इति सूत्रस्य भाषावृत्तौ ।

(६) अस्थिदधिसक्थ्यक्ष्णामनङ्० (चा० ५।४।३१) इत्यत्र भाषायाम् उदात्तस्योपेक्षासूचक उदात्तपदाभावोऽपि तस्य **बौद्धत्वं** द्योतयति ।

(७) उदाहरणेषु बौद्धं सिद्धान्तं प्रति दर्शिता श्रद्धा तस्य बौद्धत्वं प्रतिपादयतिः—यथा ।

(क) चार्वी बुद्धिस्तत्सम्बन्धादाचार्योऽपि चार्वी । स लोकयते पदार्थान्नियते गमयति उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रतिपादयति । ते युक्तिभिः स्थाप्यमानाः संमानिताः पूजिता भवन्ति । (अत्र लोकायतं प्रति श्रद्धा) लोकायतशब्दस्य बौद्धानुयायिपर्यायत्वेनामरकोशे प्रतिपादनं दृश्यते ।[2]

(ख) चान्द्रसूत्रस्य[3] वृत्तौ लिखिते—

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
मारजिद् भगवान् बुद्धः अस्माकं कुलनन्दनः ॥ इति श्लोके कुलदेवतात्वेन बुद्धस्योल्लेखः, तस्य बौद्धत्वसाधने प्रबलं प्रमाणम् ।

(ग) अवाते निर्वाणः (चा० ६।३।८६) सूत्रस्योदाहरणं निर्वाणो भिक्षुरिति दर्शयति तस्य भिक्षुनिर्वाणे आस्थाम् । भिक्षुनिर्वाणश्च बौद्धसम्प्रदायस्य महत्त्वपूर्णा मान्यता । अन्यथा निर्वाणो दीप इतीदृशं लोकप्रत्यक्षोदाहरणमेव दद्यात् ।

---

१. भूवादिधातोर्नियमान्नुम् भविष्यति (चा० सू० ५।४।२५ वृत्तौ । धातुपाठे प्रथमगणस्य नाम भूवादीति दृश्यते । (चा० धातुपाठ प्रथमगणान्ते भूवादीति दृश्यते) (चा० धातुपाठ प्रथमगणान्ते भूवादित्वान्न दीर्घत्वम् (चा० १।८८) ।

२. अमरकोशः (प्रभाटीका) २।७।७ ।

३. चा० ६।३।१६ ।

(घ) जेर्नुक् च (चा० उ० सू० १।९५) इति सूत्रस्योदाहरणं 'जिनः भगवान् बुद्धः' इति बुद्धं प्रत्यास्थां द्योतयति । भाषावृत्तिकारेण पुरुषोत्तमदेवेन पृषोदरादीनि यथोपदिष्टम् (भा० वृ० ६।३।१०९) सूत्रेण जितमेनोऽनेन इति जिन इति ग्रन्थः सम्वदते । पूर्वोक्तोदाहरणे जैनाचार्यभ्रमनिरासाय प्रयुक्तं भगवान् बुद्ध इति पदं चन्द्रस्य बुद्धं प्रति भक्तिविशेषं प्रकटीकरोति ।

(ङ) 'तारा भगवती' इत्यपि तारेः अन् (चा० उ० १।९४) सूत्रोदाहरणं बौद्धधर्मप्राप्तस्थानविशेषां तारां प्रति सम्मानविशेषं दर्शयति ।

(च) रसरुचिरुवृत्रः युच् (चा० उ० २।६७) इति सूत्रोदाहरणेषु चतुर्थमुदाहरणं 'वरणा नदी' ति वर्तते । नदीयं स्वल्पा, हिन्दूधर्मे न तथा प्राप्तस्थाना यथा बौद्धधर्मे । सारनाथोऽस्या एव कच्छे उषितः । बुद्धस्य प्रथमोपदेश-स्याधिकरणीभूतत्वादियं नदी सारनाथवदाद्रियते बौद्धैः । चन्द्रेणापि स्वोणादिसूत्रेऽस्या नद्या व्युत्पत्तिप्रदर्शनात् इमां प्रति नितरां सम्मानं प्रकटीकुर्वता स्वस्य बौद्धत्वं साधितम् ।

(छ) 'शिवादयः' (चा० उ० २।९२) इत्यनेन साधितस्य शिवस्य 'शिवं शान्तम्' इत्यत्र शान्तार्थप्रतिपाद-नात् शान्तिं निर्वाणं प्रति परमास्थाप्रदर्शनात् । शान्तिशब्दस्य निर्वाणवाचित्वमश्वघोषेण प्रतिपादितम्[1] ।

तत्राप्ययं **'महायानस्यानुयायीति'** पृषिवृषिमहेः शतृः (चा० उ० ३।७७) इति सूत्रोदाहरणे महत्-महायानम्-महान्-उत्तम इत्युदाहरणद्वयादवगम्यते । महच्छब्देन महायानस्य प्रतिपादनात्, तन्मतेन तत्र कोऽपि महत्वविशेषः सकेतितः । अन्यथा महत्पदेन सांख्यस्य महत्तत्वस्य प्रतिपादनमपि भवति । अग्रे च महान् उत्तम इति कथनाज्ज्ञायते यन्महायानं हि महत्, तस्योत्तमत्वात् ।

अयं महायानस्य योगाचारशाखाया वरिष्ठविदुष आचार्यस्थिरमतेश्च शिष्य इति प्रसिद्धम् । श्रूयते 'महा-यानसम्प्रदायस्य माध्यमिकदर्शनशाखाया विद्वत्तल्लजेन नालान्दामहाविहारस्याचार्येण चन्द्रकीर्तिना सह चन्द्रगोमिनो गभीरः शास्त्रार्थसंरम्भोऽभवदिति ।[2]

देशः—

केचितु 'अयं बङ्गप्रान्तीयः, वकारान्तबकारान्तयोः शब्दयोरुणादिसूत्रत्रिपाद्यां पृथक् पृथक् स्थापनीययोः संमि-श्रणपूर्वकस्थापनात् । चन्द्राचार्येण उणादिसूत्रत्रिपाद्या रचना तथा कृता यथा कान्तखान्त-गान्तेतिक्रमेण तत्तद्वर्णान्ताः शब्दा निष्पन्ना भवेयुः । तत्र २।८७ इत्यङ्काङ्कितेन सूत्रेण पकारान्तशब्दानां सिद्धिं प्रदर्श्य २।८८ अङ्काङ्कितेन सूत्रेण रेफशब्दस्य फान्तस्य २।८९ अङ्कमितेन सूत्रेण गुल्फशब्दस्य फान्तस्य च निष्पत्तिं प्रदर्श्य २।८०,२।९१,९२ सूत्रैः अन्तःस्थवान्तानां गर्वशर्वाश्वलट्वाकण्वखट्वाविश्वशिवसर्वब्दानां सिद्धया सह उल्बशुल्ब-निम्ब-शम्ब-स्तम्बशब्दानां सिद्धिं दर्शयित्वा पुनर्जिह्वाग्रीवाशब्दयोरन्तस्थवकारान्तयोः सिद्धिर्दर्शिता । एतेन तद्दृष्ट्या ब्कार-बकारयो र्न कश्चनोच्चारणभेद इति सिद्धयति । बवयोस्तादृशोच्चारणाभेदो बङ्गे एव दृश्यते । अतः सिद्धम् चन्द्राचार्यस्य बङ्गीयत्वम् ।

बङ्गप्रान्ते चास्य व्याकरणस्य द्वित्रशतवर्षाणि यावल्लोकप्रियत्वमपि चन्द्राचार्यस्य तत्कर्तुर्बङ्गप्रान्तांङ्कुरत्व प्रथयतीत्याहु स्तन्न युक्तियुक्तम् ।

---

१. **दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।**
दिशं न कांचिद् विदिशं न कांचित् स्नेहक्षयात् केवलमेति शान्तिम् ॥
तथा कृती निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न कांचिद् विदिशं न कांचित् क्लेशक्षयात् केवलमेति शान्तिम् ॥
सौन्दरानन्द स० १६, श्लो० २८-२९ ।

२. सं० सा० का संक्षिप्त इति० गैरेला पृ० ३४१ ।

वर्णसूत्रे बकारवकारयोः स्थानभेदस्य चन्द्राचार्येण स्वयं प्रतिपादनात्। प्राचीनकाले प्रायः सकलप्रान्तीयाः पण्डिता यजयोः शषयो र्बवयोश्चोच्चारणं समं कुर्वन्ति स्म। अधुनाऽपि प्राचीनाः पण्डिता बकारवकारयो र्विशिष्टे उच्चारणे लेखे च मन्दादराः प्रमाद्यन्ति। मिथिलायामपि पण्डितानामुच्चारणे लेखे च बकारवकारयोः किमपि वैशिष्ट्यं न दृश्यते। वबयोः श्लेषेऽभेदस्वीकृतिकारणमपीदमेव प्राक्कालिकोच्चारणविशेषमन्दादरः। प्राचीनहस्तलेखानामतितरां प्राचीनानां मुद्रितानां संस्कृतपुस्तकानामध्येतारो जानन्ति यत् तत्कालेऽनयोरुच्चारण सर्वत्र समानदूषणपूर्णमेवासीत्। अतएव 'विहारः' बिहारो जातः, सर्वशब्दः पश्चिमहिन्द्यामपि 'सब' इत्येवंरूपेण परिवर्तितः। वार्ताशब्दस्य 'बात' इत्याकारके परिवर्तने कारण वकारस्य 'ब'कारोच्चारण मेव दृश्यते। 'बात' शब्दश्चाद्य वार्तार्थे पश्चिमहिन्द्यामपि प्रयुज्यते। 'ब्रज' शब्दोऽपि 'ब्रज' भाषायाम् ब्रजरूपतां धत्ते स्म। इत्थमिदं ज्ञायते वबयोरुच्चारणमन्दादरत्वं प्राक्काले समानो व्याधिः।

चान्द्रव्याकरणस्य बङ्गे प्रचाराधिक्यात्तत्कर्तुर्बङ्गीयत्वमितिकथनमपि न नितरां प्रभावोत्पादकम्, अतिपरिचयादवज्ञैव जायते, दीपकस्याधस्तादन्धकार एव भवतीति को न जानाति ? अतएव न कोऽपि विद्वान् तद्रचना वा गृहे स्वप्रान्ते तत्प्रान्ते वा तथाऽऽदर प्राप्नोति यथान्यस्मिन् प्रान्ते। गोस्वामी तुलसीदासस्तत्थ्यमिदमनुभवन्नुवाच दोहावल्याम् :—

यत्र जन्म, न गन्तव्यं तुलसीस्तत्र कदापि
गुणमज्ञात्वा प्रोच्यते पूर्वं नाम सदापि।[1]

किंच बङ्गे प्रचार इत्यस्य जनश्रुतिमात्रं प्रमाणम्। दक्षिणे प्रचार इत्यस्य प्रमाणन्तु मल्लिनाथस्य मेघदूत[2] व्याख्यायाम् 'विश्राम' शब्दस्य साधनायोद्धृतचान्द्रव्याकरणसूत्रम्। बङ्गप्रान्ते नास्य कोऽप्येकोऽपि हस्तलेखः समुपलब्ध इत्यपि बाधते चन्द्रगोमिनं बङ्गीयम् स्वीकर्तुम्।

मन्मते तु चन्द्राचार्योऽयं कश्मीरप्रान्तीयः। तत्र 'गोमिन्' वंशस्य सत्तायाः प्रमाणसिद्धत्वात्। भामहस्य पिता रक्रिलगोमीति काव्यालङ्कारोपसंहारश्लोकेन सिद्धयतीत्यतीनुपदमेवोक्तत्वात्। चान्द्रव्याकरणस्योदाहरणेषु कश्मीरस्य क्रियासमभिहारेण भावुकताविशेषेण च सह स्मरणं दृश्यते। तथाहि—

(१) **स्मरसि देवदत्त कश्मीरेषु वत्स्यामः ? (१।२।७८)**
स्मरसि देवदत्त यत् कश्मीरेष्ववसाम ? (१।२।७९)
स्मरसि देववत्त यत् कश्मीरेषु वत्स्याम यत् तत्रौ
दनं भोक्ष्यामहे (अन्यानि चात्रोदाहरणानि सन्ति) १।२।८०
स्मरसि देवदत्त इति ह कश्मीरेष्ववसाम, कश्मीरेषु शश्वदवसामेति १।२।८०

यद्यपि अभिजानासि देवदत्त कलिङ्गेषु वत्स्याम इत्यप्युदाहरणं प्राप्यते (१।२।७८) परन्तु तदेकमुदाहरणम् अत्यन्तापह्नवे दत्तेन 'कः कलिंगं जगाम' इत्युदाहरणेन कलिङ्गनिवाससंकेतस्य बाधितत्वान्न मदुक्तविपरीतार्थप्रत्यायनसमर्थम्।

---

१. **तुलसी तहां न जाइये जहां जन्म-अस्थान।**
गुण अवगुण जाने नहीं धरे पछिला नाम॥ (दोहावली)

२. मेघदूतम् (पूर्वमेघः) "नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोः" श्लो० २६ "विश्रामेत्यत्र नोदात्तोपदेशस्य मान्तस्यानाचमेः (७।३।३४) इति पाणिनीये वृद्धिप्रतिषेधेऽपि "विश्रमो वा" इति चन्द्रव्याकरणे विकल्पेन वृद्धिविधानाद्रूपसिद्धि—मल्लिनाथटीका। अत्रत्यविचारविस्तरः चान्द्रव्या० स्थ नूतनानि सूत्राणीति प्रकरणे द्रष्टव्यः।

(२) परोक्षे लिट् (चास्योदाहरणं दृश्यते —'अजयत् जर्तो हूणान्' अत्र या जर्तनामधेया वीरजातिः स्मृता, सा सीमाप्रान्ते कश्मीरनिकटे वा वसति स्म। तातपलितजर्त-सूरताः (चा० उ०, सू० १।५२) इत्यत्र चन्द्राचार्येण स्वयं लिखितम् 'जर्तः दीर्घरोमा इति।' जर्त शब्दसाधनात् तस्य वैशिष्ट्यस्य दीर्घरोमत्वस्य चोल्लेखात् चन्द्रस्य जर्तेन सह परिचयविशेषो द्योत्यते। हिन्दी विश्वकोषमधीयता मयैकत्राधीतम् :—

चन्द्रपुरानगरं गोमोनगरं च बिहारप्रान्तस्य हजारीबागमण्डले निकटनिकटं वर्तते। अनयो र्नगरयोः समीपावस्थानं चन्द्रगोमिन आभ्यां नगराभ्यां कोऽपि सम्बन्ध आसीन्नवेति प्रश्नमुत्थापयति ? भारतेऽनेके ग्रामाश्चन्द्रपुरा नाम्ना उच्यन्ते। 'चन्द्रपुरा' नगरस्य प्रसिद्धया वाचस्पत्ये प्राप्तेनाऽऽस्पदेन किमपि वैशिष्ट्यमस्तीति नापलपितुं शक्यते। तत्रापि 'गोमो' नगरस्य समीपस्थित्याऽनुमीयते यदाभ्यां 'चन्द्रगोमिन' आसीत्कश्चिन्निकटतरः सम्बन्धः। स सम्बन्धः कीदृश इति नास्ति निश्चयः। (क) एतेन नास्य काश्मीरजन्मस्थानाभावः सिद्धयति।

(३) चन्द्राचार्यः काश्मीराधिपतेरभिमन्योराज्ञया परिभ्रष्टस्य लुप्तपठनपाठनस्य व्याकरणमहाभाष्यस्य पातञ्जलस्य प्रचारं कृतवानिति राजतरङ्गिण्याः श्लोकेन—

चन्द्राचार्यादिभि र्लब्ध्वाऽऽदेशं तस्मात्तदागमम्।
प्रवर्तितं महाभाष्यं स्वं च व्याकरणं कृतम्[1] ॥

इत्यनेनापि तस्य कश्मीरदेशस्थत्वं प्रतीयते। नहि कश्मीरमहीपतिरभिमन्युस्तदानीं दूरभाषणयन्त्रादिरहिते काले कश्मीरातिरिक्तप्रान्तस्थं चन्द्राचार्यं महाभाष्य-प्रचाराय तथाकथितमादेशमादेष्टुमर्हः। अत आदेशकाऽऽदेष्टृव्ययोः समानाधिकरण्येन भाव्यम्।

कालः—

कल्हणस्य लेखानुसारेण चन्द्राचार्यः कश्मीराधिपतेराज्ञया विलुप्तप्रायस्य पातञ्जलमहाभाष्यस्य पुनरुद्धारक इति सिद्धयति[2]। अभिमन्योः कालः खिस्तस्यपञ्चमीशताब्दीति पाश्चात्यैः समालोचकै र्निर्णीतप्रायमेव। वासुदेवशरण अग्रवालमहाभागैरपि एष एव कालः पञ्चमी शताब्दीरूपो निर्धारितश्चन्द्राचार्यस्य[3]।

भर्तृहरिणाऽपि लिख्यते:—

व्याकरणाध्येतृषु ग्रन्थविस्तारभीतेषु आलस्यग्रस्तेषु संक्षिप्ताध्ययनेनैव सन्तुष्टिमनुभवत्सु व्याडिविरचितो लक्षश्लोकात्मकः संग्रहग्रन्थः पठनपाठनाभावाल्लुप्तोऽभवत्। तदा दयालुना तीर्थदर्शिना पतञ्जलिना समस्तानां न्यायबीजानां संग्रहं विधाय महाभाष्यं विरचितम्। तन्महाभाष्यं प्रतिपाद्यगाम्भीर्यादतीवागाधं, शैलीसौष्ठवात् सरसत्वेन मनोरमत्वेन चोत्तानमिव दृश्यते। अप्रौढप्रतिभानां विदुषान्तु तत्स्वरूपस्य यथार्थज्ञानं दुष्करमेव। बैजिसौभवहर्यक्षै र्व्याकरणदर्शनस्य रहस्यमपरिज्ञाय शुष्कतर्कानुसृत्य आर्षग्रन्थाः संग्रहसमकक्षा विप्लाविताः खण्डिताश्च। इत्थं पतञ्जलिशिष्येभ्यः व्याकरणागमः परिभ्रष्टः। स केवलं दाक्षिणात्यगृहे पठनपाठनोपयोगरहितः मञ्जूषामेव भूषयति स्म।

---

१. राजतरङ्गिणी तरङ्गः—१ श्लोकः—१७६।
२. चन्द्राचार्यादिभि र्लब्ध्वा देशं तस्मात्तदागमम्। प्रवर्तितं महाभाष्यं स्वं च व्याकरणं कृतम्॥ (कल्हण राजत० तरं १—श्लोक-१७६)।
३. डा० वासुदेव श० अग्र० पाणिनि कालीन भारत वर्ष, परिशिष्ट भाग, भोगोलिक गण प्रकरण।
क. हिन्दी विश्वकोशः (भाग—४ पृ० १३६)।

चन्द्राचार्यप्रभृतयो विद्वांसो भाष्यबीजान्वेषणतत्पराः पर्वतीयात् कस्मादप्येकस्मात् गृहात् आगमं (भाष्यागमं) लब्ध्वा तस्य प्रचारं चक्रुः। मम (भर्तृहरेः) गुरुणा वसुरातेन आगम-संग्रहः कृतः।

प्रायेण संक्षेपरुचीन् अल्पविद्यापरिग्रहान्।
सम्प्राप्य वैयाकरणात् संग्रहेऽस्तमुपागते॥
कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥
अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात्।
तस्मिन्नकृतबुद्धीनां नैवावस्थितनिश्चयः॥
बैजिसौभवहयक्षैः शुष्कतर्कानुसारिभिः।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके॥
यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः
पर्वतादागमं लब्ध्वा भाष्यबीजानुसरिभिः॥
स नीतो बहुशाखात्वं चन्द्राचार्यादिभिः पुनः।
न्यायप्रस्थानमार्गांस्तानभ्यस्य स्वञ्च दर्शनम्॥
प्रणीतो गुरुणाऽस्माकमयमागमसंग्रहः[1]॥

अनेन सन्दर्भेणचन्द्राचार्यादनन्तरं वसुरातस्य तदनन्तरं च वाक्यपदीयकारस्य भर्तृहरेः कालः सिद्धो भवति। भर्तृहरिरपि स्वसमयविषये न किमपि लिलेख। अतस्तस्य समयनिर्धारणायाप्यनुमानमेव शरणम्। चीनदेशीयः पर्यटक-इत्सिंगो लिखतिः—'मम भारतसम्प्राप्तेः चत्वारिंशद्वर्षाणि प्राक् (प्रायः ६५१ तमे खिस्टाब्दे) भर्तृहरिनामकस्यैकस्य वैयाकरणस्य मृत्युरभूत्। स भारतीयव्याकरणशास्त्रस्याऽन्तिमस्य मौलिकग्रन्थस्य वाक्यपदीयस्य लेखक आसीदिति निश्चप्रचम्। मनसा विरक्तः स गृहस्थजीवनं दोलायमानेनैव मानसेन निर्वहति स्म। सप्तकृत्वस्तेन विहारसंसारौ स्वीयगतागताभ्यां परित्यक्ताङ्गीकृतौ। एकस्मिन्नवसरे बौद्धविहारे प्रवेशं कुर्वन् स स्वकीयमेकं छात्रं बहिः सुसज्जितं रथं सन्नद्धं विधाय स्थातुं समादिशत्, येन यदि तस्य दुस्साध्यं निश्चयं सांसारिकतृष्णा अधिकर्तुं प्रभवेयुस्तदा स तमारुह्य गन्तुं शक्नुयात्[2]।

इत्थं भर्तृहरे मृत्युकालः खिष्टाब्दस्य ६५१ तमोऽब्दोऽनुमितो भवति।

कशिकावृत्तौ ४।३।८८ सूत्रोदाहरणेषु वाक्यपदीयमित्युदाहरणं दृश्यते। "अधिकृत्य कृते ग्रन्थे" इत्यधिकारे शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छ (पा० ४।३।८८) इति सूत्रेण 'छ' प्रत्ययं विधाय निष्पादितस्य वाक्यपदीय-मित्यस्य ग्रन्थनामत्वे न कोऽपि सन्देहः। इत्थं भर्तृहरेर्वाक्यपदीयं काशिकावृत्तेः प्राचीनम्। काशिकावृत्तेरपि कालो न निश्चितः, तथापि विदुषां समत्याऽस्या वृत्तेरचनाकालः सप्तमखिष्टाब्दप्रथमचरणकल्प इति ज्ञायते। इत्थ काशिकावृत्तेः प्राचीनात् वाक्यपदीयात् तल्लेखकात् च प्राचीनाद् वसुराताच्च पूर्ववर्तिनश्चन्द्राचार्यस्य कालः पञ्चमशताब्द्याः प्रथमचरण इति शक्यते वक्तुम्।

---

१. वाक्यपदीयम् (का० १)।
२. इत्सिगं की भारत या० पृ० २७४।

चन्द्राचार्यस्य कृतयः:—

१—चान्द्रव्याकरणम् । २—चान्द्रवर्णसूत्राणि ।
३—चान्द्रपरिभाषासूत्राणि । ४—चान्द्र-धातुपाठः ।
५—चान्द्रोणादिसूत्राणि । ६—महाभाष्यस्य पुनरुद्धारः ।
७—चान्द्रव्याकरणसूत्रवृत्तिः तत्रैव गणपाठश्च । ८—शिष्यलेखः (धर्मकाव्यम्) ।
९—आर्यसाधनशतकम् (काव्यम्) । १०—आर्यतारान्तरवलिविधिः (स्तुतिकाव्यम्) ।
११—लोकानन्दः (नाटकम्—केवलं त्रिविष्टपीय (तिब्बती) भाषायामुपलभ्यते ।

आसु व्याकरणकृतीनां समीक्षात्मकमध्ययनं शोधप्रबन्धस्यास्य द्वितीये भागे प्रस्तूयते । चान्द्रसम्प्रदायस्य समाप्तिश्चन्द्रगोमिना सहैवा भवत् । अतोऽत्र सम्प्रदाये एक एवाचार्यो बभूव । केवलं पूर्णचन्द्रकृता चान्द्रवृत्तिपञ्जिकैकोपलभ्यते तस्याश्चर्चोपान्त्यप्रकरणे करिष्यते । अन्ये च जैनेन्द्रसम्प्रदायादयो नात्र शोधप्रबन्धे विचारविषयीकृताः विषयान्तरत्वात् ।

काशिकाकारौः—जयादित्यवामनौ

काशिकाकारो जयादित्यो बौद्धः। वामनोऽपि तथैव। अत्र सन्ति कतिचित्प्रमाणानिः—

१—नाभ्यां ग्रन्थारम्भे मङ्गलश्लोको लिखितः। इयमेका सम्प्रदायविशेषप्रवृत्तिः। न कोऽपि ब्राह्मण-वृत्तिकारो विना मङ्गलाचरणं स्वकीयग्रन्थं प्रारभते प्रायः। न च पाणिनिकात्यायनपतञ्जलिप्रभृतयोऽपि मङ्गलानाम-कर्तारो विप्रेतरे इति वाच्यम् न ते वृत्तिकाराः; किन्तु सूत्रवार्तिकभाष्यकाराः सूत्रशैल्यां मङ्गलाचरणस्य कर्तव्या-ऽनवसरः। अथ शब्देनैव मङ्गलस्य प्रदर्शितत्वात् तत्र मङ्गलं न कृतम्। न च नैतेन बौद्धत्वं प्रमाणितं भवति; बुद्ध-नमनरूपस्य मङ्गलस्याकरणात्। यदि तौ बौद्धौ स्याताम्, चन्द्राचार्यपुरुषोत्तमदेवादिवदवश्यंनमस्कुर्याताम् बुद्धम् इति वाच्यम्, चान्द्रव्याकरस्य लघुविस्पष्टसम्पूर्णत्वादिगुणसम्वलितस्यापि पाणिनीयेतरसम्प्रदायत्वात् प्रचाराभावमालोक्य स्वस्या वृत्तेरपि तथात्वमाशङ्क्यात्र वृत्तौ ताभ्यां स्वबौद्धत्वं प्रति मौनावलम्बनस्यैव श्रेयस्करत्वमुत्प्रेक्ष्य तथागतो न प्रणतः। यत्र समाजे 'देवानांप्रियः' बुद्धधर्मप्रचारकस्योपाधित्वात् कात्यायनकाले मूर्खार्थकः स्वीकृतः, यत्र च बुद्धशब्दः 'बुद्धू' भोंदू इत्यपभ्रंशत्वमाप्तोऽर्थापकर्षस्य परांकाष्ठामितस्तत्र समाजे कः स्वग्रन्थप्रचाराभिलाषुकः स्वं बौद्धं प्रकटी-कुर्यात् ?

चन्द्राचार्यसूत्र (चा० १।४।८२) वृत्तौ यथा लोकायतिकं प्रति श्रद्धा प्रतिपादिता दृश्यते तथैव भासनोपसंभाषा (पा० १।३।४७) इति सूत्रकाशिका[1] वृत्तावपि विलोक्यते। यद्यपि लोकायतिकश्चार्वाकः इति ख्यातम् तथापि अमरकोशे 'चार्वाक[2] लोकायतिकौ' इति नामद्वयंबुद्धानुयायिन इति कथनात् बुद्धधर्मस्य बज्रयानशाखायाः सिद्धान्तस्य चार्वाकमत-समानत्वात् चार्वाकलोकायतिकप्रशंसा जयादित्यस्य बौद्धत्वं द्योतयितुमर्हति।

अथ च बौद्धवैयाकरणानां सम्प्रदाय एव 'अथ शब्दानुशासनम्' इति सूत्रं पाणिनीयं स्वीकृतं प्रथमतस्तद-नन्तरं स्वामिदयानन्दप्रभृतिभिरेतदङ्गीकृतम्। कैयटदीक्षितनागेशादिभिस्तु 'वचनमिदं पतञ्जलेरित्यङ्गीकृतम्। अस्यां स्वीकृतौ काशिकाकारस्य स्वरः सर्वोच्चः सर्वप्रथमश्च। अतोऽपि जयादित्यस्य बौद्धत्वं सिद्धं भवति। काशिकाकारेण चन्द्राचार्यस्य निखिलपरिवर्धन-संशोधननियमाः सादरं विना चन्द्रनामग्रहणं पाणिनीयव्याकरणसूत्रेषु मिश्रिताः। काशिकायां दृश्यमानश्चन्द्रगोमिप्रभावो जयादित्यं बौद्धं ध्वनयति।

चन्द्राचार्येण दर्शितं मार्गमनुसृत्य जयादित्य-वामनौ स्ववृत्ती लिखितवन्तौ। न केवलं काशिकायां शैल्यनुकृता अपितु चान्द्रवृत्यक्षरानुकृतिरपितत्र दृश्यते। तथाहि—

१. वदते चार्वी लोकायते। भासमानो दीप्यमानस्तत्र पदार्थान् व्यक्तीकरोतीत्यर्थः।
वदते चार्वी लोकयते। जानति वदितुमित्यर्थः काशिका—१।३।१७।
नयते चार्वी लोकायते। चार्वी बुद्धिस्तत्सम्बन्धादाचार्योऽपि चार्वी। स लोकायते शास्त्रे पदार्थान्
नयते उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रतिपादयति।
युक्तिभिः स्थाप्यमानास्ते सम्मानिताः पूजिता भवन्ति'। चा० १।४।८२।

२. अमरकोशः २।७।७ (चार्वाक लोकायतिक बौद्ध अर्थात् बुद्ध देव के मतानुयायी के २ नाम हैं। (हि० टी०) तथा अमरकोशः २।७।७ सं० टी० (प्रभा०) देहात्मवादिनो बौद्धस्य (नामनी) चार्वाकलोका-यतिकौ इति।

चान्द्रवृत्तिः

(१) अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम् । तस्योच्चारणं भवत्येकेन ऋकोऽणो रलौ (चा० १।१।१५) इत्यकारेण । चान्द्र अइउण् (प्र० सू० १)—वृत्तिः ।

(२) 'ह' इत्येकं वर्णमुपदिश्य पूर्वाँश्चान्ते लकारमितं करोति प्रत्याहारार्थम् । तस्योच्चारणं भवति षड्भिः शिदनेकाल् सर्वस्य (चा० १।१।१२) इत्यकारेण—इत्यादि (हल् प्र० सू० १३) ।

काशिकावृत्तिः

अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन उरण् रपर (पा० १।१।५१) इत्यकारेण । (अइउण् प्र० सू० १ वृत्तिः ।

'ह' इत्येकं वर्णं मुपदिश्य पूर्वाँश्चान्ते लकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति षड्भिः 'अलोन्त्यात् पूर्व उपधा' (अ० सू० १।१।६५) इति अकारेण—इत्यादि (हल् प्र० सू० १४) ।

एवं सर्वेषां प्रत्याहारसूत्राणामुभयी वृत्तिस्तुल्यरूपा ।

अमङ्णनम् (पा० प्र० सू ७ चा० प्र० सू० ६) इत्यत्र 'केचित्तु सर्वाण्येतानि प्रत्याहारग्रहणानि अकारेणैव भवन्त्विति मकारानुबन्धं प्रत्याचक्षते इति वाक्यं चान्द्रवृत्तौ काशिकायां च समानम् । यथा च चान्द्रे भाष्यकारस्य ग्रहणाय 'केचित्' पदप्रयोगस्तथैव काशिकायाम् । यथा च प्रतिपत्तिगौरवं चान्द्रे प्रदर्श्य प्रत्याख्यानस्यायुक्तत्वं साधितम् तथा काशिकायामपि । चान्द्रे अमप्रत्याहारस्योदाहरणं अमो ह्रस्वाद् द्वे (चा० ६।४।१७) इति दत्तम् काशिकायाम् अष्टाध्याय्यामविद्यमानोऽपिअमप्रत्याहारः 'अमन्ताड्डः इत्युणादिसूत्रे दर्शितः । सर्वमिदं चान्द्रस्य व्याकरणस्य प्रभावः । अन्यथा अमप्रत्याहारदर्शंयाष्टाध्याय्या अन्यत्रानुधावनं कर्तुं तं कः प्रेरयेत् ?

यथा चन्द्राचार्येण कात्यायनदृष्टानां संशोधनानां सूत्रेष्वेव समावेशः कृतस्तथा काशिकाकारेणापि क्वापि क्वापि कृतः । पाणिनीयसम्प्रदायस्य कोऽपि विद्वान् एतादृशं सूत्रगतसम्मिश्रणं पापं मन्यते । नागेशेन लघुशब्देन्दुशेखरे (अइउण् सूत्रे) लिखितम् अष्टाध्याय्याः अदृष्टप्रयोजनमप्यस्ति । पतञ्जलिकृतप्रत्याख्यानं तु दृष्टप्रयोजनं नास्तीतिमात्रतात्पर्यम् । एवंच पाणिनिसूत्रेष्वागतानां शब्दानामनुक्रमपरिवर्तनम् वार्तिकदर्शितानां शब्दानां सूत्रेषु निवेशश्च यथा चन्द्राचार्यं बौद्धं साधयति तथा वार्तिकप्रतिपाद्यानां मध्येसूत्रं क्वापि क्वापि कृतोऽपि निवेशो जयादित्यवामनावपि बौद्धौ साधयितुमर्हति । अन्यथा मन्त्रेष्वावश्यकशब्दसमावेशवदिहाऽपि तथा करणस्य प्रत्यवायजनकत्वं स्वीकृत्य तावपि तथा न कुर्याताम् ।

दृश्यतामुदाहरणाय तादृशं काशिकाचान्द्रवृत्तिकृतं सूत्रपरिवर्तनपरिवर्धनादिकम्—

पा० सू०	चान्द्रसूत्रम्	काशिकाकारसूत्रम्
१—ग्रामजनबन्धुभ्यस्तल् ४।२।४३	ग्रामजनगजबन्धुसहायात्तल् ३।१।५९	ग्रामजनबन्धुसहायेभ्यस्तल् गजाच्चेतिवक्तव्यम् वा० ४।२।४३ ।
२—समो गम्यृच्छिभ्याम् १।३।२९ समो गमादिषु विदिप्रच्छि-स्वरतीनामुपसंख्यानम्, अतिश्रुदृशिभ्यश्च १।३।२९ वा ०१-२	समोगमृच्छिप्रच्छिस्वृश्रुवेत्यतिदृशः १।१।७१	समोगम्यच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्य १।३।२९
३—टिड्ढाणञ्द्वयचसज्दघ्नञ्मात्रच्तपप्ठक् ठञ्कञ्क्वरपः ४।१।१५	टिड्ढाणञ्ठक्ठञ्नञ्स्नञ्कञ्क्वरप्ख्युनः२।४।१७	टिड्ढा— -ख्युनाम् ४।१।१५

बाह्यसाक्ष्यमपि दृश्यते ।

१—राहुलसांकृत्यायनो महापण्डितः अनुपलब्धतत्वगवेषणानिपुणो युक्तिवादी प्रामाणिक आचार्यो लिखति-"बौद्धसंस्कृतिनामपुस्तकस्य चतुर्थेऽध्याये ३२ तमे पृष्ठे :—

पाणिनिव्याकरणेऽपि पाणिनिकात्यायनपतञ्जलीत्याचार्यत्रयादनन्तर काशिकाकारो जयादित्यः न्यासकारो जिनेन्द्रबुद्धिश्च किमपि किलक्षणं वैशिष्ट्यं महत्त्वपूर्णं च स्वीयं स्थानं धत्तः; इमावपि द्वौ बौद्धावास्ताम् इति[1] । रमाकान्त मिश्रो लिखति—अतः जयादित्यवामनावुभावपि बौद्धौ इति[2] ।

काशिकावृत्तिर्महाभाष्यविमतमपि मतं प्रस्तौति । यदि जयादित्यः वामनश्च तस्या एव परम्परायाः स्याताम् यस्या दीक्षितादय आसन्, तदा दीक्षितनागेशादिवद्भाष्यानभिमतं वक्तुं नोत्सहेताम् । प्रायोऽत्र काशिकाकारेण चन्द्राचार्यप्रभृतिमतमनुसृत्य भाष्यमतमवहेलितम् । यत्र भाष्यमतादितरन्मतं काशिकाकारस्य तानि कानिचित्स्थलानि निदर्शनार्थं दीयन्ते—

(क) न बहुव्रीहौ (पा० १।१।२९) ।

अत्र काशिकाः—सर्वनामसंज्ञायां तदन्तविधेरभ्युपमात् बहुव्रीहेरपि सर्वाद्यन्तस्य संज्ञा स्यादिति प्रतिषेधआरभ्यते । बहुव्रीहौ समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । प्रियविश्वाय । प्रियोभयाय । द्वयन्याय । त्र्यन्याय । इह त्वत्कपितृको मत्कपितृकइत्यकज् न भवति । विभाषा दिक्समासे बहुव्रीहौ (पा० १।१।२८) इति वर्तमाने पुनर्बहुव्रीहिग्रहणं भूतपूर्वमात्रेऽपि प्रतिषेधो यथा स्यात् ।

(ख) अत्र महाभाष्ये—त्वकत्पितृकः मकत्पितृकः इत्येवरूपमिष्टम् । बहुव्रीहौ तूपसर्जनीभूतत्वात्सर्वनामसंज्ञाभावः सिद्ध एव । तथा च सूत्रमिदं न कर्तव्यम् । अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गमुक्तसंशयौ त्वकत्पितृको मकत्पितृक इत्येव भवितव्यमिति (महा० भा० १।१।२९ आ०६) ।

काशिकाः—तव्यत्तव्यानीयरः ३।१।९६

धातो रिति वर्तते । धातोस्तव्यत्तव्यानीयर इत्येते प्रत्यया भवन्ति । तकाररेफौ स्वरार्थौ । कर्त्तव्यम् । कर्त्तव्यम् । करणीयम् । वसेस्तव्यत् कर्तरि णिच्च । वास्तव्यः । केलिमर उपसंख्यानम् । पचेलिमा भाषाः । भिदेलिमानि काष्ठानि । कर्मकर्तरि चायमिष्यते ।

महाभाष्ये तु कर्मणि प्रदर्शितः । कै० प्रदीप ३।१।९६ ।

काशिकाः—विभाषा ग्रहः ३।१।१४३ ।

विभाषाग्रहेर्धातो र्ण प्रत्ययो भवति । ग्रहः, ग्राहः । व्यवस्थितविभाषा चेयम् । जलचरे नित्यम्—ग्राहः । ज्योतिषि नेष्यतेः—तत्र ग्रह एव । भवतेश्चेति वक्तव्यम् भवतीति भावः, भवः । भवतेश्चेति वार्तिकं भाष्ये नास्ति । भाष्यमतेन भावशब्दस्य सिद्धिः प्राप्त्यर्थात् चुरादिण्यन्ताद् धातो र्भवितु महँति । परन्तु चुरादिव्युत्पादितस्य

---

१. पाणिनीय व्याकरण में भी तीन प्रधानाचार्यों (पाणिनि, कात्यायन पतञ्जलि के बाद काशिकाकारकार जयादित्य और न्यासकार (जिनेन्द्र बुद्धि) का स्थान बहुत ऊंचा है; जो दोंनों ही बौद्ध थे—बौद्ध संस्कृति अध्याय—४ पृ० ३१—राहुल सांकृत्यायन—(प्रकाशक-आधुनिक पुस्तक भवन ३०-३१ कलाकर स्ट्रीट कलकत्ता=७) ।

२. व्याकरण शास्त्र का संक्षिप्त इतिहास पृ० ८० (चौखम्बा प्रकाशन) ।
"अतः वामन और जयादित्य दोनों ही बौद्ध थे" ।

भावशब्दस्य पदार्थवाचित्वं कष्टसाध्यम् । तस्याधुनिकहिन्द्यादिभारतीयभाषासु प्रचलितस्य वस्तुमूल्यस्तरबोधकस्य भावशब्दस्य पर्यायत्वमेवानया व्युत्पत्त्या सम्पाद्यं स्यात् ।

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ३।२।५६ अत्र काशिकाः—अच्वाविति किम् ? आढ्यीकुवन्त्यनेन । ननु ख्युना मुक्ते ल्युटा भवितव्यम्, न च ल्युटः ख्युनश्च विशेषोऽस्ति, तत्र किं प्रतिषेधेन ? एवं तर्हि प्रतिषेधसामर्थ्यात् ख्युन्यसति, ल्युडपि न भवति, तेन ल्युटोऽप्ययमर्थतः प्रतिषेधः । उत्तरार्थश्च च्विप्रतिषेधः क्रियते । भाष्ये तु अच्वि ग्रहणम्'' कर्तरि भुवः खिष्णुच् खुकञौ (पा० ३।२।५७) । इत्युत्तरसूत्रानुवृत्यर्थम् । तेन तस्य चारितार्थ्यात् ल्युटो बाधाऽसंभवः । एवंच आढ्यीकुवन्त्यनेनेत्यत्र ल्युट् स्यादेवेत्युक्तम् ।

वस्तुतस्त्वत्र जयादित्यः स्तुत्यः । अच्विग्रहणस्योत्तरार्थत्वे तत्रैव कर्तव्यतया पूर्वसूत्रे करणजन्यं किमपि सामर्थ्यं तु स्वीकर्तव्यमेव । तेन सामर्थेन ल्युटो बाधः स्वीकार्य एव ।

सुप्यजातौ णिनिस्ताच्छील्ये ३।२।७८ अत्र जयादित्यः—

सुपीतिवर्तमाने पुनः सुब्ग्रहणमुपसर्गनिवृत्यर्थम् । (तेनोपसर्गभिन्न एव सुपि णिनिरिति व्याख्याय) उत्प्रतिभ्यामाङि सर्तेरूपसंख्यानम् (कर्तव्यम्) उदासारिण्यः प्रत्यासारिण्य इत्याद्यर्थम् इत्याह । हरदत्तमाधवादिभ्य[1]श्च तदेवानुसृतम् ।

भाष्ये तु उपसर्गेऽपि णिनिप्रयोगं विलोक्योपसर्गानुपसर्गसाधारणे सुपि णिनिप्रत्ययोऽङ्गीकृतः । तथाचोक्तम्—भाष्ये (३।२।७८) सुबिति वर्तमाने पुनः सुब्ग्रहणंकिमर्थम् । अनुपसर्ग इत्येवं तदभूत् इदं तु सुप्-मात्रे यथा स्यात् । उदासारिण्यः प्रत्यासारिण्यः । अय हि भाष्याशयः—सत्सूद्विष—(पा० ३।२।६१) इति सूत्रे सुपि स्थः (पा० ३।२।४) इत्यतः सुपीत्यनुवतते । तच्च तत्र उपसर्गेतरपम्, उपसर्गेऽपीति पृथगुक्तेः । तदिहानुवर्तमानमर्थाधिकारादुपसर्गेऽपीति पृथगुक्तेः । तदिहानुवर्तमानमर्थाधिकारादुपसर्गेतरपरं माभूदिति हेतोरत्र सूत्रे पुनःसुब्ग्रहणं कृतमिति ।

अत्र भट्टोजिदीक्षितः—अतएव ''स बभूवोपजीविनान्,'' 'अनुयायिवर्गः इतिकालिदासस्य पतत्यधीधाम विसारि' 'इति माघस्य' न वञ्चनीयाः प्रभवोऽनुजीविभिरिति भारवेश्च प्रयोगाः सिद्धचन्ति इत्थमत्रत्यः काशिकाग्रन्थो भाष्यविरोधादुपेक्ष्य इत्याह[2] ।

इदानीमुपलब्धा काशिकावृत्तिर्जयादित्य—वामनयोरुभयोः प्रयासस्य फलमिति विदुषां मान्यता । तत्र विचार्यते कियान् भागः केन कृत इति ?

(क) प्रौढमनोरमायाः शब्दरत्नव्याख्याने हरिदीक्षितेन काशिकायाः प्रथम द्वितीयपञ्चमषष्ठाध्याया जयादित्यस्य, तृतीय-चतुर्थसप्तमाष्टमाध्याया वामनस्य कृतय इति प्रति-पादनपरा काचिदभियुक्तपरम्परा स्मृता[3] ।

(ख) पण्डितश्रीशचन्द्रचक्रवर्त्तिना[4] श्री युधिष्ठिर[5]मीमांसकेन च सम्प्रत्युपलब्धा काशिकावृत्तिरापञ्चमाध्यायं जयादित्यस्य षष्ठसप्तमाष्टमाध्यायगता च सा वामनस्य रचनेति स्वीकृतम् । श्री युधिष्ठिर मीमांसकेनेदमपि प्रमाणितं यत् जयादित्येन वामनेन च यद्यपि पृथक् पृथक् सम्पूर्णाष्टाध्यायी स्वस्ववृत्यालङ्कृता यथा किल न्यासदमञ्जरी प्राप्तोद्धरणज्ञायते तथापि कालमवाप्योभयोः सम्मिश्रणं जातम्[6] ।

---

१. सि० कौ० पू० कृदन्त पृ० ५७४ ।
२. सि० कौ० पू० कृदन्त पृ० ५७४ ।
३. मनो० शब्दरत्नम् भाग—१ पृ० ५०४ इति । काशिका प्रस्तावना० (पृ० ६३) श्रीनारायण मिश्र-लिखिता) ।
४. न्यास प्रस्तावना पृ० १० ।
५. सं० व्या० शा० का इति० भागः—१ पृ० ४२५ ।
६. सं० व्या० शा० का इति० भाग १ पृ० ३३६ (प्रथम संस्करण)

(ग) विण्टरनित्समहोदयेनापि 'ख' खण्डोद्धृतं मतमेवाङ्गीकृतम्[1]।

चीनदेशीयपर्यटकेन इत्सगेन समस्तायाः काशिकावृत्तेः कर्ता जयादित्य इति मेने। यदि इत्सिंगस्य प्रामाण्यमङ्गीकृत्य समस्ता काशिका जयादित्यस्य रचनेतिस्वीक्रियेत तदा न्यासकारादीनां कथनं व्याकुप्येत।

न्यासस्य सम्पादकेन श्रीशचन्द्रचक्रवर्त्तिना इत्सिंगलेखं प्रमाणं मन्यमानेन लिखितम्:—वामनीय—काशिकावृत्तिः इत्सिंगभारतयात्रासमाप्तेरनन्तरकालिकी कृति रिति[2]।

इदं मतं समीचीनं प्रतिभाति। काशिका सैव इत्सिंगेन विलोकिता या जयादित्येन कृतासीत्। इत्सिंगस्य लेखानुसारेण खिष्टाब्दात् ६६१ तमात् प्रागेव जयादित्यस्य देहावसानमभवदिति ज्ञायते। यदि जयादित्यस्य देहावसानसमयः ६५०तमः खिष्टाब्दस्तर्हि काशिकारचनाकालः खिष्टसप्तमशताब्दीपूर्वार्धइति शक्यते संभावयितुम्। षष्ठशताब्दीतो मध्येसप्तम शताब्दि पर्यन्तं जयादित्यस्य स्थितिविषये अन्यानि प्रमाणान्यप्युपलभ्यन्ते प्रकाशनस्थेयाख्ययोश्च (पा० सू० १।३।२३) इति सूत्रे'संशय्य कर्णादिषु तिष्ठते यः' इति पद्यांश उदाहृतः। सम्पूर्णं पद्यं भारवेः किरातार्जुनीये (३।१४) वर्तते। भारविश्च खिष्टीयात् ४८२ तमादब्दात्पूर्ववर्ती। यतो हि किरातार्जुनीयस्य पञ्चदशस्य सर्गस्य कापि टीका महाराजदुर्विनीतेन ५६९—५३९ तमयो खिष्टाब्दयो र्मध्ये विद्यमानेन लिखिता। अतो भारवेः समयेन ततः पूर्वेण भवितव्यम्।[3]

जयादित्यस्य कीर्तेः राधारभूता रचना काशिकावृत्तिरेवोपलभ्यते। सुभाषितावल्यां जयादित्यकर्तृत्वेन केचिच् छ्लोकाः प्राप्यन्ते परन्तु ते कुतो गृहीता इपि न ज्ञायते।

वामनस्य समयो जयादित्यादनन्तरवर्तीति इत्सिंगलेखेन शक्यते सम्भावयितुम्। न हि समानकालवर्तिनो विदुषोरचनयोः सम्मिश्रणं सम्भाव्यते। अतो न तौ एककालवर्तिनौ। किञ्च काशिकावृत्तौ वामनेन जयादित्यस्य मतं खण्डित[4]मिति।

सम्मिलितरचनायां एकस्य मतस्यान्येन खण्डनं न मनोवैज्ञानिकं प्रतिभाति। मिलित्वा विद्वद्द्वयी कमपि ग्रन्थमपि रचयेत; एकश्चान्यस्य मतं खण्डयेदिति न नैसर्गिकं प्रतीयते। मुण्डे मुण्डे मतिर्भिन्ना तु सम्भाव्यते; परन्तु तस्य वैमत्यस्योल्लेखः संयुक्तरचनायामसंगत इवाभाति।

---

१. A History of Indian Literature, Vol. III Part II Page) 433 foot Note No. 2.

२. Probably Vaman wrote down (his share of Kashika, shortly after I—Tsing had left Inbia and so he (Vaman) is not at all menrioned by the former (I—Tsing). Unless there be some such reasons. It can not be likely that I—Tsing could avoid or forget Vaman within so short of time as between the compostion of the Kashika that is Jayaditya's Sutra-Vratti and his own book (Nyasa Prastavana Page 16).

३. मेक्डानल—हिस्ट्री आफ सं० लिटरेचर पृ० ५७७। वरदाचारी—ए हिस्ट्री आफ संस्कृत लिटरेचर पृ० ८०।

४. न्यासः—१।१।५ (काशिका भाग—१ पृ० ८५), ३।२।३३ (का० भा० पृ० ४१०-४११)। पदमञ्जरी—२।२।१७ (का० भा० २ पृ० ११७-११८; ३।१।३३ (काशिका भा० २ पृ० ४११)। प्रौढ मनोरमा ५।४।४२ शब्द कौस्तुभः १।१।४२ शब्द कौस्तुभः १।१।५ स्नोर्गित्वान्न स्थ ईकारः इत्युपक्रम्य जयादित्योऽप्येवं वामनस्तु।

अतो वामनः जयादित्यात्परवर्ती । खिष्टाब्दे ७०० तमे तस्यस मीपाब्दे वा वर्तमान आसीदिति सम्भाव्यते ।

नामकरणम्

काशिकेतिनामकरणस्याधारविषये सन्ति बहवः सम्भावनाः ।

१—पदमञ्जरीकारो हरदत्तो लिखतिः—

काशिकेति देशतोऽभिधानम् । काशिषु भवा 'काश्यादिभ्यष्ठञिठौ' (४।२।११६)[1] ।

२—वृत्तिकारेण स्वयमपि 'काश्यादिभ्यष्ठञिठौ (४।२।११६) इति सूत्रस्य वृत्तौ 'काशिका' काशिका इत्युदाहरणद्वयं दत्तम् । किन्तु तत्र ग्रन्थनामविषये न कोऽपि संकेत उपलभ्यते ।

इत्थं काशिनगरी भवत्वात् अर्थात् काश्यां नगर्यां लिखितत्वादियं वृत्तिः काशिकेति हरदत्तस्य कथनं संभावनामात्रपुष्टम्, तथापि पाश्चात्यविद्वल्लिखितेतिहासे एतदेव स्वीकृतम् ।[2]

वाचस्पति गैरोला अपि इत्थमेव स्वीचकार ।[3]

अत्र विचार्यते—स्थानकालादिप्रख्यापनविषये नितरामुदासीनाः संस्कृतग्रन्थकाराः स्वरचनाया नामकरणं कंचित्स्थानविशेषमधिकृत्य करिष्यन्तीत्याशा दुराशामात्रम् । अतः 'काशिका' इति नामकरणमर्थप्रकाशनकारित्वात्कृतमिति सम्भाव्यते ।

काशिकाया नामान्तरमप्युलभ्यते एकवृत्तिः सद्वृत्ति इचेति ।

तत्र एकवृत्तरितिनाम पुरुषोत्तमदेवस्य भाषावृत्तावुवुलभ्यते ।

तेन 'सम्बुद्धौ शाकल्यस्येतावनार्षे' (१।१।१६) इति सूत्रस्य भाषावृत्तौ प्रोक्तम्—'अनार्ष इत्येकवृत्तावुपयुक्तम्' इति । एतत् प्रकरण टीकयता श्रीसृष्टिधरचक्रवर्तिना लिखितम्—' एक वृत्तौ साधारणवृत्तौ वैदिके लौकिके च विवरणे इत्यर्थः, एकवृत्ताविति काशिकायां वृत्तावित्यर्थः । एकस्य मुख्यार्थत्वात् काशिकायां मुख्यवृत्तौ छान्दसस्यापि व्याख्यानादिति भावः इति (भाषावृत्त्यर्थविवृत्तिः सू० १।१।१६) ।

एकवृत्तिशब्दस्येयं व्याख्या सृष्टिधरचक्रवर्तिनः वैदिकसम्प्रदायगतभक्तिभूला । छान्दसानां प्रयोगाणां सिद्धिकारकसूत्रव्याख्यानात् काशिकावृत्तिर्मुख्येतिमतं पुरुषोत्तमदेवबौद्धस्य कदापि न सम्भवतिः अन्यथा भाषावृत्तौ मुख्यस्य छान्दसभागस्य परित्यागस्तत्कृतोऽनुपन्न एव स्यात् तेन छान्दससूत्राणि नामत उल्लिख्यापि न व्याख्यातानि । किंच व्याकरणेऽसंख्यापवादनियमानां 'बहुल' पदमहिम्ना कथंचिद्दर्शितव्याकृतीनां छान्दसप्रयोगाणां मुख्यत्वं न वा कात्यायनस्याभिप्रेतं न वा पतञ्जलेरभीष्टं सिद्धयति । अन्यथा पाणिनिरष्टाध्याय्याः प्रारम्भं केनापि वैदिक शब्दसाधकेन सूत्रेण कुर्यात् । धातुपाठे वैदिका धातवः प्रथमं पठिताः स्युः ।

कात्यायनेनापि 'सिद्धे शब्दार्थसम्बन्धे' इत्यादौ शब्दार्थसम्बन्धसिद्धत्वे लोक एव हेतुत्वेनोपन्यस्तः ।

पतञ्जलिनाऽपि 'अथ शब्दानुशासन' मिति व्याख्यावसरे 'केषां शब्दानां लौकिकानां वैदिकानां चेत्यत्र लौकिकाना मेव शब्दानां प्रथमोल्लेखान् मुख्यत्वं प्रतिपादितम् ।

अतः 'एकवृत्तिरिति नामप्रयोगे पुरुषोत्तमदेवस्यान्यत्तात्पर्य सम्भाव्यते । तेन स्वभाषावृत्तिरचनायां काशिकाभागवृत्ती आश्रिते । तत्र काशिका पूर्वरचितत्वाल्लेखकेन महत्वविशेषदानादेकां संख्यां वहति । अतः सैकवृत्तिः ।

---

१. पदमंजरी पृ० ६ (काशिका भाग—१) ।

2. The Commentary of Kashika-Winternitz—A History of Indlan Literature Vol. Part II.

३. 'काशिका' की रचना वाराणसी में हुई—सं० सा० का संक्षिप्त इतिहास—गैरोला पृ० ३७० ।

'[1]काशिकाभागवृत्त्योश्चेत् सिद्धान्तं बौद्धुमस्ति धीः'।

इत्यत्रापि काशिकापदमेकत्वसंख्याविशिष्टम्। अतः पुरुषोत्तमदेवेनास्य मुख्यत्वं वृत्तिगुणप्राचुर्यात् स्वीकृतं भवेत् नतु छान्दससूत्रव्याख्यानात् इति।

माघस्य[2] 'सद्वृत्तिः सन्निबन्धना' इत्यत्र काशिकायाः सकेतं स्वीकुर्वद्भिः सद्वृत्तिरिति काशिकाया नामान्तरमन्यते।

अस्या वृत्तेर्बहूनि वैशिट्यानि सन्ति तथाहि :—

१—इयं वृत्ति गौरिव वर्तते। यथा गौर्विपिने चरन्ती नानाविधानितस्ततः प्ररूढान् भेषज्यसम्पादकानोषधि-वल्ली-गुल्म-क्षुपान् जग्ध्वा तेषां साररूपेण सम्पन्नं मधुरमिष्टं दुग्धमस्मभ्यं वितरति, वयं च न जानीमः 'सा कास्कान् भेषज्यभूतान् ओषधिवल्लीगुल्मक्षुपानमक्षयत्; किन्तु तद्दुग्धपानेनास्माक बहूनां ज्ञाताज्ञातानां रोगाणां चिकित्सा जायते; तथैवेयं काशिकावृत्तिर्बहूनां प्राचीनानां वृत्ति-भाष्य-'धातुनामपारायणादिषु इतस्ततोविप्रकीर्णानां शब्दतन्त्र-सम्बन्धितत्वानां सारांशं सरलमनोहरप्रसन्नया शैल्या व्याकरणायवितरति; येन व्याकरणस्य शरीरात् बहवो दोषा दूरं गच्छन्ति; निर्दुष्टं च तत्कलेवरं देदीप्यमानं जायते। वयंच तेषामृषिकल्पानामनल्पतपःपूतजीवनानां वैयाकरणानां नामान्यज्ञात्वापि तेषां रचनानां विशुद्धं तत्वं यत्प्राप्नुमस्तदस्या एव वृत्याः प्रसादः[3]।

२—सूत्रैः वार्तिकैश्चादर्शितसिद्धयुद्योगानां लक्ष्याणां संग्रहाय नवानामिष्टीनामुपसंख्यानमस्य द्वितीयवैशिष्ट्यम् यथा 'भुवश्च' (३।२।१३८) इति सूत्रे चकारोऽनुक्तसमुच्चयार्थः—'भ्राजिष्णुना लोहितचन्दनेन'।

भ्राजिष्णुशब्दसाधनाय जयादित्येन त्रिमुन्यदर्शितोद्योगः दर्शितः। (काशिका ३।२।१३८)।

उक्तं च सिद्धान्तकौमुद्यां (पृ० ५८७) चकारोऽनुक्तसमुच्चयार्थः—भ्राजिष्णुरिति वृत्तिः। एवं क्षयिष्णुः। नैतद्भाष्ये दृष्टम् इति।

यथा वा अव्ययं विमक्ति—(२।१।६) सूत्रस्य काशिकायां वृत्तौ सादृश्यं तुल्यता। किमर्थमिदमुच्यते। यथार्थ इत्येव सिद्धम्। गुणभूतेऽपिसादृश्येयथा स्यात्—सदृशः सख्या ससखि इत्युक्तम्।

विषयोऽयं भाष्ये नोक्तः। अतएव एतस्याः वृत्तेः व्याख्याप्रसंगे हरदत्तेन पदमञ्जर्यामुक्तम्—'अप्रसिद्धोदहरणमेतत्, चिरन्तनप्रयोगात्'।

३—शुद्धगणनिर्देशोऽस्य तृतीयं वैशिष्ट्यम्। एतेन ज्ञायते यदितः प्राग्रचितासु वृत्तिषु दर्शिता गणाः शुद्धानासन्। शुद्धगणपाठस्य कृतेऽस्या अधमर्णत्वं स्वीकार्यमेव। साम्प्रतं सिद्धान्तकौमुद्यादिषु समुपलभ्यमानस्य गणपाठस्याधारः काशिका एव। गणपाठस्य सूत्रपाठात्पृथक्स्थितौ काठिन्यमनुभूय यथा चन्द्राचार्येण वृत्तावेव तस्य समावेशः कृतस्तथा काशिकाकाराभ्यामपि।

---

१. भाषावृत्ति पृ० ५७३।
२. शिशुपालवधम् सर्ग २।११३।
३. वृत्तौ भाष्ये तथा धातुनामपारायणादिषु।
विप्रकीर्णस्य तन्त्रस्य क्रियते सार संग्रहः॥ का० वृ० भाग १ श्लोक० १।

४—न केवलं सूत्रेण शब्दा व्याक्रियन्ते, किन्तूदाहरणप्रत्युदाहरणवाक्याध्याहारसहितसूत्रव्याख्यानेन शब्दानामन्वाख्यानं जायते। सूत्रस्य चाल्पाक्षरत्वात्तद्रहस्यज्ञानमतिकठिनम्। महाभाष्यादिग्रन्थसमुद्रमन्थनेन रहस्यामृतप्राप्तिर्न साधारणजनायाससाध्या। अतः सूत्रगूढार्थविवरणमत्यावश्यकम्। तदस्या वृत्तेश्चतुर्थं वैशिष्ट्यम्।

५—व्युत्पन्नरूपसिद्धिरस्याः पञ्चमं वैलक्षण्यम्। व्युत्पत्तिप्रदर्शनपूर्वकमुदाहृतानां रूपाणां सिद्धिरित्यर्थः।[1]

६—परिकरबन्धोऽप्यत्र ग्रन्थे प्रतिपादितः शब्दव्याकृतये प्रातिपादितानां तत्वानां विषये समुत्थितानां समुत्थापितानाम्वा विचिकित्सानां निवारणार्थरचितो ग्रन्थः परिकरबन्ध उच्यते। रक्षाबन्धः परिकरबन्धशब्दार्थः। शंकासमाधानग्रन्थं विना कोऽपि प्रतिपादितोऽर्थः सिद्धान्ततां नैव गच्छति।[2] परिकरशब्दस्यात्र प्रगाढगात्रिकाबन्धार्थः ग्रन्थकारास्याभिप्रेतः। 'व्याकरणस्य शरीरम्' इति मानवीकरणस्य सामञ्जस्यानुरोधात्। यथा शीतवातातपाक्रमणनिवृत्यर्थं शरीरे गात्रिकाबन्धः क्रियते तथा प्रतिवादिप्रश्नाक्रमणनिवारणाय शङ्कासमाधानात्मकः परियोजनावतरणिकादिग्रन्थोऽत्र विरचितः। काशिकाकारेण व्याकरणस्य कार्यं परिनिष्ठतशब्दान्वाख्यानमात्रमुक्तम्।

"[3]व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत्।
शिष्टैः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण" ।

अर्थात् व्याकरणस्य शरीरं साधुशब्दान्वाख्यानाय। व्याकरणमिष्ट्युपसंख्यान-शुद्धगणपाठादिनिरूपणपूर्वकपरिनिष्ठितशब्दसाधुत्वान्वाख्यातृशास्त्रमात्रमस्ति; तथापि इष्ट्याद्युपसंख्यानादतिरिक्तविषयस्य प्रतिपादनं यद्ग्रन्थकारेण क्रियते तच्छास्त्रशरीरस्य रक्षार्थं कृतप्रगाढगात्रिकाबन्धमात्रमस्ति।

यदीदृशः विचारः परवर्तिवैयाकरणानामविष्यत् तदा व्याकरणशास्त्रमिदं भाषाशिक्षणात्मकात् स्वोद्देश्याच्च्युतं नामविष्यत्। टीकाग्रन्थानां वाग्जाले निपत्य शास्त्रमिदं 'ननु नच' मात्रस्वरूपं भूत्वा प्रतिदिनं ह्रासाभिमुखं च नागमिष्यत्।

यद्यपि पाणिनि-कुणिमाथुरश्वोभूत्यादिदेवनन्दीदुर्विनीतचुल्लिभट्टिनिर्लूरादिविरचिता वृत्तयः आसन् अष्टाध्याय्याः सूत्राणां, काशिकायाः पूर्वास्तथापि उद्धरणमात्रमेव तासामुपलभ्यते साम्प्रतम्। अतः काशिकैवाष्टाध्याय्यध्ययने केवलं शरणम्।

अस्यां प्रतिसूत्रमनुवृत्तिपरम्परासूत्रार्थः, उदाहरणप्रत्युदाहरणानि यथास्थानं गणपाठः, सर्वमेकत्र शब्दान्वाख्यानसम्बद्धं वस्तु शङ्कासमाधाननिरसनपुरःसरमुपलभ्यते इति व्याकरणसरलतासम्पादनप्रयासोऽस्या विजयते।

सर्वे परवर्तिनः भट्टोजिदीक्षितनागेशादयोऽस्या अधमर्णाः। पुरुषोत्तमविमलमतिशरणदेवादयश्चेत्यहो अस्या माहात्म्यम्।

---

१. इष्ट्युपसंख्यानवती शुद्धगणा विवृतमूढसूत्रार्था।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं 'काशिका' नाम॥ (काशिका भाग—१ श्लो० २)।

२. भवेत् परिकरो व्राते पर्यङ्कपरिवारयोः। प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपि॥
इति विश्वः (१४३।२२५)। अ० को० रामाश्रमी टीका पृ० ५६६।

३. काशिका वृत्ति (भाग—१ पृ० १ श्लो० ३)।

बौद्धवैयाकरणो विमलमतिस्तस्य कृतिर्भागवृत्तिश्च

पाणिनीयव्याकरणतन्त्रे सर्वासु प्राप्तासु वृत्तिषु काशिकायाः प्राधान्यं सर्वैरेकस्वरेण स्वीक्रियते। सेयं-काशिकावृत्तिरपि जयादित्येन बौद्धेन वामनेन च रचितेति गवेषणाबुद्धियत्नपरैः राहुलसांकृत्यायनप्रभृतिभिर्विद्वद्भिः सप्रमाणं संसाधितमेव[1]। काशिकाया अनन्तरं प्राप्तमहत्वपूर्णस्थाना भागवृत्तिरपि बौद्धवैयाकरणस्य भर्तृहर्युपाधि-विलसितस्य विमलमतेरेवेति जितं पाणिनीयव्याकरणवृत्ति, जगदपि बौद्धेन। इयं भागवृत्तिर्यद्यपि साम्प्रतं नोपलभ्यते तथापि व्याकरणाकोशादिग्रन्थेषु प्राचुर्येणास्या उद्धरणानामुपलम्भादनुमीयतेऽस्या उपलब्धिकाले एतदीया प्रतिष्ठा प्रामाणिकता चेति।

बौद्धवैयाकरणेन पुरुषोत्तमदेवेन स्वभाषा-वृत्तौ भागवृत्तेः प्रामाणिकत्वं प्रतिपादयता लिख्यतेः—

काशिकाभागवृत्त्योश्चेत् सिद्धान्तं बोद्धुमस्ति धीः
तदा विचिन्त्यतां भ्रातर्भाषावृत्तिरियं मम। (भाषावृत्ति पृ० ५७३)

पुरुषोत्तमदेवस्य भाषावृत्तौ लिखितात् निर्दिष्ट-श्लोकात् सिद्धान्तकौमुद्यां[2] शब्द कौस्तुमे[3], दुर्घटवृत्तौ[4] चास्या वृत्तेरसकृदुद्धरणानामुपलम्भात् सप्तदशशताब्दीं यावदस्याः हस्तलेखाः सुलभा आसन्निति सम्भाव्यते। इदानीं श्री युधिष्ठिरमीमांसकेन यत्र तत्रोपलब्धानां भागवृत्तेरुद्धरणानां प्रकाशनं 'भागवृत्ति संकलनम्' इति नाम्ना कृतम्। अनेन संकलेन मूलग्रन्थस्योपादेयताऽनुमातुं शक्यते।

पुरुषोत्तमदेवेन विरचितायाः भाषावृत्तेष्टीकाकारेण सृष्टिधराचार्येण पूर्वनिर्दिष्टश्लोकव्याख्यानप्रकरणे 'वलभीनगरस्य राज्ञः श्रीधरसेनस्याज्ञया भर्तृहरिणा भागवृत्तिर्विरचिता इत्युक्तम्[5]। कातन्त्रपरिशिष्टकृता श्रीपतिद-त्तेनोक्तम् —भागवृत्तिकृता विमलमतिनाप्येष निपातितः इति[6]।

पूर्वोक्तादुद्धरणद्वयादसौ विप्रतिपत्तिरुदेति यत् किमियं भर्तृहरेः कृतिरथ च विमलमतेः। न च पूर्वोक्तो-द्धरणद्वयेऽन्यतरस्य प्रामाणस्य साधिका कापि विनिगमना वर्तते। यामाधारीकृत्येदं तत्थ्यमिदं चातत्थ्यमिति निश्चय-पूर्वकं शक्यते निर्वक्तुम्। अत उभयत्र प्रामाण्यमङ्गीकृत्य सामञ्जस्यं स्थापनीयम्। तच्चेत्थं स्यात् यत् भागवृत्ति-कारस्य विमलमति'रिति नाम आसीत् भर्तृहरिति च तस्योपाधिः। एवं स्वीकृते उभयमप्युद्धरणं सुसंगतं सिद्धचति। संस्कृतसाहित्ये कालिदासत्रयीव संस्कृतव्याकरणजगति भर्तृहरित्रयी आसीदिति संभाव्यते। तत्र प्रथमः भर्तृहरिः वाक्यपदीयस्य कर्ता महाभाष्यस्य व्याख्याताऽन्येषां च बहूनां ग्रन्थानां लेखकः पदवाक्यप्रमाणज्ञः। द्वितीयः—भट्टिका-

---

१. राहुलसांकृत्यायन-बुद्धसंस्कृति अध्या० ४ पृ० ३२।
२. १।३।२८।
३. शब्द कौस्तुभः ४।११।१०।
४. १।१।१५,१।३।४५ इत्यादौ।
५. 'भागवृत्तिर्भर्तृहरिणा श्रीधरसेननरेन्द्रादिष्टेन विरचिता' (भाषावृत्ति विवृत्तिः ८।४।६८)।
६. भागवृत्ति संकलनम् पृ० ३३।

व्यस्य कवयिता महाकविर्भर्तृहरिः, तृतीयो भर्तृहरिर्भागवृत्तेः कर्ता विमलमतिनामा महावैयाकरणः। तत्राद्यस्य भर्तृहरिरिति नामधेयम्। अपरयोस्तूपाधिः। अयं बौद्धः, बौद्धसम्प्रदाये विमलतेरतिप्रसिद्धेः।

काशिकातोऽनन्तरमस्या रचनाकालः। सम्पूर्णायाः काशिकाया रचनाकालः खि्रष्टसप्तमशताब्दी मन्यते यतोऽत्र दिङ्नागस्य प्रमाणसमुच्चयस्योल्लेखोऽस्ति (३।३।४२) तथैव भारवेः किरातार्जुनीयस्य (३।१४) श्लोकस्य प्रमाणमत्र प्रस्तुतं वर्तते। अतः भागवृत्तेः कालः खि्रष्टीयसप्तमशताब्दीतोऽनन्तरं भवेदिति संभाव्यते।

भागवृत्तेः प्राग्रचिताः सर्वाः वृत्तयः अष्टाध्यायीक्रममनुसृत्यैव विरचिता आसन्। परन्तु भागवृत्तिः लौकिकवैदिकसूत्राणि प्रकरणद्वये यथायथं विभज्य ग्रन्थकर्तुः पाणिनेराचार्यस्य क्रममतीत्य विरचिता। अस्याः प्रथमो भागः भाषाभाग आसीत्। द्वितीयो भागः छान्दसभागो भवेदिति सम्भाव्यते भागद्वयस्य सत्ता बाह्यसाक्ष्यादनुमीयते। कतिपयानि तानीह प्रस्तूयन्ते :—

(१) अतएव भाषाभागे भागवृत्तिकृद्, भाषावृत्तिकारश्च क्वसुकानज्विधानलक्षणं न लक्षितवान् इति गोपीचन्द्रः—प्राह संक्षिप्तसारटीकायाम् (पृ० ८२९ तिङन्त)।[1]

(२) 'अथवैतन्न वक्तव्यम्, छान्दसत्वात्। अतएव भागवृत्तौ **भाषाभागेस्त्येव तत्' इति** संक्षिप्तसार सन्धि प्रकरणे (पृ० १९०) गोपीचन्द्रः[2]।

भागवृत्तीतिनामकरणेऽपि इदमेव निदानमनुमीयते। यतोऽनेन लौकिकवैदिकशब्दसाधकानि सूत्राणि विभज्य तत्र वृत्तिर्लिखिता। भागपुरस्सरा वृत्तिः भागवृत्तिः, विभज्य कृता वृत्ति र्भागवृत्तिरिति वा विग्रहः। इतः पूर्वं लिखिता वृत्तिः काशिका वृत्तिरेकवृत्तिरित्युच्यते। पुरुषोत्तमदेवो भाषावृत्तौ (१।१।१६) काशिकावृत्तिमेकवृत्तिमाख्यत्। 'भाषावृत्यर्थविवृति'कारः सृष्टिधराचार्यः एकवृत्तिशब्दं काशिकावाचकमित्थं युक्तिमुपन्यस्य व्याख्यातवान् एकवृत्तौ साधारणवृत्तौ लौकके वैदिके च विवरण इत्यर्थः। एकवृत्ताविति काशिकायां वृत्तावित्यर्थः। लोकवेदोभयसाधारणानां शब्दानामन्वाख्यानपरकपाणिनीयसूत्राणां विभागमकृत्वा लिखितां काशिकावृत्तिमेकवृत्तिमाह सृष्टिधरः। विमलमतिः स्वांवृत्तिं लौकिकवैदिकशब्दसिद्धिसम्पादकानां सूत्राणां भागद्वयकरणपूर्वकमलिखदिति संभाव्यते भागवृत्तिनाम्नो मूलम्।

[3]अस्या वृत्तेरुद्धरणानि निम्नलिखितेषु ग्रन्थेषु उपलभ्यन्ते। एतेनास्या महत्वं शक्यतेऽधिगन्तुम्।

१—महाभाष्यप्रदीपे (कैयटस्य)
२—नागेशग्रन्थे
३—पदमञ्जर्याम् (हरदत्तस्य)
४—भाषावृत्तौ (पुरुषोत्तमदेवस्य)
५—दुर्घटवृत्तौ (शरणदेवस्य)
६—परिभाषावृत्तौ (सीरदेवस्य)
७—परिभाषावृत्तौ (पुरुषोत्तमदेवस्य)
८—उणादिवृत्तौ (श्वेतवन वासिनः)
९—उणादिवृत्तौ (उज्ज्वलदत्तस्य)
१०—धातुवृत्तौ—(सायणस्य)
११—ज्ञापकसमुच्चये (पुरुषोत्तमदेवस्य)
१२—सिद्धान्तकौमुद्याम् (भट्टोजिदीक्षितस्य)
१३—प्रक्रियाकौमुद्याम् (रामचन्द्रस्य)
१४—व्या० सिद्धान्तसुधानिधौ (विश्वेश्वरसूरिणः)
१५—संक्षिप्तसारटीकायाम् (गोपीचन्द्रस्य)
१६—कातन्त्रपरिशिष्टे
१७—हरिनामामृत व्याकरणे
१८—नानार्थार्णवसंक्षेपे (केशवस्य)

१. भागवृत्तिसंकलनम् पृ०।
२. तदेव पृ० ४२।
२. भागवृत्तिसंकलनम्।

१९—अमरकोशटीकासर्वस्वे (सर्वानन्दस्य)
२०—हेतुबिन्दुटीकालोके (दुर्वेकमिश्रस्य)
२१—शब्दशक्तिप्रकाशिकायाम्
२२—व्याकरण दर्शनर इतिहासः (गुरुपदहालदारस्य)[1]

भागवृत्तेर्वैशिष्ट्यम्—

१—भागवृत्तिकारः लक्षणैकचक्षुष्कइत्यनुमीयते । अतएव तेन कवीनां त्रिमुनिलक्षणाननुगतप्रयोगाणां प्रामादिकत्वमुद्घोषितम् । दुर्घटवृत्तिकारशरणदेवेन त्रिमुनिलक्षणानामुद्भाविताभिर्विविधाभिर्व्याख्याभिः कल्पितामिर्नूतनव्युत्पत्तिभिरन्यैश्च नानाविधैरूपायै दुर्घटितलक्षणानां प्रयोगाणां साधनाय व्यग्रतां दर्शयित्वा लक्ष्याणां प्राधान्यं व्याकरणस्य च लक्ष्यानुसारित्वंप्रख्याप्य स्वस्यलक्ष्यैकचक्षुष्क प्रकटीकृतम् । भागवृत्तिकारस्तु लक्षणेभ्यस्तिलमात्रमपि विपरीतं लक्ष्यं प्रामादिकं व्याजहार । तथाहि—

(१) 'बाधकान्येव निपातनानि' इति सर्वादिसूत्र (१।१।१५) भाष्यं प्रमाणीकृत्य 'पुरातनमुनेर्मुनिताम्' (किरात० ६।१६) 'पुरातनी नंदीः' (माघ० १२।६०) इत्यत्र प्रोक्त'पुरातन'शब्दस्य प्रामादिकत्वमाख्याय भागवृत्तिकारेण लिखितम्—गतानुगतिकतया कवय : प्रयुञ्जते न तेषां लक्षणंचक्षुरिति[2] ।

अत्र पुरुषोत्तमदेवीयपरिभाषावृत्तौ (प० सं० ९९) 'अबाधकान्यपि निपातनानि भवन्ती' त्युपलभ्यते । तत्रत्यग्रन्थेन ज्ञायते यत् 'बाधकान्येव निपातनानि' इत्येव भाष्येष्टिस्तथापि लक्ष्यस्थित्यनुरोधात् जयादित्येन त्वियं दर्शिता 'अबाधकान्यपि निपातनानि इति (**पु० प० वृ० प० सं० ९९**) । तेन पुराणप्रोक्तेषु ब्राह्मणकल्पेषु (पा० ४।३।१०५) । इत्यत्र पुराणेतिनिपातनस्याबाधकत्वात् 'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यः (पा० ४।३।२३) । इति पुराशब्दात् ट्युट्युलो स्तुडागमो भवति । अतो दधतः पुरातनमुने र्मुनिताम् इति भारवेः (६।१०) पुरातनी नंदीरिति माघस्य च (१२।६०) कवेः प्रयोगौ सिद्धयतः । ज्ञापकं चात्र (अबाधकान्यापि निपातनानि भवन्ति (पु० प० वृ० प० सं० ९९) वृत्तिकारदर्शनग्रहाविष्टा दर्शयन्ति 'त्रयाणामित्यस्य सिद्धये त्रेस्त्रयः (पा० ७।१।५३) इति सूत्रम् । यदि बाधकान्येव निपातनानि भवन्ति तदा त्रीणामिति प्राप्ते तद्बाधकरूपेण निजां त्रयाणां गुणः इलौ (पा० ७।४।७५) इत्यत्र त्रयाणामिति निपातनेनैव सिद्धत्वात्तत् सूत्रं नारभ्येत । यदा त्वबाधकान्यपि भवन्ति तदा त्रीणामिति प्रसक्तस्याप्रयोगाय त्रेस्त्रय इति सूत्रमर्थ वद् भवति ।

अनेन ज्ञायते 'जयादित्यः' शिष्टप्रयोगं प्रधानं मन्यते तत् साधनाय त्रिमुनिवचनं यदि न पर्याप्तं तदान्यदीयवचनमप्याश्रयति । अथ च स त्रिमुनिवचनस्य व्याख्यान्तराश्रयणेन सामर्थ्यपरकव्याख्यानेन वा प्रयोगसाधनप्रयत्नं करोति । पुरुषोत्तमदेवस्याप्ययमेव स्वभावः । शरणदेवस्त्वत्र विषये परमोदारः । स तु कमपि प्रचलितं लौकिकं शास्त्रीयं वा प्रयोगमसाधुं नैव मन्यते । स्थितस्य गतिश्चिन्तनीया' इति वैयाकरणस्य स्वभावस्य यथा प्राचुर्यं शरणदेवे उपलभ्यते न तथाऽन्यत्र । चन्द्राचार्यवत् प्रचलितप्रयोगाणां साधनाय सर्वदा कटिबद्धः शरणदेवः सर्वथा प्रशस्यः । किन्तु यत्र चन्द्राचार्यः नूतनसूत्रनिर्माणस्वभावस्तत्र शरणदेवो मुनित्रयलक्षणैरेव दुर्घटप्रयोगसिद्धिकारकः । अस्तु—

भागवृत्तिकारो विमलमति र्लक्षणैकचक्षुष्कस्तत्रापि भाष्यस्य परमश्रद्धालुरनुगामी । स न कदापि भाष्यानुक्तं सूत्रार्थं व्याख्यातुं चेष्टते, न वान्यस्य युक्तियुक्तमपि भाष्यानुक्तं भाष्याक्षरप्रतिकूलं च वचनं स्वीकरोति ।

(२) स उक्तानुक्तदुरुक्तानां चिन्तां न करोति, न वा स्थितस्य गतिश्चिन्तनीयेति वैयाकरणधर्ममनुपालयितुं चेष्टते । त्रिमुनिवचनाक्षरविपरीतं महाकविप्रयोगमपि श्रुत्वा स झटिति वदति 'प्रामादिक' इति ।

तद् यथा—सिद्धान्तकौमुद्यां (पृ० ५२७) दृश्यते—

---

१. भागवृत्तिसकलनम् ।
२. उद्धरणमिदंसीरदेवीयपरिभाषावृत्तावुपलभ्यते (पृ० १३६-३७) ।

(क) कथं तर्हि आजघ्ने विषगविलोचनस्य वक्षः इति भारविः आहध्वं मा रघूत्तमम् इति भट्टिश्च ? प्रमाद एवायमिति भागवृत्तिः ।

(ख) कथं 'नभः समाक्रामति नष्टवर्त्मना, स्थित्वैकचक्रेण रथेन भास्करः' ? अपशब्द एवायमितिभागवृत्तिः ((शर० दु० वृ० १।३।४०) ।

(ग) 'कण्डूतिरसाधुः' इति भागवृत्तिः (भागवृत्तिसंकलनम् पृ० २२) ।

(घ) 'पाण्डुर'शब्दोऽसाधुरिति भागवृत्तिः (भा० वृ० सं० पृ० १५) ऊषसुषिमुष्कमधोरः (५।२।१०७) इति सूत्रे काशिका कारेण यद्यपि प्रोक्तम् 'नगपांसुपाण्डुभ्यश्चेति वक्तव्यम्' इति तथापि वचनमिदमनार्षम् । अतः स्वीकारानर्हम् इति विमलमतेरभिप्रायः ।

(ङ) 'त्वया ज्ञातो मया ज्ञात इत्यसाधुरिति भागवृत्तिः ।' (भाग० वृ० संक० पृ० २०) 'मतिबुद्धिपूजार्थेभ्यश्च (पा० ३।२।१८८) इति वर्तमानक्तेन भूतक्तस्य बाधात् ।

कथम्—अनेकेषाम् नानास्थान इति न्यासः उत्तरपदार्थप्रधानत्वान्नञ्समासस्य ।—अतएव भागवृत्तिकृता—अनेकेषामिति दुष्टा एवापशब्दा इति प्रोक्तम् (दुर्घटवृत्तिः (२।२।६) ।

मैत्रेयरक्षितस्तु द्वित्वादाप्येकत्वाध्यारोपादेकवचनम् । यदा त्वेकत्वाध्यारोपविषये द्वित्वादौ भेद आश्रीयते तदा वचनभेदः यथा [1]द्युद्भ्यः, वृद्भ्यः[2] इति पा० सूत्रयोः । एवंचानेकेषामित्यादयोऽपि प्रयोगा जिनेन्द्रादिषु दृश्यमानाः साधव एवेत्याह ।

(च) नप्त्री पौत्री सुतात्मजा (अमरकोशः २।६।२९) । इत्यमरोक्तः नप्त्रीति शब्दः पाणिनीयमतेन सिद्धयति । नप्तृनेष्टृ उ० २।९५ सूत्रेण निष्पन्नान्नप्तृशब्दात् ऋन्नेभ्यो ङीप् (पा० ४।१।५) इति ङीपि रूपसिद्धेः । भागवृत्तिकारस्तु नप्तृशब्दं स्वस्रादिषु पठित्वा तत्र न षट्स्वस्रादिभ्य इति ङीबभावमाह । एवंच तन्मतेन नप्त्रीत्यसाधुः । तथा चाह भट्टोजिदीक्षितः 'भागवृत्तिकारस्तु नप्तृशब्दमपि स्वस्रादिषु पठित्वा' नप्ता कुमारीत्युदाजहारेति (शब्द कौस्तुभः भा० ३ पृ० १० ।

(३) नूतनप्रयोगसाधनाय नूतनं वचनं न स्वीकरोति भागवृत्तिकारः ।

(क) यथा 'मणीव' इत्यादौ मणीवादीनां प्रतिषेधो वक्तव्य इति वचनं जयादित्येन स्वीकृतम् । परन्तु भागवृत्तिकारेण इवार्थे वकारोऽयमिति स्वीकृत्य तन्नूतनं वचनं नाङ्गीकृतम् । (भागवृत्ति संकलनम् पृ० ४) ।

भाषावृत्तौ (१।१।११) पुरुषोत्तमदेवेन प्रथमं जयादित्यस्य 'मणीवादीनां प्रतिषेधो वक्तव्य इत्येके इति ततश्च विमलमतेः इवार्थे वकारोऽयमित्यन्ये' इति मतं प्रदर्शितम् ।

(ख) दम्भेरेत्वं वक्तव्यम् ६।४।१२० (काशिका) श्रन्थेश्चेति वक्तव्यम् ६।४।१२२ (क शिका) (चकारस्यानुकसमुच्चायकत्वात् ग्रन्थेरपि) तेन देभतुः श्रेथतुः ग्रेथतुरित्यादिरूपाणि सिद्धयन्तीति यत्स्वीक्रियते वैयाकरणैस्तद् विमलमतये न रोचते; पूर्वोक्तानां वचनानामर्षत्वात् । (संक्षिप्तसारटीका तिङन्त ८०९) (भा० वृ० सं० पृ० ३५) ।

(४) यङ्लुकश्छान्दसत्वं स्वीकरोति भागवृत्तिकारः । तथाचोक्तम् भाषावृत्तौ पुरुषोत्तमदेवेनः—यङोऽचि च (२।४।७४) इत्यत्र चकारात् बहुलं छन्दसीति सर्वमनुवर्तते । तेन बाहुल्यादनच्यपि च्छन्दस्येव यङ्लुक् । भाष्ये[3] तु हुश्नुग्रहणज्ञापकबहुलाद् बोभवीतीत्येवं पदं भाषायां साधु । नान्यदिति भागवृत्तिः ।

---

१. पा० १।३।९१ ।

२. पा० १।३।९२ ।

३. ६।४।८७.

जयादित्यस्तु इह (यङोऽचि च (२।४।७४) इत्यत्र) चकारेण बहुलग्रहणमनुकृष्यते न तु च्छन्दसीति । तेन भाषायामनच्यपि यङ्लुक् । लालपीति वावदीति इत्याह ।

अत्र पुरुषोत्तमदेवो जयादित्यमनुमोदते उक्तं च तेन शिष्टैर्भाषायामपि यङ्लुक्प्रयोगाः क्रियन्ते यथा—

यदि देवो वरीवर्षि कोकिलो रोरवीति च
मयूरोऽपि नरीनर्ति मरीमर्मि तदा प्रिये । इति ।
'तेजांसि शंशमांचक्रुरिति भट्टिः ।
'हरिणा सह संख्यं ते बोभूत्विति यदब्रवीः
न जाघटीति युक्तौ तत् सिंहद्विरदयोरिव ॥
इति पाणिनेर्जाम्बवतीविजयकाव्यम् । (पु० दे० भा० वृ० २।४।७४)

एवं जङ्घा, चलाचलः, इत्यादि प्रयोगाद् यङ्लुक् भाषायामपि भवत्येव ।

चन्द्राचार्योऽपि लुगधिकारे यङो बहुलमिति (भाषाभागे) पठ्यते । काशिकायामपि छन्दोऽनुवृत्तिर्नेष्टेत्युक्तम् । केचित्तु यङोऽचि चेति सूत्रे छन्दसीत्यनुवृत्तिं विधाय भाषायां यङ्लुक्प्रयोगान् साधयितुं ज्ञापकमाश्रयन्ति । हुश्नुवोः सार्वधातुके (६।४।८७) इति सूत्रे हुश्नुग्रहणं 'योयुवति' 'रोरुवति' इत्यादौ यङ्युकि व्यावृत्यर्थं कृतं ज्ञापयति क्वचिद् भाषायामपि यङ्लुग् भवति, अन्यथा भाषायां यङ्लुकोऽभावात् योयुवतीत्यादिप्रयोगाणामसंभवात्तद् व्यावृत्तिदानमसंगतम् स्यात् इति वदन्ति तन्न युक्तम् प्रथमं छन्दसीत्यनुवर्तनम् ततो भाषायां यङ्लुको विधानाय ज्ञापकाश्रयणं न बुद्धिमत्तासूचकम्, प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात् ।

अतश्चन्द्राचार्येण यङो बहुलम् (१।१।८६) भाषाभागे पठितम् भाषावृत्तिकारेण पुरुषोत्तमदेवेन च (२।४।७४) सूत्रमिदं व्याख्यातम् भाषावृत्तौ ।

एवं पदन्नोमास् (६।१।६३) इति सूत्रस्य छान्दसत्वं, यदुक्तं भागवृत्तिकृता तदपि न, लोके एषां निर्बाधप्रयोगदर्शनात् । तथाचोक्तं 'भागवृत्तिसंकलने' (पृ० ३१) कातन्त्रपरिशिष्टवृत्तिं समुद्धरता श्री युधिष्ठिरमीमांसकेनः —भागवृत्तिकृता छान्दसं (६।१।६३) वचनमित्यभ्युपगतम् । न तन्मतमाद्यानां वृत्तिकृताम्, न च चन्द्रस्य । स्मार्ताश्च भाषायामपि प्रयुक्तवन्तः इति ।

(५) केचित्तादृशाः प्रयोगा ये भागवृत्तिमतेनैव साधवो यथा 'अक्षिकाणः' इति समस्तप्रयोगोऽसाधुः । तृतीया तत्कृतार्थेन गुणवचनेन (पा० २।१।३०) इत्यत्र तत्कृतार्थेन गुणवचनेनेत्युक्तत्वात् तृतीयान्तं तृतीयार्थकृतगुणवचनेनैव समस्यते । एवंच शंकुलाखण्ड इत्यत्रैव समासः स्यात्, खण्डस्य शंकुलया कृतत्वात् । अक्ष्णा काण इत्यत्राक्षिकाण इति न स्यात् अक्ष्णा काणत्वगुणलब्धये न किमपि कृतमिति । अतएव भट्टोजिदीक्षितः—तत्कृतेति किम् अक्ष्णा काण इति प्रत्युदाहृतम् (सि० कौ० पृ० २११) नहि अक्ष्णा काणत्वं कृतम् किन्तु कर्मादिनैवेति (तत्त्वबोधिनी (पृ० २११) ।

भागवृत्तिकारस्तु अक्ष्णा काणः अक्षिकाण इत्यत्र समासं स्वीचक्रे ।

अक्ष्णा काणः अक्षिकाण इति भागवृत्तिः (भाग वृ० संक० पृ० १३) ।

भागवृत्तिमते अक्षिकाणः इति समस्तशब्दः साधुः (व्याकरण दर्शनेर इतिहास पृ० २१८) वेमुश्च केचिद्दुधिरमिति (सप्तशती २।५७) श्लोके वेमुरित्यत्रैत्वाभ्यासलोपौभागवृत्तिमतेनैव सिद्धयतः । (सि० कौ० टुवम् धातुः पृ० ४४१) ।

जयादित्यान्मतभेदो यथा—

(१) (क) युवतीनां समूहो यौवनम् इत्याह भागवृत्तिकारः इति परिभाषावृत्तिः सं० पृ० ५८।

(ख) 'युवतिशब्दाद् यौवत' मिति जयादित्यः। भस्याढे तद्धिते (पा० ६।३।३५ वा) इति पुंवद्भावे यौवनमिति। भागवृत्तिः (भाषावृत्तिः ४।२।३८)।

(ग) युवतीनां समूह इत्यर्थे यौवतमिति जयादित्यः। पुंवद्भावात् यौवनमिति भागवृत्तिः अतएव—

'यमुपास्ते पुण्यभाजं कलाकुशलयौवनम्
सरसं नित्यशस्तन्वि सफलं तस्य यौवनम्'।

इति तन्मते प्रयोगः (भा० वृ० सं० पृ० २५)।

(२) साहाय्यमित्यस्य साधुत्वं जयादित्येन स्वीक्रियते भागवृत्तिकारेण तु न स्वीक्रियते। तथाचोक्तम् भाषावृत्तौ योपधाद् गुरूपोत्तमाद् वुञ् (५।१।१३२) इति सूत्रे साहाय्यमित्यपि ब्राह्मणादित्वा (पा० ५।१।१२४) दिति जयादित्यः। नेति भागवृत्तिः। (दुर्घट पृ० ८६)।

एतैः पूर्वोक्तै र्वैशिष्ट्यैरस्य लक्षणैक-चक्षुष्कत्वं प्रतीयते। यदि सम्पूर्णा भागवृत्तिरूपलब्धा स्यात्तदाऽधिकं किमपि शक्यते वक्तुं तद् रचनादिविषये इति।

न्यासकारो जिनेन्द्रबुद्धिः

जयादित्यवामनविरचितायाः पाणिनीयाष्टाध्याय्याः काशिकावृत्तेर्न्यासनाम्ना व्याकरणनिकाये विख्याता टीका काशिकाविवरणपञ्जिका (पञ्जिकेत्यपि बहुत्र दृश्यते) जिनेन्द्रबुद्धिना बौद्धेन निर्मिता। काशिकावृत्तेरुपलब्धासु सर्वासु टीकास्वेषैव प्राचीनतमेति विदुषां मतम्।

व्याकरणशास्त्रसिद्धान्तानां स्पष्टतया प्रतिपादनादियं टीका न्यासशब्देनाभिहिता। किंच काशिकायां निहितानि यानि यानि रत्नान्यासन्, तान्यत्र यथावत् स्थापितानि सुरक्षितानि च सन्तीति दृष्ट्वा सूक्ष्मदर्शिभिः समालोचकैरस्या नाम न्यासेति कृतम्। 'पुमानुपनिधिर्न्यासः' इत्यमरकोशे (२।९।८१) निक्षेपस्योपनिधि न्यासेति नामद्वयं दृश्यते। 'सुरक्षितमत्र मे धनं तिष्ठतु' इति बुद्ध्या यद्धनं कस्यापि विश्वासपात्रस्यान्तिके न्यस्यते तन्न्यासः। नाटकादौ प्रयोगो दृश्यतेऽस्मिन्नर्थेऽस्य शब्दस्य 'दुःखं न्यासस्य रक्षणम्' इत्यादौ। न्यस्यतेऽसौ इति न्यासः (कर्मणि (पा० ३।३।१९ इति) घञ् असुक्षेपणे (दि० प० से०) धातोः अ० को० रामाश्रमी) अनया व्युत्पत्त्या यद्वस्तु निक्षिप्यते तन्न्यासो भवितुमर्हति। न्यस्यतेऽस्मिन् इत्यधिकरणे बाहुलकाद् घञ्सिद्धस्य रूपस्य टीकार्थो भवितुं शक्नोति। न्यसनं न्यास इति भावे प्रथमं न्यासशब्दं संसाध्य न्यासः अस्यास्तीति न्यासोऽस्मिन्नस्तीति व्युत्पत्त्या वा अर्शाद्यचा न्यासशब्दः साध्यः तस्य च टीकापरत्वं संभवति।

व्याकरणसिद्धान्तस्य काशिकाप्रतिपाद्यभावस्य वा सुरक्षितनिक्षेपस्थानत्वाद् न्यासेत्यस्याः पञ्जिकाया अन्वर्थं नाम गुणज्ञैः कृतं प्रतीयते।

न्यासस्य तात्पर्यप्रतिपादनपद्धतिः सरला मनोहारिणी च प्रसिद्धशब्दाऽप्यस्य भाषा, गम्भीरार्था। अत्र शास्त्रार्थस्य स नव्यन्यायवाग्जालप्रकारो न दृश्यते, यत्र पतनादनन्तरं शास्त्रस्य मूलतत्वं तथैव विलुप्तं जायते जातं वा, यथा मरुस्थलसम्पर्कात् प्रसन्नसलिला सरिता सरस्वती विलुप्ता जाता। व्याकरणग्रन्थस्य स्वक्लिष्टतायै कुख्यातस्य विषयप्रतिपादनमेतावत्या ईदृश्या च सरलपद्धत्या कृतं न विलोक्यतेऽन्यत्र। इदमेव कारणमस्ति यत् न्यासकारस्य बौद्धधर्मानुयायिनोऽपि पाणिनीयव्याकरणपरम्परायां सादरं नाम परिगण्यते विद्वद्भिः।[1]

(१) न्यासकारो जिनेन्द्र-बुद्धि **बौद्धः**। न्यासस्य[2] पुष्पिकायां 'बोधिसत्वदेशीयाचार्य इतितदुपाधेरुपलम्भात्।' ईषदसमाप्तौ कल्पब्देशीयरौ (पा० ५।३।६७) इति बोधिसत्त्वशब्दात् देशीयर्प्रत्यये कृतेऽस्य शब्दस्य बोधिसत्वतुल्यत्वमर्थः सिद्ध्यति। तेन बौद्धसम्प्रदायेऽस्य महानादर आसीदिति गम्यते।

यत्तु बौद्धसम्प्रदाये बोधिसत्वस्योद्भावनात्वावश्यमस्ति किन्तु बोधिसत्वदेशीयस्य न। किमीदृशी कल्पना तत्र भवितुं शक्नोति ? यथा योगिनां वर्गद्वयं स्वीक्रियते, युक्तो युञ्जानश्च, तथैव बोधिसत्व-बोधिसत्वदेशीयेतिवर्गद्वयं बौद्ध सम्प्रदाये ऽपि शक्यते स्वीकर्तुम् तत्र किं बोधिसत्त्वदेशीयः बोधिसत्वस्य पूर्वभूमिरित्यादिकुतर्कं विधाय जिनेन्द्रबुद्धे बौद्धत्वं संदिह्यते कैश्चित्तन्न

---

१. द्रष्टव्या न्यास प्रस्तावना पृ० १९।

२. द्रष्टव्या —न्याससहितायाः काशिकायाः प्रथमाद्यध्यायावसाने न्यासपुष्पिका।

बोधिसत्त्वदेशीयेत्युपाधिर्जिनेन्द्रबुद्धेर्बोधिसत्वसाम्यं प्रकटीकुर्वन् तस्य तत्सम्प्रदाये समादरभावं सूचयति। सचोपमालंकारस्तस्य बौद्धत्वं तत्सम्प्रदाये बोधिसत्त्वबोधिसत्त्वदेशीयेतिवर्गद्वयकल्पनां विनाऽपि प्रमाणीकर्तुं शक्यत इति न कोऽपि विरोधो दृश्यते।

(२) इन्द्रवरुणभव (पा० ४।१।४९) सूत्रस्य मुद्गलाच्छन्दसीति वार्तिकं व्याचक्षाणेन भट्टोजिदीक्षितेन मनोरमायां न्यासकारः वेदवाह्य इत्युक्तम्।[1]

(३) बौद्धधर्मत्वादेवायं न्यासकारः दीक्षितेन स्वग्रन्थे सर्वत्रोपेक्षितः। तेन स्वग्रन्थे हरदत्तस्यनाम गृहीतं, किन्तु जयादित्यजिनेन्द्रबुद्धयो र्नामाक्षरं श्रीमुखेन न कदाप्युच्चारितम्। मनोरमायां न्यासकारः काशिकाकार इति तूपलभ्यते किन्तु जयादित्यः जिनेन्द्रबुद्धिश्चेति नाम न दृश्यते प्रायः।

(४) उदयनाचार्येण स्वकीये 'आत्मतत्वविवेके' प्रोक्तम्:[2]—,कथं पुनः सुगताद्यागमेषु अनादरश्छान्दसानाम्, वेदविद्वेषिपदर्शनान्तःपातिपुरुषप्रणीतत्वादीदिति मा शङ्किष्ठाः, जिनेन्द्र-जगदिन्द्र-प्रभृतिप्रणीतेष्वप्यादरात्। तत् कस्य हेतोः, महाजनपरिगृहीतपूर्वागमाविरुद्धतया तदनुसारित्वात्। सन्दर्भोऽयं 'न्यास'मधिकृत्यैव लिखित इत्यनुमीयते उदयनस्य काले (खिष्टैकादशशताब्दीमध्यभागे) ब्राह्मणवैयाकरणैरपि पाणिनीयन्याकरणमधीयानै र्न्यास एवाधारीचक्रे। अतः क्षुब्धस्यसम्प्रदायविशेषस्य परितोषाऽर्थमुदयनाचार्येणेदृशी पङ्क्ति लिखिता।

अनेन सन्दर्भेण जिनेन्द्रबुद्धे बौद्धत्व मवगम्यते। अवगम्यते च जिनेन्द्रबुद्धे र्न्यासस्य विद्वत्समाजे प्रचारः।

न्यासकारेण क्वापि स्वविषये किंचिन्मात्रमपि नोक्तम्। अतोऽन्तःसाक्ष्याभावाद् बाह्यसाक्ष्येणैव तस्येतिवृत्तिविषये किमपि शक्यते वक्तुम्। काशिकाया वृत्तेष्टीकायाः पदमञ्जर्याः कर्ता हरदत्तः खिष्टैकादशशताब्द्याः चरमे चरणे सम्भावितकालः स्वटीकायां न्यासकारस्य जिनेन्द्रबुद्धेः सनामोल्लेखं चकार[3] अतो न्यासकारस्य समयः खिष्टैकादशशताब्दीचरमचरणात्प्रागेवावगन्तव्यः।

डा० याकोबी भविष्यत्-पुराणं प्रमाणीकृत्य हरदत्तस्य देहावसानसमयं ८७८ तमम्[4] ईश्वीय वर्षं स्वीकृतवान्। अनेनाऽपि प्रमाणेन न्यासकारस्य कालः ८५० तमात्खिष्टाब्दात् पश्चान्न स्वीकर्तुं शक्यते।

अनेन खिष्टसप्तशत (७००) तमाब्दे तत्समीपपूर्वापराब्दे वा वर्तमानेन वामनेनापि लिखितायाः काशिकाया वृत्तेष्टीका कृता। अतोऽस्य समयेन ततः परेण भाव्यम्।

मैत्रेयरक्षितेन (१०८३-११०८ ई०) न्यासमधिकृत्य 'तन्त्रप्रदीपनाम व्याख्या लिखिता। मैत्रेयरक्षिताच्च न्यास कारेण पूर्ववर्तिना भाव्यम्।

इत्थं न्यासकारस्य जिनेन्द्रबुद्धेः कालः खिष्टनवमशताब्द्याः प्रथमश्चरण इतिस्वीकरणे न काप्यापत्तिः।

'अनुत्सूत्रपदन्यासां इति शिशुपालवधश्लोके श्लिष्टस्य 'न्यास' पदस्य न्यासग्रन्थपरकमेकमभिधेयमङ्गीकृत्य जिनेन्द्रबुद्धेः न्यासग्रन्थस्य च समयः शिशुपालवधस्य रचनाकालात् पूर्वमिति निर्णेतुं न शक्यते, न वा माघकविर्जिनेन्द्रबुद्धेरनन्तरभावीति शक्यते समर्थयितुम्, व्याकरणनिकाये बहूनां न्यासग्रन्थानां सद्भावस्य प्रमाणोपलब्धेः महाकविमाघस्य निर्दिष्टश्लोके प्रयुक्तस्य न्यासपदस्य जिनेन्द्रबुद्धिकृतन्यासपरकत्वस्वीकारे विनिगमनाभावात्।

---

१. काशिकाप्रस्तावना पृ० ८५।
२. आत्मतत्वविवेकः पृ० ९०७ तथा इन्ट्रोडक्शन आफ प० वृ०, ज्ञा, स०, का० चक्रम् पृ० ५।
३. पदमञ्जरी ४।१।४१।
४. सं० व्या० शा० इति० भाग १० पृ० ४६४।

[1]भर्तृहरिविरचितमहाभाष्यदीपिकायामपि कस्याप्येकस्य न्यासस्योल्लेखो दृश्यते। एको न्यासः पूज्य-पादेति नाम्ना प्रख्यातेन देवनन्दिनाऽपि पाणिनीयाष्टकमधिकृत्य[2] 'शब्दावतार' नामको लिखित इति ज्ञायते।

एकस्यापरस्य मल्लवादिसूरिविरचितस्य विश्रान्तविद्याधरव्याकरणटीकात्मकस्यापि[3] न्यासस्योल्लेख उपलभ्यते।

भामहेनाप्येकस्य न्यासकारस्योल्लेखः स्वीयेऽलंकारशास्त्रे कृतः यथा—"शिष्टप्रयोगमात्रेण न्यासकारमतेन वा। तृचा समस्तषष्ठीकं न कथंचिदुदाहरेत्। सूत्रज्ञापकमात्रेण वृत्रहन्ता यथोदितः अकेन च न कुर्वीत वृत्तिस्तद् गमको यथा इत्यत्र"। जिनेन्द्रबुद्धिन्यासे वृत्रहन्तेत्यत्र जनिकर्तुः प्रकृतिः (पा० १।४।३०) इति ज्ञापक-बलेन समासविधान-चर्चा नोपलभ्यते अतो भामहाभिप्रेतो न्यासो न 'जिनेन्द्र'न्यासो भवितुमर्हति। पूर्वोक्तान्यासा जिनेन्द्रन्यासतो भिन्ना इति निश्चितम्। किंच न्यासशब्दो व्याकरणनिकाये सूत्रस्वरूपविशेषार्थे यत्र तत्र प्रयुक्तः। 'यथान्यास'मेवास्तु इति पतञ्जलिग्रन्थेऽनेकत्र प्रयुक्तोयं न्यासशब्दः। "अकः सवर्णे दीर्घः" ६।१।१०१ इत्यस्य स्थानेऽकोऽकि दीर्घ इति न्यासः करिष्यते इति वैयाकरणैरुच्यते।

अतो माघकाव्ये प्रयुक्तस्य न्यासशब्दस्य जिनेन्द्रबुद्धिकृतन्यासपरकत्वनिर्धारणमसम्भवम्। एवं न्यासकारस्य कालः माघाद् भामहाद्वा प्रागासीदिति कथनमसंगतमेव।

न्यासटीकायावैशिष्ट्यान्यधो दीयन्ते संक्षेपेणः—

पणिनीयसूत्राणां सम्यक्, झटिति च तात्पर्यज्ञानाय पाणिनीय—सूत्राष्टकस्य कुणिश्वोभूतिदेवनन्दिदुर्विनीत-चुल्लिनिल्लूरादिविरचितासु वृत्तिषु करालेन कालेन कवलीकृतासु वैयाकरणानां सूत्रार्थोदाहरणप्रत्युदाहरणावबोधवार्ति-कार्थनिर्णय-भाष्यरहस्यसंवेदनायैकमात्रशरणीभूतायाः काशिकावृत्तेस्तात्पर्यप्रकोष्ठप्रवेशाय काशिकाविवरणपञ्जिकैवैका कुञ्जिका। हरदत्तमिश्रेण विरचिता पदमञ्जरी शास्त्रार्थविषयं महता घटाटोपेन वर्णयन्त्यपि ग्रन्थार्थाधिगमाय न छात्राणां तथोपयोगिनी यथा न्यासनाम्नी बौद्धाचार्यविरचितेयं व्याख्येति सर्वैः काशिकापरिशीलकैर्विद्वद्भिरनुभूयते मन्यते च।

अस्याः व्याख्याशैली पाण्डित्यपूर्णा प्रौढा, ग्रन्थरहस्यावतारकावतरण-शोभिता, उदाहरण-प्रत्युदाहरण-व्युत्पत्तिदर्शिका, यथावश्यकसूत्र-निर्देशसहिता, व्याकरणसकलरहस्यस्फोटनयुक्ता, अधिगमितयाथातथ्या चेति हरतीयं शास्त्रावबोधतद्रहस्यजिज्ञासूनां मनांसि।

किमपि नवीनतत्वोद्भावनं तत्समर्थनं चात्र दृश्यते। दृश्यताम्:—भूवादयो धातवः १।३।१ इति सूत्रस्य न्यासग्रन्थः।

---

१. तस्मादनर्थकमन्तग्रहणं दृश्यते (कृन्मेजन्तः १।१।३९)। न्यासे तु प्रयोजनमन्तग्रहणस्योक्तम्। स्व-भावैजन्तप्रतिपर्थम्। इह मा भूत् कुम्भकारेभ्य इति भर्तृहरिकृतमहाभाष्यदीपिका पृ० ३१४ (सं० व्या० का इति० भाग—१ पृ० ३६१ उद्धृतमुद्धरणम्)।

२. "न्यासं जैनेन्द्रसंज्ञंसकलबुधनुतं पाणिनीयस्य भूयो न्यासं शब्दावतारं मनुजततिहितं वैद्यशास्त्रं च कृत्वा। यस्तत्वार्थस्य टीकां व्यरचदिह भात्यसौ पूज्यपादः स्वामी भूपालवन्द्यः स्वपरहितवचःपूर्णदृग् बोध-वृत्तः" ॥ जैन सा० और इति० पृ० १०७ टि० १ व्या० शा० इति० ४१३।

३. "शब्दशास्त्रे च विश्रान्तविद्याधरवराभिधे—न्यासं चक्रेऽल्पधीवृन्दबोधनाय स्फुटार्थकम्"। प्रभावक-चरितान्तर्गतमल्लवादिप्रबन्धः निर्ण० सा० सं पृ० ७८ सं० व्या० इति ५४२।

'भूवा' शब्दस्य स्थाने भूरादिर्येषाम् इतिबहुव्रीहौ आदिशब्दे परतो यदि संहितया निर्देशस्तदा 'इको यणचि' ६।१।७७ इति यणादेशे कृते भ्वादय इति भवितव्यम् । अथासंहितया निर्देशस्तदाभू आदय इति, तत् कुतोऽयं वकारः ? यस्मिन् सति भूवादय इति निर्देशोभवतीयाशङ्क्य भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते, भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः 'इति काशिकायामुद्धृतंभाष्यश्लोकं व्याचक्षाणेन न्यासकारेण लिख्यते' भूवादीनां संज्ञिनां निर्देशेऽयं वकारो मङ्गलार्थः प्रयुज्यते । मङ्गलमर्थः प्रयोजनं यस्य स तथोक्तः । स मङ्गलशब्दो धर्मपर्यायः धर्मार्थं इति यावत् । यथा वेदे 'त्रियम्बकं यजामहे' इत्यत्र यकारस्य दृष्टप्रयोजनं नास्तीत्यदृष्टार्थो धर्मार्थ एव पाठस्तस्य । अथवा अपूर्वस्य वस्तुनोलाभो लोके मङ्गलं सम्मतम् यथा प्रातर्दध्यादीनाम्, तथेहापि वकारस्यापूर्वस्य लाभो मङ्गलं प्रशस्तम् । प्रशस्तार्थो मङ्गलशब्दः । तथा चोक्तम्:—मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीर-पुरुषकाणि भवन्ति आयुष्मत्पुरुषाणि च । इह चादौ वृद्धिशब्दो[1] मङ्गलम्, मध्ये[2] चायं वकारः अन्ते च स्वरितोदयम्[3] इत्युदयशब्दः । इत्थमत्र त्रियम्बकशब्दवत् भूवादि शब्दस्य साधुत्वमुक्तम् । तस्य च प्रयोगस्य प्राशस्त्यमपि दर्शितम् ।

मङ्गलादीनि मङ्गलमध्यानीत्यस्यात्र नूतनं व्याख्यानमुपलभ्यते । वृद्धिरादैच् (पा० १।१।१) वृद्धिशब्द आदौ प्रयुक्तः भूवादय (पा० १।३।१) इत्यत्र, वाशब्दो भूवादिशब्दस्य मध्ये प्रयुक्तः नोदात्तस्वरितोदय ८।४।६७ इत्यत्रोदयशब्दः स्वरितोदयशब्दस्यान्ते प्रयुक्त इत्यत्र व्याख्याने नूतनत्वम् । अतएवास्य भाष्यस्य सुसंगतिः । अन्यथा 'अथ शब्दानुशासनम्' इति वचनमपाणिनीयम् अर्थात् पातञ्जलमिति स्वीकुर्वतां मतेनाऽपि वृद्धिरादैच् सूत्र-स्यादिमसूत्रत्वात्तत्र प्रयुक्तस्य वृद्धिशब्दस्यादिमङ्गलसम्पादकत्वस्वीकारस्य सम्भवेऽपि भूवादयो धातवः (पा० १।३।१) इति सूत्रस्याष्टाध्यायीमध्यगत्वभावात् अत्रत्य 'वा' शब्दस्य शास्त्रमध्यनिष्ठमङ्गलार्थत्वस्वीकारासंभव एव । एवम् अ अ (पा० ८।४।६८) इति सूत्रस्यैवाष्टाध्यायीचरमसूत्रत्वान्नोदात्तस्वरितोदय ८।४।६७ इति सूत्रस्थोदयशब्दस्यान्त-मङ्गलार्थस्वीकारोऽसंगत एव स्यात् ।

'अथ शब्दानुशासनमित्यस्य पाणिनीयप्रथमसूत्रत्वमङ्गीकुर्वतां बौद्धवैयाकरणां मतेन तु वृद्धिरादैजिति-शास्त्रस्य प्रथमसूत्रत्वाभावाद् वृद्धिशब्दस्यादिमङ्गलसम्पादकताऽपि विरुद्धा स्यात् ।

न्यासव्याख्याने तु सर्वं सामञ्जस्यम् । यतस्तन्मतेन मङ्गलम् आदौ मध्येऽन्ते च येषाम् तादृशानि शास्त्राणि वृद्धिरादैजित्यादीनि सन्ति । तत्रादौ वृद्धिशब्दः प्रयुक्तोऽस्त्येव । भूवादिरितिशब्दे वकारो मध्ये प्रयुक्तो वर्तते । 'स्वारितोदय' इति शब्देऽन्ते प्रयुक्त एव उदयशब्दो मङ्गार्थकः ।

इदमप्यत्र बोध्यम्—इकां यण्भिर्व्यवधानं बौद्धैर्यैयाकरणैः प्राचीनैयाकरणैरिव साधु मन्यते । भाषा-वृत्तिकारेण बौद्धेन पुरुषोत्तमदेवेन ६।१।७७ सूत्रस्य वृत्तावेकं वार्तिकमलेखि—'इकां यण्भिर्व्यधानं व्याडिगोलवयोरिति वक्तव्यम्; उदाहरणे च दत्ते 'दधियत्र दध्यत्र' । तेन स्वर्णः सुवर्णः, भ्वादयः भूवादय इत्यादि प्रयोगाः सिद्धाः ।

पुरुषोत्तमदेवादपि प्राचीनेन 'अभयनन्दिना' एतादृशं मतं संग्रहस्येति लिखितम्[4] ।

---

१. वृद्धिरादैच् १।१।१ ।

२. भूवादयो धातवः १।३।१ ।

३. नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ८।४।६७ ।

४. इकां यण्भिर्व्यवधानमेकेषामिति संग्रहः । जैनेन्द्रमहावृत्तिः १।२।१ ।

पं० क्षितीशचन्द्रचटर्जीमहाभागेन 'टेक्नीकलटर्म्स आफ संस्कृतग्रामरे' स्वपुस्तके 'वायुवम्बरयोरिवे'त्यत्र यण्भिरिको व्यवधानस्य लक्षणार्थः भूवादयो धातव इत्यत्र वकार इत्युक्तम्।[1]

हेमचन्द्रस्य स्वोपज्ञवृहद्वृत्तौ[2] पाल्यकीर्तेः स्वोपज्ञाऽमोघावृत्तौ[3] यण्व्यवहितरूपस्य पाक्षिकसाधुत्वं निर्दिष्टमस्ति।

तैत्तरीयादिशाखास्वपि इग्व्यवहितस्य यणः प्रयोगसद्भावस्य प्रमाणमुपलभ्यते। जैमिनिब्राह्मणे 'प्राणः अपानः व्यान इत्यत्राष्टावक्षराणीत्युक्तम्। तत्र प्राण इत्यत्र द्वे, अपान इत्यत्र त्रीण्यक्षराणि, व्यान इत्यत्र च त्रीण्यक्षराणि इति मिलित्वाष्टावक्षराणि भवन्तीति लिखितमस्ति। तत्र व्यान इति मुद्रणाशुद्धिरनुमीयते वियान इति पाठेन भवितव्यम्। अन्यथा तत्र तिसृणां मात्राणां कुतः सम्भवः? वियान इति च रूपं व्यवहितयणः प्रयोगस्य सद्भावएव सम्भवति।[4]

बोधायनगृह्यसूत्रेऽपि 'त्र्यहे त्रियहे' इत्युभयविधप्रयोगो दृश्यते।[5]

पाणिनिः स्वकाले यण्व्यवहितानां प्रयोगाणां लोकेऽप्रचलनं विलोक्य तत्साधुत्वसम्पादकं नियमं न लिलेख साक्षात्, परन्तु भूवादयो धातव इति वकारव्यवहितं प्रयोगं विधाय तादृशं रूपं स्वीकृतवानेव। अतएव महाभारते[6] कालिदासस्य[7] काव्ये चोपलब्धस्य त्रियम्बकपदस्यासाधुत्वं न कल्पनीयम्। तद्वारणायार्षप्रयोगत्वं, कवीनां निरङ्कुशत्वं पाठभेदप्रयासश्च तत्र तत्र कल्पितानि वृथैव।

यद्यपीदं सर्वं चान्द्रव्याकरणप्रभावितं दृश्यते चान्द्रधातुपाठे प्रथमस्य गणस्य संज्ञा भूवादिरिति दत्ताऽस्ति नतु भ्वादिरिति। इगचोर्मध्ये यण्व्यवहितस्य भूवादिरिति रूपस्यापि सद्भावः स्वीकारश्च प्राक्कालादेव वर्तते इति प्रतीयते तथापि न्यासकारेण 'भूश्च वाश्चेति द्वन्द्वः आदिश्चादिश्चेति व्यवस्थाप्रकारवाचिनोरेकशेषः। ततो भूवौ आदी येषामिति बहुव्रीहिस्तेन भूप्रभृतयो वासदृशा इत्यर्थः। सादृश्यं च प्रयोगभेदेन' इत्यादि क्लिष्टं व्याख्यानं[8] न्यक्कृत्य तन्मतं स्फोटितमिति तस्य कृतज्ञता स्वीकार्यैव।

किंच न्यासकारेण 'वृत्तौ भाष्ये तथा धातुनामपारायणादिषु' इति श्लोकव्याख्यावसरे 'धात्विति' प्रतीकमादाय धातवो भूवादय इत्युक्तं नतु भ्वादय इति। अथ च भूवादयो धातव इति सूत्रव्याख्यावसरे स्वकाशिकाविवरणपञ्जिकायां 'जिनेन्द्रबुद्धिनोक्तम्' भूरादि यैषां ते **भूवादयः**। भूवादयो दशगणीपठिता अत्र गृह्यन्ते। भू इत्येवमादयः

---

१. "भूवादीनां वकारोऽयं लक्षणार्थः प्रयुज्यते। व्यवधानमिकोयण्भिर्वायुवम्बरयोरिव। टेक्नीकल टर्म्सआफ संस्कृत ग्रामर पृ० ७१।

२. केचित्तु इवर्णादिभ्यः परान् यरलवानिच्छन्ति-दधियत्र, तिरियङ् मधुवत्र, भूवादयः। हैमव्याकरणम् १।२।२१।

३. शाकटायन व्या० १।१।७३ सूत्रलघुवृत्तौ इको यण्भिर्व्यधानम् इत्येके पृ० २३ अमोघावृत्तो पृ० १५ इकोयण्भिर्व्यधानमित्येके।

४. प्राण इति द्वे अक्षरे, अपान इति त्रीणि, व्यान इति त्रीणि तदष्टौ सम्पद्यन्ते जैमिनिब्राह्मणः १।११२।

५. त्रियहे पर्यवेते 'बोधयानगृह्यसूत्रम् ५।२।

६. येन देवस्त्रियम्बकः (महाभारतशान्तिपर्व ९९)।

७. त्रियम्बकं संयमिनं ददर्श (कुमारसंभवम् ३।४४) व्यकीर्यत त्र्यम्बकपादमूले (कु० सं० ३।६१)।

८. प्रौढमनोरमाशब्दरत्नम् पृ० ८६।

शब्दा धातुसंज्ञका भवन्तीत्यनेन गणपाठेनैवेयं धातुसंज्ञा विधीयते । तेन अणपयति कडुपयतीत्येवमादीनां धातुसंज्ञा न भवति । यद्येवम् या-वा-दिव इत्येवमादीनां सर्वनामविकल्पस्वर्गाभिधायिनां धातुसमानशब्दानामक्रियावचनानामपि धातुसंज्ञा प्राप्नोतीति कस्यचिद् भ्रान्तिः स्यात्, अतस्तन्निराकर्तुमाह काशिकाकारः—धातुशब्दः पूर्वाचार्यसंज्ञा । ते च क्रियावचनानां संज्ञां कृतवन्तः । तदिहापि पूर्वाचार्यसंज्ञाश्रयणात् क्रियावाचिनामेव भूवादीनां धातुसंज्ञा विधीयत इति । काशिकाक्षराणि व्याकुर्वता जिनेन्दुबुद्धिना पुनर्लिख्यतेः—लघ्वर्थं हि संज्ञाकरणमिच्छन्त्याचार्या इत्येकाक्षरायां संज्ञायां कर्तव्यायां महत्याः **पूर्वाचार्यसंज्ञाया यदाश्रयणं, तस्यैतत् प्रयोजनं यथाविधानां ते धातुसंज्ञां कृतवन्तः, तथाविधानामेवैषा संज्ञा यथा स्यादिति** । ते च क्रियावचनानामेव धातुसंज्ञां विहितवन्तः । तदिहापि पूर्वाचार्यसंज्ञाश्रयणात् क्रियावचनानामेव धातुसंज्ञा विधीयते तेन या-वा-दिव इत्येवमादीनां धातु-समान-शब्दानामक्रियावचनान्न भवतीति भावः ।

इत्थं भूश्च वाश्चेत्यादिक्लिष्टव्याख्यानमनाश्रित्यापि न्यासकारेण क्रियावाचित्वलाभोपायः दर्शितः, यण्-व्यवहितरूपस्य च साधुता संसाधिता ।

इत्थं बहुविधं न्यासवैशिष्ट्यं विस्तरभयान्न लिख्यते ।

काशिकायाः द्वितीया प्रसिद्धा व्याख्या पदमञ्जरी न्यासस्याक्षराण्यपि गृहीतवती किमुत तदीयतात्पर्याणि ।[1]

१. काशिकान्यासपद० (भा० २ पृ० ३८४) ग्रन्थोद्रष्टव्यः ।

वामनः—लिङ्गानुशासनस्य कर्ता

चत्वारो वामनाः संस्कृतशास्त्रकर्तारो दृश्यन्ते ।[1] तत्र प्रथमो विश्रान्तविद्याधराऽऽख्यस्य जैनव्याकरणस्य कर्ता । द्वितीयोऽस्ति काशिकायाः वृत्ते रचयिता, तृतीयोऽलंकारशास्त्राचार्यः काव्यालंकारसूत्रवृत्तयोः कर्त्ता चतुर्थश्च लिङ्गानुशासनस्य कर्ता । काशिकाकारस्तेभ्यस्त्रिभ्योऽपि भिन्न[2] इति प्रामाणिकाः ।

ममाप्येतदेव मतम्, निम्नलिखितप्रमाणोपलब्धेः ।

१. पुरुषोत्तमदेवस्य भाषावृत्तौ अनेकस्थलानीदृशान्युपलभ्यन्ते, यत्र भागवृत्तिकारः काशिकां खण्डयति, तथाहि साहाय्यमिति ब्राह्मणादित्वादिति जयादित्यः, नेति भागवृत्तिः ।[3]

२. कथमद्यश्वीनो वियोगः विजायते इत्यस्यानुवृत्तेरिति जयादित्यः स्त्री-लिंग निर्देशात् उपमानस्याप्यसंभवादिति भागवृत्तिः ।[4]

३. इह समानस्येतियोगविभागः, तेन सपक्षसधर्मसजातीयाः सिद्धयन्तीति वामनवृत्तिः । अनार्षोऽयं योगविभागः । तथा ह्यव्ययानामनेकार्थत्वात्, सदृशार्थस्य सहशब्दस्यैते प्रयोगाः कथं नाम समानपक्षइत्यादयोऽपि भवन्तीति भागवृत्तिः[5]

४. इशिग्रहणादिह पूरुषो नारक इत्यादावप्ययं दीर्घ इति वामनवृत्तिः । अनेनोत्तरपदे विधानादप्राप्तिरिति पूरुषादयो दीर्घोपदेशा एव संज्ञाशब्दा इति भागवृत्तिः[6] ।

एषु आदिमोद्धरणद्वये जयादित्यस्य चरमोद्धरणयुगले वामनस्य च वृत्तिः खण्डिता भागवृत्तिकृता विमलमतिना ।

भागवृत्ते रचनाकालः खिष्टाष्टमशताब्यनुमीयते विद्वद्भिः । इत्थं वामनोऽयं काशिकाकारः खिष्टस्य सप्तशततमेऽब्दे विद्यमान इति संभावनाया अस्ति कश्चिदवसरः ।

काव्यालंकारसूत्रग्रन्थस्य तद्वृत्तेश्च रचयितुर्वामनस्य कालः खिष्टनवमशताब्दी स्वीक्रियते । अयं कल्हणस्य लेखानुसारेण काश्मीरनरेशस्य जयापीडस्य ७७९ तमात् खिष्टाब्दादारभ्य ८१३ खिष्टाब्दं यावद्विद्यमानस्य समापण्डित आसीत् । अनेन वामनेन भवभूतेः खिष्टाष्टमशताब्दीपूर्वार्धवर्तिनः पद्यम् 'इयं गेहे लक्ष्मीरियममृतर्तिर्नयनयोः' (उत्तर रा० च० १।३८) इत्युद्धृतम् । अतोऽयं भवभूतेः परवर्ती । दशमशताब्दीभवाद्राजशेखरात्प्राचीनः, यतः काव्यमीमांसायां राजशेखरेणास्य कानिचित् सूत्राणि समुद्धृतानि । वामनोऽयमुद्धृत आनन्दवर्धनाचार्येण खिष्टनवमशताब्दीमध्यभागगतेन स्वीयध्वन्यालोके, अतोऽयं न काशिकाकारेण सहैक्यं गन्तुमर्हति ।

---

१. वामनो विश्रान्तविद्याधरव्याकरणकर्ता—गणरत्नमहोदधिः २ ।
सं० व्या० शा० का इति० भाग १—पृ० ४२५ ।

२. सं० व्या० शा० का इति१ भाग—१ पृ० ४२५, सं० सा० का सं० का इति० गैरोला पृ० ३७० ।

३. भाषावृत्ति पृ० ३१० ।

४. भाषावृत्ति पृ० ३१४।

५. भाषावृत्ति पृ० ४२० ।

६. भाषावृत्ति पृ० ४२७ ।

लिङ्गानुशासनस्य कर्ता वामनो बौद्धः । यतोऽनेन स्वीयलिङ्गानुशासने सिद्धः प्रणतः[१] । चद्राचार्येणापि चान्द्रव्याकरणमङ्गलश्लोके बुद्धो नतः[२] । अतस्तुल्यन्यायाद् यथा चन्द्राचार्यो बौद्धस्तथायमपि बौद्धः । सर्वार्थसिद्ध इति सिद्धार्थ इति भगवतो बुद्धस्यैकं नामामरकोशे पठितम्[३] । अनेन यदाप्तलक्षणं प्रोक्तं स्वीयलिङ्गानुशासनस्य स्वोपज्ञवृत्तौ, मन्ये तदपि बुद्धमेवाधिकृत्य[४] । अतोऽस्य वामनस्य बौद्धत्व निश्चप्रचम् ।

लिङ्गानुशासनस्य कर्ता वामनोऽयं चन्द्रजनेन्द्राभ्यां परवर्ती, स्वग्रन्थे तयोर्लिङ्गानुशासनयोः कृतस्योपयोगस्य स्वयमुल्लेखात्[५] ।

अनेन च ज्ञायते यद् व्याडिवररुचिचन्द्रगोमिजैनेन्द्रैर्लिङ्गानुशासनस्यापि रचना कृतेति । वामनेन व्याडि-पाणिनिभ्यां सह चन्द्राचार्योऽपि स्मृतः वृत्तौ ।

माघस्य पङ्क्तिरप्युद्धृता दृश्यतेऽत्र[६] तृतीयाया आर्याया वृत्तौ । माघश्च सुप्रभदेस्व पौत्रो दत्तकसर्वाश्रयस्य पुत्र आसीत् । सुप्रभदेवोऽयं कस्यापि धर्मनाभाख्यस्य राज्ञो मन्त्री आसीत् । ज्ञायत इदं म घस्य श्लोकेन[७] । धर्मनाभः वर्मलातस्य द्वितीयं नाम मन्यते[८] । वर्मलातश्चायं श्रीमालस्य प्राचीनग्रन्थेषु भीनमालाख्यया प्रसिद्धस्य गुर्जरस्थस्य नगरस्थस्य नाम । वर्मलातस्य समयः वसन्तगढशिलालेखे ६८२ सम्वदिति यथा निर्दिष्टस्तथा ज्ञायते सुप्रभदेवस्य कालः ६२५ खिष्टाब्दमितो भवेत् । युक्त्यानया माघस्य समयः खिष्टस्य सप्तमशताब्द्यश्चरमो भागस्तर्क्यते ।

---

१. सिद्धं विबुधजनेष्टं विदिताखिलवाङ्मयं प्रणम्याप्तम् ।
लिङ्गानुशासनमहं वक्ष्यार्यामिः समासेन ॥ (वा० लिगा० मं० श्लोल पृ० १) ।

२. सिद्धं प्रणम्य सर्वज्ञं सर्वीयं जगतो गुरुम् । लघुविस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम् । (चा० व्या० भा० १—पृ० १) ।

३. सर्वार्थसिद्धः शौद्धोदनिश्च सः अ० को० १।१५ । 'सिद्धार्थो बुद्धसर्षपौ' इति शाश्वतः (अ० को० रामाश्रमी व्या० पृ० ९) ।

४. यो दृष्टाविरुद्धाविसम्वादिवचनोऽत्यन्तसकललोकहितागमप्रणेता विश्वसनीयः स आप्तः । स्वो० वृ० पृ० २ ।

५. व्याडिप्रणीतमथ वाररुचं सचान्द्रं जैनेन्द्रलक्षणगतं विविधं तथान्यत्
लिङ्गस्य लक्ष्म हि समस्य विशेषयुक्तम् उक्तं मया परिमितं त्रिदशा इहार्याः । (वा० लिङ्गानुशासन-पुष्पिका) ।

६. प्रोषितार्यमणं मेरोरन्धकारस्तटी मिव (श० पा० व० २।३६) (वा० लिङ्गा० वृ० आर्या ३) ।

७. सर्वाधिकारी सुकृताधिकारः श्री धर्मनाभस्य बभूव राज्ञः
असक्तदृष्टिर्विरजाः सदैव देवो परः सुप्रभदेवनामा । (शि० पा० व० पृ० ५२१ निर्णय सा० प्रे० बम्बई) ।

८. शिशुपालवध की हस्तलिखित प्रतियों में इस धर्म नाभ राजा को वर्मनाभ, धर्मलात्, वर्मलात् आदि अनेकनामों से लिखा गया है । यह अनेकनामता लिपिकारों की त्रुटि के कारण हुई है । (सं० सा० सं का०० इति० वाचस्पति गैरोला पृ० ८१२) ।

किंचास्यैव लिङ्गानुशासनस्य षष्ठकारिकायामागतस्य राजार्थशब्दस्य व्यावृत्तिं वदता स्वोपज्ञवृत्तिकारेण प्रत्युदाहृतं दत्तं जगत्तुंगसभा इति ।[1]

साम्प्रतमितिहाससमञ्जैरन्विष्टं यद् राष्ट्रकूटवंश्यनृपः गोविन्दस्तृतीयः जगत्तुङ्गः प्रथम इत्युच्यते स्म । जगत्तुङ्गस्य राज्यकालः ७९४-८१३ खिष्टाब्दमध्ये आसीत् । अयं जगत्तुङ्गसभेतिनिर्देशः वामनं न केवलं जगत्तुङ्गसमकालिकं साधयति; अपि तु प्रकटयति तस्य तत्सभासम्मान्यसदस्यतामपि । वामनेनापि श्रीभवनस्य ग्रामस्य निर्देशः कृतः । सोऽयं श्रीभवनग्रामो 'ताम्रपत्रे जगत्तुङ्गनृपीये तस्य जगत्तुङ्गमहीपस्य काञ्चीं वेगीं च विजेतुं प्रस्थितस्य ससैन्यस्य विश्रामस्थानरूपेणोल्लिखितः तेन लेखेनैव ज्ञायते 'तस्मिन्नेव ग्रामे स वर्षाकालं निनाय इति' ।

अतोलिङ्गानुशासनस्य कर्तुर्वामनस्य बौद्धस्य कालः खिष्टनवमशताब्दीपूर्वार्ध इति संभाव्यते ।

राष्ट्रकूटमहीपतिजगत्तुङ्गस्य सभा-रत्नत्वादस्य निवासस्थानं राष्ट्रकूटराजधानी मान्यखेट आसीदिति गम्यते ।

स्वीयं स्वीयं प्रतिपाद्यं सिद्धान्तं प्रमाणीकर्त्तुमनेकैर्विद्वद्भिर्वामनीयलिङ्गानुशासनस्योद्धरणानि समुद्धृतानि । तैरस्य ग्रन्थस्य प्रामाणिकग्रन्थेषु परिगणनमासीदिति गम्यते । अमरकोशटीकाकारेण सर्वानन्देन[2] क्षीरस्वामिना[3] रायमुक्तेन[4] च वामनीयलिङ्गानुशासनस्य मूलस्य, हेमचन्द्रेण तद्वृत्तेश्चोदाहरणं लिङ्गानुशासनविवरणे[5] दत्तम् । व्याडिपाणिनिवररुचिनामग्रहणेन सह पाणिनि[6]-चन्द्रव्याकरणं च स्मृतम् । पुस्तकेऽस्मिन् ऋग्वेद-महाभारत-महाभाष्य-हर्षचरितशिशुपालवधोद्धरणान्यपि समुपलभ्यन्ते । उदाहरणद्वयं कुतस्त्यमिति न ज्ञायते स्मेदानीमपि ।

कतिपयानि भौगोलिकनामान्यपि वामनेनात्र लिखितानि । तानि यथा कश्मीरम्, कोंकणम्, वरेन्द्रा, (राजशाही मण्डले) तीरमुक्तिः, मालवका, पाञ्चलाश्च । मथुराकान्यकुब्जेत्युभयं नगरं तैलाबत-श्रीकान्त-श्रीभवन-लिङ्गासाधिसालुकिनिप्रभृतयो ग्रामा श्चात्राख्यातानि ।

वामनीयं लिङ्गानुशासनमिदं आर्यावृत्तनिबद्धमस्ति । अत्र ३३ आर्याः सन्ति । तत्र प्रथमा मङ्गलाचरणरूपान्तिमास्तिस्रो ग्रन्थोपसंहाररूपाः । प्रथमयार्यया कृतबुद्धापरपर्यायसिद्धनमस्कारयाऽस्य कर्तुर्वामनस्य बौद्धत्वं

---

१. राजार्थानामिति किम्-राजशब्देन सह समासेऽपि न भवति राजसभा, जगत्तुङ्गसभा, इति । (वामनीय लिङ्गानुशासनस्य कारिका-६) ।

२. द्विगुरपि पात्राद्यन्तः (१-६), बहवश्च सामासिकता (१-८९) पुल्लिङ्ग स्त्रीलिङ्ग मरीचिमणियष्टि मुष्टयो (१-१७९) । रूपं तल्पं शिल्पं समीपकूपोडुपान्तरीपाणि ।

३. यद् वामनः संख्याव्ययपूर्वकश्च पथः ।

४. द्विगुरपि पात्राद्यन्तः क्रियाऽव्ययविशेषश्चैक्ये इति वामनः (प्रथम काण्डम्) संख्याव्ययपूर्वकश्च पथश्चेति वामनः (द्वितीयकाण्डम्) ।
एवं समाहारे क्लीबमप्यहोरात्रम् वामनलिङ्गानुशासने द्विगुरपि पात्राद्यन्तः इति ।

५. जगत्तुंगसभा, अहोरात्रम्, पुंसि हर्षः क्लीवे वामनः । हरीतकः हरीतकी, हरीतकम् वामनः ।

६. पाणिनेरुपज्ञा, पाणिन्युपज्ञमकालकं व्याकरणम् पाणिनिना प्रथमं कालाधिकाररहितं व्याकरणं कर्तुं शक्यमिति परिज्ञातम् । चन्द्रोपज्ञसंज्ञकं व्याकरणम् (वा० लिङ्गा० पृ० ७) ।

साध्यते। अन्तिमार्यात्रयमपि पुस्तकस्यास्य परावरकालसाधनायान्तःसाक्ष्यं प्रस्तौति । तत्रैकत्रिंश्यार्याया ज्ञायते, यदनेन व्याडिवररुचिचन्द्रकृतमथान्यच्च लिङ्गानुशासनं समीक्ष्य स्वपुस्तकं लिखितम्। एतेनास्य ग्रन्थस्य स्वोत्प्रेक्षित्व-निरसनपूर्वकं समूलत्वं दर्शितम्।

लिङ्गानुशासन मिदं सरलं स्फुटं संक्षिप्तं च वर्तते। स्वोपज्ञवृत्या व्याकरणशैल्या लिखितयाऽत्र स्फुटत्व-मागतम्। यदि स्वोपज्ञा वृत्ति र्न स्यात् अनेकत्रार्थावगमने बाधा स्यात्।

मङ्गलाचरणोपसंहारकार्यसंलग्नाभ्यश्चसृभ्य आर्याभ्योऽवशिष्टैः—

एकोनत्रिंशता श्लोकैः अतीव जटिलं संस्कृतभाषागतलिङ्गज्ञानं निरूपितमिति वामनस्य शैलीगतं प्रौढित्व-मेव न प्रदर्शयति; किन्तु येन प्रत्ययादिमाध्यमेनेयता संक्षेपेणातिविस्तरस्य लिङ्गतत्वस्य निरूपणं सम्भवममवत् तदस्य महावैयाकरणत्वमपि साधयति। संक्षेपेण लिङ्गानुशासनादिदं पुस्तकं सर्वेभ्योऽवरेभ्यः परेभ्यश्च लिङ्गानुशासन-ग्रन्थेभ्योऽतिरिच्यते। सोऽस्ति प्रत्ययादिमाध्यमः; योऽस्य पुस्तकस्य संक्षिप्तकलेवरस्य हेतुः। अथ स एव च वैया-करणैकबोधगम्यतायाश्च कारणम्। प्रत्ययानां समासशक्त्या समाहारशक्त्या च संग्रथनमस्यार्यासु दृष्ट्वा को न विस्मयमयते। उदाहरणाय द्वितीयार्या विविच्यताम्—

नाम नपुंसकलिङ्गं तत्तनलस्तुत्व शब्दपर्यन्तम्।
मन्नन्तो द्व्यजुदितमपि सन्तं हल्पूर्वं रुत्यान्तम्॥

अयं भावः त-त्त-न-ल-स्तु त्वइत्यत्येते शब्दाः पर्यन्तोऽवसानं यस्य तत्तथोक्तं नाम नपुंसकलिंगं भवति। उदाहरणं 'तस्य' यथा—इदं व्रतं इदं मतं, इदं पलितम्, इदं क्षतं (व्रणम्) अलातमुल्मुकम्। 'त्तस्य' यथा—इदं वृत्तम् छन्दो रचना, निमित्तं हेतुः, पित्तम् मायुः, चित्तं मनः, वित्तम् द्रव्यम्। 'नस्य' यथा—विपिनं वनम्, काननमटवी, जघनं पूर्वकटीभागः आननम् मुखम्। लस्य यथाः—शीलम् स्वभावः, मूलम्, जलम्, सलिलम् तोयम्, कमलम्, उत्पलम्। स्तो र्यथा—इदं मस्तु (दध्नो यदधः पानीयम्) वास्तु। 'त्वस्य' इमानि तत्वानि, इदं सत्वं (गुणः)। नामेतिकिम् रचितो ग्रन्थः कृताः स्तुतिः, कृतं कुण्डम्, कृत्तः कटः कृत्ता शाटिका, गोदोहनः घटः, सुशीलः पुरुषः इत्यादि। नामेति कथनान्नात्रातिव्याप्तिः यद् व्युत्पत्तिमन्तरेणैवार्थ-प्रतीतिकरमनादिसांकेतिकमभिधानं तन्नामपर्यायः रूढशब्द इत्यर्थः। आर्यायां त्तेतिसंयुक्तशब्दग्रहणात् रत्नचिह्ने चेति निर्देशाच्च तत्तनलशब्दाः केवला एव गृह्यन्ते। तेनेह नपुंसकलिङ्गता न भवति। अयमन्तः अवसानम्, हस्तः पाणिः, मुहूर्तः क्षणः, धमिल्लः केशरचना, चिक्खल्लः कर्दमः इत्यादि।

मन्शब्दोऽन्तो यस्य स 'मन्नन्तः' 'द्व्यच्' द्वौ अचौ यस्मिन् स द्व्यच्। मन्नन्तो यो द्व्यच्छन्दः स नपुंसक-लिङ्गो भवति। इदं साम प्रियं वेदश्च, धाम स्थानं तेजश्च, शर्म सुखम्, भस्म भूतिः, पुंल्लिङ्गनिर्देशात् मन्नन्त इत्यत्र सामान्येन शब्दः परिगृह्यते न नामैव। तेन प्रियस्य भाव इदं प्रेम, बहूनां भाव इदं भूम इत्यादि यौगिकशब्देऽपि नियमः प्रवर्तते। द्व्यजिति किम्—अयं तरीमा कल्पः। सवीमा प्रसवः। द्व्यजुदितमपि सन्तम्। पुल्लिङ्गं स्त्रीलिङ्गं वा प्रोक्तमपि सकारान्तं द्व्यच् नाम नपुंसकलिङ्गं भवति यथा इदं यशः, तेजः ओकः, यादः इत्यादि। द्व्यजिति किम्—अयमनेहाः कालः। उदितमपि इदं रक्षः, राक्षसः, तमः राहुदैवाभिधानत्वात् पुल्लिङ्गमुक्तम्। इदं वयः पक्षी प्राप्य-भिधानात् पुल्लिङ्गमभिहितम्। नामेति किम्—सौजाः पुरुषः, सौजाः स्त्री। सान्तमेव द्व्यजुदितमपि नपुंसकलिङ्गं भवति। अन्यत्र पुनरनुमिदमेव वेदितव्यम्। तेनायं पारावतः शैलः असनः, पुत्र इत्यादौ नातिप्रसक्तः।

हल् पूर्वो येभ्यः ते हल्पूर्वा रुवशब्दास्तेऽन्ते यस्य तत् तथोक्तं नाम नपुंसकलिङ्गं भवति। रेफस्य यथा—गोत्रम्, पात्रम्, पत्रम्, वस्त्रम्, रोर्यथाः—अश्रु श्मश्रु, अत्रु—गलादूर्ध्वम्। 'यस्य' यथा, धान्यं सस्यं ब्रीह्यादि, आज्यं घृतम् द्रव्यम्।

इत्थं शुक्तौ सागरसमावेशस्यात्र प्रयत्नः कृतः। पद्यशैल्यामपि सूत्रशैलीवत् सारवत्त्वमत्र सर्वत्र दृश्यते।

संस्कृत भाषायां शब्दलिङ्गानि तथाऽनियतानि यथा तानि कमपि नियमं नैव सहन्ते। यथा हि लोके प्राणवतां मध्ये पुरुषः स्त्रीत्ययं द्विविधो महाविभागः प्रसिद्धः, तथा स्त्रीपुरुषभेदभिन्नत्वात् जडपदार्थानां नपुंसकत्वं च प्रसिद्धम् स्यात्तदा शब्दलिङ्गज्ञानाय स्यादेक उपायः। परन्तु संस्कृतवाङ्मये लिङ्गव्यवस्था कृत्रिमा कष्टा च दृश्यतेः—तथाहि—

(१) शिला, नगरी भूमिरित्यादयः शब्दा जडपदार्थवाचका नपुंसकार्हा अपि स्त्रीलिङ्गाः तथैव पाषाण, आहारः वृक्ष इत्यादयः पुल्लिङ्गा दृश्यन्ते।

(२) भार्यावाचकोऽपि दारशब्दः पुल्लिङ्गः कलत्रं च नपुंसकम्। जलं नपुंसकम् किन्तु आपः स्त्री, धर्मशब्दः पुल्लिङ्गनपुंसकलिंगौ। समूहवाचकौ वृन्दसमुदायशब्दौ क्रमशः नपुंसकपुल्लिङ्गौ।

(३) किञ्च विशेष्यगतं लिङ्गविशेषणेऽप्यारोप्यते यथा वृक्षशब्दो विशेष्यो नियतपुल्लिङ्गोऽपि विशेषणावस्थायांविशेष्यलिङ्गको भवति। यथा विशालवृक्षा वाटिका, विशालवृक्षमुद्यानम् उभयतो विशालवृक्षो मार्ग इत्यादौ।

शब्दलिङ्गसम्प्रतिपत्तौ ईदृशमनियमताजन्यं कष्टं विभाव्य पारोवर्यविदः करुणाविष्टमानसाः प्राञ्च आचार्याः संस्कृतवाङ्मयमहार्णवं सर्वंकषप्रसरेण स्वसुबुद्धिमन्दरेणालोड्य लिङ्गानुशासनामृतं सुकुमारमतीनामपि सुखपानक्षमं समधिगतव्याकरणशास्त्रमर्यादेभ्यस्तृषितेभ्यो विबुधेभ्यः समर्पितवन्तः। इत्थं निसर्गदुरासदे लिङ्गानिर्णयमहादुर्गे सुखप्रवेशक्षमं द्वारमेकमपावृतं प्राचीनैः। अस्यामेव लिङ्गानुशासनग्रन्थशृंखलायामिदं लिङ्गानुशासनमेकं बहुमूल्यं कटकमस्ति।

(क) वामनीयलिङ्गानुशासने विलोकितान्युद्धरणानि—

उद्धरणस्वरूपम्	ग्रन्थेऽस्मिन् यत्रोद्धृतम् तस्य पृष्ठस्य संख्या	यतो गृहीतं तस्य ग्रन्थस्य नामविवरणं च
१—कथेव भारतीयस्य	२	हर्षचरितम्-१-९
२—यत्क्रिया युक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञका भवन्ति	२	महाभाष्यम् १-४-६०
३—प्रोषितार्यमणं मेरोरन्धकारस्तटीमिव	४	शिशुपालवधम् २-२९
४—तानि धर्माणि प्रथमान्यासन्	८	ऋग्वेदः १-१६६-४३
५—रसासृङ्मांसभेदोस्थिमज्जशुक्राणि धातवः	८०	वाग्भटः
६—मातुरुच्चार एव सः		महाभारतम्
७—स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्	१२	महाभाष्यप्रथमाह्निकम्
८—जान्वच्चितातिहिमक्लीमसशाटकानां मित्रादपि प्रथमयाचितभाटकानाम्		

वामनः—लिङ्गानुशासनस्य कर्ता

पुत्रादपि प्रियतमैकवराटकानां
वज्रं दिवः पततु मूर्ध्नि किराटकानाम् १२ (प्राय इयं लोकोक्तिः)

(ख) वामनीयलिङ्गानुशासने प्रयुक्तानां व्यक्तिवाचकसंज्ञानामनुक्रमाणिका—

	सं० पृष्ठ
कान्यकुब्जम् नाम नगरम्	
कश्मीरम् नाम देशः	१८
कोंकणं नाम देशः	१८
चन्द्रः (चन्द्रोपज्ञमसंज्ञकं व्याकरणम्)	१८
चान्द्रम् (सचान्द्रम्)	७
(जगत्तुङ्ग) जगत्तुङ्गसभा	२०
(जैनेन्द्रः) जैनेन्द्रलक्षणगतम्	६
तीरभुक्तिर्नाम देशः	२०
तैलावटं नाम ग्रामः	१८
(नन्दः) नन्दोपक्रमाणि मानानि	१८
(नन्देन किल प्रथमं मानानि कृतानि)	७
पञ्चालो नाम देशः	
(पाणिनिः) पाणिनेरुपज्ञा पाणिन्युपज्ञमकालकं व्याकरणम्, पाणिनिना प्रथमं कालाधिकाररहितं व्याकरणं कर्तुं शक्यमिति प्रतिज्ञातम्	१८
मथुरा (मथुरा नाम नगरी)	७
(माल्लवकः) मालवको नाम देशः	१८
लिङ्गाषाढी नाम ग्रामः	१८
वरणानामदूरभवं नगरं वरणाः नगरम्	१८
(वररुचिः) वररुचिप्रभृतिभिरप्याचार्यैरार्याभिरभिहितः	१८
वरेन्द्राः नाम देशः	२
वामनः (शुभैर्गुणैः कविहितं भुवि वामनेन)	१८
वाररुचम् (व्याडिप्रणीतमथ वाररुचं सचान्द्रम्)	२०
व्याडि (व्याडिप्रणीतम्) व्याडिप्रमुखैः	२०
शालुकिनी नाम ग्रामः	२०, २
श्रीकण्ठो नाम देशः	१८
श्रीभवनं नाम ग्रामः	१८
उशीनरदेशः	१८
मालिनी स्रग्धरा आपीडः	७
	१०

प्रणव इति नाम वृत्तम्
खलतिकं नाम वनानि

इति।

वामनीयं लिङ्गानुशासनमिदम् आर्यावृत्तनिबद्धमस्ति। अत्र ३३ आर्याः आगताः। तत्र प्रथमा मंगलाचरण-रूपाऽन्तिमास्तिस्रः ग्रन्थोपसंहाररूपाः। तत्र प्रथमयार्यया कृतबुद्धापरपर्यायसिद्धनमस्कारयाऽस्य कर्तुः वामनस्य बौद्धत्वं साध्यते। अन्तिमार्यात्रयमपि पुस्तकास्यास्य परावरकालसाधनायान्तः साक्ष्यं प्रस्तौति। तत्रैकत्रिंश्याऽऽर्यया ज्ञायते यदनेन व्याडिवररुचिचन्द्रजैनेन्द्रकृतमन्यच्च लिङ्गानुशासनं सम्यक् समीक्ष्य स्वपुस्तकं लिखितम्।

एतेन व्याडिवररुचिचन्द्रजैनेन्द्रभ्योऽयं परवर्ती। त्रिंशत्तमार्यायामयमपि लिङ्गज्ञानस्य लोकाधीनत्वं स्वीकुर्वन् लिखति 'अनुदितं जनाज्ज्ञेयम्'। पाणिनिरपि स्वीचकार—'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य'।

मैत्रेयरक्षितः

मैत्रेयरक्षितोऽयं बौद्धो महावैयाकरणो बोधिसत्वदेशीयजिनेन्द्रबुद्धिना विरचितायाः पाणिनिसूत्रवृत्तिकाशिका-विवरणपञ्जिकाया न्यासाख्यायास्तन्त्रप्रदीपाख्यां सारगर्भितां महतीं व्याख्यां लिलेख। इष्ट्या तन्त्रप्रदीपस्य हस्तलेखः कलकत्तानगरस्य राजकीयपुस्तकालये सुरक्षितोऽस्ति। तत्र प्रथमाध्यायस्य प्रथमपादान्तोभागो नोपलभ्यतेऽवशिष्टाश्च सकला भागा अविकला विद्यन्ते[1]।

मैत्रेयरक्षितो न केवलं पाणिनीयव्याकरणस्यासाधारणो विद्वानवर्तत; किन्त्वन्येषामपि व्याकरणानां प्राप्त-प्रगाढपाण्डित्योऽभवत्। तन्त्रप्रदीपस्य व्याख्यात्मकस्य, धातुव्याख्यात्कस्य धातु-प्रदीपस्य चाध्ययनेन तस्यानेकव्याकरण-विशेषज्ञत्वं स्पष्टं प्रतीयते। 'धातुप्रदीप'स्यान्ते रक्षितेन स्वयमुल्लिख्यतेः—

वृत्तिन्यासं समुद्दिश्य कृतवान् ग्रन्थविस्तरम्।
नाम्ना तन्त्रप्रदीपं यो विवृतास्तेन धातवः॥

आकृष्य भाष्यजलधेरथ धातुनामपरायणाक्षपणपाणिनिशास्त्रवेदी।
कालापचान्द्रमततत्वविभागदक्षो धातुप्रदीपमकरोज्जगते हिताय॥

नेयं गर्वोक्तिः किन्तु तत्थ्यकथनम्। आसीदयं गम्भीरसमालोचकः। न किमपि मतं तर्कनिकषकषणं बिना तेन क्वाप्यङ्गीकृतम्। अतएव परवर्तिनो वैयाकरणास्तन्मतं स्वमतपुष्टीकरणाय यत्र तत्रोद्धृतवन्तः।[2]

परिभाषावृत्तिकारेण ख्यातवैयाकरणेन तस्य गहनं पाण्डित्यं ग्रन्थानां गाम्भीर्यं चोपवर्ण्य तज्ज्ञानाय प्रयत्नः करणीय इत्युन्मुक्तकण्ठेनोद्घोषितम्।[3] तेन च तस्य कृत्स्नस्य ग्रन्थविस्तरस्य बोद्धव्यत्वं प्रतिपादितं विलोक्य तस्य विख्यातटीकाकारमल्लिनाथवद् भाषाधिकारः सूच्यते।

निर्दिष्टग्रन्थद्वयस्य महत्वं तट्टीकासम्पत्या सुखेनानुमातुं शक्यते। बौद्धवैयाकरणैरेव न किन्तु अन्यैरपि विद्वद्भिरनयोष्टीकां कृत्वा स्वगौरवमन्वभावि।

नन्दनमिश्रेण 'तन्त्रप्रदीपे' तन्त्रप्रदीपोद्योतनम्, सनातनतर्काचार्येण 'प्रभा', केनाप्यज्ञातनाम्ना पण्डितेन आलोकश्चात्र टीका लिखिताः। यद्यपि धातुप्रदीपे कापि टीका नोपलभ्यते तथापि अमरकोशादिटीकासु तथोद्धरणं दृश्यते येन तत्राप्यनुमीयते टीकासम्पत्तिः। शरणदेवस्य दुर्घटवृत्तावपि एकस्याः कस्याश्चिद् धातुप्रदीपटीकाया उल्लेखो-वर्तते।[4]

---

१. व्या० शा० का इतिहास भाग १ पृ० ४६६।
२. द्रष्टव्यम् दु० वृ० २।२२, ५६, ११५, १२४ इत्यादिपृष्ठेषु।
३. तस्माद् बोद्धव्योऽयं रक्षितः बोद्धव्याश्च विस्तरा एव रक्षितग्रन्थाः।
४. द्रष्टव्या-दुर्घटवृत्तिः, (पृ० ६१, १०१, ११३)।

पुरुषोत्तमदेवः

अयंबौद्धः, यतः

(१) लौकिकशब्दव्युत्पत्तिप्रदर्शिका भाषावृत्तिरनेन—

'नमो बुद्धाय भाषायां यथात्रिमुनिलक्षणम् ।
पुरुषोत्तमदेवेन लघ्वी वृत्ति विधीयते' ।।

इति मङ्गलश्लोकं बुद्धदेवनमस्कारपरकमारचयता प्रारब्धा ।

(२) कारकचक्रस्य स्वरचितस्य मङ्गलश्लोकेऽपि सर्वज्ञो मुनिः प्रणतः । दृश्यताम्:—

"मुनिं प्रणम्य सर्वज्ञं सर्वज्ञानप्रकाशकम् ।
बालानां कथ्यतेऽर्थाय मया कारकचक्रम्" ।। इति ।[1]

(३) महाभाष्यप्राणपणाख्यायां लघुवृतावपि स बुद्धमेव नौति तद् यथा—

नमो बुधाय बुद्धाय यथात्रिमुनिलक्षणम्
विधीयते प्राणपणा भाषायां लघुवृत्तिका[2]

(४) भाषावृत्तौ पुरुषोत्तमदेवस्य बौद्धत्वसाधकानि बहूनि प्रमाणान्यन्तःसाक्ष्यरूपाण्युपलभ्यन्तेः—तथाहि

(क) बौद्धो जिनः पातु वः (उदाहरणम् आशिषि लिङ्लोटौ सू० ३।३।१७३) ।

(ख) न सुखप्रति संसारे, न दोषप्रति बुद्धदर्शने (सुप् प्रतिना मात्रार्थे २।१।६) ।

'अत्र संसारे सुखस्य लेशोऽपि नास्ति, बुद्धदर्शने दोषस्य लेशोऽपि न दृश्यते' उदाहरणद्वयमिदं बौद्धधर्म-मूलभूतसिद्धान्तेन सह पुरुषोत्तमदेवस्य बौद्धदर्शनं प्रति पूर्णामास्थां प्रकटीकरोति ।

(ग) वाहितं पापमनेनेति ब्राह्मणः जितमेनोऽनेनेति जिनः (उदाहरणे पृषोदरादीनि यथोपदिष्टम् ६।३।१०९ इत्यस्य) ।

अत्र ब्राह्मणस्य पापवाहकत्वोक्त्या ब्राह्मणं प्रति हीनबुद्धिर्दर्शिता । यदि ब्राह्मणः पापं कृत्वा तद् गङ्गा-स्नानादिना वाहयति, वाहयितुं वा विश्वसिति अथवा यज्ञादिना यदि स वाहयामास पापम् इति श्रद्धधाति; उभयथाऽपि स न प्रशस्यः, प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायात् । जिनस्तु पापम् एनो जितवान्, अतः स पापास्पृष्टः इति जिनं प्रति समादरभावः प्रदर्शितः ।

(घ) 'अधीयन् सकलं शास्त्रम् धारयन् मस्करिव्रतम्' इङ्धार्योः शत्रकृच्छ्रिणि' ३।२।१३० इति सूत्रस्य उदाहरणरूपेणोपन्यस्तं वाक्यं कस्यापि पद्यस्य खण्डमिव प्रतिभाति । अधीयन् इत्युभयत्र शतृप्रत्ययः अकृच्छ्रिण्यर्थे विहितः । कृच्छ्रेणाध्ययने कृच्छ्रेणाधीते इत्येव भवति एवं कृच्छ्रेण धारणे 'कृच्छ्रेण धारयति' इत्येव भवति नतु शतृप्रत्ययः । एवंचात्र शतृप्रत्ययेन अकृच्छ्रार्थे विहितेन ज्ञापयितुमिच्छति पुरुषोत्तमदेवः यत् कोऽपि बौद्धभिक्षुः सकलं शास्त्रं बिना कष्टं पठन् मस्करिव्रतं च विना क्लेशं धारयन् वर्तते । अन्यद् व्रतं कष्टकरं वर्तते बौद्ध-धर्मस्य च मध्यमाप्रतिपदात्वान्मस्करिव्रतं सरलमक्लेशधार्यं च वर्तत इति प्रतिपादनमपि तस्य बौद्धत्वं द्योतयति प्रति-पादयितुः ।

---

१. कारकचक्रम् पृ० १०१ (राजशाही संस्करणम् ।
२. परिभाषावृत्तिः ज्ञापकसमुच्चयः कारकचक्रम् (राजशा० सं० पृ० ११९ ।

(ङ) बोधिसत्वो महासत्वः (उदा० विशेषणं विशेष्येण बहुलम् इत्यस्य (भा० वृ० २।१।५७) अत्र बोधिसत्वस्य महासत्वत्वप्रतिपादनमपि बोधिसत्वमहात्म्यख्यापनपरं तस्य बौद्धत्वध्वननहेतुः।

(च) देवदत्तः ब्रह्मदत्तः आभ्यामुदाहरणाभ्यां सह बुद्धइत्युदाहरणं दत्तमुपलभ्यते। (क्तिच् क्तौ च संज्ञायाम् (भा० वृ० ३।३।१७)।

(छ) कृतकत्वादनित्यः शब्दः कृतकत्वेन च (विभाषा गुणेऽस्त्रियाम् भा० वृ० २।३।२५)।

(ज) मा कुरुत कर्माणि शान्ति वः श्रेयसीति माकरणशीलो मस्करी परिव्राजकः (मस्करमस्करिणौ वेणुपरिव्राजकयोः (भा० वृ० ६।१।१५४)।

कर्मकाण्डनिषेधपरकमिदं वचनं तस्य बौद्धत्वं साधयति।

(झ) देवानां प्रिये (वार्तिकम्) षष्ठ्याः आक्रोशे (षष्ठ्या अलुग् भवति प्रियशब्दे ६।३।२१ पर इत्यर्थः)।

अत्र भट्टोजिदीक्षितादयो वैयाकरणा यथा देवानांप्रिय इति च मूर्खे इति योजयन्ति तथा न भाषावृत्तौ। अतो भाषावृत्तिकारेण पुरुषोत्तमदेवेन बुद्धधर्मप्रचारप्रसारकार्यसमर्पितजीवनाय राज्ञेऽशोकाय प्रयुक्तस्यास्य शब्दस्य वैदिककर्मकाण्डपण्डितमण्डलीख्यातोऽर्थापकर्षो न स्वीकृत इति सिद्धयति।

(ञ) 'युष्माकं पालकः शम्भुरस्माकं देशको जिनः' (उदा० अनुदात्तं सर्वमपदादौ (पा० ८।१।१।८) अत्रापि 'युष्माकं पालकः शम्भुरस्माकं देशको जिनः' इत्युदाहरणे जिनस्य पालकत्वोक्त्या पुरुषोत्तमदेवेन स्वस्य बौद्धधर्मानुयायित्वं प्रकटीकृतमेव। एवमेव युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ पा० ८।१।२० इति सूत्रस्थमुदाहरणं 'शिवो वां रक्षतु बुद्धो नौ पातु' इति, तथा सपूर्वायाः प्रथमाया विभाषा पा० ८।१२६ इति सूत्रस्थमुदाहरणं 'शिवस्त्वा रक्षतु त्वां वा' जिष्णुर्मा रक्षतु मां वा इति च तस्य बुद्ध इष्टदेव इति प्रत्याययति।

(ट) बौद्धीयं मतम् (वृद्धाच्छः ४।२।११४) आगामिनि मासे पञ्चदशरात्रादवरस्मिन् महाबोधिं गन्तास्मः, आगामि सम्वत्सरस्य यदवरं वैशाख्यास्तत्र गयां यास्यामः (कालविभागे चानहोरात्राणाम् ३।३।१३७) 'प्रणम्य शास्त्रे सुगताय तायिने' (१।४।३२) इत्यादीन्युदाहरणानि सन्ति यानि तस्यान्यप्रमाणसिद्धस्य बौद्धत्वस्य पोषकाणि सन्ति।

(ठ) भक्तिः (४।३।६५) भज्यते सेव्यतेऽसौ भक्तिः अत्रार्थे यथाविहितं स्यात्। बुद्धो भक्तिरस्य बौद्धः। शैवः। सौरः, चाण्डः। सौघ्नः। माथुरः। इति भाषावृत्तिग्रन्थे शैवसौराद्युदाहरणेषु सर्वप्रथमं प्रस्तुतेन बौद्ध इत्युदाहरणेन ज्ञापितो बुद्धं प्रति निष्ठाविशेषोऽपि तस्य बौद्धत्वसाधकेषु हेतुष्वन्यतमः।

(ड) शुद्धोदनः सिद्धार्थस्य पिता। सिद्धार्थ एव ज्ञानं प्राप्य बुद्धो बभूव। बुद्धस्य पितुर्नाम शुद्धोदन इति शकन्ध्वादिषु पररूपं वाच्यम् (६।१।९४-वा०) इति सिद्धयतीति भाषावृत्तौ दर्शितम्। एवंचात्र शुद्धोदनशब्दसाधुत्वसम्पादनाय दर्शिता व्यग्रता व्यग्रस्य पुरुषोत्तमदेवस्य बौद्धत्वं प्रत्याययति।

देशः—

केचित्तु पुरुषोत्तमदेवोऽयं बङ्गवासी वबयोरुच्चारणसाम्यात्। तथाहि प्रत्याहारप्रकरणे कियन्तः प्रत्याहारा निष्पाद्यन्ते इति विचारं प्रस्तुवल्लिँखति 'अश् हश् वश् झश्, जश् पुन र्बश् इति। अत्र पुनर्ग्रहणं वश् बश् इति प्रत्याहाराक्षयोरुच्चारणसाम्यं सूचयति। सत्युच्चारणभेदे पुनर्ग्रहणमनुपपन्नमेव स्यात्। तच्चोच्चारणसाम्यमन्तस्थवकारपवर्गबकारयोर्बङ्गभाषायामेव। मातृभाषाप्रभावाद् बङ्गीया विद्वांसो वबयोः समानमुच्चारणं कुर्वन्ति। स्वकीयोच्चारणसाम्यात् वशबशोरभेदभ्रान्तिं निराकर्तुं तेनोक्तम् पुनरिति। अतोऽयं बङ्गीयः।

(२) नद्या मतुप् (पा० मतुप् (पा० ४।१।८५) इति सूत्रे पुरुषोत्तमदेवेन दत्तमुदाहरणं पद्मावतीत्यपि तस्य बङ्गवासित्वसाधकम्। पद्मावतीति पद्मेति वा नाम बङ्गप्रान्तं गताया गङ्गाया एव वर्तते। बङ्गस्य पूर्वोत्तरभागे नदीयं

वहति । ब्रह्मपुत्रसङ्गतायाः गङ्गायाः पद्मेति नाम बङ्गवासिभिर्दत्त प्रतीयते । इत्थं बङ्गप्रान्तीयनद्या नाम्नो व्याकृत्या स तत्प्रान्तीय इति शक्यतेऽनुमातुम् ।

(३) किंच बङ्गीयलेखकानामेष स्वभावो यत्ते हस्तलेखान्ते 'यथादृष्टं तथा लिखित लेखको नास्तिदोषक' इति लिखति । भाषावृत्ते र्हस्तलेखान्ते मिलितेन तादृशेन लेखेनास्य हस्तलेखको बङ्गप्रान्तीयः, प्रत्यासत्या मूललेखकोऽपि तत्रत्य इति शक्यतेऽनुमातुम् । अथ च बङ्गीयहस्तलेखकप्रयुक्तस्य 'नास्तिदोषकः' इत्यस्य सिद्धिरपि पुरुषोत्तमदेवेनात्र दर्शिता अनेकमन्यपदार्थे (२।२।२४) इति सूत्रभाषावृत्तौ । तत्र तेनोक्तम् 'अस्तिधना, लेखको नास्तिदोषक इत्युदाहरणद्वयमव्ययाभ्यामस्तिनास्तिभ्यां समासेन सिद्धमिति । इत्येष सिद्धिप्रयत्नस्तस्य बङ्गीत्वं द्योतयति ।

(४) भाषावृत्यर्थविवृतिकारेण श्रीसृष्टिधराचार्येण लिखितम् यत् 'भाषावृत्तिः पुरुषोत्तमदेवेन वैदिकप्रयोगानर्थिनो लक्ष्मणसेनस्य राज्ञ आज्ञया लिखिता[1] । लक्ष्मणसेनोऽयं बङ्गस्य महीपतिरतः पुरुषोत्तमदेवेनापि तत्रत्येनैव भाव्यम् ।

(५) 'पाश्चात्या गौडेभ्य आढ्यतरा' इत्युदाहरणं द्विवचनविभज्योपपदे तरबीयसुनौ ५।३।५७ इति सूत्रस्य दत्तं भाषावृत्तौ पुरुषोत्तमदेवेन । अत्र 'पाश्चात्या' इति वर्तते सम्बन्धिशब्दः । केभ्यः 'पाश्चात्याः' ? गौडे भवा गौडास्तेभ्यः, गौडदेशीयेभ्यः आढ्यतरा इत्यनेन कथनेन पुरुषोत्तमदेवस्य गौडदेशनिवासित्वं सिद्धयति । अतोहि स्वभावादेव मानवः धनेन प्रतिवेशिनमाढ्यतरं मन्यते । अतएव लोकोक्तिरस्ति-परस्यायः स्वस्य च व्ययो महाननुभूयते जनैरिति ।

यत्तु लक्ष्मणसेनस्य राज्यं मिथिलापर्यन्तं विस्तृतमासीत् । अतः पुरुषोत्तमदेवस्य मैथिलत्वमपि सम्भाव्यते वकारबकारयोरुच्चारणे लेखे च प्राचीनमैथिलपण्डिता अपि प्रमाद्यन्ति इति तन्न, अन्यप्रमाणप्रतिकूलत्वात् । तेन न किमप्युदाहरणं तथा दत्तं वाक्यं च लिखितमेकमपि, येन तस्य मिथिलां प्रति मातृ-भू-भावनाऽनुमेया स्यात् । अथ च दृश्यते बङ्गप्रान्तं प्रति तस्य विशेषस्नेहः । तथाहि—बङ्गजनपदः (उदा० १।२।५१) इत्युदाहरणं लुपि युक्तवद् व्यक्तिवचने (१।२।५१) इति सूत्रस्य सर्वप्रथमं दत्तम् । अस्य सूत्रस्य भाषावृत्तौ दृश्यते :—बङ्गस्यापत्यानि बहूनि बङ्गा तेषां निवासः (४।२६८) इत्यणो जनपदे लुप् (४।२।८१) बङ्गा जनपदः इति । इत्थं काशिकायां पाञ्चाला इत्यस्य व्याकृतये यथाचयनं कृतं जयादित्येन तथाऽत्र बङ्ग इत्यस्य व्याकृतिर्दृश्यते । यदि पुरुषोत्तमदेवस्य बङ्गप्रान्तेन साकं सम्बन्धविशेषो न स्यात् तदा कथं स काशिकायां प्रदर्शितं पाञ्चाला इत्यस्य व्याकृतिविशेषं विहाय बङ्गा इत्यस्य व्याकृतिं कुर्यात् ।

नैतावदेव किन्तु विशेषणानां चाजातेः (१।२।५२) इत्यत्र प्रत्युदाहरणं ददानेन तेन स्पष्टमुक्तम् **बङ्गा जनपदो**[2] **रमणीयः** । एतेनाऽपि तस्य बङ्गीयत्वं सिद्धं भवति । जननी जन्मभूमिश्च स्वार्गादपि गरीयसीति सर्वैर्भावुकैरनुभूयते ।

कालः—

आधुनिकगवेषणामनुसृत्य लक्ष्मणसेनस्य राज्य (शासन) कालः ११६९ तमात् खिष्टाब्दात् प्रारब्ध इति मन्यते । भाषावृत्यर्थविवृतिकारस्य सृष्टिधरस्य लेखानुसारेण भाषावृत्तिः पुरुषोत्तमदेवेनास्यैव राज्ञ आज्ञया लिखिता । अतः भाषावृत्तेरचनाकालः ११६९ तमखिष्टाब्दात्पश्चात् सिद्धयति । महम्मदबिनबख्तियारेण लक्ष्मणसेनोजितः इति वदन्तीतिहासज्ञाः । लक्ष्मणसेनस्य पराजयकालः द्वादशशततमखिष्टाब्दकल्पः । अतः पुरुषोत्तमदेवस्य कालः खिष्टाब्दद्वादशतकस्योत्तरार्धः ततः प्राग् वा मन्तव्यः ।

---

१. वैदिकप्रयोगानर्थिनो लक्ष्मणसेनस्य राज्ञ आज्ञाया प्रकृते कर्मणि प्रसञ्जन् वृत्ते र्लघुताया हेतुमाह-भाषायामिति भाषावृत्यर्थविवृतिः—भाषावृत्तिभूमिका पृ० ११ ।

२. तुलनीयम्—अमार सोनार बंगलादेश इति रवीन्द्रगीतेन सह ।

पुरुषोत्तमदेवोऽयं महामहोपाध्यायोपाधि-विभूषितः इति तद्ग्रन्थोपक्रमोपसंहाराभ्यामवगम्यते ।[1]

पुरुषोत्तमदेवेनानेके ग्रन्था लिखिताः—

(१) भाषावृत्तिः
(२) महाभाष्यलघुवृत्तिः (प्राणपणाख्या)
(३) कुण्डलीव्याख्यानम्
(४) कारककारिका
(५) दुर्घटवृत्तिः
(५) परिभाषावृत्तिः
(७) ज्ञापकसमुच्चयः
(८) उणादिवृत्तिः
(९) कारकचक्रम् ।

(१) भाषावृत्तिरित्यस्य लघुवृत्तिरित्यपि नामान्तरम् । अस्या वृत्तेर्हूनि वैशिष्ट्यानि सन्ति तेषु कानिचिदधोदीयन्ते ।

१—काशिकाकाकारेणैव पुरुषोत्तमदेवेनापि 'अथ शब्दानुशासनम्' इति पाणिनिसूत्रमिति स्वीचक्रे । अतएव पाणिनिसूत्राण्यधिकृत्य वृत्तिं चिकीर्षुः स **स्वभाषावृत्तावि दं सूत्रं सर्वप्रथमं** लिखति ।[2]

२—अइउण् इत्यादीनां चन्द्राचार्यजयादित्यवत् अनेनापि प्रत्याहारसूत्रत्वमात्रमङ्गीकृतं नतु शिवसूत्रत्वम् ।[3]

३—काशिकायामिव भाषावृत्तावपि 'र' प्रत्याहारः स्वीकृतः ।[4]

४—लोकप्रचलितोदाहरणसंकलनाद् वृत्तेः सारल्यं नानाकाव्येभ्योऽवचित्योदाहरणदानात् ग्रन्थस्य सारस्यं च वैशिष्ट्यमिह दृश्यते । बौद्धाः लोकपराः प्रसादशैलीप्रतिपादनस्वभावाश्च भवन्तीति सूक्तेरुदाहरणं वृत्तिरियम् ।

(क) लोकप्रचलितोदाहरणं यथाः—निद्राणः (८।२।४३) करणम् हरणम् (८।४।२) कश्छात्रः (८।४।४०) केनोभ्यते इति कुम्भः ६।१।९४ ।

(ख) काव्येभ्य उद्धृतमुदाहरणं यथाः—

(१) सहस्य रात्री**रुदवास**ततपरा (कुमार संभवम्) ६।३।५८ ।
(२) न मानिनी संसहतेऽ**न्यसंगम्** (भट्टिः) ६।३।३५ वा० ५ ।
(३) भवतीप्रसादादिति तु चिन्त्यम् (दुर्गासं० ४।१६) ।
(४) उन्नसं दधती वक्त्रम् (भट्टिः) ५।४।११९ ।

---

१. महामहोपाध्यायश्रीपुरुषोत्तमदेवकृता भाषावृत्तिः (भाषावृत्ति-पृ०, १, पृ० ५७३) कारकचक्रान्ते-महामहोपाध्यायश्रीपुरुषोत्तमदेवविरचितं कारकचक्रं समाप्तम् पृ० ११९ (राजशाही सं०) ।

२. भाषावृत्तिः पृ० १ ।

३. भाषा वृ० पृ० १ काशिका पृ० २ । साम्प्रतमुपलब्धे राजस्थानप्राच्यविद्याप्रकाशिते चान्द्रव्याकरण-पुस्तके शिव सूत्रत्वोल्लेखस्तु न चन्द्रकृत इति स्वीकृतमेव प्रकाशकैः पृ० चा० व्या० पृ० १ ।

४. लकारे त्वनुनासिकः प्रतिज्ञायते । तेन उरण्रपरः १।१।५१ इत्यत्र प्रत्याहारग्रहणाल्लपरत्वमपि भवति । (काशिका-लण् सूत्रम्) ।
प्रत्याहाराः एकचत्वारिंदशद् भवन्ति । उरण् रपरः (१।१।५१) चयो द्वितीया, ८।४।४८।१ अमन्ताड्डः (उ० सू० १।१११) इत्येतैश्चत्वारिंशदिति (भा० वृ० पृ० २) ।

(५) क्षणं मया विश्वजनीन मुच्यते (माघः) ५।१।९ ।

(६) तस्मिन्नन्तर्घणे पश्यन् (भट्टिः) ३।३।७८ ।

(७) दारिद्र्यं पुरुषस्य विक्लवकरम् (अज्ञातम्) ३।२।२० ।

(८) जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ (रघुः) १।२।७० ।

काव्यादुद्धृतान्युदाहरणानि पुरुषोत्तमस्य वैदुष्यं प्रकटय्यय पाठकानां मनःसु श्रद्धाविशेषं जागरयन्ति व्याकरण-विषयस्य स्वाभाविकीं रूक्षतां च स्वल्पयन्ति ।

५—पाणिन्यदृष्टानां शब्दानामन्वाख्यानमस्य ग्रन्थस्यापरं वैशिष्ट्यम् तथाहिः—दधियत्र दध्यत्र ।

पुरुषोत्तमेन इको यणचि (६।१।७७) इति सूत्रभाषावृत्तौ 'इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम्' इति वार्तिकं स्वीकृतम् । तेन दधियत्र भूवादय इत्यादियण्व्यवहितप्रयोगा अपि सिद्धाः । पाणिनिना स्वयं भूवादय इति लिखितम् किन्तु तत्साधनोपायो न दर्शितः । पाणिनेरयं स्वभावः 'कुलटाया वा (पा० ४।१।१२७) इत्यादावपि दृष्टः । स कुलटाशब्दं प्रयुङ्क्ते; तत्साधनोपायस्तु तेन स्वयं न विहितः किन्तु कात्यायनेन 'शकन्ध्वादिषु पररूपं वाच्यम्' इति वार्तिकं निर्माय स शब्दः साधितः । भूवादय इत्यत्र भूश्च वाश्चेतिद्वन्द्वः आदिश्चादिश्चेति-व्यवस्थाप्रकारवाचिनोरेकशेष इति कल्पना तु पाणिनिश्रद्धामात्रज्ञापिका, क्रियावाचित्वाभावेऽपि 'याः पश्यसि' इत्यादौ आतो धातोरित्यनेन प्रतिपदोक्तस्यैव आतो लोपाद् धातुत्वाभावेऽप्यदोषात् । आतोऽनाप इति वार्तिकप्रत्या ख्यानफलभेदवारणाय पूर्वोक्तार्थस्वीकारस्यैवौचित्यम् । विकल्पार्थक 'वा' शब्दस्तु न भूप्रभृतिषु पठितः । सर्वं वाक्यं सावधारणं भवतीतिन्यायादन्यत्रापठितानां भ्वादिपठितानां च धातुसंज्ञेत्यर्थकरणे विकल्पार्थकवाशब्दस्य स्वरादिगणे पाठात् धातुसंज्ञा न स्यात् । **चन्द्राचार्यमतेन तु निर्दिष्टतत्तदर्थवाचका एव धातवः अतो न दोष-प्रसक्तिः ।**

अतएव चन्द्राचार्येण प्रथमगणस्य भूवादिरिति नाम कृतं संगच्छते । कालिदासस्य काव्ये कुमारसंभवे 'त्रियम्बकं संयमिनं ददर्श' (३।४४) 'व्यकीर्यत व्यम्बकपादमूले' (३।६१) इत्युभयविधं रूपं दृश्मेतद्वार्तिकमस्वीकृत्य न साधु कर्तुं शक्यते ।

वार्तिकमिदं कात्यायनवार्तिकपाठे न दृश्यते तथापि पुरुषोत्तमेनानुक्तचिन्तां कृत्वात्र वार्तिककारायितम् । शिष्टप्रयुक्तस्य शब्दस्यानन्वाख्यानं वैयाकरणस्यैव दोषः न तु तादृशस्य शब्दस्य दोषः । नह्ययं स्थाणोरपराधो यदेनमन्धो न पश्यति, पुरुषापराधः स खलु भवति । अतः भाषावृत्तौ वार्तिकमिदं स्वीकृत्य व्याकरणस्याव्याप्तिदूषणं निरस्तमिति प्रशंसार्हः पुरुषोत्तमः । ५।२।२१ इति सूत्रे 'नियतकालाश्च स्मृतयो व्यवस्थाहेतव इति कैयटः । मुनित्रयमतेनैवेदानीं साध्व-साधुप्रविभागः, तस्यैवेदानीन्तनशिष्टै र्वेदांङ्गतया परिगृहीतत्वात् । दृश्यन्ते हि नियतकालाः स्मृतयो यथा कलौ परा-शरी स्मृतिरिति १।१।२७ सूत्रशब्दकौस्तुभे भट्टोजि-दीक्षितः । यङ्लुक्प्रकरणे मनोरमायाम् 'काशकृत्स्नादिमता-नामपि मुनित्रयविरोधे इदानीमग्रहणमेव—इति भट्टोजिदीक्षितेन प्रोक्तम् तत्तु न विचारविलसितम्, मुनित्रयनिर्मित-व्याकरणस्येवेदानीन्तनशिष्टै र्वेदाङ्गत्वेनाङ्गीकारे पाणिनीयव्याकरणनिर्माणात् प्राक् वेदानामेकाङ्गविहीत्वापत्तेः । इदानीन्तनशिष्टैस्त्रिमुनिव्याकरणं वेदाङ्गत्वेनाङ्गीक्रियते, प्राचीनैस्तु किमप्यन्द व्याकरणं वेदाङ्गमङ्गीकृतमित्यपि कल्पना न युक्ता अव्यवस्थाप्रसंगात् । यथा गङ्गाजलं सर्वजलमात्मसात् कृत्वा वहति तथैव वेद-भाषा-शास्त्रप्रवाहे समागतान् सर्वान् प्रयोगन्नीत्वा प्रचलद् व्याकरणमेव प्रशस्यव्याकरणम् । अतः पुरुषोत्तमदेवो यदि प्रचलितप्रयोगस्य पाणिन्याद्यदृष्टस्य साधनाय किमपि वचनं प्रस्तौति सोऽवश्यप्रशस्यः । तत्रापि 'व्याडिगालवयोः' सम्मतिमुक्त्वा मुनिसम्मतत्वमपि प्रतिपादितमित्यतीव स्तुत्यः सः ।

एवमेव अस्मदो द्वयोश्च १।२।५९ इति सूत्रेण अस्मदः एकत्वे द्वित्वे च बहुवचनं विधीयते लोके 'अहं करोमि'

इत्यस्य स्थाने वयं कुर्म इत्यस्यापि प्रयोगदर्शनात् । आवां कुर्व इत्यपि लोके प्रयुज्यते तत्स्थाने वयं कुर्म इत्यपि च । किन्तु लोके 'त्वं गुरुः' इत्यस्य स्थाने' यूयं गुरवः' इति प्रचलितस्य प्रयोगस्य साधनाय पाणिनीयतन्त्रे कमपि यत्नमदृष्ट्वा जयादित्येन यदुक्तं 'युष्मदि गुरावेकेषाम्' तत् पुरुषोत्तमदेवेनापि स्वीकृतम् ।

अत्र युष्मदीति उलक्षणं भवदादिशब्दस्यापि तेन 'भवान् गच्छति' इत्यस्य स्थाने 'भवन्तः गच्छन्ति' इत्यत्रापि समादरे बहुवचनं सिद्धयति ।

न चास्मदो द्वयोश्च १।२।५९ इति सूत्रं भाष्ये प्रत्याख्यातम् इन्द्रियाद्यवयवगतबहुत्वस्यास्मच्छब्दार्थे समारोपाद् बहुवचनस्य सिद्धेरिति वाच्यम् प्रत्याख्यातमिति त्वन्यत् । किन्तु यदा सूत्रमिदमारभ्यते तदा 'युष्मदि गुरावेकेषाम्' इतीदृशस्य कस्यापि वचनस्य 'त्वं गुरु' रित्यस्य स्थाने प्रयुक्तस्य' 'यूयं गुरव' इत्यस्य साधनाय पथप्रदर्शकः जयादित्यस्तदनुयायी च पुरुषोत्तमः प्रशस्य एव ।

अत्र दाधिमथाः १।२।५९ इति सूत्रस्य टिप्पण्याम् 'अस्मदो द्वयोश्च', (१।२।५९) एतत्सूत्रविषये जातस्य बहुवचनस्यैकत्वं द्वित्वं वार्थः । तथाचै-कत्वस्य विवक्षायां जातस्यास्मदो बहुवचनस्यैकत्वमेवार्थो वाच्यः । इत्थं वयमित्यस्यैकत्ववाचित्वादस्मदर्थैकत्वसंख्यावाचिन एव तिङ उचितत्वेन 'वयं ब्रवीमि इत्येव साधु । एवं द्वित्वस्य विवक्षायां जातस्यास्मदो बहुवचनस्य द्वित्वसंख्याभिधायित्वाद् द्विवचनमेव तिङ उचितमिति वयं ब्रूव इत्येव साध्वित्याहुः । पुरुषोत्तमदेवस्तु न तथा स्वीकरोति अहं करोमि वयं कुर्म आवां कुर्वो वयं कुर्म इत्युक्तेः[1] ।

अत्रेदं वक्तव्यम् अतिदेशशास्त्रेण यदतिदिश्यते तत् प्रयुक्तमेव कार्यं भवति । यथा 'सेर्ह्यपिच्च' ३।४।८७ इत्यनेन यदा सिपः स्थाने जातस्य हेरपित्त्वं विधीयते तदा तत्र पित्प्रयुक्तकार्यं न भवति यथा वा 'णलुत्तमो वा' ७।१।६१ इत्यनेन णलो णित्त्वं यदा विकल्पत्वान्न भवति, तत्र पक्षेस्वतः सिद्धं णित्कार्यं न जायते । एवमेव यदैकत्वविशिष्टस्यास्मदः 'सूत्रेण बहुवचनं विहितं तदा तत्रादिष्टबहुवचनतया बहुत्वात्तदनुरोधेन तिङन्तपत्तदादपि बहुवचनस्यैवौचित्यात् वयं ब्रूमः वयं कुर्म इत्येव साधु, ननु वयं ब्रवीमि वयं करोमीति वा ।

किंच न वैयाकरणाः कुम्भकारवच्छब्दान् निर्माय लोकेभ्यः प्रयोक्तुं वितरन्ति किन्तु वैयाकरणाः शब्दान्वाख्यातारः शब्दानुशासनकर्तारश्च । उभयत्रानुशब्दप्रयोगात्सूच्यते यत् स्थितस्य गतिचिन्तनमेव वैयाकरणकार्यम् । लोके चैकत्वे द्वित्वे च विवक्षितेऽस्मदो बहुवचनेन सह तङन्तपदेनापि बहुवचनं कृतं दृश्यते अतस्तथैव साधु । बिहारप्रान्तीयाः प्रायः एकाकिनोऽपि स्वस्य कृते हिन्दीभाषां वदन्तः 'मैं' इति पदस्य स्थाने 'हम' इति प्रयुञ्जते, तेऽपि 'हम जाते हैं' इत्यत्र क्रियापदं बहुवचने एव स्थापयन्ति ।

ये किल पाश्चात्या 'हम बोलता है' इति वदन्ति तान् वयमुपहसाम एव । इत्थं 'वयं ब्रवीमि' इति वाक्यमुपहासायैव स्यात् ।

पुरुषोत्तमदेवेन तादृशाः शब्दा न व्याकृता न च तेषां व्याकृतये निर्मितानि वचनानि स्वीकृतानि, यत्र योगार्थः न संघटते यथा 'गव्यूति' शब्दस्य व्याकृतिमुपेक्षमाणः स वदति गव्यूतिशब्दस्तु क्रोशयोजनवदव्युत्पन्न एव (६।१।७९) अतस्तेन गोयूतिरितिविभागः अध्वपरिमाणे चेति वार्तिकं च न स्वीकृतम् ।

अनेन भाषा-वृत्तिग्रन्थेन ज्ञायते यत् स्वरस्यावहेलना लौकिके प्रयोगे सर्वतोऽदृश्यत तत्काले । अतएव दृश्यते भाषा-वृत्तौः—स्वरलक्षणं तु न निबध्यते भाषायां स्वरस्याप्रचारात् । वैदिकप्रयोगस्यापि उपादेयता समाप्तप्राया ।

---

१. भाषावृत्तिः १।२।५९ ।

अतएवात्र वैदिकप्रयोगसाधकानां सूत्राणां वृत्ति र्नदत्ता । अतएवोक्तं सृष्टिधराचार्येण (चक्रवर्तिना) वैदिकप्रयोगानर्थिनो लक्ष्मणसेनस्य राज्ञ आज्ञया प्रकृते कर्मणि प्रसजन् वृतेर्लवुतायाहेतुमाहेत्यादि ।

अस्या वृत्ते र्महत्वं टीकासम्पत्यानुमातुं शक्यते । श्री सृष्टिधरचक्रवर्तिनः भाषावृत्यर्थ-विवृतिः, सनातनतर्काचार्यस्य फक्किका वृत्तिः, विश्वरूपस्य भाषावृत्तिपञ्जिका इत्येताद्दश्यो महत्वपूर्णाष्टीका उपलभ्यन्ते ।

भाषावृत्तौ काशिका-भागवृत्योः प्रभावः स्वयं लेखकेनाङ्गीकृतः ।
'काशिकाभागवृत्त्योश्चेत् सिद्धान्तं बोद्धुमस्ति धीः
तदा विचिन्त्यतां भ्रातर्भाषावृत्तिरयं मम' । इति[1]

अनेन ज्ञायते पुरुषोत्तमदेवस्य कालपर्यन्तं **भागवृत्ति**ग्रन्थ उपलब्ध आसीदिति ।

शिष्टैः प्रयुक्तानां शब्दानामन्वाख्यानं यत्र काशिकया भवति तत्र साऽऽश्रिता पुरुषोत्तमदेवेन, यत्र ताद्दशमन्वाख्यानं भागवृत्या जायते तत्र च भागवृत्तिरङ्गीकृता । यत्र च द्वे अपि वृत्ती शब्दान्वाख्यानकारिके किन्तु प्रक्रियायां मतभेदस्तत्रोभयमपि मतं दत्तम् 'एके' अन्ये इत्यादि-मतभेदसूचकं पदं प्रयुज्य । तथाहि—

(१) भ्राजिष्णुरितिसिद्धये जयादित्येन 'भुवश्च (३।२।१३८) इति सूत्रे उक्तम् चकारोऽनुक्त समुच्चयार्थः इति, उदाहरणं च दत्तम् भ्राजिष्णुना लोहितचन्दनेन । तच्च सर्वं भाषावृत्तौ (३।२।१३६) स्वीकुर्वता प्रोक्तम्' भुवश्च (३।२।१३८) चकारात् भ्राजिष्णुरित्येके ।

यङ्युकश्छान्दसत्वं भागवृत्तौ स्वीकृतम् । जयादित्येन तु लौकिकत्वमपि मन्यते । पुरुषोत्तमदेवेन रोरवीति नरीनर्ति जाघटीति इत्यादिशिष्टप्रयोगदर्शनात् जयादित्यमतमेव स्वीकृतम्, भागवृत्तिमतन्तूपेक्षितम् ।

(२) 'घृतनिधायमुदकं निदधाति' इत्यत्र कषादिषु यथाविध्यनुप्रयोगः ३।४।४६ इति णमुल्प्रकृतेरनुप्रयोगः क्रियासमभिहारानुप्रयोग-वद् व्यधानेऽपि भवति इति भागवृत्तिकारेणाऽपि स्वीकृतम् (भा० वृ० ३।४।४६) ।

(३) मणीवादीनां प्रतिषेधो वक्तव्यः इत्येके (जयादित्याः) इवार्थे वकारोऽयमिति भागवृत्तिः ।

यत्र च काशिका-भागवृत्योरभयोरन्यतरस्या अपि मतं न रोचते तत्रान्यन्मतमुद्भावितम् यथाः वावदूक शब्दो गृह्यतामुदाहरणाय । यजजपदशां यङः (पा० ३।२।१६६) इति सूत्रे वद्धातोः पाठाभावात् तेनासिद्धस्य वावदूकशब्दस्य 'वदेर्यङ्लुगन्तादूकः स्वीकृतो भागवृत्तिकारेण । तथोक्तम् उज्ज्वलदत्तेन वदेर्यङ्लुङन्तादूकः । वावदूकश्च वक्तरि (उ० वृ० पृ० १५३) ।

किन्तु पुरुषोत्तमदेवेनात्र उणादिप्रत्ययः स्वीकृतः वावदूकस्तूणादौ (भा० वृ० पृ० १५८) ।

परिभाषावृत्तिविमर्शः—

पुरुषोत्तमदेवस्य महत्त्वपूर्णा द्वितीया कृति र्वर्तते परिभाषावृत्तिः । व्याकरणनिकाये उपलभ्यमानपरिभाषाग्रन्थेष्वयमेवादिमो ग्रन्थः । पुरुषोत्तमदेवेन स्पष्टमुक्तम्—परिभाषा हि न पाणिनीयानि वचनानि किन्तु नानाचार्याणाम् । ज्ञापकसमुच्चयस्य प्रारम्भे लिखिते—

"यश्चक्रे परिभाषाणां वृत्ति वृद्धसुसंमताम् ।
पुरुषोत्तम आरेभे स ज्ञापकसमुच्चयम्" ॥

---

१. भाषावृत्तिः ८।४।६८ ।

इत्यत्र श्लोके 'वृद्धसुसम्मतां वृत्तिं चक्रे' इत्युक्त्वा स्वीयवृत्तेर्मूलभूतायाः कस्या अपि वृद्धसम्मताया वृत्तेरुल्लेखः क्रियते तथापि तस्या वृत्तेः साम्प्रतमनुपलब्धेरयमेव परिभाषाग्रन्थ आदिम इति परिभाषाक्षेत्रेऽपि बौद्ध एव विजयते।

परिभाषाया ज्ञापकसिद्धा वचनसिद्धा न्यायसिद्धेति त्रिविधवर्गीकरणमपि साम्प्रतमत्रैवोपलभ्यते।

'वृद्ध सुसम्मताम्' इति पदस्थवृद्धपदेन व्याडिं गृहीत्वा व्याडिकृतपरिभाषापाठोऽस्या परिभाषावृत्तेर्मूलमिति केचित्।

सीरदेवस्य परिभाषापाठः नागेशस्य परिभाषेन्दुशेखरश्च पुरुषोत्तमदेवीयपरिभाषामधिकृत्यैव लिखितौ।

परिभाषावृत्तौ विवृतानां परिभाषाणां संख्या १२० वर्तते। परिभाषायाः सामान्य लक्षणमिह न दत्तम्। परितो व्यापृता भाषा परिभाषेति व्युत्पत्त्यैवार्थबोले लब्धे सामान्यलक्षणनिर्माणं नातीवोपयुज्यते इति विचार्य प्रायस्तेन लक्षणनिर्माणं परित्यक्तम्[1]। वृत्तौ (परि० १) तेन परिभाषाया वर्गीकरणमित्थं विहितम् अथेयं परिभाषा (१) लिङ्गवती (इको गुणवृद्धी पा० १।१।३) (२) विध्वङ्गशेषभूता च (अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् परिभा० वृ० प० १) तत्र द्वितीया द्विविधा (१) न्यायमूला (२) वचनमूला चेति।

परिभाषाणामियं वृत्तिर्ललिता वृत्तिरुच्यते। तथाचोक्तम् परिभाषावृत्तिप्रस्तावनाश्लोके पुरुषोत्तम देवेन—

अथातः परिभाषाणां वचनानां च तादृशाम्
संक्षिप्य ललितां वृत्तिं प्रस्तौति पुरुषोत्तमः इति।

सीरदेवस्य परिभाषावृत्तेर्नागेशस्य च परिभाषेन्दुशेखरस्य चाधारेषु मुख्यतमं स्थानं वर्ततेऽस्या वृत्तेः। सीरदेवेन स्वपरिभाषावृत्तौ पुरुषोत्तमीयपरिभाषावृत्तेर्न केवलमर्थानुकरणमपितु शब्दानुकरणमपि कृतम्।[2]

यद्यपि परिभाषेन्दुशेखरस्य परिभाषावर्गीकरणमधिकं वैज्ञानिकं विषयप्रतिपादनं च प्रौढम् रीतिरपि परिमार्जिता प्राञ्जला तथापि मूलरूपत्वात् सारल्येन विषयोपस्थापनाच्च पुरुषोत्तमीयपरिभाषावृत्तेर्महत्वमङ्गीकार्यमेव।

ज्ञापकसमुच्चयः—

ज्ञापकसमुच्चयः पुरुषोत्तमदेवस्य वर्तते तृतीया कृतिः। व्याकरणनिकाये ज्ञापकानां ज्ञापनानां च तथैव महत्वमस्ति यथा परिभाषाणाम्। यथा परिभाषाणामभावे पदे पदेऽनिष्टापत्तिभयम् तथा ज्ञापनानामनङ्गीकारेऽपि। परिभाषावृत्तौ अपठितानि ज्ञापकसिद्धानि वचनान्यत्र समुच्चितानि वर्तन्ते। इत्थं ज्ञापकसमुच्चयः परिभाषावृत्तेः पूर्णत्वाय नैरन्तर्येण रचितो लेखकेनेति सिद्धचति। व्याकरणतन्त्रे कार्यमेतादृशं न केनापि कृतमद्यापि। नान्यो द्वितीय ईदृशो ग्रन्थः केनापि लिखितः। इत्थमनुमीयते पुरुषोत्तमदेवस्य गवेषणाशक्तिरुर्वरेति।

चान्द्रव्याकरणे बहूनि ज्ञापनवचनानि लक्ष्यसिद्धये समुपात्तानि वृत्तौ। परन्तु चन्द्रेणाऽपि ज्ञापकसमुच्चयः ज्ञापनसमुच्चयः वा न लिखितः ज्ञापितानि तानि तानि वचनानि संकलयता। इत्थं ज्ञापकसमुच्चयः बौद्धवैयाकरणस्यैवोद्भावनेति स्वीकारे न स्वल्पोऽपि संकोचाऽवसरः।

दृश्यतामुदाहरणाय चान्द्रे ज्ञापितानां वचनानां वृत्तौ तत्र तत्रोपयोगश्चर्चा च—

(१) अण्ग्रहणं (क्षेमप्रियमद्रादण् च (चा० १।२।२८ इत्यत्र) हेत्वादिषु ट—प्रतिषेधार्थम् (चा० १।२।२८ सू० वृ०)।

---

१. परि० वृ० १।

२. अनिनस्मन् ग्रहणान्यर्थ.....। इदं च कात्यायनवचनं परिभाषारूपेण पठ्यते। (सी० प० वृ० पृ० १६१)।
कात्यायनवचनमेतत् परिभाषा पठ्यते। पु० प० वृ० प० सं० ७७ पृ० ३६।

(२) अस्मादेव ज्ञापकात् (शूद्रा चामहत्पूर्वा जातिरित्यत्रामहत्पूर्वाग्रहणज्ञापकात्) तदन्तविधिरत्र प्रकरणे भवति (चा० २।३।१५ वृ०)।

(३) गोरचि यद् (चा० २।४।१५) इति सिद्धे पुनर्वचनं तदन्तविधिज्ञापनार्थम्। (चा० ४।१।२ सू० वृ०)।

अस्मिन् ज्ञापकसमुच्चये संगृहीतव्याख्यातानां ज्ञाप्यानां संख्याः १९८ सन्ति। ज्ञाप्यानां वर्गीकरणस्याधारः अष्टाध्यायीक्रम एवास्ति। अष्टाध्याय्यायं चत्वारः पादाः सन्ति; एवमिहापि अष्टावध्यायाः प्रत्यध्यायं चत्वारश्चत्वारः पादाः सन्ति। येषां ज्ञाप्यानां ज्ञापकानि यत्राध्याये यत्र च पादे वर्तन्ते तानि तस्मिन्नेवाध्याये तस्मिन्नेव च पादे न्यस्तानि। यथा 'तरप् तमपौ घः (पा० १।१।२२) इति सूत्रज्ञापितं 'प्रकर्षार्थमन्तरेण क्वचित्स्वार्थेऽपि तरबस्तीति ज्ञाप्यं प्रथमाध्यायस्य प्रथमे पादे न्यस्तम्।

(१) प्रथमाध्यायस्य प्रथमपादस्य नामकरणविशेषो नोपलभ्यते। किन्त्वन्येषामध्यायानां तत्तत्पादगत-वैशिष्ट्यमधिकृत्य नामधेयविशेषा अपि कृताः तथाहि—

प्रथमाध्यस्य—द्वितीयपादस्य नामधेयमस्ति कुटादिपादः (गाङ कुटादिभ्य पा० १।२।१) इति सूत्रस्यात्र पादे प्रथम-सूत्रत्वात्)।

प्रथमाध्यायस्य—तृतीयपादस्य नामास्ति भूपादः (भूवादयो धातव (पा० १।३।१) इतिसूत्रस्यात्र पादे प्रथमसूत्रत्वात्)।

प्रथमाध्यायस्य—चतुर्थपादनामास्ति कारकपादः।

अस्मिन् पादे 'कारके (पा०१।४।२३) इति सूत्रं यद्यपि प्रथमसूत्रं न वर्तते तथापि कारककार्याणां प्राधान्यात् प्रचुरत्वाच्च तथा नामकरणं कृतमिति सम्भाव्यते एवमेव द्वितीयाध्यायस्य प्रथमपादमारभ्याष्टमाध्यायस्य चतुर्थपादं यावत् अष्टाविंशतेर्विभागानां नाम करणे प्राधान्यमेव मूलम्।

प्रायः परिभाषा अपि ज्ञापिता वर्तन्ते, 'ज्ञापक-समुच्चये' संगृहीता ज्ञाप्या अपि ज्ञापिता वर्तन्ते। इत्थं पुरुषोत्तमदेवेन पुस्तकद्वये तयो विभज्यान्वाख्याने किं मूलमाश्रितमिति जिज्ञासायाम् इदमेव समाधानं सम्भाव्यते यत् व्याड्यादिविरचितपरिभाषापाठेषु परिभाषात्वेनामिमताः परिभाषावृत्तौ व्याख्यातास्तत्रापठिता ज्ञापकसमुच्चये संकलिता इति। परिभाषावृत्तिमुपसंहरता तेनोक्तम्:—इति तावत् ज्ञापकसिद्धा, वचनसिद्धा न्यायसिद्धाश्च काश्चन परिभाषा वचनानि च कानिचिद् यथाबोधमस्माभि विवृतानि। एवमन्यान्यपि शब्दक्रियोपयोगन्यायवाक्यानि लिङ्गोदाहरणाभ्यां समनुगन्तव्यानि। परिभाषावृत्तिः (राजशाही सं० पृ० ५६)।

पूर्वोक्तोद्धरणे 'काश्चन परिभाषाः वचनानि च कानिचिद्' इत्यनेन ज्ञायते इतोऽन्या अपि सन्ति परिभाषाः। परिभाषाज्ञाप्ययो वर्गीकरणे रूढिरेव कारणं भवितुमर्हति नान्यदिति गम्यते।

पुरुषोत्तमदेवस्यैतादृशं वर्गीकरणमवैज्ञानिकं विचार्यैव सीरदेवेन नागेशेन च ज्ञापकसमुच्चये पठितानि कतिचिज् ज्ञाप्यानि स्वस्वपरिभाषाग्रन्थे पठितानि तथाहि :—

यथा आतिदेशिकं कार्यमनित्यम् (ज्ञापक० स० पृ०७ ४) एकान्ता अनेकान्ताश्चानुबन्धा (ज्ञाप० स० पृ० ७२) परिहृत्यापवादविषयमुत्सर्गः प्रवर्तते (ज्ञाप० स० पृ० ९५) इत्यादीनि ज्ञाप्यानि परिभाषेन्दुशेखरे परिभारूपेण पठितानि[1]।

परिभाषावृत्तौ परिभारूपेण पठितान्यपि बहूनि वचनानि नागेशेन परिभाषेन्दुशेखरे नोपन्यस्तानि अथोपन्यस्यापि च तत्र परिभाषात्वं न स्वीकृतम् यथा :—परिभाषा वृत्तौ—

अगत्या खलु परिभाषाऽऽश्रीयते (परि० वृत्ति प० सं० ११९)। अबाधकान्यपि निपातनानि (प० वृ० सं०

---

१. परि० शे० परि० सं० ९९, ५, ६४।

९९), अर्थाद्विभक्तिविपरिणामः (प० वृ० सं० ८८), अव्यक्ते गुणसंदेहे नपुंसकलिङ्गं प्रयोजयेत् (प० वृ० सं० ६०) उदित् सवर्णं गृह्णाति न सवर्णमात्रम् (प० वृ० सं ८९) निमित्तकार्यं न तन्निमित्तस्य (प० वृ० सं० ९४) इत्यादयो न दृश्यन्ते परिभाषेन्दुशेखरे । अत्र चतुर्थी षष्ठी च परिभाषे सीरदेवस्य परिभाषावृत्तावपि न स्तः ।

दुर्घटवृत्तिकारेण शरणदेवेन ज्ञापकसमुच्चयः षट्कृत्वोद्धृतः । महासान्धिविग्रहिकश्रीधरेण स्वकाव्यप्रकाशविवेकटीकायां मम्मटेन दत्तं च्युतसंस्कृतेरुदाहरणम् अनुनाथते इति समालोचयता प्रोक्तम्—नाथतेरात्मनेपदिनः 'आशिषि नाथ' इत्यात्मनेपदविधानमाशिषि नित्यार्थम् । तेन याच्ञादौ विकल्प इति ज्ञापितं भवति । अतएव नाथसे किमु पतिं न भूभृतः' इत्यादि सिद्धचतीति क्रोडादिसूत्रे मैत्रेयः ।

कारकचक्रम्:—

कारकचक्रे कारकाणां दार्शनिकं विवेचनं वर्तते । ग्रन्थोऽयं वाक्यपदीयस्य कारकविचारमाश्रित्य लिखितः अतएवायं ग्रन्थः वाक्यपदीयस्योद्धरणेन परिपूर्णः । वैयाकरणभूषणे कारिकां लिखित्वा तद्व्याख्यास्वरूपं गद्यं लिखितमस्ति । अतः दार्शनिकविचारप्रवाहे साऽखण्डता नोपलभ्यते या किलेह विशुद्धगद्यग्रन्थे । अत्र क्रमे परमविकासमापन्ना ग्रन्थाः सन्ति नागेशस्यलघुमञ्जूषा स्फोटवादादयः । इत्थमयं ग्रन्थः दार्शनिकग्रन्थशृङ्खलायां मध्यगता **कटिकेव** वर्तते ।

ग्रन्थोऽय मतीव सरलेन संस्कृतेन प्रसादशैल्या च लिखितोप्यर्थगौरवं न क्वापि परित्यजति । सेयं प्रसन्नगम्भीरपदा सरस्वती सर्वेषां बौद्धाचार्याणां वैलक्षण्यम् ।

उदाहरणाय प्रातिपदिकार्थनिरूपणं विलोक्यताम्:—

'तत्र प्रातिपदिकार्थः सत्तेति । अद्वैतवादिनामेतद्दर्शनं सत्ता प्रातिपदिकार्थ इति । सत्ता नाम काचिदनादिनिधनरूपा नित्यतया व्यवस्थिता अनिर्मेया आकाशादिवत् सर्वशब्दैरेवाभिधीयते ।

यद्येवमभावशशविषाणादिभ्यः प्रथमा न प्राप्नोति, तेषामभाववाचकत्वेन सत्ताया अभावात् । नष्टोघट इत्यादेश्च प्रथमा न प्राप्नोति, नष्टस्य सत्ताया अभावात् । बीजादङ्कुरो जायते इत्यादौ च प्रथमा न प्राप्नोति सतो जन्माभावात्, अत्रोच्यते, सत्ता हि द्विविधा **वस्तुसत्ता अभिधेयसत्ता च** । नेह वस्तु सत्ताभिप्रेता किन्तर्ह्यभिधेयसत्ता । अभिधेयभूतस्यार्थस्य सर्वत्र विद्यमानत्वात् नेदं दूषणम् । अधिधेयं च ज्ञेयमिति यावत् । सा चाभावशशविषाणादीनामपि विद्यते । तथा चोक्तं न्यासकृता अभावोऽप्यर्थोऽभिधेयो भवत्येव । अन्यथा ह्यर्थाभावादितिवचनमनुच्चारणीयमेवस्यात्, अर्थाभावात् ।

एवमेव अन्ये त्वाहुरित्यादिना न्यासस्य (२।२।४६ सूत्रस्थस्य) मतं यत्रार्थान्तरनिरपेक्षा शब्दस्य वृत्तिः स प्रादिपदिकार्थः इत्युपस्थापितं साङ्गोपाङ्गविवेचनपूर्वकम् ।

अन्ते च यो यावन्तमर्थं न व्यभिचरति तस्य तावानेव प्रातिपदिकार्थः । तथात्रोक्तं भाष्ये अन्वयी, प्रातिपदिकार्थः । यो यावन्तमर्थं न व्यभिचरति, तस्य तावानेवार्थोऽन्वयी, तेन तस्य तावानेवार्थः प्रातिपदिकार्थः नातिरिक्त इति यावत् ।

कारक चक्रे इमे ग्रन्था ग्रन्थकाराश्चपुरुषोत्तमदेवेनोद्धृताः—

१—भाष्यकारः
२—भर्तृहरिः
३—न्यासः
४—न्यासकृत्
५—वृत्तिकारः

६—मण्डनमिश्रः

७—कज्जटः

अत्र प्रथमादिक्रमेण निरूपणं कृतम् । अतः षष्ठी सप्तम्याः पूर्वं निरूपिता वर्तते ।

कारकस्य सामान्यविशेषलक्षणं भेदप्रभेदाः, तेषां च सलक्षणोदाहरणानि च यथा सरलतयाऽत्र निरूपितानि न तथान्यत्र ।

स्थालीपुलाकन्यायेन चतुर्थीलक्षणभेदप्रभेदाः दृश्यन्ताम् ।

सम्प्रदानं त्रिविधम् प्रेरकमनुमन्तृकमनिराकर्तृकं चेति । तत्र प्रेरकं यथा ब्राह्मणाय गां ददाति । ब्राह्मणो हि पूर्वं मह्यं गां देहीति धार्मिकं प्रेरयति स च तेन प्रेरितो ददाति । अनुमन्तृकं यथा—उपाध्यायाय गां ददाति । उपाध्यायो हि यजमानं प्रथमं गां दातुं न प्रेरितवान्, अथ तां दीयमानामनुमन्यते भद्रं कृतमिति । अनिराकर्तृकं यथा-आदित्याय पुष्पं ददाति । न च आदित्यः प्रार्थयते, नाप्यनुमन्यते केवलं दीयमानं न निराकोति । इत्यादि स्वस्वत्वपरित्यागपूर्वकपरसत्वापादनमेव सम्प्रददातेरर्थोऽत्र स्वीकृतः । तेन रजकस्य वस्त्रं ददातीत्येव स्यादस्यापि मतेन ।

प्राणपणायाः पत्रमेकमेवोपलभ्यते साम्प्रतम् ।

तस्या अन्यासां च रचनानां समालोचनं तासामनुपलब्धेर्विषयान्तरविस्ताराभयाच्च न क्रियते । मन्ये, एतावान्निरूपणमेव तं महावैयाकरणं साधयितुमलं स्यादिति ।

बौद्धो वैयाकरणः शरणदेवस्तस्य दुर्घटवृत्तिश्च

दुर्घटवृत्तेः कर्ता शरणदेवोऽयं बौद्धः। स्वस्यां वृत्तौ बौद्धग्रन्थप्रयोगा[1]णां बहुशः स्मरणात् साधुत्वदर्शनान्मंगलाचरणश्लोके स्वदुर्घटवृत्तेः बुद्धापरपर्यायस्य सर्वज्ञस्य नमनाच्च[2]। सौभाग्यादत्रैव मङ्गलाचरणश्लोके प्रकरणे दौधक वृत्तबन्धे रचनाकालोऽपि तेन लिखित एव। तदनुसारेणास्य रचनाकालः १०९५ शाकमहीपतिवत्सरः सिद्धयति। शाकमहीपतिवत्सरोऽयमिदानीं शालिवाहनशकाब्दनाम्ना व्यवह्रियते। ततश्चेयं रचना ११७२ तमे खिस्ताब्दे सम्पन्नेति निश्चीयते। उपक्रमस्य तृतीयेन पद्येन वृत्तेरस्याः संक्षेप्ता प्रतिसंस्कर्ता च श्रीसर्वरक्षित इति प्रतीयते। तत्र 'श्रीसर्वरक्षितेन' इत्यत्र श्रीशब्दप्रयोगेणाऽऽदरविशेषावगमात् श्रीसर्वरक्षितः शरणदेवस्य गुरुः गुरुकल्पो वेति सम्भाव्यते[3]।

शरणदेवोऽयमतीव व्युत्पन्नः। समस्तं वाङ्मयं तस्य हस्तामलकवत् प्रत्यक्षमिव प्रतीयते। लौकिकाश्च सकलाः प्रयोगास्तस्य विचारवीचिनिचिताइव दृश्यन्ते। एतादृशेन प्रखर पाण्डित्येन विलसितस्यास्य शरणदेवस्य निरीक्षण-समीक्षण शक्तिरपि विशिष्टैव दृश्यते, यतोऽस्य दृष्टेः न कोऽपि लक्षणदोषस्तिरोहितो न वा कापि प्रयोगविप्रतिपत्तिराच्छन्ना वातिष्ठत। मम्मटस्य शब्देषु लोकशास्त्राद्यवेक्षणात् या निपुणता व्युत्पत्तिः प्राप्तव्याऽभिहिताऽस्ति सा शरणदेवस्य दुर्घटवृत्तौ प्रतिपदमुपलभ्यते।

ग्रन्थस्य नामकरम्—

तेषां प्रयोगाणामत्र वृत्तौ विवरणं दीयते, येषु पाणिनिसूत्राणि दुःखेनैव संघटन्ते। कृच्छ्रघटनीयानां लक्ष्याणां लक्षणानुगततया विवरणदानादियं वृत्तिः दुर्घटवृत्तिनाम्नाऽऽख्याता ग्रन्थकारेण। यदि चोच्यते अत्र प्राधान्येन सूत्राण्यु-

---

१. भिक्षुणी, कथम्, उच्यते
भिक्षुं भिक्षुंत्वं नयति प्राप्नोति इति क्विपि
कृदिकारादक्तिन इति ङीष् (४।१।४९)।

कथं मान्यचरेभिर्गन्धरेभिः इति बौद्धप्रयोगः। बहुलग्रहणमिहापि सम्बद्धयते।
तेन क्वचिदैस्त्वं न भविष्यति। (७।१।९।

२. नत्वा शरणदेवेन सर्वज्ञं ज्ञानहेतवे।
वृहद्भट्टजनाम्भोजकोशवीकाशहेतवे ॥

शाकमहीपतिवत्सरमाने, एकनभोनवपञ्चवितानें।
दुर्घटवृत्तिरकारि मुदे वः कण्ठविभूषणहारलतेव ॥

वाक्याच्छरणदेवस्य छात्रावग्रहपीडिया
श्रीसर्वरक्षितेनैषा संक्षिप्य प्रतिसंस्कृता—पृष्ठ—२ दुर्घटवृत्तिः।

३. शरणदेवः श्रीसर्वरक्षितस्य शिष्यः शिष्यकल्पो वा सम्भाव्यते।
(दुर्घटवृत्तिभूमिकायाम् गणपति शास्त्री पृ० १)।

लिल्ख्य तेषां वृत्तौ दुर्घटता दर्शिताऽस्ति, तथा च दुर्घटेतिविशेषणं सूत्राणां भवितुमुचितं न प्रयोगाणाम् इति तर्हि दुर्घटानां लक्ष्येषु सदुःखं घटनीयानां पाणिनिसूत्राणां विवरणं वृत्तिः जीवनम् वा इति तात्पर्यं नीत्वेदृशनामकरणमिति गृह्यताम्। नच पूर्वनिर्दिष्टविग्रहद्वयेपि षष्ठीसमासो दुर्लभः दुर्घटेत्यस्य प्रयोगे सूत्रे वा सांकाक्षतया वृत्तिशब्देन सह सामर्थ्याभावात् इति वाच्यम्, मा भवतु षष्ठीसमासः। मध्यमपदलोपिसमासेन रूपसिद्धेः सम्भवात्, तथाहि दुर्घटाः प्रयोगाः यस्यां सा दुर्घटप्रयोगा; दुर्घटानि वा सूत्राणि यस्यां सा दुर्घटसूत्रा सा चासौ वृत्तिरिति विग्रहे शाकप्रियः पार्थिव इतिवत् दुर्घटवृत्तिशब्दस्य सिद्धिः। अत्र च वृत्तौ, वाङ्मये लोके च प्रयुक्तास्तादृशाः प्रयोगाः संकलिताः, येषां सिद्धिः सामान्यतः पाणिनिसूत्रेण न सम्भाव्यते। प्रथमं पाणिनिसूत्रं लिखितं ततश्च तादृशे सूत्रे स्वीकृते येषां लोकशास्त्रप्रसिद्धानां लक्ष्याणां निष्पत्तौ बाधा दृश्यते, तेषां परिगणनं कृत्वा 'कथं तर्हि' पद्धत्या ताः बाधा दर्शयित्वा 'उच्यते' शैल्या तेषां लक्ष्याणां सिद्धयुपायः प्रदर्शितः। वृत्तिरियं बहूनि महत्वान्यादधाति तथाहि :—

(१) बहूनां ग्रन्थानां ग्रन्थकाराणां च समयनिधारणे सहायिकेयं वृत्तिः। अत्र येषां ग्रन्थानामुद्धरणानि दत्तानि, तेषां समयनिर्धारणं लिखितनिर्माणकालेनाऽनेन ग्रन्थेन कर्तुं पार्यते।

(२) बहूनां ग्रन्थानां नामनिर्देश-पूर्वकमिह निर्दिष्टानां साम्प्रतमनुपलब्धानां 'शुद्धसुबन्तम्' प्रसिद्धपदम्, सुवर्णरेखा, प्रयोगमुखीत्यादीनां सम्भावनामाशंसनीयोपलब्धिं चैषा प्रमाणयति। अस्यां वृत्तौ समुपलब्धनाम्नां ग्रन्थानां विषये जिज्ञासां साम्प्रतमुपलब्धानां च तेषां प्राप्तिप्रयत्नप्रेरणां चोद्भाव्य ग्रन्थरत्नमिदं समीक्षार्थं संस्कृतभक्तान् समुत्कयति, समालोचनार्थं च तानाह्वयति। इत्थमिदं ग्रन्थरत्नं गवेषणायै प्रचुरसामग्रीं प्रयच्छति।

(३) प्रसिद्धप्रयोगनिष्पत्तिशङ्कानिरसनपूर्वकं तदुपपत्तिसमालोचनापरोऽयमेक एव ग्रन्थः नापरः संस्कृतव्याकरणे उपलभ्यते। परन्त्वस्य शैली प्रौढ्याऽनुमीयते यदेतादृशा ग्रन्थाः संस्कृतेऽवश्यमासन् इदानीं च ते कथाशेषतां गता इति। एतादृशविचारबीजं यद्यपि भाष्ये उपलभ्यते, परन्तु एतादृशानां प्रचुरसंख्यकानामन्वेषणीयसमाधानानां प्रयोगाणामेकत्र वर्गीकृतविवरणप्रस्तुतीकरणं शरणदेवस्यैव प्रयासफलं वैयाकरस्यैर्भुज्यत इति भूयो भूयः प्रशस्यः सः।

(४) अस्यां दुर्घटवृत्तौ ६२ ग्रन्थकाराः, ६९ ग्रन्थाश्चोद्धृताः १०१४ संदिग्धसिद्धयः प्रयोगाश्च पाणिनीयव्याकरणदिशा संसाधिताः। ईदृशेन विवरणेनास्य ग्रन्थकर्तुरेकतो लोकशास्त्रगतप्रयोगज्ञानागाधताऽन्यतश्च व्याकरणज्ञानस्फीतता ध्वन्यते। तस्यायमायासः कं न चित्रीयते; समस्तवाङ्मयस्य लौकिकशब्दानांचानन्तपारावाराणां मन्थनमननं येन कृतं भवेत्।

(५) अत्रत्यो विचारो यथा प्रौढः शैली च तथैव प्राञ्जला। दृश्यताम् उदाहरणाय—

'कथं नप्ता कुमारी, ऋन्नेभ्यो ङीप् इति ङीप्प्रवृत्तेः, उच्यते, भागवृत्तिकृन्नप्तृशब्दं स्वस्रादौ पठितवान्। तेन 'न षट् स्वस्रादिभ्य इति ङीपो निषेधः। कथं तर्हि नप्त्री पौत्री सुतात्मजा इत्यमरः, उच्यते, ये स्वस्रादौ न पठन्ति तन्मतेन।

अत्रत्याऽऽशंका तदुद्धारश्च कयाऽपूर्वया बोधगम्यया शैल्या प्रवर्शितौ इति शास्त्रज्ञानजुषां विदुषां न तिरोहितम्।

कतिपयान्युदाहरणान्तराण्यपि विलोक्यन्ताम्:—

संस्कृतव्याकरणे लिङ्गप्रयोगे यथा पदे पदे प्रमादशंका बाधते प्रयोक्तारम्। सावधानेन मनसा पदप्रयोगेऽपि लिङ्गाशुद्धयो दृश्यन्ते; तत्कृते दृढाधाराभावान्नियमनिर्माणजन्यं काठिन्यमनुभूय पाणिन्याचार्येणापि 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति व्याहृत्य लिङ्गनिर्णयनियमानामनावश्यकता दर्शिता। 'गृहस्थूणं शशोर्णम्' इति वररुचिलिङ्गकारिकाप्रयोगे परवल्लिङ्गता (२।४।२६) स्यात् ?—लोकाश्रयत्वाल्लिङ्गस्येति क्लीबत्वम्।

'गणरात्रं निशा बह्वृचः' इत्यमरप्रयोगे अच्प्रत्यन्वपूर्ववर्तात् ५।४।७५ इत्यचि रात्राह्नाहा पुंसि २।४।२९ इति पुंस्त्वेन भाव्यमिति चेदुच्यते गणशब्दोऽयं बहुत्ववाची समूहवाची च। अत्र बहुत्ववाचित्वे गणानां रात्रीणां समाहार इति समाहारे द्विगौ कृते समासे 'समासान्ता अनवयवाः' इत्यस्मिन् दर्शने अकारान्तोत्तरपदत्वाभावाद् अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते इति न स्त्रीत्वम्। स नपुंसकम् पात्रादित्वाद् वा क्लीबत्वम् इत्यादि लिङ्गानुशासनदोषसमाधानानीह दत्तानि (दु० वृ० पृ० ५५)। गणशब्दस्य बहुगणवतुडतिसंख्या इति संख्यासंज्ञकस्य पूर्वत्वे "संख्यापूर्वं रात्रं क्लीबम्" इति क्लीबत्वेनापि संभवत्यत्र निर्वाहः। संस्कृतभाषायां परस्मैपदात्मनेपदप्रयोगकाठिन्यं सर्वैरनुभूयते। एतत्प्रयोगकाठिन्यादेव प्राकृते आत्मनेपदप्रयोगो विलुप्तः। 'भारो न बाधते राजन् यथा बाधति बाधते' इत्येतादृशोपहासभाजनतामधुनापि वैयाकरणतल्लजोऽपि गच्छति। शरणदेवेनात्मनेपदस्यस्थाने परस्मैपदस्य प्रयुक्तस्य साधुत्वसम्पादनाय बहव उपाया दर्शिताः। एतेनात्मनेपदप्रयोगप्रमादस्तेन क्षम्य इति व्यञ्जितम्।

'कर्णपुच्छं मया त्यक्तं भग्नो दन्तस्तथैव च
एष कालः समुत्पन्नो यः पलाति स जीवति'।

इत्यत्र कथं पलातीत्युक्तम्, अनुदात्तङित आत्मनेपदमिति आत्मनेपदप्रसक्ते 'पलायते' इति सिद्धचतीति प्रश्नस्या नेकधा समाधानम लिखितम् तथाहिः—

१—पल गतौ इत्यस्य लेटि आडागमे रूपम्, छान्दसा अपि भाषायां क्वचित् प्रयुज्यन्ते। अध्वर्युशब्देन क्याच्छन्दसि ३-२-१७० इत्युप्रत्ययान्तेन ज्ञापितम्।

अथवा अय् गतौ इत्यस्मादात्मनेपदानित्यत्वात् तिपि दिवादौ ध्याचिन्तायामिति वक्तव्ये भूवादौ 'ध्यै' चिन्तायामितिज्ञापकात् गणकार्यानित्यत्वाच्छपोऽभावे रूपं लोपोव्योर्वलीति (६-१-६६) इति यलोपे पलातीति।

२—कथमुच्चिकुटिषतीति कुटादित्वेन सनो ङित्वात् तङ्प्रसंगात् उपदेशाधिकारादिति 'गाङ्कुटादौ' न्यासः। कथं बोभूयते तपसः परस्मैपदं च इति सनाद्यन्तानामप्युपदेशोऽस्ति' इति ज्ञापकसमुच्चयः। सचायुक्तः भावकर्मणोः (१।३।१३) इत्यात्मनेपदनिवृत्यर्थत्वात्। कथं शिञ्जद् वलयसुभगैः 'इति मेघः। उच्यते। चक्षिङो युजर्थायात्मनेपदार्थाय चेकारानुबन्धे कर्त्तव्ये द्वयनुबन्धत्वम् 'अनुदात्तङितमात्मनेपदमनित्यमिति ज्ञापयति'। तथा 'नीचं समृद्धमपि सेवति नीच एव दूरेण तं परिहरन्ति पुनर्महान्तः' 'अनुक्तमप्यूहति पण्डितो जनः' 'लभन्ति पुनरुत्थानम्' तवोपशायिका यावद्राक्षस्यश्चेतयन्ति न, 'त्राहि मामुरुदुःखितम्' त्राहि मां हि तथा गतम्' इत्यादि सिद्धम्। त्राहीत्यत्रेदमपि वाच्यम् त्रायते इति त्राः। अन्येभ्योऽपि दृश्यते इति विचि आचारे क्विपि धातुत्वे लोटि रूपम्। मां त्राहित्रातेवाचरेत्यर्थः। 'मण्डपे शयामि किमतः परम्' इति। गणकार्यमनित्यम् इति गणकार्यानित्यत्वाच्छपो लुग् भवेत्। कथम् 'आदध्यादन्धकारे रतिमतिशयिनीमावहन् वीक्षकाणाम्' इति मयूरः। उच्यतेः धा धारण इत्यस्य नायं प्रयोगः, किन्तु दध्धारणे इत्यस्याऽशिष्यार्धधातुकत्वे। आदधातीति आदधः ततश्चाचार क्विबन्तात् आशिषि लिङ्कारलोपो यासुटि रूपम्। इत्थमात्मनेपददोषाणां बहून्युदाहरणानि दत्वा तेषां समाधानानि प्रोक्तानि।

शरणदेवस्य पाण्डित्यम् व्याकरणाय तद्दानं च—

व्याकरणशास्त्रमर्मज्ञोऽयं शरणदेवः लोकिकप्रयोगपरिशीलनप्राप्तनैपुण्यः विविधशास्त्रसमागतपदगतसाधुत्वसन्देहपूर्वकतन्निष्पादनदक्षः स्वच्छप्रतिभः पाणिनीयभक्तश्चासीत्। अनेन संदिग्धसिद्धीनां प्रयोगाणां साधनाय विविधाः रीतयोऽङ्गीकृताः, किन्तु ताः अपि सिद्धयः प्रायः पाणिनिसूत्रव्याख्याद्वारेणैव दर्शिताः। तासु कतिपया रीतयोऽधो दीयन्ते उदाहरणायः—

१—ज्ञापनात्मकरीतिः
२—पक्षान्तराश्रयमूला
३—व्यवस्थितविभाषारूपा
४—प्रकृत्यन्तरकल्पनारूपा
५—प्रत्ययान्तरस्वीकारात्मिका
६—व्याख्यान्तराश्रयणी
७—परिभाषाश्रया
८—प्रक्रियान्तराङ्गीकारात्मिका
९—योगविभागमूला
१०—चार्थसंग्राह्या
११—आकृतिगणाश्रया
१२—ग्रन्थान्तरसमाधानाश्रया
१३—भाष्यप्रतिकूलकल्पना
१४—बहुलाश्रया
१५—विवक्षाश्रया
१६—नियमान्तराश्रयणमूला
१७—व्याकरणान्तराश्रयणी
१८—न्यासान्तराश्रयणी
१९—निर्देशमूला
२०—उपचारमूला
२१—नियमासंकोजन्या
२२—लोकाश्रया
२३—अध्याहाराश्रिता

१—ज्ञापनात्मिका रीतिः सास्ति यया संदिग्धसिद्धेः कस्यापि प्रयोगस्य किमपि ज्ञापनमाश्रित्य सिद्धि विहिता।

(क) यथा तुल्यास्यप्रयत्नं सवर्णम् पा० १।१।९ इति सूत्रे उक्तेन ऋकारलृकारयोः सवर्णसंज्ञा वक्तव्या इति वार्तिकेन ऋकारलृकारयोः सवर्णसंज्ञायां जातायाम् प्रकल्प्यमान इत्यत्र ऋवर्णाच्चेति णत्वप्रसङ्गमुद्भाव्य उरिति वक्तव्ये ऋवर्णाच्चेति वार्तिके वर्णग्रहणं णत्वस्यास्यानित्यत्वज्ञापनार्थम्। तेनात्र न णत्वम्। यद्वा ऋलृक् इत्यत्र प्रत्याहारे लृग्रहणं शक्यमकर्तुम्। यथा सावर्ण्याद्दकार ऋकारं गृह्णाति तथा लृकारमपि ग्राहयिष्यति किं लृकारेण। तज्ज्ञापयति ऋकारलृकारयोः सावर्ण्यमनित्यम् इति। तेन यथा क्लृप्तशिख इत्यत्र गुरोरनृत इति प्लुतो भवति, नत्वनृत इति प्रतिषेधस्तथा प्रकल्प्यमान इत्यत्र णत्वाभावः। इत्थमत्र ज्ञापनमाश्रित्य णत्वापत्तिः परिहृता। कृत्यच इति प्राप्तस्य तु णत्वस्य क्षुम्नादित्वाद्वारणम्।[1]

(ख) 'पतिना नीयमानायाः पुरः शुक्रो न दुष्यति' तथा 'गते मृते प्रव्रजिते क्लीबे च पतिते पतौ तथा पतौ जीवति या नारी उपोष्य व्रतचारिणी, आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत्' इत्यादौ शेषोऽध्यसखि (पा० १।४।७) पतिः समास एव (पा० १।४।८) इति पतिशब्दस्य समास एव धिसंज्ञाविधानात्, धिसंज्ञाऽप्राप्त्या पतिनेत्यादि रूपासिद्धिशङ्कायाः समाधानम् ज्ञापकत्वमाश्रित्य कृतम् तथाहि शेषोऽध्यसखिपती इति वक्तव्ये पृथक्करणं ह्यनित्यत्व-ज्ञापनार्थम्। तेन पतिशब्दस्य क्वचिदसमासेऽपि धिसंज्ञा[2]।

(ग) टित आत्मने पदानां टेरे (पा० ३।४।७९) कथं कर्त्तारौ कर्त्तार इत्यादौ न टेरेत्वम्। कृतटेरेत्वस्यादेशौ जातौ लक्षणाभावात्। यद्वा थासः से (३।४।८०) इत्यत्र सकारादेशे कर्तव्ये एकारान्तादेशो ज्ञापयति आदेशादेशानां टेरेत्वं नेति। शेरते श्रयन्ते इत्यादौ त्वादेशस्यैकदेशादेश इति टेरेत्वम् संभवति। एत्वे कृते वा अदादेशः।

(घ) श्रिणी भुवोऽनुपसर्ग ३।३।२४ अत्रानुपसर्ग इत्युक्तत्वात् 'प्रादुर्भाव' इति सकललोकप्रयुक्तस्य शब्दस्य सिद्धिः कथं स्यादित्याशङ्क्य समाहितम्:—उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ८।३।८७ इत्यत्रोपसर्गात् पृथक्प्रादुर्ग्रहणात् ज्ञायते नात्रोपसर्गकार्यम्। इत्थमस्यसिद्धिः ज्ञापकद्वारा कृता[3]।

---

१. दु० वृ० १।१।९।
२. दु० वृ० १।४।८।
३. दु० वृ० ३।३।२४।

(ङ) भुजोऽनवने १।३।६६ इति सूत्रेऽनवने अर्थात् अपालने इत्युच्यते पालनार्थे तङोऽसाधुत्वं ज्ञायते। तथाच 'दिवं मरुत्वानिव भोक्ष्यते महीम्' बुभुजे 'पृथिवीपालः पृथिवीमेव केवलाम्' इति रघुवंशे विहिततङ्घटितपद-प्रयोगोऽशुद्धः। एवम् बुभुजाते चिरं महीम् इति कामन्दकीयेऽपीति चेन्न भुजो भक्षे इति वक्तव्येऽनवनग्रहणात् उपभोगवृत्तावपि तङ् इति रक्षितः। पुरुषोत्तमदेवोऽपि प्राहः—' उपभोगोऽत्र गौणार्थः। स च पदेन तङन्तेन प्रतीयते। यथा गौरति सुबन्ते बाहीक इति। तङ् तु अदने मुख्यार्थे पूर्वमेव जातः। अथवा उपपत्तिवैचित्र्यमात्रमेतत्। भुजेरेव ह्युपभोगो मुख्यार्थो भवति, उपसर्गस्य द्योतकत्वात्। अथवा रक्षणीयं निक्षेपादिकमात्मसात् कुर्वन् हि तस्या-रक्षक इत्युच्यते लोके। तथा च आत्मसात् करणं वा अनवनम्। तथाचात्रानवनार्थसत्वात् तङ् सम्भवति। चान्द्रास्तु भुजो भक्ष इत्येवमाहुस्तेषां मतेनेदृशाः प्रयोगाश्चिन्त्याः। अतस्तेषां लक्षणं सदोषमेवेति हृदयम्।

(च) बहिर्ग्रामादित्यत्र कथं पञ्चमी, विधानामावात् इति चेदुच्यते अपपरिबहिरञ्चवः पञ्चम्या २।१।१२ इत्यनेन पञ्चम्या सह बहिरित्यस्य समासविधानाज् ज्ञापकात् बहिर्योगे पञ्चमीति भागवृत्तिः। न चैवं 'करस्य करभो बहिः' इत्यत्र बहिर्योगे करस्येत्यत्र षष्ठी न स्यात् इति वाच्यम् ज्ञापकसिद्धं न सर्वत्र इति ज्ञापकसमुच्चयस्य समाधा-नात्[1]।

(छ) ददरिद्रौ इत्यत्र कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमितिवचनात् आम् स्यात् इति चेन्न आत औ णल इत्यत्र ओकारे कर्तव्य औकारग्रहणम् दरिद्रातेरार्धधातुके आलोपो वाच्य इति आलोपे कृते श्रवणार्थम्। तच्च तदैव संभवति, यदा दरिद्रातेराम् न स्यात् इत्थमत्र आत औ णल (७।१।३४) इति ज्ञापकादामोऽभावो ज्ञापनाश्रयणेन कृतः[2]।

(ज) गिरौडश्छन्दसीत्यस्य जागरूकत्वात् लोके 'गिरिश' शब्दप्रयोगस्य साधुत्वं न सिद्धयति तथा च गिरिश-मुपचचार प्रत्यहं सा सुकेशीत्यादिप्रयोगाणां का गतिरिति चेत्, यजुः क्रतुरिति वक्तव्ये अध्वर्युक्रतुरिति ज्ञापकात् छान्दसा अपि भाषायां प्रयुज्यन्ते क्वचिदितिरक्षितोक्तसमाधानमेव गृहाण[3]।

(झ) निर्देशमूलकमपि ज्ञापनमाश्रितमत्र। तेन कर्मणि भृतो ३।२।२२ इत्यत्र भृताविति निर्देशात् भृतिरिति रूपं साध्यते। अन्यथा 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः' ३।३।९९ इति सूत्रेण विहितेन क्यपा क्तिनो नित्यं बाधात् भृतिरिति न स्यात्। वा सरूपविधिस्तु न, अस्त्रियामित्युक्तेः।

(२) शरणादेवेन क्वचिद् पक्षान्तरमाश्रित्य दोषोद्धारः कृतः।

(क) धातोः कर्मणः समानकर्तृकादिच्छायां वेत्युच्यते, एवंच कूलस्याचेतनत्वात् इच्छाया असम्भवात् 'नदी-कूलं पिपतिषतीति कथं सन्प्रत्ययः इति प्रश्नस्योत्तरम् ददल्लिखति' पदसंस्कारेण, इति।

(ख) 'इदानीं करिष्यसि' इति प्रयोगः सर्वजनीनः। तत्र इदानीमेवेति प्रेषणस्य वृत्तत्वात् प्रैषातिसर्गप्राप्त-कालुषु 'कृत्याश्च' ३।३।१६३ इत्यनेन कृत्यलोटोः विधानेन भाव्यम्, तयोः सर्वलकारापवादत्वात् इति चेदुच्यते पद-संस्कारे साधुः। एवं श्वो गमिष्यसीत्यादिरपि साधुः।

(ग) 'माच्छादयामीति' रूपावतारप्रयोगे माङि लुङ् ३।३।१७५ इत्यनेन लुङ्लकारः कुतो न, उच्यते, पदसंस्कारपक्षे छादयामीतिपदस्य पृथक्संस्कारानन्तरं मा शब्देन तस्य योगे रूपसिद्धेः।

---

१. दु० वृ० पृ० ३२, ३३।
२. दु० वृ० पृ० ६२।
३. दु० वृ० पृ० ६५।

(३) क्वापिक्वापि शरणदेवेन व्यवस्थितविभाषाश्रयणेन प्रयोगनिष्पत्तिः दर्शिता । (क) यथा 'व्यथां द्वयेषामपि मेदिनीभृताम्' इति माघकाव्ये समागतस्य द्वयेषामितिप्रयोगस्य कथं सिद्धिः, प्रथमचरमतयाल्पार्धकतिपयनेमाश्च (पा० १।१।३३ सूत्रेण तयपः स्थाने जातस्यायचः स्थानिवद्भावेन तयप्प्रत्ययान्ततया प्राप्ताऽपि सर्वनामसंज्ञा जस्येव जायते । एवंचामि सर्वनामसंज्ञाया अभावात् तन्मूलकस्य आमि सर्वनाम्नः सुट् (पा० ७।१।५२) इति सुटः असंभवादित्या शङ्क्य प्रथमचरमेति सूत्रे व्यवस्थितविभाषाश्रयणात् अन्यत्रापीष्यते सर्वनामसंज्ञेति समाधानं दत्तम् ।

(ख) नित्यं ङितः ३।४।९९ सूत्रेण यदि सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः क्रियते तदा 'मातः किं विदधामः' इति कुट्टनीमते विसर्गान्तरूपस्य सिद्धेरभावः स्यात् लोटो लङ्वद् ३।४।८५ इत्यतिदेशेन सलोपप्रसंगात् इति प्रश्नस्य समाधानम् लोटो लङ्वद् इत्यत्र वृत्तौ विदोलटो वा० ३।४।८३ इत्यतो वाग्रहणमनुवर्त्याडादिव्यावृत्यर्थं व्यवस्थितविभाषाश्रयणस्यावश्यकत्वेनात्र न सलोप इति ।

यद्यपीदमुत्तरं न रोचते वैयाकरणाय यतः पचाम इत्यादौ लोटो लङ्वद्भावेन यत्सलोपकार्यं साध्यते तस्यैव-व्यवविभाषाश्रयणादभावसाधनं नियमाव्यवस्थासूचकम् । अतः शरणदेवेन 'विदधीमहि' इति पाठः कर्तव्यः इत्युक्तम् तथापि यथा कथंचित् तेन व्यवस्थितविभाषाऽऽश्रीयत इति प्रदर्शयितुमुदाहरणमिदं दत्तम् ।

(४) संदिग्धसिद्धीनां रूपाणां प्रकृत्यन्तराश्रयणं विधाय साधनमपि दृश्यते दुर्घटवृत्तौ । इयं रूपसाधनप्रक्रिया-प्रकृत्यन्तराश्रयरूपेति मया वर्गीकृता । अस्याः प्रक्रियाया अनेके प्रकारा उदाहरणानि चात्र दृश्यन्तेः—

(अ) यथा 'व्यथां द्वयेषामपि मेदनीभृता' मित्यत्र द्वयशब्दस्य जसि विभक्तौ अयचस्तयपः स्थाने जातस्य स्थानिवद्भावेन तयप्प्रत्ययान्ततया 'प्रथमचरमेति' विकल्पेन सर्वनामसंज्ञायाः सम्भवेऽपि षष्ठीबहुवचने सर्वनामसंज्ञा-विधानाभावात् आमि सर्वनाम्नः सुडिति सुट् न स्यादिङ्क्य इष् गतौ इत्यत्र क्विपि द्वयं द्वैधं गच्छन्तीति द्वयेषः तेषाम् द्वयेषाम् इति च प्रकृतिद्वयमाश्रित्य रूपं संसाधितम् । एवंच द्वयेषाम् इति न द्वयशब्दस्यामि रूपं किन्तु द्वयेष्रूपप्रकृत्यन्तरस्येति तात्पर्यमायाति ।

(आ) लावण्यमुत्पाद्य इवास यत्नः इति कुमारप्रयोगे अस्तेर्भूः २।४।५२ इति भ्वादेशवारणं, नेदमस्तेरूपं किन्तु अस् गतिदीप्त्यादानेषु इत्यस्येति प्रकृत्यन्तरमाश्रित्य कृतम् ।

(इ) 'का ते स्तुतिः स्तव्यपरापरोक्ति' रित्यत्र 'एतिस्तुशास्वृदृजुषः क्यप् (३।१।१०९) इत्यनेन क्यप्प्रत्यये स्तुत्यपरेत्येव स्यादित्याशङ्क्य स्तवमर्हतीत्यर्थे दण्डादिभ्यो यत् (५।१।६६) इति यत्प्रत्ययेन कृतं समाधानमपि प्रकृत्य-न्तराश्रयणपूर्वकमेवास्ति ।

(ई) गिरिशमुच्चचार प्रत्यहं सा सुकेशी इति गिरीशो गिरिशो मृड इति कुमारामरकोशकाराभ्यां गिरिश इति कथं साधितः, अधिकरणे शेतेः ३।२।१५ इत्यत्र गिरौ डः छन्दसीति डप्रत्ययस्य छन्दस्येव विधानात्, उच्यते गिरिरस्याश्रयत्वेनास्तीति लोमादित्वात् शः । इत्थमत्र न गिरिपूर्वकशीङ्प्रकृतिः किन्तु केवला गिरिप्रकृतिः[1] ।

(उ) ',एवमुक्तवति पौलस्त्ये भूगोऽप्याह महेश्वर" इति कैलासोद्धरणे, 'परिधोरुभुजानाह हसन्तीस्वागतं कवीन् इति भट्टिकाव्ये चाहेति तिङन्तप्रतिरूपकः शब्दः कालसामान्यवचनः न तु ब्रूञ्धातोर्वर्तमानकालिकः प्रयोगः[2] ।

(ऊ) ईर्ष्यालुः, बुभुक्षालुः लज्जालुः शीतालुरित्यादयः शब्दाः कथं सिद्धचन्ति; स्पृहिगृहिपति दयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ३।२।१५८ इति सूत्रे ईर्ष्यादेः पाठाभावात् इति चेदुच्यते, ईर्ष्यामालातीति बुभुक्षाम्

---

१. दु० वृ० ३।२।१५ ।

२. दु० वृ० ३।२।१२३ ।

लज्जां वा आलातीति विग्रहे मृगय्वादित्वात् कुप्रत्ययः। शीतं न सहते इति विग्रहे शीतोष्णतिप्रेभ्यस्तदसहने इति आलुच् प्रत्ययस्तद्धितः[1]।

(ए) 'जगतोऽस्य जगन्मये' इति चण्डीप्रयोगे 'जगन्मये' इति इति 'जगन्मया' इत्यस्य सम्बुद्धौ यत्साधितं रूपं तन्न सिद्धचति, नित्यं वृद्धशरादिभ्यः ४।३।१४४ इति नित्यमयटि ङीपि सम्बुद्धौ जगन्मयि इति रूपस्यैव सम्भवादिति चेन्न जगन्मयते जानातीति मय् धातोः पचाद्यचि अजादेराकृतिगणत्वात् टापि रूपसिद्धिसम्भवात्[2]।

५—प्रत्ययान्तराश्रयणमूला यथा—

(क) जातिस्मरौ नूनमिमावभूताम् इति रघुवंशे जातिस्मराविति प्रयोगः संदिग्धसिद्धिः, कर्मण्यण् इति अण्प्रत्यये दुर्वारे जातिस्मारावितिं स्यादितिचेत् पचाद्यचा सिद्धेः।

पुरस्तरा इति स्त्रीलिङ्गे न सिद्धचति पुरोऽग्रतोऽग्रेषु सर्तेः ३।२।१८ इति टप्रत्यये टिड्ढेति ङीप्प्रसंगात्, उच्यते पचादेराकृतगणत्वात् अच्प्रत्ययेन सिद्धिः।

६—व्याख्यान्तराश्रयणी रीति र्यथा—

(क) त्वं ब्राह्मणीत्यत्र त्व+अम् इति स्थितेऽन्तङ्गत्वात्प्राप्तस्य टापो वारणाय 'शेषे लोप' इति सूत्रस्यात्वयत्वनिमित्तेतरविभक्तौ परतो युष्मस्मदोरत्यस्य लोप इति व्याख्यां विहाय आदेशाच्छेषस्य अर्थादङ्गागस्य लोप इति व्याख्यां कृत्वा त्व—अद्+अम् इति स्थतेऽन्तङ्गत्वावान्न टाप्। इत्थं दूषणमिदं निवारयितुं व्याख्यान्तरमाश्रितम्।

कषादिषु यथाविध्यनुप्रयोगः ३।४।४६ इत्यनेन णमुल् प्रत्ययः कषादीनामनुप्रयोगश्च क्रियेते। स्वे पुषः इति सूत्रेण स्वरोपं पुष्णाति इत्यादौ पुष्णातेः पश्चात् प्रयोगः सम्यक् प्रतीयते। किन्तु अपुषत् स्वपौषम् इति भट्टिप्रयोगेऽपुषदिति न पश्चादस्ति। तथाचात्र कषादिषु यथाविध्यनुप्रयोगः पूर्वस्मिन् इति सूत्रविरोध इति न वाच्यम्—उक्तसूत्रेऽनुशब्दो न पश्चादर्थवाची, अपि तु समीपवाचीति अनुर्यत्समया २।१।१५ इति वत्। इत्थं दूषणमिह व्याख्यान्तरमाश्रित्य समाहितम्।

७—परिभाषाश्रया समाधानरीतिरिह बहुत्र दृश्यते।

(क) दिवोकस इति प्रयोगस्य प्रसिद्धस्य सिद्धिः सकृद्गतौ विप्रतिषेधे यद्बाधितं तद् बाधितमेवेति परिभाषामाश्रित्य दर्शिता। तथाहिः—दिव उत् ६।३।१३१ इत्युत्वे कृते दि+उ+ओकस इति स्थिते यणि यकारे पूर्वोत्तरपदयोः पुनर्यणि वकारे द्यवोकस इत्यनिष्टरूपापत्तिशङ्कां विधाय शब्दपरविप्रतिषेधादुकारस्य प्रथमं यणि दिव+ओकस—दिवोकस इत्यस्य सिद्धिरिति रक्षितोक्तसधानमनूद्य तत्र अचः परस्मिन् पूर्वविधौ १।१।५७ इति स्थानिवत्त्वात् इकारस्य न यण् सकृद्गतौ विप्रतिषेध इति न्यायात् इति परिभाषाश्रितं समाधानं दत्तम्[3]।

(ख) 'अपि शाकं पचानस्य' इत्यत्र लटः शतृशानचौ ३।२।१२४ इति शानचि कृते आने मुक् इति मुको दुर्वारत्वात्कथं पचान इति प्रश्नस्योत्तरम्, आगमशास्त्रमनित्यमिति परिभाषामाश्रित्य मुकोऽभाव समाधानद्वारा दत्तम्। पचान इत्यत्र आतो ङितः ७।२।८१ इति आकारस्य स्थाने एकारादेशोऽपि गुणकार्यमनित्यमिति परिभाषया शपोऽभावद्वारा अकारात् परस्य ङित आकारस्याभावाद्वारितः[4]।

८—प्रक्रियान्तराङ्गीकारात्मिका रीति र्यथा—

(क) 'ब्राह्मणी राजकुलानी' भिक्षुणी त्येवमादयः इन्द्राणी दण्डिनीत्यादिप्रकारकाः शब्दाः साधिताः शरणदेवेन।

---

१. दु० वृ० ३।२।१२८।
२. दु० वृ० ४।३।१४४।
३. दु० वृ० पृ० १०६।
४. दु० वृ० पृ० ६८।

तथाहि इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् (४।१।४९) इति सूत्रे पूर्वोक्तानां 'ब्रह्म' 'राजकुल' प्रभृतीनां पाठाभावात् उक्तसूत्रेण आनुकः ङीषश्चाभावात् कथमिमे शब्दाः सिद्धा इत्याशङ्क्य ब्राह्मणं राजकुलं वा नयति जीवयतीति कर्मण्यण्, टिड्ढेति ङीपि ब्रह्माणी राजकुलानीति साधितम्। भिक्षुणीति तु भिक्षुं भिक्षुत्वं नयति प्राप्नोति इति क्विपि कृदिकारादक्तिन इति ङीष् कृते सिद्धयति।[1]

(ख) 'नीचो वदति न कुरुते' इत्यत्र ऋत्विग् दधृक् इति ३।२।५९ सूत्रेण क्विन् प्रत्यये प्रत्यङ्तिवत् न्यङ् इति प्राप्नोति कथं नीच इति, क्विन् प्रत्यये सति अनिदिताम् ६।४।२४ इति अनुनासिकलोपे अच् प्रत्यन्ववपूर्वात् इत्यत्र अजिति योगविभागादचि 'अच' ६।४।१३८ इत्यकास्य लोपे 'चौ' ६।३।१३८ इति दीर्घत्वे नीच इति सिद्धचति।

९—योगविभागमूला यथा—

(क) 'कथं 'स भगवान् पुरुषोत्तमः' इत्यक्ते पुरुषोत्तमशब्दे समासः, न निर्धारणे २।२।१० इति षष्ठीसमास-प्रतिषेधात्। पुरुषेषूत्तम इति सप्तमीसमासस्तु नह्येव संभाव्यते, शौण्डादिगणे उत्तमशब्दस्य पाठाभावात्। सप्तमी शौण्डैः २।१।४० इत्यस्याप्रवृत्तेरिति चेदुच्यते सप्तमीतियोगविभागात् समासः[2]।

(ख) ननु रघुवंशे कालिदासेन प्रेक्ष्य स्थितां सहचरीमित्यत्र सहचरीति शब्दः प्रयुज्यते। स च न सिद्धचति चरेष्टः (३।२।१६) इत्यनेन अधिकरणे उपपदे एव टप्रत्ययो विधीयते। अतएव भिक्षासेनाऽऽदायेषु चर इति सूत्रं पृथक् पठ्यते इति चेन्न 'ट' इति योगविभागात् तस्य सिद्धेः[3]।

(ग) सन्देहद्वापरौ चाथेति अमरकोशे द्वापरेत्यत्र परशब्दस्यासंख्यात्वात् द्वयष्टनः संख्यायाम् ६।३।४७ इत्यात्वाप्राप्त्या रूपासिद्धिमाशङ्क्य आन्महत इत्यत्र आदिति योगविभागादात्वम् प्रागेकादश इति निर्देशात् समाहितम्।

१०—चार्थसमुच्चयसंग्राह्या यथा—

कथं 'धूमायन्त इवाश्लिष्टा' : ? अत्र वाष्पोष्मभ्यामुद्वमने (३।१।१६) क्यङोऽप्राप्तेरिति चेदुच्यते फेनाच्चेति वक्तव्यमित्यत्र चकारेणानुक्तसमुच्चार्थेन धूमशब्दस्य संग्रहात्।

११—आकृतिगणाश्रया—

कथं शास्त्रवाक्यानीति उपदेश १।३।२ सूत्रे वृत्तिः, चन्द्रगोमिनामिति चेति कुमति च ८।४।१३ इति णत्व-प्राप्तेरितिचेदुच्यते क्षुम्नादित्वाण्णत्वनिषेधः।

१२—ग्रन्थान्तरसमाधानाश्रया—

शरणदेवस्येदमौदार्यम् यत्तेन ग्रन्थान्तरस्य व्याकरणान्तरस्य च समाधानं बहुत्र स्वीकृतम्। तेन दुराग्रह-वशात् प्रायः अन्यस्य समाधानं न खण्डितम् क्वापि, अपि तूदारतां दर्शयताऽन्यस्य मतमतान्तरं साध्वङ्गीकृतम्। एता-दृशानि सन्ति बहून्युदाहरणानि यद्यपि, तथापि कतिपयान्यत्रोद्दिश्यन्ते।

(क) अन्यथैवं कथमित्थंसुसिद्धाप्रयोगश्चेत् ३।४।२७ इत्यनेनान्यथादिपूर्वत्वे णमुल्प्रत्ययो विधीयते स च क्त्वाप्रत्ययस्य बाधकः। तथा च अन्यथा कृत्वा गतः, कथं कृत्वा इत्यादि प्रयोगाः न सिद्ध्येयुः, किंच 'अन्थथाकृत्वा परिहृतम्' इति भाष्यकारप्रयोगोऽपि न स्यात्। इदं च लक्षणस्य महद्दूषणं यत्तेन लक्ष्यं न व्याप्यते। अतः कोऽप्यु-

---

१. दु० वृ० पृ० ८४।
२. दु० वृ० पृ० ३८।
३. दु० वृ० पृ० ६५।

पायस्तादृशावश्याभ्युपेयो येनैते प्रयोगाः सूत्रेण साधिताः स्युः । अतः मन्तव्यम् यत् 'वा सरूपोस्त्रियाम्' इति न्यायेनात्र णमुला सरूपेण क्त्वाप्रत्ययः विकल्पेन बाध्यते । तेन पक्षे क्त्वाप्रत्ययोऽपि भवत्येव । स्त्र्यधिकारात् परेण वासरूपविधिः प्रायिक इति रक्षितोऽप्यत्रानुकूलः ।

(ख) ह्वीवनम् सीवनमितिलोकप्रसिद्धप्रयोगे हलि च ८।२।७७ इत्यनेन हल्परत्वाभावात् दीर्घाप्राप्तेः ह्विवुक्लमुचमां शिति[1]त्यस्या शित्परत्वाभावाद् दीर्घाप्राप्तेः, रूपसिद्धिसमस्यां ह्विविसिव्योदीर्घश्चेति चान्द्रसूत्रमाश्रित्य समाहितवान् शरणदेवः ।

१३—भाष्यप्रतिकूलत्वमिता—

पाणनीयाः भाष्यान्धानुयायिनः । यथोत्तरं मुनीनां प्रामाण्यम् इति स्वीकुर्वन्तः पाणिनीया वैयाकरणाः पाणिनिं कात्यायनं च यथाकथंचिदुपेक्षन्ते किन्तु भाष्यवचनविरुद्धकल्पनात् ते स्वप्नेऽपि बिभ्यति । युक्तिवादास्तर्कवादाश्च सिद्धान्तिभाष्यवचनप्रतिकूलगामिनोऽत्र शास्त्रे सदा तिरस्कृताः । किन्तु शरणदेवः स्वतन्त्रविचारः भाष्यविरुद्धमपि युक्तिसिद्धं प्रामाणसिद्धम् लोकसिद्धं च स्वीकरोति । अतएव न बहुव्रीहौ १।१।२६ इति सूत्रे तेन भाष्यकारस्य मतं न स्वीचक्रे । एवंच त्वकल्पितृको मकल्पितृक इति बहुव्रीहौ लौककप्रक्रियावाक्येऽपि सर्वनामतानिषेधात् अकचोऽप्रवृत्तिरुक्ता । अत्र बहुव्रीहौ इति विषयसप्तमी, तेन बहुव्रीहौ विषयीभूते अर्थात् चिकीर्षिते एव सर्वनामसंज्ञा निषिध्यते । अन्यथाऽन्यपदार्थप्रधाने बहुव्रीहौ जातेऽवयवस्योपसर्जनत्वेनासर्वादित्वादेव विधेरप्रसक्तौ निषेधो व्यर्थः स्यात् अतएव प्राग् बहुव्रीहेः प्रक्रियावाक्यदशायां प्रसक्तस्य सर्वनामत्वस्य निषेधाय सूत्रमिदम् । एवञ्च त्वत्कपितृको मत्कपितृक इति सिद्धम् । अतएव धातुवृत्तावुक्तम्—बहुव्रीह्यर्थे वृत्तत्वात् अर्थात् बहुव्रीहिशब्दस्य तादर्थ्यलक्षणया बहुव्रीह्यर्थपदपरत्वात् समानकाल एव निषेधादकचोऽप्रवृत्तिः । तथाच प्राग्वत् क एव भवति । तथाच भाष्यम् :—विधिनिषेधौ च समानकालाविति । इति स्वमतं पश्चात् सिद्धान्तरूपेणोल्लिख्य पूर्वं कथमित्यादिनोत्क्षिप्तं भाष्यमतमिहोपेक्षितम् ।[1]

त्वकृत्पितृक इति रूपं न मिलति वाङ्मये न वा लोके, नापि त्वत्कपितृक इति रूपं दृश्यते क्वापि तथाच शास्त्रानुसारिरूपकल्पनैव ज्यायसीति शरणदेवस्य हृदयम् ।

१४—बहुलाश्रया—

(क) कृत्यैर्ऋणे २।१।४६ इति सूत्रे 'यत्प्रत्ययेवेनैष्यत' इति वार्तिकबलेन यत्प्रत्ययप्रयोगेनैवानेन समासविधानात् 'सम्वत्सरकरणीयम्' इत्यादौ कथं समास इत्याशङ्क्य बहुलवचनात् समाहितम् ।

(ख) मेरुपर्वतः कैलासाद्रिः शिंशपावृक्षः, शमीतरुः, तर्कविद्या, व्याकरणशास्त्रम्, प्राप्यकर्मेत्यादौ 'विशेषणं विशेष्येण बहुलम् २।१।५७ इति समासो न स्यात्, विशेषणमित्येतावत्युक्ते सम्बन्धिशब्दादेव विशेष्येणेतिलब्धे विशेष्यग्रहणेन उभयतो विशेषणविशेष्यभावे समासविधानात् । इह च मेरुप्रभृतिशब्दादेव पर्वतादेः प्रतीतिरिति न पर्वतादीनां विशेषणत्वं मेरुप्रभृतीनामिति चेदुच्यते, बहुलवचनाद् भविष्यतीति समाधायात्रापि बहुलाश्रयं समाधानमुपस्थापितम् ।

(ग) वर्णात्कार इति सूत्रेण ककार इत्यादौ कारप्रत्ययो विधीयते । तस्य च धातोरविधानात् 'कृ[2]दतिङ्'

---

१. कथं त्वत्कपितृको मत्कपितृकः ? बहुव्रीहौ सर्वनामत्वाभावादकचोऽप्रवृत्तिः । गोनर्दीयमतेनान्तरङ्ग एवायम् । यथाहः—अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गावुक्तसंशयौ इति प्रत्यङ्गावन्तरङ्गावित्यनुन्यासकारः । दु० वृ० १।१।२६ ।

२. ३।१।९३ ।

इत्यनेन कृत्त्वाभावतया कृ[1]त्तद्धितसमासाश्चेति प्रातिपदिकत्वाभावात् विभक्तिर्नोत्पद्येतेति शङ्का न कार्या बहुलवचनात् क्वचिद्धातोरविहितस्यापि कृत्प्रत्ययत्वस्वी[2]कारात्।

(घ) विदधातीति विधिर्ब्रह्मा। अतएवामरेणोक्तम् :—वि[3]धाता विश्वसृड्विधिरिति। तत्रोपसर्गे घोः किः ३।३।९२ इत्यत्र भावे कर्तरि च कारके इत्यनुवृत्तेस्तत्र कर्तरि किप्रत्ययासंभवात् कर्तरि विधिरितिरूपासम्भव इति। नच कर्तुः—करणत्वविवक्षायां भविष्यति ल्युटा बाधात् न वा वासरूपविधिः क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति समर्थसूत्रे रक्षितोक्तेः। ए ˙ च कर्तरि विधिरितिरूपसिद्धेः का गतिः ? बाहुलकात् कर्तरि कः।

स्त्रियाम् क्तिन् ३।३।९४ इति सूत्रे ग्लाजाहाभ्यो निः इति वार्तिकम् पठितम् तेन ग्लानिज्यानिहानिशब्दसिद्धावपि म्लानिरिति लोकप्रसिद्धरूपं न सिद्धचति इति चेत्, श्रूयताम्—बाहुलकात् अतएव पुरुषोत्तमदेवः ग्लाम्लाज्याहाभ्य इति लिखति।

(ङ) वर्णात् कारः (वा० ३।३।१०८) इत्यनेन यदि वर्णात् कारप्रत्ययो विधीयते तदा एवकारः 'हुंकारेणैव तम्' इत्यादौ वर्णसमुदायात् कारप्रत्ययः कथं दृश्यते, बाहुलकात्।

१५—विवक्षाश्रया-यथा-संहिता वाक्ये विवक्षाधीना इत्यस्ति वैयाकरणैः स्वीकृतम्। विवक्षाधीनानि कारकाणि भवन्ति, इति च सर्वैर्वैयाकरणैरभ्युपगम्यते। दुर्घटवृत्तौ न केवलं कारकप्रयोगाः न वा वाक्ये सन्धयः किन्तु अन्यान्यान्यपि कार्य्याणि विवक्षाबलात् साधितानि। तथाहि—

(क) प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यति प्रभु[4]रित्यत्र वर्तमाने लृट्प्रयोगः प्रत्येकं विनियुक्तात्मेति प्रत्येकत्मविनियोगादन्तरं ज्ञानस्य भाव्यमानत्वेन विवक्षावशाज्जायत लृट्[5]।

(ख) 'अभूत्नृपो विबुधसखः परन्तप इति भट्टिप्रयोगे 'अभूदभूमिः[6] प्रतिपक्षजन्मनामिति माघकाव्ये च परोक्षे लिट् ३।२।११५ इति परोक्षत्वाल्लिट् प्राप्नोति परन्तु पदसंस्कारे भूतसामान्यविवक्षायां लुङ् भवति। एवं कौशल्ययाऽसावि सुखेन रामः प्राक् केकयीतो भरतस्ततोऽभूदित्यत्रापि विवक्षातो लुङ् लकारः संपाद्यः।[7]

(ग) क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति तावत्स बह्निर्भवनेत्रजन्मा भस्मा[8]वशेषं मदनं चकार इत्यत्र चरन्तीति वर्तमानलट्प्रयोगोऽनुचितः। परोक्षे लिट् विधानात् तथापि भस्मावशेषकरणापेक्षया यद् वर्तमानत्वं तदध्यारोप्य लट् विवक्षितः[9]।

(घ) लज्जातिरश्चां यदि चेतसि स्याद[10]संशयं पर्वतराजपुत्र्याः तं केशं प्रसमीक्ष्य कुर्युः बालप्रियत्वं शिथिलं चमर्यः। इत्यत्र क्रियातिपत्तिसत्वात् लिङनिमित्तेः लृङ्क्रियातिपत्तौ इति लृङ्लकारः कथं नेति चेत् श्रूयताम्, कविना क्रियातिपत्ते विवक्षा न कृता। विवक्षा हि शब्दव्युत्पत्तेः प्रधानं कारणम्।

(ङ) यद्युच्यते तयो (भाव कर्मणोः) रेव कृत्यक्तखलर्थाः ३।४।७० तर्हि कथं फलानामाशित इति पूरणादिसूत्रे वृत्तिः अत्र कर्तरि क्तो न भवेत्। यच्च कर्तरि क्तविधायकं सूत्रम् गत्यर्थाकर्मकश्लिषस्थासवसजनरुहजीर्यतिभ्यश्चेति, तत्रास्य धातोः नैव समावेशो भवितुमर्हति, अश्नातेः सकर्मकत्वस्य प्रसिद्धेः। आशितः कर्ता ६।१।२०७

---

१. १।२।४६।
२. दु० वृ० पृ० ६२।
३. अमरको० १।१।१७।
४. दु० वृ० पृ० ६८।
५. कुमा० २।३१।
६. मा० १।४२।
७. दु० वृ० पृ० ८।
८. कुमा० ३।७२।
९. दु० वृ० पृ० ६८।
१०. कुमा० १।४२।

इति स्वरसूत्रे निपातनात् कर्तरि क्त इति भाष्यम्, यद्यप्यस्ति, तथापि सूत्रेण तस्य संग्रहणस्य को मार्ग इति चेत्, श्रूयताम्, न केवलमत्र शास्त्रे फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिह स्वीकृतम्, अपि तु धातोरर्थान्तरे वृत्ते र्घात्वर्थेनोपसंग्रहात्, प्रसिद्धेरविवक्षातः, कर्मणोऽकर्मिका क्रिया इत्यपि अकर्मकत्वमिहाङ्गीकृतम्। तथा च फलानां कर्मत्वेनाविवक्षणात् अविवक्षितकर्मत्वेनाकर्मकत्वात् कर्तरि क्तः सुसम्पन्नः। आङ्पूर्वत्वाद्दीर्घे फलानामाशितः इति सिद्धचति।

(च) एवं गुरौ भक्त इत्यादौ गुरोः कर्मणोऽधिकरणत्वेन विवक्षितत्वादकर्मकत्वे कर्तरि क्तो भवितुमर्हति।

१६—नियमान्तराश्रयणमूला—

रघुवंशस्य 'कर्षन् स शैवाललता नदीष्णः' इति श्लोके नदीष्ण इति न सिद्धचति, नद्यां स्नातो नदीष्ण इत्यधिकरणे उपपदे कप्रत्ययस्य दुर्लभत्वात्, आतोऽनुपसर्गे कः ३।२।३ इत्यत्र कर्मणीत्यनुवृत्तेः, मूलविभुजादित्वात् कप्रत्ययस्य प्राप्तिदर्शनात्। इत्थमत्र नियमान्तरमाश्रित्य कः प्रत्ययः साधितः प्रकृतिप्रत्ययौ च यथोद्भावितौ तथैव।

(यद्यपि रघुवंशे पूर्वोक्तमुद्धरणमानुपूर्व्या नोपलभ्यते साम्प्रतम् तथापि शरणदेवेन पञ्चमे सर्गे शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चात् इति सन्दर्भे कश्चित् पाद एव 'कर्षन् स शैवाललतानदीष्ण इत्येवं रूपतया पठ्यमान उपलब्धः स्यात्। नदीष्ण शब्दस्य प्रयोगस्तु रघुवंशस्य षोडशसर्गेऽपि दृश्यते 'आनायिनस्तद्विचये नदीष्णान्' इत्येवं रूपेण)।

१७—व्याकरणान्तराश्रयणी—

(क) दिवोकस इत्यत्र षष्ठीतत्पुरुषसमासे दिव उत् ६।३।१३१ इति उत्वे दि+उ+ओकस इति स्थिते प्रथमोपस्थितिकत्वात् इकारस्य यणि द्यु+औकस इति स्थितौ यणि द्यवोकस इति प्राप्यते अत्र चान्द्राः पृषोदरादित्वादुत्वाभावं साधयन्ति तत् स्वीकृतं शरणदेवेनापि।

(ख) ऋते योगे द्वितीयाऽपि प्रयुज्यते लोके। अतएव महिम्नः स्तोत्रे 'फलति पुरुषाराधनमृते' इति प्रयोग उपलभ्यते। पाणिनिकाले प्रायः स्तादृशः द्वितीयाप्रयोगो नासीत्। अथवा सन्निपि पाणिनिना न दृष्टः अथवा दृष्ट्वापि नियमो न निर्मितस्तस्य साधनाय विश्रामः एकादशः भूवादयः, इत्याद्यनेकशब्दानां स्वेनाप्रयुक्तप्रयुक्तानामिव। चन्द्रगोमिना तु 'ऋते द्वितीया चे'ति सूत्रं निर्माय एतादृशस्य प्रयोगस्य संग्रहः क्रियते। शरणदेवेनापि तदनुमन्यते। कर्मणि द्वितीया इत्यत्र द्वितीयेति योगविभागात् ऋते योगे द्वितीया साध्या इति शरणदेवप्रतिपादनन्तु पाणिनिप्रति नितान्तश्रद्धासूचकमेव।

(ग) स्वकीयमिति पदसिद्धिः कथम् कुग् जनस्य परस्य चेत्युच्यते वृत्तौ एवंच जनकीयम् परकीयम् इति सिद्धावपि स्वकीयम् इति न स्यात् इति चेन्न 'स्वपरजनदेवराज्ञां कुक् च' इति चान्द्र[1] सूत्रस्य जागरूकत्वात्। एवंच स्वीकयमिति साधनाय स्वार्थिककन्प्रत्ययान्तः स्वकशब्दोऽत्र स्वीकर्तव्य इति न्यासकारकष्टकल्पना वृथैव। 'परस्य च' इत्यत्र चकारात् स्वशब्दस्यापि संग्रहोभवितुमर्हति।

(घ) ष्ठीवनं सीवनमित्यादिलोकप्रचलितप्रयोगाणां सःधनाय कोऽपि यत्नः पाणिनीयव्याकरणे कृतो न दृश्यते। ष्ठीवति सीव्यति इत्यादौ शपि प्रत्यये दीर्घविधानाय पाणिनिना ष्ठिवुक्लमुचमां शिति ७।३।७५ इति सूत्रं क्रियते। सीव्यति इत्यत्र 'हलि च' ८।२।।७७ इत्यनेन हल्परस्य वान्तधातोरूपधाया दीर्घः सिद्धचति; किन्तु ल्युट्प्रत्यये तस्यानादेशे ष्ठिव्+अन, सिव+अन इत्यादौ शिद्हलोरन्यतरस्यापि परत्वाभावात् तयोः सूत्रयोरप्राप्तिः। अन्यच्च दीर्घविधायकं सूत्रं न क्रियते। पाणिनिना, यदत्र दीर्घं कुर्यात्। एवंचात्र दीर्घः एका समस्या वर्तते पाणिनीयानां कृते। पृषोदरादित्वात् गुणाभावो दीर्घश्चेति कल्पना तु यस्य क्वापि गति र्नास्ति तस्य वाराणसी गतिः। अतोऽत्र चान्द्रं

१. चा० ३।२।५८ गणसूत्रम्।

सूत्रं शरणीक्रियते ष्ठिवि सिव्यो दीर्घश्चेति (दु० वृ० पृ० १३७) ष्ठिविसिव्योरिति स्थाने-ष्ठिवुसिवो दीर्घश्चेत्येव सूत्रं दृश्यते चान्द्रव्याकरणे (चा० सू० १।३।९८) अर्थस्तु समान एव ।

(ङ) 'मध्यन्दिनार्कसन्तप्तः सरसीं गाहते गजः' इत्यत्र अर्धर्दिषदजन्तस्य मुम् ६:३।६७ इति मुमविधायकसूत्रस्याप्त्याऽन्यस्य च मुमलक्षणस्याभावात् कथं मध्यन्दिनेति प्रयोगः इति चेत् 'मध्यस्य दिने' इति चान्द्रसूत्रं स्वीक्रियताम् । अतएव माध्यन्दिनीशाखा इत्यत्रस्थः माध्यदिनीशब्दमूलभूतः मध्यन्दिनशब्दोऽपि सिद्धयति । पृषोदरादित्वात् रूपसिद्धिकल्पना तु न जायसी, सर्वेषाम् पण्डितम्मन्यइत्यादीनामपि शब्दानां तेनैव सिद्धेः, तत्तत्सूत्रनिर्माणस्य निष्प्रयोजनत्वापत्तेः । तस्मात् मा कुरु एताद्दशं धूलिप्रक्षेपं नयनयोः समालोचकानां, किन्तु स्वीकरु पाणिनीयतन्त्रस्यसागरजलात्मसमावेशनाक्षमस्य गोष्पदस्येव विशालवाङ्मयानन्तभूमण्डलप्रयुक्तपदरत्नसमाधानाक्षममस्यापर्याप्तत्वम् । गीयतां समालोचकविचक्षणैः देवबोधगीतमिदं पद्यम्—

"न दृष्ट इति वैयासे शब्दे मा संशयं कृथाः
अज्ञैरज्ञातमित्येवं पदं नहि न विद्यते' ।
'यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात् ।
पद रत्नानि किं तानि सन्ति पाणिनिगोष्पदे ।
(महाभारत-ज्ञान दीपिका टीका प्रार० श्लो-७-८) ।[1]

१८—न्यासान्तराश्रयणी—

(क) सहचरी शब्दस्य साधनाय भिक्षासेनादायेषु चर इत्यत्र सहशब्दस्य समावेशः दर्शितः भिक्षासेना सहपाठाद्वा[2]

(ख) मुरारिरुक्तवान्' ज्योत्स्नाकरम्भरयश्चकोराः' तत्रोदरम्भरयइत्यस्य साधुत्वं न सम्भाव्यते, फलेग्रहिरात्मम्भरिश्चे ३।२।२६ त्यत्र पाठाभावात् इति शङ्काया समाधानं ददता शरणदेवेन लिख्यते, अनुक्तसमुच्चयार्थकचकारेण उदरम्भरिरित्यस्य संग्रहसंभवादुक्तरूपसिद्धिः । न च भाष्ये चकारेण कुक्षिम्भरिरित्यस्य संग्रहः कृत इति वाच्यम्, कुक्षिम्भरिरित्यस्योपलक्षणत्वस्वीकृतिमात्रे भाष्यस्य तात्पर्यात् । उपलक्षणं स्वं बोधयत् स्वसमानमन्यदपि बोधयति । यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदमुलक्षणम् तत् स्वं बोधयति, अपरमपि दध्युपघ्यातकं सकलं प्राणिनं मार्जारादि प्रत्याययति । तेन तत्र काकात् काकसदृशेभ्यश्च जन्तुभ्यो दधि रक्षणीयमिति बोधो जायते । एवमेवात्र भाष्यस्य कुक्षिम्भरिरिति उदरम्भरिरित्यस्यापि बोधकम् ।

१९—निर्देशमूला—

'साम्प्रतिकाभावे भूतपूर्वगतिः' ।

रिति परिभाषायां साम्प्रतिकशब्दस्यासाधुत्वं 'सायंचिरम्' (४।३।२३) इति सूत्रस्य प्रवृत्तेरिति चेदुच्यते असाम्प्रतिक (४।३।९) इति निर्देशात् तस्य सिद्धिः[3]

२०—उपचारमूला—

केकयशब्दोमुख्यरूपेण देशे वर्तते, उपचारेण च दुहितरि वर्तितुं शक्नोति । यथा कलिङ्गः साहसिक इत्यादौ स पुरुषे उपचर्यते तथेहापि उपचारात् केकयशब्दो दुहितृवृत्तिर्भवितुमर्हति ।

---

१. सं० व्या० शा० इतिहासे (भाग—९ पृ० ४३ उद्धृतौ) ।
२. दु० वृ० पृ० १६ ।
३. दु० वृ० पृ० ९० ।

ततश्च शांर्ङ्गरवादिनृङीन् । केकयीति सिद्धयति । तेन केकय्युपज्ञं वत बह्वनर्थम् 'इति भट्टिप्रयोगः साधु[1] ।

२१—नियमासंकोचजन्या—

विदिभिदिच्छिदेः कुरच् ३।२।१६२ इति सूत्रेण शीलेऽर्थे कुरच्प्रत्ययो विधीयते तेन भिदाशीलं वस्तु भिदुरमिति शक्यते वक्तुम्; किन्त्वस्य शब्दस्यार्थे विस्तारो दृश्यते । भेदकोऽपि भिदुर उच्यते लोके । 'यथा' कुलिशं भिदुरं पविः इत्यमरः । 'संसारबन्धच्छिदुरान् द्विजातीन् इति घोषः, 'करीन्द्रबन्धच्छिदुरं मृगेन्द्रम्' इति विजयः, 'छिदुरयादुरयाचितमङ्गना' इति माघश्च । एषां शब्दानामर्थविस्तारं दर्शयन्ति स कथं संगच्छते, भिदेः छिदेः कर्मकर्तरि चाऽमिष्यते इति वृत्तावुक्तत्वात् केवले न स्यादिति चेन्न भिदुरादयः कर्मकर्तरि कर्तरि च ५।२।३८ इति काव्यालंकारे वामनेनाभिधानात् वृत्तौ कर्मकर्तरि चेति सूत्रघटकश्चकारः केवलेऽपि विधायकः ।

२२—लोकाश्रया—

शोभा शब्दः सर्वत्र लोके सुषमा परमा शोभा इति कोशे च प्रसिद्धः । किन्तु शब्दोऽयं केन प्रत्ययेन सिद्धयति ? यद्युच्यते स्त्रियां विहितेन 'अ' प्रत्ययेन; तर्हि पृच्छ्यते, केन सूत्रेण सः अप्रत्ययो विधीयते ? न तावत् अप्रत्ययात् ३।३।१०२ इत्यनेन अप्रत्ययान्तेभ्यो धातुभ्यो विधानात् । नापि गुरोश्च हलः ३।३।१०३ इत्यनेन ? गुरुमत्वाभावात् इति चेच्छ्यताम् शुभशुम्भ शोभार्थे इति निर्देशात् अप्रत्ययकल्पनात् । अथवा गुरोश्च हल इत्यत्र चकारोऽनुक्तसमुच्चयार्थः । तेन शुभधातोः संग्रहः । अथवाऽत्र घञ् एव प्रत्ययः स्वीकार्यः, न च घञजपः पुंसि इति पुंल्लिङ्गत्वापत्तिः, लोकाश्रयत्वाल्लिङ्गस्येति स्त्रीत्वसिद्धेः ।

२३—अध्याहाराश्रिता—

समानकर्तृकयोः पूर्वकाले (३।४२१) इति सूत्रेण समानः कर्ता ययोः धात्वोः, द्विवचनस्यातन्त्रत्वात् येषां वा धातूनां, तत्र पूर्वकाले विद्यमानात् विद्यमानेभ्यो वा धातुभ्यः क्त्वाप्रत्ययः विधीयते । अतः देवदत्तः स्नाति, यज्ञदत्तो गच्छति ततः इत्यत्र देवदत्तः स्नात्वा यज्ञदत्तो गच्छति इति प्रयोगो न भवति । एवंच अवजानासि मां यस्मात् अतस्ते न भविष्यति मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा इति रघुप्रयोगे, तथा कूपोदके मुखं दृष्ट्वा सह्यस्तुष्यति केशवः, स्नात्वा सुखं भवति, मासेन भुक्त्वा तुष्टिः स्यात् इत्यादौ क्त्वा तत्स्थानिको वा ल्यप् प्रत्ययः कथमितिचेत् स्थितस्येत्यध्याहार्यम् इति भाषावृत्तिः ।

शरणदेवेनात्र वृत्तौ—

१.	आगमविप्रतिपत्तिः	२.	आदेशविप्रतिपत्तिः
३.	विकरण ,,	४.	उपग्रह ,,
५.	लिङ्गविप्रतिपत्तिः	६.	कारकविप्रतिपत्तिः
७.	काल ,,	८.	स्वर ,,
९.	हल् ,,	१०.	प्रत्यय ,,
११.	संज्ञा ,,	१२.	समास ,,
१३.	पूर्वप्रयोग ,,	१४.	अनुप्रयोग ,,
१५.	वचनविप्रतिपत्तिः		

दर्शिताः समाहिताश्च पूर्वोक्तैश्चचतुर्विंशप्रकारकैरुपायैश्चोपायैः । कानि चिदुदाहरणानि दीयन्ते ताः विप्रतिपत्ती विस्पटयितुम्—

---

१. दु० वृ० पृ० ६८, ८६ ।

१— मध्यन्दिन शब्दे कृतस्य[1] मुमः,

अपि शाकं पचानस्य[2] अकृतस्य मुकः,

चिक्रंसया कृत्रिमपत्रिपङक्तेः इति माघे इटः[3]

जृत्वा इत्यत्र इटः[4]

विदितः समाययौ[5] इत्यत्र इटौऽभावस्य विपतिपत्ते रुदाहारणानि ।

मा बालिपथमन्वगा[6] इत्यत्र अडागमस्यासम्भवविप्रतिपत्तिः ।

इमा आगमविप्रतिपत्तयः सन्ति ।

२—आदेशानां विप्रतिपत्तयो यथा—

अमुक[7] इत्यत्रोत्वमत्वयोरभावः प्राप्यते 'औत्वप्रतिषेधः साकच्कस्य वा' वक्तव्यः सादुत्वंचेति वार्तिकेन औत्वाभावे उत्वे च असुक इति वृत्तौ साधनात्[8] समाधानं तु व्यवस्थितविभाषामाश्रित्य दत्तम् तथाहि जराया (७-२-१०१) इति सूत्रात् अन्यतरस्यां ग्रहणमनुवर्त्य व्यवस्थितविभाषया तदोः सः इति ७।२।१०६ इति सत्वाभावे जाते अमुक इति भवतीति ।

आर्तः उपार्त इत्यादौ रदाभ्यामीति आदेशो नकारः प्राप्नोति क्तस्य स्थाने उपसर्गाद्दतीति वृद्धेर्बहिरङ्गत्वेना-सिद्धत्वान्न भवति । दुर्नीतम् दुर्नयम् इत्यत्र उपसर्गादसमासेऽपि णोपदेशस्य इति णत्वादेशमाशङ्क्य उपसर्गप्रतिरूप-कत्वादिति भाषावृत्तिदत्तं समाधानमङ्गीकृतम् ।

३—विकरणविप्रत्तिपत्तयो यथा—

बहुषु बहुवचनम् १।४।२१ सूत्रे वासुदेवं परित्यज्य योऽन्यं देवमुपासते इत्यत्र एकवचने शपोऽदादित्वाल्लुकि उपास्ते इत्यस्य प्राप्तिमाशङ्क्य गणकार्यस्यानित्यत्वेन शपो लुगभावद्वारा रूपसिद्धिरुक्ता ।

४—उपग्रहविप्रतिपत्तयो यथा—

प्रोपाभ्यां समर्थाभ्याम् १।३।४२ सूत्रेणात्मनेपदे प्राप्ते 'कथं' ते तां हन्तुम् प्रचक्रमुः इति चण्डीप्रयोगः ? एव 'म्रियते लुङ् लिङोश्च (पा० १।३।१६) इति लुङि लिङि शिति च विवक्षिते एवात्मनेपदं विधीयते नान्यत्र, तदा मम्रे पतङ्गवद् वीरः इति भट्टि प्रयोगः' कथम् इत्याशङ्क्य क्रमशः (पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण इति प्रचक्रमुरिति संसाध्य 'मम्रे' इत्यत्र तङ् 'म्रियते' १।३।६१ इति नियमस्तु कर्तर्येव प्रवर्तते तत्र कर्तृस्थे चाशरीरे इति सूत्रात् कर्तरीत्यनुवृत्तेः इति ग्रन्थेन साधितः ।

५—लिङ्गविप्रतिपत्तयो यथा—

सभा राजामनुष्यपूर्वा २।४।२३ इति नपुंसक लिङ्गत्वे प्राप्ते 'नृपतिसभामगमन्नवेपमाना' इति कीचकवध-

---

१. अरुर्षिदजन्तस्य मुम् ६।३।६७ दु० वृ० ।

२. लटः शतृ० ३।२।१२४ ।

३. स्तु क्रमो ७।२।२६ ।

४. जृव्रश्च्योः क्त्वि ७।२।५५ ।

५. विभाषा गम ७।२।६८ ।

६. न माङ्योगे ६।४।७४ ।

७. अदस औ सुलोपश्च ७।२।१०७ पृ० १२५ ।

काव्यप्रयोगे स्त्रीलिङ्गाभावमाशङ्क्य नृपतिरिति गजपतिवद् नराजपर्याय इति रक्षितोक्तं समाधानं निवेद्य नृणां पतिर्यस्यां सभायामिति बहुव्रीहिसमासेन नृपतिशब्दं संसाध्य ततः नृपतिश्चासौ सभा नृपतिसमाइति कर्मधारयसमासे कृते नृपतिसमा इत्यत्र सूत्राप्राप्तेः तत्रानङ् कर्मधारयइत्यनुवृत्तेः।

गृहस्थूणं शशौर्णम् इति वररुचिलिङ्गकारिकायाम् अमरलिङ्गसंग्रहे चोक्तं क्लीबत्वं न युज्यते, परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २।४।२६ इति सूत्रेण परवल्लिङ्गताप्राप्तेः इत्यस्य समाधानाय असिद्धवदत्राभात् इतिवत् वतिनिर्देशोऽस्य सूत्रस्य व्यभिचारज्ञापकः इति अथवा लोकाश्रयत्वाल्लिङ्गस्येति उक्तम्।

६—कारकविप्रतिपत्तयो यथा—

'परापवादशस्येषु चरन्तीं गां निवारय' इत्यत्र वारणार्थानामीप्सित इति पञ्चमी सम्भाव्यते ध्रौव्येणाविवक्षितत्वात् सा वार्यते'। जातं वंशे भुवनविदिते' इत्यत्र जनिकर्तुः प्रकृतिः १। १।४।३० इति अपादानेन पञ्चमी प्राप्यते सा 'वंश्यं प्रकृतिर्नतु वंश एवेति कथयित्वा वारिता।

उपोष्य रजनीमेकामित्यत्र अभुक्तर्थकस्य वसे र्योगे उपान्वध्याङ्वसः १।५८ इति कर्मत्वप्रतिषेधात् द्वितीयाऽ प्राप्ता, कालाध्वनोरिति २।३।५ विधीयते सा। ओदनवस्त्रयोः पाकवानायोगात् ओदनं पचति वस्त्रं वयतीत्यत्र कर्तुरीप्सिततमं कर्मेत्यस्या प्राप्ति प्रदर्श्य तादर्थ्यात् ताच्छब्द्येन तण्डुले तन्तौ च तयोर्वृत्तित्वस्वीकरात् द्वितीयेत्युक्तम्।

एवम् 'अयाचितारं न हि देव देवमद्रिः सुतां ग्राहयितुं शशाक' इत्यादौ 'गतिबुद्धि' इति सूत्रे ग्रहधातोः पाठाभावात् कथं द्वितीया इति संदिह्य देवदेवमयाचिताद्रिः सुतां ग्राहयितुम् अरमर्थादलम्, अत्यर्थं न शशाकेति छेदं कृत्वाऽस्य सूत्रस्याप्रवृत्यापि द्वितीया संसाधिता। इत्यादीनि सन्ति बहूनि कारकविप्रतिपत्तेरुदाहरणानि।

७—कालविप्रतिपत्तयो यथा—

'यथाह धात्र्या प्रथमोदितं वचः' इत्यत्र वर्तकानकाले निष्पन्नस्य आहेत्यस्य भूते प्रयोगमनुपपन्नमाशङ्क्योक्तम्' तिङन्तप्रतिरूपकोऽयमाहेतिशब्दः कालसामान्यवचनः।

एवं 'प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यति प्रभुः" इति कुमारसंभवप्रयोगस्य विप्रतिपत्तिम् उक्त्वा, समाहितम् 'प्रत्येकं विनियुक्तात्मेति प्रत्येकमात्मविनियोगात् तदनन्तरं ज्ञानस्य भाव्यमानत्वात् लृट्, विवक्षावशादिति समाहितम्।

८—स्वर (अच्) विप्रतिपत्तयो यथा—

(क) वाहनम् इत्यत्र अत उपधाया ७।२।११६ इत्यस्याप्राप्त्या दीर्घाकारो नैव सम्भाव्यते वाहनमाहितात् इति निर्दशादिति निर्देशमूलकं समाधानम्।

(ख) नियमयति इत्यत्र मित्वनिषेधात् मितां ह्रस्वः ६।४।९२ इति ह्रस्वाभावात् धातुयकारेऽकारो दुर्लभः। यमः समुपनिविषु च ३।३।६३ इति निष्पन्नान्नियमशब्दात्तत्करोतीति णिचि रूपम्।

(ग) 'आपीय प्रातरेव' इत्यत्र ईकारो दुर्लभः, न ल्यपि ६।४।६९ इतीत्वनिषेधात्। पीङ् पाने इत्यस्यरूपमिति समाधानं प्रकृत्यन्तरमाश्रित्य दत्तम्।

९—हल्विप्रतिपत्तयो यथा—

(क) इषु गमियमां छः। (७।३।७७) इति सूत्रेण शित्येव षकारस्य छकारो विधीयते। तेन लृडादौ सम्भावितशप्प्रभृतौ इच्छतीत्यादिच्छधटितस्य रूपस्य साधुत्वं शक्यते स्वीकर्तुम् लृडादौ इच्छिष्यतीति रूपस्यासम्भवात् दुर्गा सप्तशत्यां कथं प्रतीच्छिष्याम्यहमिति रूपमुपलभ्यत इति चेत्, श्रूयताम्, नायमिष्धातोः प्रयोगः; किन्तु इच्छां प्रतिगतः

प्रतीच्छः तद्वदाचारिष्यामीतिप्रतीच्छशब्दादाचारक्विपि प्रतीच्छिष्यामीति नामधातोरूपम् । इत्थमत्र चकारच्छाकारयोः सद्भावः साधितः[1] ।

(ख) वाल्मीकिरामायणादौ उपसर्गत्वाभावेन समासाभावे पि 'गृह्य' इत्यादौ ल्यप्प्रत्ययो दृश्यते, अन्यत्रापि 'अर्च्यदेवानिहागतः' इत्यादिप्रयोगाः दृश्यन्ते । कथं तेषांसिद्धिरिति सर्वेत्र यकाराभावमाशङ्क्य (वाच्छन्दसी' ति वाच्ये क्त्वापि च्छन्दसि ७।१।३८ इति वचनसामर्थ्यात् 'असमासेऽपि ल्यब्भवतीति ज्ञापन मूलकं समाधानं दत्तम्। एतावताच्छन्दसि समासाभावेऽपि ल्यप् सिद्धचति न तु लोके इति तथापि छान्दसा अपि क्वचिद् भाषायां प्रयुज्यन्त इति भाषायामपि सिद्धम् अथवा अपि शब्दः सर्वोपाधिव्यभिचारार्थस्तेन भाषायामसमासेऽपि ल्यप् सिद्धचति ।[2]

१०—प्रत्ययविप्रतिपत्तयः यथा तद्धितस्य विप्रतिपत्तयः ।

(क) औषः शार्वर इत्यत्र ऊषाशर्वरीशब्दाभ्यां कालवाचकाभ्यां कालाठञ् ४।३।११ इति ठञा भाव्यम् अतएवात्र कृतयोरण्प्रत्ययो विप्रतितत्ती दर्शिते[3] ।

(ख) [4]साम्प्रतिकः शाश्वतः पुरातनः इत्यादौ 'सायं चिरं प्राह्णे ४।३।२३ इत्यस्य प्राप्त्या ठञः अणश्च-पुराणप्रोक्तेषु ब्राह्मणकल्पेषु इति बाधात् ट्युट्युलोरसम्भवः ।

कृतो विप्रतिपत्तयो यथा :—

म्लानिः इत्यत्र निप्रत्ययस्य ग्लाज्याहाभ्यो निः इत्यत्र पाठाभावात् अविधेयत्वम् । विधिरित्यत्र कर्तरि उपसर्गे धोः किरित्यस्य न प्राप्ति, स्तत्र भावे अकर्तरि च कारके इत्यनुवृत्तेः । यष्टिरित्यत्र व्रजयजोर्भवि क्यप् ३।३।९८ इति क्यपा क्तिनो नित्यंबाधात् क्तिनोऽप्राप्तिः वा स्वरूपविधिस्तु स्त्रियाम् न ।

(ग) स्तव्यशब्दे एतिस्तुशास् इति ३।२।१०९ इति क्यप्प्रसक्त्या स्तुत्य इति सम्भाव्यते । दु० पृ० ६४ ।[5]

(घ) सहचरीत्यत्र चरेष्टो ३।२।१६ न स्यात् अधिकरणे इत्यनुवृत्तेः । स्त्रीप्रत्ययविप्रतिपत्ति र्यथा ।[6]

(ङ) मधुरीत्यत्र ङीरोऽसंभवः । नप्ता कुमारीत्यत्र नप्तृशब्दे ऋन्नेभ्य इति ङीपः प्राप्तिः । त्रपा इत्यत्र षित्त्वात् ङीष् प्राप्नोति । इत्थं भूता प्रत्ययविप्रतिपत्तीरुत्प्रेक्ष्य समाहिताः ।[7]

---

१. दु० वृ० ७।३।७७ ।

२. दु० वृ० पृ० १२० ।

३. अनुदितोषसरागः इति किरातार्जुनीयम् । शार्वरस्य तमसो निषिद्धये इति कुमारसंभवे कालिदासः ।

४. साम्प्रतिकाभावे भूतपूर्वगतिः (परिभाषा) शाश्वतो ध्रुवो नित्य इत्यमरः पुरातनं त्वां पुरुषं पुराविदः इति माघः ।

५. का ते स्तुति स्तव्यपरा परोक्तिः इनि चण्डी । अ० ११ श्लो० ६ ।

६. 'प्रेक्ष्य स्थितां सहचरीम्' इति रघुः ।

७. मधुरीत्यत्र गापोष्टक् ३।२।८ इति यदि टक् स्यात् तदा टित्वाद् ङीप् भवेत् परन्तु सुराशीध्वोः पिवतेरितिनियमनात् टकोऽभावे मूलविभुजादित्वात् कप्रत्यये कृते टाप् प्राप्नोति । स्वस्रादौ नप्तृ शब्दो न पठ्यते—

"स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा
याता मातेति सप्तैतै स्वस्रादय उदाहृताः"

(च) कूलं पिपतिषतीत्यादौ कूलस्याचेतनत्वादिच्छाया असम्भवात् सनोऽभावमाशङ्क्य पदसंस्कारेण समाहितम् ।[1]

(छ) 'गर्वायसे' इत्यत्रोपमानाद्यभावात् कर्तुः क्यङ् सलोपश्च ३।१।५१ इत्यनेन क्यङोऽप्राप्तस्य सिद्धये गर्वशब्देऽर्शाद्यचं प्रकल्प्य गर्वः पुरुषः इत्थमगर्वो गर्वो भवतीति भृशादित्वं प्रकल्पितम् ।[2]

(ज) लिखापयति वर्णापयति इति कायस्थप्रयोगे णिच आपुकश्च साधनाय अर्थवेदसत्यानामापुग् वक्तव्य इति वार्तिकेन पुकि वक्तव्ये आपुको विधानमन्यत्र विधानार्थमिति ज्ञापनमाश्रितम् ।[3]

(झ) 'मा भैः शशाङ्क मम सा धुरि नास्ति राहुः' अत्र सिच् प्रत्ययस्य लुक् न प्राप्नोति, विधानाभावात् अतएव भट्टिकाव्ये' मा भैषीरिति प्रयोगः कृतः इत्याशङ्कायाः समाधानमागमशासनानित्यवात् कृतम् ।[4]

११—संज्ञाविप्रतिपत्तयो यथा—

'क्लीबे च पतिते पतौ' इत्यादौ पतिः समास एव ५।४।८ इति नियमादसमासे घिसंज्ञाविप्रतिपत्तिमुद्भाव्य 'शेषोऽध्यसखिपती' इति वक्तव्ये पृथक्करणं तदनित्यत्वज्ञापनार्थमिति समाहितम् ।

१२—समासविप्रतिपत्तयो यथा—

समासनिषेधकसूत्रसत्वात्, समासविधायकसूत्राभावात् समासार्थापेक्षितविभक्त्यादेरभावाच्च समासविप्रतिपत्तयस्त्रिधा भवन्ति ।

तत्र पुरुषोत्तम इत्यत्र न निर्धारणे २।२।१० इति, किंकृते भोगाः इत्यत्राऽव्ययेन सह पुरणगुणेति २।२।११ इति, कलहंस राममहितः कृतवान् इति भट्टिप्रयोगेक्तस्य च निषेधात् समासाः कथमिति प्रश्नः सप्तमीति योगविभागात्, कृता साहचर्यात् अव्ययस्यापि कृत एव ग्रहणात् तृतीयासमासेन शेषषष्ठ्या वा समासः' इति समाधानम्[5] । जनयति कुमुदभ्रान्तिं घूर्तबको बालमत्स्यानाम् इत्यत्र विशेषणसमासविधायकस्य पोटायुवति २।१।६५ इत्यनेन बाधात् तस्य च बाधकस्यान्यस्य सूत्रस्याभावात् कथं समास इति विप्रतिपत्तेः समाधानद्वयं दत्तम् व्यक्तिपरोऽत्र बकशब्दः । अतोऽस्याप्राप्त्या विशेषणसमासः इति । कुत्सितानि कुत्सनैरिति वा समासः[6] बन्ध्यासुत इत्यादौ बन्ध्यादेः सुतादिसम्बन्धाभावात् षष्ठ्यभावे प्राप्ते कथं षष्ठीसमासः इति प्रश्नस्य समाधानमुक्तम् बुद्धचऽवसितोऽत्र सम्बन्धः । यथा शिलापुत्रकस्य शरीरम्[7]

१३—पूर्वप्रयोगादिविप्रतिपत्तयो यथा—

साधारणो भूषणभूष्यभावः इति कुमारसंभवप्रयोगे अल्पाच्तरत्वात् (२।२।३४) भूष्यशब्दस्य पूर्वप्रयोगः

---

१. धातोः कर्मणः समानकर्तृकारिच्छायां वा ३।१।७) ।

२. कर्तुः क्यङ्० सलोपश्च ३।१।११

कस्त्वं भो निशि केशवः शिरसिजैः किं नाम गर्वायसे
चक्री चन्द्रमुखीं प्रयच्छसि समे कूपीं घटीं दोहिनीम् ।

३. सत्यापपाश-सूत्रे ३।१।२५ ।

४. गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ३।१।७७ ।

५. दु० वृ० पृ० ३८ ।

६. दु० वृ० पृ० ३६ ।

७. दु० वृ० पृ० ३८ ।

प्राप्यते, इति चेदुच्यते 'लक्षणहेत्वोः' ३।२।१२६ इति निर्देशात् पूर्वप्रयोगनियमस्यानित्यत्वज्ञापनात्[1] ।

१४—अनुप्रयोगविप्रतिपत्तयः—

कृञ्चानु प्रयुज्यते लिटि ३।१।४० इति सूत्रम् आम्प्रत्ययाव्यवहितं कृभ्वसनुप्रयोगं शास्ति। ततश्च 'तं पातयां प्रथममास पपात पश्चात्' इति रघौ कालिदासप्रयोगे प्रथमशब्दव्यवहितासप्रयोगो न युज्यते, तथापि अत्र पातयाम् इति न ण्यन्तस्याऽऽमन्तप्रयोगः किन्तु पातशब्दे उपपदे याते विचि निष्पन्नस्य 'पातया' शब्दस्य द्वितीयायामेकवचने पातयामिति रूपं पातं यान्तमिति तदर्थः। आस इति अस्गत्यादिषु इति धातो लिटि प्रथमपुरुषैकवचने रूपम्[2]।

१५—वचनविप्रतिपत्तयो यथा—

'वासुदेवं परित्यज्य योऽन्यं देवमुपासते
तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः'।

इत्यत्रैकत्वे 'उपास्ते' इति युक्तम् इति चेन्न असगतिदीप्यादानेषु इत्यस्य भौवादिकस्योभयपदिनो रूपम्।[3]

दुर्घटवृत्तौ समागतानामुद्धरणानां विवरणम्—

ग्रन्थःनाम	कतिधोद्धृताः ?	क्वोद्धृताः ?
१—अमरकोष टीका	१ एकधा	दुर्घटवृत्तेः ५५ पृष्ठे
२—अमरलिङ्गकारिका	१ एकधा	,, ९३ पृष्ठे
३—अमरलिङ्गसंग्रहः	२ द्विधा	,, ५५, ८१ पृष्ठे
४—अर्धनारीश्वरकम्	१ एकधा	,, १२५ पृष्ठे
५—अष्टधातुः	२ द्विः	,, २६, १४४
६—उणादिवृत्तिः	१ एकधा	,, ९६
७—उत्तरकाण्डम्	१ एकधा	,, १०८
८—उदात्तः	१ एकधा	,, ७५
९—कण्ठाभरणम्	१ एकधा	,, १३९
१०—कलाप-वृत्तिः	१ एकधा	,, ११९
११—कादम्बरी	२ द्विः	,, २२, ४५
१२—कल्पः	१ एकधा	,, ७७
१३—कामन्दकीयम्	२ द्विः	,, २१, १३३
१४—किरातः (किरातार्जुनीयम्)	३ त्रिः	,, ७०, ८९, ९०
१५—कीचकवधः	१ एकधा	,, ५५
१६—कुट्टनीमतम्	२ द्विधा	,, ८०
१७—कुमारः (कुमारसंभवम्)	२७ सप्तविंशतिधा	७, २१, २३, २९, ३४, ३७, ४३, ४५, ४६, ४९,

१. दु० वृ० पृ० ४३।
२. दु० वृ० पृ० ६२।
३. दु० वृ० २६।

१८—कैलासोद्धरणम्	१ एकधा	५३, ५६, ५७, ६८, ७१, ७३, ७९, ८४, ८८, ८९, ९७, १००, १०२, ११३, ११७, १२७, १२८
१९—कोशः	१ एकधा	६८
२०—क्लीवलिङ्गकारिका	१ एकधा	६०
२१—चण्डी (चण्डिका सप्तशती)	११ एकादशधा	५३
		१९, ५४, ६४, ८२, ९१, ९३, १०९, ११५, ११६, १२१, १२८
२२—चन्द्रिका	१ एकधा	१५
२३—चान्द्रसूत्रम्	४ चतुर्धा	४५, ८९, १३७, १४०
२४—जयमङ्गला (भट्टिकाव्यव्याख्या)	८ अष्टधा	२०, ३३, ४४, ४९, ५८, ६१, ८२, १०२
२५—जातकमाला	१ एकधा	१५
२६—जाम्बवतीविजयम् (पाणिनिकृतम्)	१ एकधा	९०
२७—ज्ञापकसमुच्चयः	५ पञ्चधा	३३, ३९, ५७, १०३, १४४
२८—टीका	१ एकधा	२१
२९—त्रिकाण्डशेषः	द्विः	४३, १०८
३०—धातुपारायणम्	द्विः	७, ८
३१—धातुप्रदीपः	पञ्चधा	२, २२, ५६, ११५, १२४
३२—धातुप्रदीपिका	सकृत्	१४२
३३—धातुप्रदीपटीका	त्रिः	६१, १०१, ११३
३४—धातुवृत्तिः	सकृत्	३७
३५—नेमिसन्धानम्	सकृत्	८०
३६—न्यासः	४० चत्वारिंशद्धा	४, ५, ९, ११, १४, २७, ३०, ३२, ३४, ३६, ३७, ४०, ४२, ४९, ५१, ६१, ७१, ७२, ७४, ७७, ७९, ८६, ८८, ८९, ९३, ९७, १०५, ११०, १११, ११२, ११६, १२०, १२१, १२४, १२५, १२९, १३२, १३७, १४०, १४३

३७—पञ्चतन्त्रम्	सकृत्	५८
३८—पदम्	सकृत्	६९
३९—पारायणम्	सकृत्	६३
४०—प्रक्रिया	सकृत्	८०
४१—प्रयोगमुखी	सकृत्	१३३
४२—प्रसिद्धपदम्	सकृत्	११५
४३—मुरारिः (अनर्घराघवकर्ता)	पञ्च कृत्वः	१८, ६६, ९७, १००, १११
४४—मैत्रेयः	द्विः	९१, १०५
४५—रक्षितः	५९ एकोन—षष्टिकृत्वः	१, २, ७, १२, १५, १९, २०, २३, २४, २५, २८, २९, ३०, ३५, ३७, ३९, ४०, ४१, ४३, ४४, ४५, ४७, ४८, ५०, ५१, ५३, ५४, ५५, ५६, ५७, ६१, ६२, ६७, ७१, ७३, ७४, ७८, ७९, ८४, ८५, ९८, १०२, १०४, १०६, १०७, १०८, १०९, ११३, ११४, ११६, ११८, ११९, १२५, १२७, १३३, १३५ १३६, १४२, १४३
४६—वल्लभः	सकृत्	७१
४७—वामनः (काव्यालंकारकृत्)	द्विः	६९, ११४
४८—वाल्मीकिः	सकृत्	९१
४९—विजयः	सकृत्	६९
५०—वृत्तिकारः	चतुष्कृत्वः	१७, ६१, ७२, १२०
५१—वैशेषिकाः	सकृत्	८०
५२—व्याख्यान-शीलः	सकृत्	९१
५३—व्यासः	द्विः	११९, १२१
५४—शूलपाणिः	सकृत्	१११
५५—श्रीकण्ठः	द्विः	२३, ११९

५६—श्रीसर्वरक्षितः	सकृत्	१६
५७—सम्बन्धः	सकृत्	१०८
५८—सादलः (सुदल)	सकृत्	११६
५६—सुभूतिः	द्विः	६१, १४१
६०—सोमनन्दी	त्रिः	५२, ६२, १११
६१—हरिश्चन्द्रप्रयोगः	सकृत्	५३

एवमेवात्र पुस्तके ये ग्रन्थकाराः स्मृतास्तेषाम् विवरणमेवमस्ति

ग्रन्थकारनाम	कतिकृत्वः स्मृताः	केषु च पृष्ठेषु स्मृताः
१—अनुन्यासकारः	चतुष्कृत्वः ४	३, ८, ४०, १३८
२—अनुपदकारः	सकृत् १	१४१
३—अमरः	त्रिंशत् कृत्वः ३०	३३, ३४, ५४-५७, ६४, ६६, ७३, ७४, ७६, ८१, ८४, ८७, ६०, ६१, ६४, ६७, ६८, ६६, १०१, १०३, १०६, ११०, १२३, १२८, १३०, १३२, १३४, १३७
४—इन्दुः	सकृत् १	७३
५—उज्ज्वलदत्तः	सकृत् १	६६
६—कात्यायनः	सकृत् १	०६
७—कायस्थः	त्रिः ३	३२, ६०, ६४
८—कालापाः	सकृत् १	१३८
६—कैयटः	चतुः ४	१६, ३३, ३४ ६०
१०—गोनर्दीयः (महाभाष्यकृत्)	सकृत् १	३०
११—घटकर्परः	सकृत् १	१०८
१२—घोषः (अश्वघोषः)	षट् कृत्वः ६	७, १८, ६६, ६५, १०६, १२७
१३—चन्द्रगोमी	द्विः २	११०, १२६
१४—चाणक्यः	सकृत् १	२१
१५—चान्द्राः	चतुष्कृत्वः ४	२१, १०३, १०६, १२७
१६—जयादित्यः	सकृत् १	५७
१७—जैनेन्द्रः (न्यासकारः)	सकृत् १	३७
१८—दण्डी (काव्यादर्शकारः)	सकृत् १	४२
१६—धर्मकीर्तिः (रूपावतारकृत्)	सकृत् १	३३
२०—नन्दी	सकृत् १	६१
२१—न्यासकृत्	षट्कृत्त्रः ६	६, १०, ३६, ४६, ७५, १०५
२२—पाणिनिः (जाम्बवती विजयकर्ता)	सकृत् १	६०
२३—पुरुषोत्तमः	षट् कृत्वः ६	२१, ३०, ३८, ४७, ७४, ७६

२४—पूर्ववृत्तिदशवृत्तिकृत्	सकृत् १	४७
२५—प्राणेश्वरः	सकृत् १	१७
२६—बौद्धप्रयोगः	सकृत् १	१२८
२७—भट्टिः	द्वाचत्वारिंशत्—कृत्वः ४२	२०, २३, २५, २६, २७, २९, ३२, ३३, ३६, ३९, ४०, ४२, ४३, ४४, ४७, ४८, ५१, ५८, ६०-६३, ६५, ६७, ६८, ७१, ७३, ७४, ७६, ७९, ८२, ८३, ८५, ९२, ९५, ९९, १०१, १०४, १०५, १०६, १११, १३१
२८—भट्टिटीकाकृत्	सकृत् १	३१
२९—भर्तृहरिः (भाष्यटीकाकृत्)	त्रिः ३	१३, १७, १२८
३०—भवभूतिः	चतुः ४	२१, ३४, ९८, १२६
३१—भागवृत्तिकृत्	पञ्चकृत्वः ५	१६, ३७, ४५, ५२, १२८
३२—भागुरिः	सकृत् १	९६
३३—भारविः	पञ्चदशकृत्वः १५	१६, १७, १८, २०, २२, ३७, ४८, ५४, ५७, ८२, ९७, ९९, १०७, १२४, १३४
३४—भाष्यकारः	चतुष्कृत्वः ४	२०, ४९, ६०, ८१
३५—मयूरः	पञ्चकृत्वः ५	१५, १०३, ११४, ११६, १४२
३६—महिः	सकृत् १	१९
३७—माघः	त्रयस्त्रिंशत्कृत्वः ३३	३, ६, २२, २५, २८, २९, ३४, ३५, ३७, ४२, ४५, ५३, ५८, ६७, ६९, ७३, ७६, ८३, ८४, ८७, ९४, १०१, १०२, १०६, ११६, १२४, १२७, १२९, १३०, १३४, १३८, १४१, १४२
३८—भट्टिटीका	सकृत् १	२३
३९—भागवृत्तिः	एकविंशतिकृत्वः २१	३, ४, ७, १७, १९, २०, २२, २७, ३१, ३७, ५७, ५८, ६९, ९०, ९४, ९५, १०६, १११, १२४, १३०, १३७
४०—भारतः	सकृत् १	१२१
४१—भारवीयव्याख्या	सकृत् १	१०२
४२—भाषावृत्तिः	अष्टाविंशतिकृत्वः २८	२३, ३६, ५१, ६६, ७०, ७५, ७६, ७८, ९१, ९४, ९५, ९७, ९८, १०४, १०७, १०८, ११४, ११५, १२०, १२४, १३४, १३७, १३८, १३९, १४०, १४२, १४३, १४४

४३—भाष्यम्	अष्टाविंशतिकृत्वः २८	२, ३, ४, ९, १९, २४, ३१, ३७, ४० ४७, ४८, ५५, ६७, ७३, ७९, ८०, ८१, ९०, ९७, ११४, ११६, १३०, १३८, १३७, १३९, १४१
४४—महिम्नः प्रयोगः	द्विः २	४५, १०६
४५—मालतीमाधवम्	सकृत्	४४
४६—मीमांसकप्रयोगः	सकृत् १	१०७
४७—मीमांसावार्तिकम्	सकृत् १	६९
४८—मेघः (मेघदूतम्)	एकादशकृत्वः ११	१४, २७, २९, ४९, ६१, ६४, ७३, ९७, १०६, १३२, १३४
४९—रघुः (रघुवंशम्)	अष्टादश कृत्वः १८	१५, १६, १८, २१, ४२, ५८, ६२, ६५, ६८, ७८, ८३, ८६, ८७, ९७, १०२, १०८, ११३, ११५
५०—रत्नश्रीः	सकृत् १	२३
५१—रामायणम्	सकृत् १	६१
५२—रूपावतारः	सकृत् १	७८
५३—लक्षणम्	सकृत् १	२७
५४—लिङ्गकारिका	सकृत् १	११५
५५—लेखमालिका	सकृत् १	५०
५६—वररुचिलिङ्गकारिका	,, १	५५
५७—वासवदत्ता	,,	१४०
५८—विश्वः	त्रिः ३	९७, १२७, १३४
५९—वृत्तिः (काशिका)	चत्वारिंशत्कृत्वः ४०	२, १२, १५, २२, २४, ३४, ३६, ३७, ४०, ४२, ४३, ४६, ५०, ५२, ५३, ६१, ६३, ६७, ७२, ७५, ७७, ७९, ८५, ८७, ८९, ९७, १०४, १०७, १०८, ११०, ११२, ११३, ११५, ११७, ११९, १२४, १२५, १३२, १३३, १४१
६०—वृत्तिव्याख्यानम्	सकृत् १	११०
६१—वृद्धसुवर्णम् (शुद्ध सुबन्तम् इत्यस्यैवायं प्रमादलेखः सम्भाव्यते)	सकृत् १	१०९

६२—वृद्धिः	सकृत १	११८
६३—वृद्धिन्दः ?	सकृत १	१२०
६४—(वेणी) वेणीसंहारम्	त्रिः ३	५६, ५७, १०८
६५—वैद्यकशास्त्रम्	सकृत् ?	४७
६६—शुद्धसुबन्तम्	सकृत १	१६
६७—श्रीगोविन्दम्	सकृत् १	९१
६८—संसारावर्तः	सकृत १	१३२
६९—सुवर्णरेखा	सकृत् १	१२४

धर्मकीर्तेरूपावतारः—

नव्यव्याकरणस्य प्रथमो ग्रन्थः

धर्मकीर्तिरयं रूपावतारस्य कर्ता सौगतमतानुयायीति ग्रन्थादौ निवेशितेन सर्वज्ञप्रणामात्मकप्रतिज्ञाश्लोकेन ज्ञायते[1]। सर्वज्ञ इति भगवतो बुद्धस्य प्रसिद्धं नाम सर्वज्ञः सुगतो बुद्ध इत्यादावमरसिंहादिना तथाप्रतिपादनात्। चान्द्रव्याकरणादौ दृश्यमानमङ्गल श्लोकेऽस्य शब्दस्य बुद्धापरपर्यायरूपेण प्रयोगः उपलभ्यते। न च 'कृशानुरेताः सर्वज्ञः धूर्जटिर्नीललोहितः' इत्यमरकोशे सर्वज्ञशब्दः शंकरार्थको दृश्यते तथा चात्र सर्वज्ञशब्देन बुद्धस्य ग्रहणे विनिगमनाभाव इति वाच्यम्, उभयार्थकोऽपि सर्वज्ञशब्दः यथा बुद्धरूपार्थे ख्यातो न तथा महादेवार्थे। केवलस्य सर्वज्ञशब्दस्य प्रयोगे शंकरस्योपस्थितिर्न भवति, बुद्धार्थस्य तु भवति इत्यस्यैव विनिगमकत्वं गृहाण। यथा धर्मराजशब्दः बुद्धपर्यायोऽपि प्रयोगविरहात् अल्पप्रयोगाद्वा विना प्रसिद्धं विशेष्यं, सुगतार्थप्रतिपादनासमर्थोजातस्तथैव सर्वज्ञशब्दोऽपि साहित्ये लोके वा शंकरार्थेऽल्पप्रयोगः शनैः शनैः प्रयोगरहितस्तदर्थप्रतिपादनाक्षमो जातः। व्यवहार एव शब्दानां प्राणप्रदः। नहि गौः स्वरूपेण गौर्नाप्यगौर्गोत्वाभिसम्बन्धात्तु गौः' इति वाक्यपदीये यस्य गोत्वाभिसम्बन्धस्य गोनिर्णायकत्वमुच्यते; तस्यापि प्रत्यायकत्वं शब्दप्रयोगाद्व्यवहारादेव सिद्धचति। अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्। प्रवृत्तिनिमित्तमपि परिवर्तिनि संसारे परिवर्तते, अतः अद्य यस्य कस्यापि शब्दस्य यस्मिन्नर्थे प्रयोगः कालान्तरे तदितरार्थेऽपि तस्य प्रयोगः जायते। स च प्रयोगः प्राचुर्येण यदि जातस्तदा तस्य पूर्वस्मिन् काले प्रतिपाद्योऽर्थः लुप्तो भवति। यथा जुगुप्सा गवेषणादयः शब्दाः साम्प्रतं गोपनेच्छा गोकर्मकान्वेषणादिरूपमर्थं नैव बोधयन्ति किन्तु घृणान्वेषणमात्रमर्थं ददति। एवमेव सर्वज्ञशब्दस्य गतिः। स शब्दः सर्ववित्त्वरूपं यौगिकमर्थमादाय प्रथमं प्रयुक्तः, पश्चाच्च महादेवरूपार्थे यौगिकरूढः तथागतकालादनन्तरं तत्रार्थे योगरूढो जातः। अतः सर्वज्ञशब्दः विना प्रकरणादिकं विना च विशेष्यशब्दं तत्कालादारभ्य बुद्धार्थमेवाभिदधाति। अतः सर्वज्ञप्रणामकारकोऽयं धर्मकीर्तिर्बौद्धः चन्द्राचार्यभामहशरणदेवादिवत्, नतु शैवः।

न च रूपावतारस्य द्वितीयभागे देवी—[2]प्रणामपरकमङ्गलश्लोकदर्शनादस्य सौगतत्वे सन्देह इति वाच्यम् सौगतैरपि वागीश्वर्याः बहुशः प्रणमनात्।

बर्नेल्लाख्यांग्लपण्डितकृततंजोरनगरालयलिखितग्रन्थसमुच्चयसूचिकायां कृष्णदीक्षित इत्याख्यः कोऽपि विद्वान् रूपावतारस्य कर्ता इति लिखितमुपलभ्यते।[3]

आपर्टाख्यविद्वद्विरचितलिखितग्रन्थसमुच्चयसूचिकासु च कृष्णदीक्षितस्यैव रूपावतारकर्तृत्वेनोल्लेखो दृश्यते।[4]

---

१. सर्वज्ञमनन्तगुणं प्रणम्य बालबोधार्थमिमम्।
रूपावतारमल्पं सुकलापमृजुं करिष्यामि ॥ रूपावतार भा० १ पृ० १।

२. प्रणम्य शिरसा देवीं बालानां हितकारिणीम्
यथा सारं प्रवक्ष्यामि धातुप्रत्ययपञ्चिकाम्।

३. विलोक्यताम् रूपावतार भूमिका—पृ० १।

४. विलोक्ताम् रूपावतार भूमिका पृष्ठ।

रूपावतारस्य कर्ता धर्मकीर्तिरिति निश्चप्रचम् प्रमाणैः प्रसिद्धया च। अतः धर्मकीर्तिरचितस्य रूपावतारस्य कर्तृत्वं कृष्णदीक्षितस्य किल प्रमादादतिरिक्तं नान्यत् किमपि। धर्मकीर्तेरूपातारकर्तृत्वं नानाविधप्रमाणसिद्धम्। नेपालराजपुस्तकालयस्यलिखितग्रन्थसन्दोहे रूपावतारोऽन्यतम इति महामहोपाध्यायहरप्रसादशास्त्रिप्रकाशिततायां तत्सूचिकायां दृश्यते। अपिच तत्र मुद्रितैतद्ग्रन्थादौ विद्यमाने श्लोके धर्मकीर्तेस्तत्कर्तृत्वेनोल्लेखः स्पष्टः।[1]

अपरंच अनन्तशयनराजकीयपुस्तकालयस्थलिखितग्रन्थसमुदयान्तर्गतरूपावतारव्याख्यायां व्याख्याकारः मूलकर्तारंस्तुवन् व्याख्यारम्भे यत् पद्यं रचयामास तस्मिन्नपि धर्मकीर्तिर्नामग्राहं गृहीतः। तस्य सौगतत्वं च प्रतिपादितम्।[2]

रूपावतारमुद्रणकार्ये यानि यानि तालपत्रलिखितपुस्तकानि विलोकितानि तेषु एकस्य मद्रासनगरस्थपचैयप्पोत्तमविद्याशाला-संस्कृतमुख्याध्यापककृष्णशास्त्रिप्रेषितस्यान्तप्रकरणपुष्पिकायां धर्मकीर्तेरुल्लेख उपलभ्यते।[3]

धातुप्रत्ययपञ्चिकेत्यस्यैव रूपावतारस्योत्तरभागः धर्मकीर्तिनैव कृतः इति धातुप्रत्ययपञ्चिकाभागस्य प्रारम्भपुष्पिकाभ्यामगम्यते[4]। रूपावतारसम्पादकेन धातुप्रत्ययपञ्चिकापुस्तकेषु हस्तलिखितेषु अन्यतमस्योपरि रूपावतार इति नामोल्लेखोऽपि दृष्टः[5]। पृथक्प्रचारबाहुल्येन धातुप्रत्ययपञ्चिकायाः स्वतन्त्रग्रन्थान्तरत्वमपि चिरख्यातमस्य ग्रन्थस्य महत्वं साधयति न तु स्वतन्त्रकर्तृत्वम्। धर्मकीर्तेः धातुप्रत्ययपञ्चिकाकर्तृत्वस्य सुप्रिसिद्धत्वात् ग्रन्थे यथावसरं तन्नामोल्लेखोऽल्पभ्याच्च[6]

यद्यप्यत्र वाक्ये आचार्यमिश्रेतिविशेषणेन धर्मकीर्ते विप्रत्वं प्रतीयते मिश्रोपाधेर्विप्रत्वसमनियतत्वात् तथापि सौगतत्वस्वीकृतेः प्राक् तस्य विप्रत्वं सम्भवति। अतएव 'अभिमतषडभिज्ञप्रक्रियोऽपि स्वयं यः

प्रथमसमयसज्जद्वासनावासितात्मा' इति श्लोकद्वितीयचरणे

तस्य प्रथमसमयसज्जद्वासनावासितात्मत्वं प्रतिपादितं संगच्छते।

धातुप्रत्ययपञ्चिकाऽपि रूपावतारस्य द्वितीयो भागः, उभयोः कर्ता एक एव स च सौगतमतानुयायीत्यत्र नास्ति स्वल्पोऽपि संशयावकाशः।

कस्तावदेष धर्मकीर्तिः कदा काम्बा भुवमलंचकारेति विचारः प्रस्तूयते। एको धर्मकीर्ति विख्यातकीर्ति न्यायशास्त्रपरिष्कर्ता बौद्धसिद्धान्तप्रवक्ताऽसीत्। द्वितीयश्च धर्मकीर्तिः सम्भाव्यते, कोऽपि कविरासीत् यः किलानन्दवर्धनाचार्येण ध्वन्यालोके समुदाहृतः। एतौ पूर्वोक्तौ धर्मकीर्त्तौ भिन्नावित्यत्र नास्ति पुष्कलं निरवद्यं वा प्रमाणम्। तयो

---

१. कृता सुकृतिना चेयं प्रक्रिया धर्मकीर्तिना
पोतानां पोतवत् क्षिप्रं शब्दाब्धौ पारगामिनाम्। (रूपावतार भू० पृ० २)।

२. अभिगतषडभिज्ञप्रक्रियोऽपि स्वयं यः प्रथमसमयसज्जद्वासनावासितात्मा
अकलयदतिहृद्यं शब्दविद्यानुमोदम् स जयति नवकीर्तिः सन्मनोधर्मकीर्तिः। (रूपावसार भूमिका पृ० २)।

३. इति धर्मकीर्तिविरचिते कृदन्तकाण्डं समाप्तम्।

४. प्रणम्य शिरसा देवीं बालानां हितकारिणीम्। यथा सारं प्रवक्ष्यामि धातुप्रत्ययपञ्चिकाम् इति रूपावतारः समाप्तः।

५. रूपावसारभूमिका पृष्ठ—३।

६. इत्याचार्यमिश्रधर्मकीर्तिविरचिते तिङन्तखण्डे सप्तमः परिच्छेदः समाप्तः। रूपा० भू० पृष्ठ—३।

भिन्नताङ्गीकारेऽपि तयोरन्यरस्यरूपावतारकर्तृत्वं नैव स्वीकार्यं स्यात् एतयोरुभयोरपि नूनमेव एतद्ग्रन्थकर्त्रपेक्षाकृतं पूर्वकालिकत्वं प्रमाणैः सिद्धम् । अनयोः प्रथमस्तावन्माधवाचार्यकृते सर्वदर्शनसंग्रहे बौद्धदर्शनान्तर्गतयोगाचारदर्शन-निरूपणसन्दर्भे नाम्नोद्धृत उपलभ्यते ।[1]

अद्वैतवेदान्तप्रतिष्ठापकत्वेनाभिमतैः श्रीमच्छंकराचार्यैरपि 'नाभाव उपलब्धेः'[2] इति सूत्रस्य व्याख्यानावसरे पूर्वपक्षिस्थाने स एवानूदित इति वर्तते कापि पण्डितमण्डली किम्वदन्ती । माधवाचार्येण ये योगाचारमतोपस्थापकाः श्लोकाः समुद्धृतास्तेष्वपि शंकराचार्याणामत्रत्यं कथनं संवादिरूपेण उपलभ्यते । तस्मात् सिद्ध्यत्यस्य नैयायिकस्य धर्म-कीर्तेः शंकराचार्यजीवनकालात् प्राग्वर्तित्वम् । भारतीयबौद्धविद्याप्ररोहवृत्तान्तज्ञाः केचिन्नवीनपण्डिता अपि एतं सौगताचार्यमतिप्राचीनमेव मन्यन्ते ।

महामहोपाध्यायसतीशचन्द्रविद्याभूषणैः दार्शनिकस्य धर्मकीर्तेरस्य कालो दिङ्नागाचार्यधर्मोत्तराचार्यानन्तर-वर्त्तीति संभावितम् । अन्यच्च इत्सिङ्गनामकस्य बौद्धभक्तस्य चीन-यात्रिकस्य लेखेन ज्ञायते यत् खिष्टाब्दीयसप्तम-शतकान्ते धर्मकीर्ति र्भूतपूर्व इव विख्यात आसीदिति ।

ध्वनिकारोद्धृतो द्वितीयो धर्मकीर्तिः कविरालंकारिकश्चासीदिति निश्चितमेव । भदन्तधर्मकीर्तिग्रथितानि बहूनि पद्यानि सुभाषितावलौ दृश्यन्ते इति नाविदितं पण्डितानाम् ।[3] भदन्तेतिविशेषसमादरद्योतकोपाधियुक्तत्वात् कवि धर्मकीर्तिः सौगतसम्प्रदाये आचार्यत्वेनाति पूज्योऽमन्यतेति सम्भाव्यते । वासवदत्तायां वासवदत्तानायिकावर्णन-प्रसङ्गे 'बौद्धसंगतिमिवालङ्कारभूषिताम्' इति वाक्यस्य टीकावसरे शिवरामः बौद्धसङ्गति र्नाम धर्मकीर्तिकृतो ग्रन्थ-विशेष इति व्याख्यातवान् इति महामहोपाध्यायदुर्गाप्रसादमिश्रवर्याणां मतं पूर्व मेव प्रकाशितम्[4] । सुबन्धोः वासवदत्ता-वाक्येनानेन धर्मकीर्तिग्रन्थस्य बौद्धसंगतेरलङ्कारालंकृतत्वं ध्वन्यते । सुबन्धुश्चास्ति बाणेन स्वपूर्ववर्त्तिकविनिरूपण-प्रस्तावे चर्चितत्वाद् बाणभट्टकालात् खिष्टाब्दीयसप्तमशतकात् प्राक्कालिकः । अलङ्कारालंकृतबौद्धसङ्गतिकारस्य धर्म-कीर्तेश्च कालस्सुबन्धोः प्रागेव निर्धारणयोग्यः । इतीत्थमुभावापि इमौ धर्मकीर्ती खिष्टाब्दीयसप्तमशतकात् प्रागेवा-भूता मिति शक्यते केनापि विश्वासेन सह वक्तुम् : इत्थं भूतसमानकालिकत्वं तयोरेक्यप्रतिपादनप्रमाणमपि भवितुमर्हति । आलङ्कारिकत्वं कवित्वं नैयायिकत्वं स्वसमयाचार्यत्वं च परस्परविरुद्धा गुणा अपि संस्कृतवाङ्मयोपासकेषु बहुषु विद्वत्सु दृष्टा एव; यथा दिङ्नागाचार्ये विविधविद्याविद्योतितान्तःकरणे, खण्डनखण्डखाद्यकर्तरि श्रीहर्षे नैषधचरितमहा-काव्यकृति, पण्डितराजे जगन्नाथे महानैयायिके विलक्षणसमालोचके विचित्रकविकर्मनिपुणे च । सन्ति चान्येऽपि बहवो विद्वांसः दार्शनिका अपि कवयो, मीमांसका अपि काव्यरसिकाः समालोचकाः । अतः विरुद्धविद्यानैपुण्यात् तयो धर्मकीर्त्योर्भिन्नत्वख्यापनमितिहासविरुद्धं प्रत्यक्षानुभूतिविरुद्धं चेति । रूपावतारकर्ताधर्मकीर्तिस्तूभाभ्यामप्याभ्यां भिन्नः ।

रूपावतारकर्ता धर्मकीर्तिः रूपावतारे काशिकावृत्तिमनुसृत्य तत्थ्यामुल्लिखति स्म अस्मिंश्चग्रन्थे यत्र तत्र तस्यावृत्ते र्नामाप्युपलभ्यते ।[5] अतः काशिकाकाराभ्यां वामनजयादित्याभ्यामयं पश्चाज्जात इति सिद्ध्यति ।

---

१. 'एषा हि तेषां परिभाषा स्वयं वेदनं तावदङ्गीकार्यमन्यथा जगदान्ध्यं-
प्रसज्येत तत् कीर्तितं धर्मकीर्तिनाऽप्रत्यक्षोपलब्धस्य नार्थदृष्टिः प्रसिध्यति ।

२. वेदान्त सूत्रम्—११।२।२८ ।

३. रूपावतारभूमिका पृष्ठ—५ ।

४. विलीकनीया औचित्यविचर्चायाः टिप्पणी (काव्यमाला सिरीज भाग १ पृ० ११७)।

(१) ५. ईदादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः (वार्तिक १-१-११) इतिपाठः काशिकाधारः भाष्ये च न दृश्यते । अतएव मणीवादीनां प्रतिषेधो वक्तव्य इति भाष्यकारवार्तिककाराभ्यामपठित्वातदप्रमाण-

धातुप्रत्ययपञ्चिकायां काशिकावृत्तिव्याख्याकारकस्य जिनेन्द्रबुद्धे र्हरदत्तस्य च नामोपलब्धे धर्मकीर्तिः सुतरां काशिकातोऽर्वाचीन इति प्रतीयते ।[1]

रूपावतारस्य च नाम तत्रत्योदाहरणानि च दृश्यन्ते विविधेषु ग्रन्थेषु । एतेनास्य ग्रन्थस्य ततः प्राग्भवत्वेन सह, प्रामाण्यं च प्रमापितं भवति ।

प्रक्रियासर्वस्वकारेण नारायणभट्टेन स्वग्रन्थादौ ग्रन्थलेखनप्रवृत्तिप्रेरकं तत्वं निरूपयता रूपावतारोऽयं नाम-ग्राहं गृहीतः ।[2]

मैत्रेयरक्षिततन्त्रप्रदीपे रूपावतारस्य[3] नाम ग्रहणं दृश्यते । रूपावतारोद्धरणदायकेषु नारायणभट्टस्य समयः खिृष्टाब्दीयसप्तदशशताब्दयां सम्भाव्यते । दुर्घटवृत्तौ शरणदेवेनाऽपि रूपावतार उद्धृतः[4] शरणदेवेन स्ववृत्तिग्रन्थ-प्रारम्भे ग्रन्थरचनासमयः १०९५ तमः शालिवाहनशकाब्दः स्वयं लिखितः ।[5]

इत्थं दुर्घटवृत्ते रचनाकालः ११७२ तमः खिृष्टाब्दः सिद्ध एव । रूपावतारस्य रचना ततः प्राक्तनी ।

किंच अनुन्यासकारः (तन्त्रप्रदीपकारः) मैत्रेयरक्षितः सायणाचार्यैः स्वकीयमाधवीयधातुवृत्तावुदाहृतः ।[6]

मेतत् । मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम इति प्रयोगस्तु वाशब्दस्योपमानार्थकस्य इति तत्र कैयटः ।

२. समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः १-३-२९ इति पाठः काशिकादृष्टः रूपावतारे समुद्धृतः । भाष्यपाठस्तु समोगम्यृच्छिभ्याम् १-३-३९ विदिप्रच्छिस्वरतीनामुपसंख्यानम् वा अर्तिश्रुदृशिभ्यश्चेति वाच्यम् ।

३. अचिशीर्षः ६-१-६२ इति काशिकानुसारेण सूत्रत्वेनोद्धृतम् । भाष्ये तु अचिशीर्षः इतिवक्तव्यम् (वा० ४-१-६१) इति वार्तिकरूपेण दृश्यते ।

४. रूपावतारोद्धृतः टिड्ढाणञ्द्वयसज्दध्रच्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम् ४-१-१५ इति काशिकासम्मतः पाठः । भाष्यानुसारी पाठस्तु टिड्ढाणञ् द्वयसज् दध्रच् मात्रच् तयप् ठक् ठञ्क्वरपः ४-१-१५ नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् (वा) ।

५. धर्मकीर्तिना रूपावतारे पद्दन्नोमास् सूत्रे काशिकानुसारेण आसनशब्दस्य आसन्नादेशः स्वीकृतः । भाष्याशयस्तु आस्यशब्दस्य आसन्नादेशः ।

६. अडभ्यासव्यवायेऽपि ६-१-१३६ इत्यस्य सूत्रत्वं काशिकासम्मत्या सम्भवति । भाष्ये त्वस्य दृश्यते वार्तिकरूपता ६-१-१३५ ।

१. "दीर्घान्त एवायं हरदत्ताभिमतः, तदा सेट्त्वादकुविष्टेत्यपि भवति । जिनेन्द्रस्तु ह्रस्वान्तमेवावादीत् तदा अकुत इति भवति" (रू० भा० २ पृ० १५७) ।

२. "वृत्तौ चारु न रूपसिद्धिकथना रूपावतारे पुनः" रू० भू० पृ० ८ ।

३. रूपावतारभूमिका पृष्ठ—१० ।

४. कथंमाच्छादयामीति रूपावतारः । (दु० वृ० पृ० ७८) ।

५. शाकमहीपतिवत्सरमाने एकनभोनवपञ्चवितानें । दुर्घटवृत्तिरकारि मुदे वः कण्ठविभूषणहारलतेव ।
दु० वृ० पृ० १ श्लो० २ ।

६. यथाह मैत्रेयरक्षितः—उदात्तत्वमयतिवर्जं भट्टग्रामन्यायेनोदात्ता इत्युच्यन्ते । इति सायणाचार्यधातु-वृत्ति—भाग—१ पृ० २२९ ।

खिष्टाब्दीयचतुर्दशशतकस्य मध्यभागः सायणाचार्यकाल इति साम्प्रतिकैरितिहासज्ञैर्निर्णीतप्राय एव। मैत्रेयरक्षितः सायणाचार्यात् पूर्वकालिकः। मैत्रेयरक्षितादपि च प्राचीनो रूपावतारकर्ता धर्मकीर्तिरिति स्वतःसिद्धमेव। अतः खिष्टाब्दीयत्रयोदशशतकात् प्रागेव रूपावताररचनाकाल इति। खिष्टचतुर्दशशतके तु ग्रन्थोऽयं विद्वत्समाजे ख्यात आसीदतः खिष्टाब्दीयान्नवमशतकात्पश्चात् त्रयोदशशतकाच्च प्रागेव बभूव वैयाकरणो धर्मकीर्तिरिति विद्वत्संमतिः। तत्रापि शरणदेवकृतदुर्घटवृत्तिरचनाकालात् तत्र स्पष्टमुल्लिखितात् ११७२ तमात् खिष्टाब्दात् तत्रत्य-समुद्धृतनाम्नो रूपावतारस्य कालः प्रागेव मन्तव्य इति मन्मतिः। धर्मकीर्तिः वैयाकरणत्वेन स्वसमये ख्यातः तदनन्तरं च प्रभावितव्याकरणसंसारः कः आसीत् कां च भुवमलंचकारेति जिज्ञासायां 'सिंहलद्वीपाधिपस्य प्रथमस्य पराक्रमबाहोः समकालिकः कश्चिद् धर्मकीर्तिः स्मृतो भवति। महावंशनामके सिंहलद्वीपराजचरिते दृश्यते स राजा बौद्धमतावलम्बी स्वद्वीपस्थभिक्षुसंघजीर्णोद्धाराय महाकाश्यपनामानं परिवाड्वरं शीलविद्याविभूषितं संघस्थविरमकरोदिति। एष महा-काश्यपो महावैयाकरण इति ज्ञायते यतोऽस्य कृतं चान्द्रव्याकरणानुसारि बालावबोधनं नाम व्याकरणपुस्तकं साम्प्रत-मपि प्राप्यते पाठ्यते च सिंहले। तच्छिष्यशिष्यः कश्चित् संघराजधर्मकीर्तिः सिंहले विख्यातकीर्तिः बालावताराख्यं पालीभाषाव्याकरणं व्यरचदिति वर्तते प्रसिद्धिः[1]।

अथ च राज्ञः प्रथमपराक्रमबाहोः सभायां धर्मकीर्त्याख्यः कश्चित् पण्डितप्रवर आसीदिति महावंशग्रन्थादव-गम्यते।[2]

एष एव पण्डितः बौद्धभिक्षुः संघराजाख्य इति सम्भाव्यते।

"अभिगतषडभिज्ञप्रक्रियोऽपि स्वयं यः

प्रथमसमयसञ्जद्वासनावासितात्मा" इति वचनेन रूपावतारकर्तुः प्रथमं वैदिकब्राह्मणत्वं तदनु बौद्धत्वं च सिद्धयति। महावंशग्रन्थेनैव सिंहलद्वीपभूपस्य पराक्रमबाहो राज्यकालः खिष्टाब्दीयद्वादशशतकोत्तरार्धं आसीदिति ज्ञायते। ततः स संघराजधर्मकीर्ति र्भवेद्रूपावतारकार इति संभाव्यत इति रङ्गाचार्यमहाभागाः।

परन्तु नैतत्समीचीनं प्रतिभाति—

शरणदेवविरचितायां स्पष्टमुल्लिखितरचनाकालायां दुर्घटवृत्तौ रूपावतारस्य[3] धर्मकीर्ते[4]श्च नामोलेख-दर्शनात् धर्मकीर्तेरूपातारकारस्य कालः ११७२ तमात् खिष्टाब्दात् प्रागेव स्वीकर्तव्यः हेमचन्द्रेण लिङ्गानुशासनस्य स्वोपज्ञविवरणे धर्मकीर्ते रूपावतारेण सहोल्लेखः कृतः।[5] हेमचन्द्रेण पञ्चाङ्गव्याकरणस्य रचना ११३६-११४३ खिष्टाब्दे कृता। एतेन तु धर्मकीर्तेः समयः ११४३ खिष्टाब्दादपि प्रागेव सिद्धयति।

एवंच सिंहलद्वीपस्य राज्ञः प्रथमपराक्रमबाहोः खिष्टाब्दद्वादशशतकोत्तरार्धवर्तिनः सभापण्डिततत्वमस्य न युज्यते; दुर्घटवृत्तप्रतिपादितकालेन सह सामञ्जस्याभावात्।

अतो धर्मकीर्ते र्देशविषये न शक्यते किमपि निश्चयेन वक्तुम्।

केरलेषु द्राविडेषु सिंहलेषु चास्य रूपावतारस्यातीतकालिकं प्रचारप्रसारबाहुल्यं विलोक्य ग्रन्थकारस्य सिंहल-वासित्वमिव केरलद्रविडान्यतरदेशवासित्वमपि शक्यते संभावयितुम्।

व्याकरणशिक्षायै या प्रणाली प्रशस्यते साम्प्रतं शिक्षाशास्त्रिभिस्तस्या अपि सर्वप्रथमाविष्कारको बौद्धो वैयाकरणो धर्मकीर्तिरेवेति जितं बौद्धेन नव्यव्याकरणजगदपि सृजता। व्याकरणशिक्षाविषये नवीनशिक्षाजगति

---

१. महाकाश्यपकृतबालावबोधनभूमिका पृ० २ (रू० भू० १६)।

२. रू० भू० १६। ३. दु० वृ० पृ० ७८। ४. दु० वृ० पृ० ३३।

५. वाः वारि रूपावतारे तु धर्मकीर्तिनास्य नपुंसकत्वमुक्तम् लिङ्गानुशासनस्य स्वोपज्ञविवरणम् पृ० ७१।

प्रचलिता विचारा इत्थं सन्ति। न व्याकरणं विना स्वल्पायासेन भाषाज्ञानं भवितुमर्हति। अतः कतिपये विद्वांसः भाषाशिक्षां व्याकरणशिक्षां विनाऽपूर्णमिव मन्यन्ते।

कतिपये भाषाशस्त्रिणो व्याकरणशिक्षामर्थशून्यां मन्यन्ते। तेषां मतेन भाषाभाषणात् श्रवणात् पठनाच्च स्वयमेवागच्छति। तस्या अध्ययनाय व्याकरणनियमानामभ्यसनं व्यर्थमस्ति। एतदेव तथ्यं मनसिकृत्य भाष्यकारोऽपि कथयति—दृश्यते कृतप्रयत्नाश्चाप्रवीणा अकृतप्रयत्नाश्च प्रवीणा[1] इति। इमे मनोविज्ञानसिद्धान्तं प्रमाणयन्तो वदन्ति भाषा केवलमनुकरणेनाधिगता भवतीति।

तृतीया श्रेणी तेषां विदुषामस्ति ये मध्यमं मार्गं प्रशंसन्ति। ते कथयन्ति "व्याकरणं बिना भाषाशिक्षाऽपूर्णेति। भाषा नियमैरनियमिता विशृङ्खलिता जायेत। तस्मात् व्याकरणं तत्र मर्यादामानेतुं यथामर्यादमवश्यं पाठनीयम्। किन्तु पाठ्यमानमिदं व्याकरणं व्यावहारिकमथ च क्रियात्मकं (Functional) भवेत्। इमेऽपि विचक्षणा औपचारिकरूपेण व्याकरणाध्यापनं वरं शुभफलप्रदं च नैव मन्यन्ते। औपचारिकव्याकरणाध्यापने प्रथमं व्याकरणनियमा अभ्यसनीया भवन्ति, नियमानां च प्रयोगाः लक्ष्यसिद्धिरूपाः पश्चात् शिक्ष्यन्ते। न तथा व्यावहारिकव्याकारणे। अत्र तु प्रथमं भाषागताः प्रयोगाः शिक्ष्यन्ते, ततो नियमानां ज्ञानं कार्यते।

तत्र द्वितीयं मतं संस्कृतभाषाशिक्षणेतरविषयकमिति मन्तव्यम्। व्याकरणं यदि न भवेत्, तदा संस्कृतमिदानीं यथा कालिदासभाससमये आसीत् तथैव न भवेत्। संस्कृतस्य प्राचीनवाङ्मयस्य याथातथ्येनावगमनाय तदीयं व्याकरणमवश्यमेवाध्येयम्। 'रक्षोहागमलध्वसंदेहाः प्रयोजनम्' इति पतञ्जलिप्रयुक्तं व्याकरणप्रयोजनप्रतिपादकं वाक्यमिदानीमपि वर्ततेऽक्षरशः सार्थकम्। न केवलं वेदानामपि तु समस्तवैदिक-श्रेण्योभय-विध-वाङ्मयानां रक्षार्थम् तेषां रूपस्थैर्यसम्पादनकारणीभूतं व्याकरणमवश्याध्येयम्। न केवलं यज्ञे कर्मणि ऊहार्थम् यथा किल पतञ्जलिना महाभाष्ये निर्दिष्टम्, अपि तु भाषायामपि साहित्येऽपि एकत्र 'कवये' इति दृष्ट्वा रवये इति ऊहार्थम् 'पतये' इत्यस्य निवर्तनाय च व्याकरणाध्ययनस्यानिवार्यता सिद्धचति। ब्राह्मणेन निष्कारणो धर्मः षडङ्गोवेदोऽध्येयो ज्ञेयश्च इति आगमे ब्राह्मणपदम् सर्वेषां वाङ्मयाध्ययनप्रवृत्तानामुपलक्षणम्। ब्रह्मणो विस्तृतस्य व्यापकस्य ज्ञानमयस्य परिचयप्रवृत्ताः सर्वे ब्राह्मणा एव। संस्कृतं न केवलं ब्राह्मणस्य जातिविशेषस्य पैतृकसम्पत्तिः क्षत्रियै र्दर्शनोपनिषदादिनिर्माणे प्रमुखैः, बौद्धैः नागार्जुनचन्द्रगोम्यश्वघोषप्रभृतिभिः, जैनैर्हेमचन्द्रादिभिरस्य वाङ्मयस्य समृद्धये कृतप्रशस्यप्रयत्नत्वात्। अतएवोच्यते विचारकैः साहित्यम् दर्शनम् शास्त्रं व्याकरणं कला विज्ञानं च न कस्यापि देशस्य कस्यापि जातिविशेषस्य राष्ट्रस्य वा सम्पत्तिरपि तु तानि मानवमात्रस्य सर्वस्वम् भवन्ति। यत्स्वं सर्वेभ्यो भवेत् तदेव सर्वस्वं भवितुमर्हति।

लघुनोपायेन महतः शब्दौघस्य ज्ञानं व्याकरणं विना न भवितुमर्हति। उत्सर्गापवादनियमा निर्मीयन्ते वैयाकरणै र्वाङ्मयभाषागतप्रयुक्तशब्दानां स्वभावमधीत्याधीत्य। तान् नियमान् माध्यमीकृत्य भाषा विशेषतः मातृभाषारूपेणाविद्यमाना भाषावाङ्मये तदभिज्ञविद्वत्समाजे च प्रयुज्यमाना भाषा व्याकरणमाध्यमेनैवाध्येया भवति। अतः संस्कृतसदृशभाषायाः सम्प्रत्यमातृभाषीभूताया ज्ञानाय व्याकरणाध्ययनमतीवावश्यकम् तत्र वैशिष्ट्यात् पाणिनीयव्याकरणस्यैव दृश्यते प्रचारो बाहुल्येन संस्कृतविद्याध्ययनसंस्थासु। पाणिनीयव्याकरणस्य चाध्ययने क्रमद्वयमुपलभ्यते। तत्रैकोऽष्टाध्यायीक्रमः येन किल क्रमेण पाणिनिना सूत्राणि निर्दिष्टानि तेनैवक्रमेण तदध्ययनं लक्षणक्रमष्टाध्यायीक्रमम्वाध्ययनमुच्यते। क्रमेस्मिन् पूर्वं समस्ताष्टाध्यायी सूत्राणामभ्यासो विधीयते। अत्र चाष्टाध्यायीसूत्रपाठेन सह धातुपाठोणादिपाठगणपाठलिङ्गानुशासनपाठेति पाठचतुष्टय्यपि कण्ठस्थीकार्यते।

---

१. प्रयोगे सर्वलोकस्येति वार्तिक महाभाष्यम् (प० आ०)।

वार्तिकानि कात्यायनकृतानि पातञ्जलं महाभाष्यं, जयादित्यवामनाभ्यां कृता काशिकावृत्तिश्चात्र क्रमेऽवश्याध्येतव्यानि भवन्ति स्म। सर्वाण्यमूनि पानिनीयाष्टाध्यायीपूरकाणि।

इत्सिंगभारतयात्राकाले (ई० ६८१-६९१) क्रमोऽसौ प्रचलित आसीदिति ज्ञायते तद्यात्रा विवरणग्रन्थमधीत्य।[1] अत्रक्रमे पाणिनिसूत्रकात्यायनवार्तिकपातञ्जलमहाभाष्यकाशिकावृत्तिग्रन्था अध्याप्या भवन्ति।

कथं क्रमोऽसौ समुपेक्षितो व्याकरणशिक्षकच्छात्रैरिति जिज्ञासायाम् कारणद्वयं प्रत्यक्षीभवति तदुपेक्षाया मुख्यरूपेण:—

१—अस्य क्रमस्य शिक्षणपद्धतिविसम्वादिता।

२—दूषणदुष्टता च।

अद्यत्वे सर्वत्र शिक्षणसंस्थायाम् भाषाशिक्षणपद्धति र्लक्ष्याल्लक्षणाभिमुखगामिनी वर्तते। पूर्वनिर्देशानुसारेण प्रथमं सुललितानि सरलानि सरलानि प्रचलितानि उदाहरणानि प्रदर्श्यन्ते शिक्षकैः, तदनन्तरं तान्याधारीकृत्य नियमं कमपि सामान्यंनिर्मातुं छात्राः प्रेर्यन्ते तै र्निमितानां च नियमानां गुणदोषौ प्रदर्श्य निर्दुष्टं नियमं सूत्रं वा समुत्स्थाप्यते। एतेन छात्रस्य व्याकरणाध्ययने सम्भाव्यमानं स्वाभाविकं वैरस्यं दूरं गच्छति, तस्य व्याकरणप्रतिभा च पल्लवितपुष्पिता जायते। तत्कृते व्याकरणं काष्ठभारवत् क्लेशावहं न भवति, किन्तु तद् भवति पुष्पमाल्यमिव स्पृहणीयाङ्गीकारम्। इयं पद्धतिरागमनपद्धतिरुच्यते प्रशिक्षणशास्त्रिभिः। निगमनपद्धतिरुपेक्षिता सर्वत्र व्याकरणविद्याभवनेषु आगमनपद्धतिश्चाङ्गीकृता। निगमनागमनपद्धती इमे अष्टाध्यायीरूपावतारप्रक्रियाकौमुदीप्रभृतिजक्रमद्वयस्य सदृशौ। अतः एककालावच्छेदेन एकदेशावच्छेदेन च भाषाशिक्षणपद्धतिवैषम्यमसोढव्यमभवत्। सर्वस्यास्य तथ्यस्य विमर्शनं तत्तत्पद्धतीनां परिज्ञानं विना ऽसम्भवम् इति निरूप्यते प्रथमं तावन्निगमनागमनपद्धतिद्वयं ततस्तेनाष्टाध्यायीरूपावतारपद्धतिभ्यां सह साम्यं च निरूपयिष्यते। तथाहि:—

---

(१) १. "इसमें (अष्टाध्यायी में) १००० श्लोक (४ सूत्रों का १ श्लोक मानकर ऐसा लिखा गया है) है। यह पाणिनि की रचना है, जो प्राचीन काल में बहुत भारी विद्वान् था ०००००००००००००० आजकल के भारववासियों का इसमें विश्वास है। बच्चे ८ वर्ष की आयु में इस (पाणिनि) सूत्र पाठ को सीखना आरम्भ करते हैं और ८ मास में इसको कण्ठस्थ करते हैं। (इत्सिग को भारत यात्रा पृ० २६४)।

२. वृत्तिसूत्र (काशिकावृत्ति)—
यह ऊपर के सूत्र (अर्थात् पाणिनि के सूत्र) की टीका है। पहले समय में अनेक टीकाएं रची गयी थीं, यह उन सबमें उत्तम है। यह सूत्र का अर्थ देती है। और इसके अनेक प्रकार के अर्थों की बड़ी बारीकी से व्याख्या करती है। ०००००००००० पन्द्रह वर्ष के लड़के इस वृत्ति को पढ़ना आरम्भ करते हैं पांच वर्ष में इसे समझ लेते हैं। (सैव २६८ पृ०)।

३. यदि चीन के मनुष्य भारत में अध्ययन के लिए जांय तो उन्हें सबसे पहले इस ग्रन्थ का अध्ययन करना पड़ता है, फिर दूसरे विषय। यदि ऐसा न होगा तो उनका परिश्रम व्यर्थ जायगा। (सैव पृ० २६८)।

४. इस वृत्ति का अध्ययन कर चुकने के पश्चात् विद्यार्थी गद्य और पद्य की रचना सीखना आरम्भ करते हैं और हेतुविद्या तथा अभिधर्म कोष में लग जाते हैं। न्याय द्वारा तर्क शास्त्र के अध्ययन से वे ठीक तौर पर अनुमान करते हैं और जातकमाला के अध्ययन से उनकी ग्रहण शक्ति बढ़ती है। (सैव २७०-२७१ पृ०)।

५. प्रौढ़ विद्यार्थी उसे (चूर्णि अर्थात् महाभाष्य को) ३ वर्ष में सीख लेते हैं। (सैव पृ० २७३)।

व्याकरणाध्यापनस्य साम्प्रतं पद्धतिद्वयमुपलभ्यते (१) निगमनरीतिः (२) आगमनरीतिश्च । तत्र निगमनरीतौ नियमाः प्रथममध्याप्यन्ते तत्पश्चात् उदाहरणानि दत्वा नियमानां याथार्थ्यं निर्दुष्टत्वं च स्थिरीक्रियते । सिद्धान्ताः लक्षणानि सूत्राणि वा प्रथमं ज्ञाप्यन्ते तदनन्तरं तेषां प्रयोगीकरणं प्रयोगेऽवतरणं च शिक्ष्यते । निगमनरीत्या सामान्यात् विशेषाभिमुखं गम्यते । यथा 'सहयुक्तेऽप्रधाने' सह साकं सार्धम् समं योगे तृतीया इति नियमं सामान्येन प्रस्तूय तत उदाहरणानि समुपस्थाप्यन्ते रामेण सह, मया साकम् सीतया सार्धम् वा पठनीयम् इति ।

आगमनरीतौ प्रथम पर्याप्तान्युदाहरणानि समुपस्थाप्यन्ते उदाहरणानां गवेषणात्मकमध्ययनं क्रियते; ततः तान्युदाहरणानि आधारीकृत्य तदुपरि संघटनीयानां व्यापकनियमानामनुसंधानं क्रियते । अस्यां रीतौ प्रयोगात् नियमाभिमुखगतिर्भवति । द्वितीया रीतिः पूर्वरीत्यपेक्षयाऽधिकरुचिरा सुगमतया छात्रैरधिकसरूच्यधीयते । किन्तु अत्र रीतौ उदाहरणानां तथा प्रसिद्धानां सरलानां च चयनं कर्तव्यं भवति यथा छात्रैस्तदध्ययनद्वारा नियमानां निर्माणं कर्तुं तन्निकटं वागन्तुम् प्रभूयत । अस्यां रीतौ छात्रैरभिरुचिरपि गृह्यते तेषां तर्कशक्तिरनुसन्धानवृत्तिश्चोपचीयते ।

पाणिनेः समये पारायणपद्धतिः प्रचलिताऽसीदिति अष्टाध्याय्यां पारायणशब्दोल्लेखात् तन्मूलकपरायणिकेति सिद्धशब्दाच्च प्रतीयते । पारायणं नाम पूर्वममभ्यस्तानां विषयाणामभ्यासदाढ्याय पुनः पुनः पठनमावृत्ति वा । व्याख्यानप्रणाली अपि तदानीमतिप्रचलितप्रणाल्यासीत् । व्याख्यानस्य चत्वार्यङ्गान्यपि महाभाष्यादौ वर्णितानि वर्तन्तेऽस्तान्यपि तदात्वे प्रसिद्धानीति सम्भाव्यते । तानि यथा (१) चर्चा (२) उदाहरणम्, (३) प्रत्युदाहरणम् (४) वाक्याध्याहारः । चर्चा नाम पदानां विग्रहीकरणम् यथा वृद्धिरादैच् इत्यस्य चर्चास्वरूपं भवेत् वृद्धिः आत् ऐच् इति । उदाहरणात्मके व्याख्याने तेषां प्रयोगाणां विवरणं प्रस्तूयते स्म, यत्र नियमानां संगमनं भवति स्म । यथा एङः पदान्तादति इत्यत्र उदाहरणम् वनेऽस्मिन् शिवोऽर्च्य इत्यादि ।

प्रत्युदाहरणं नाम तत् स्थलं यत्र लक्षणप्रवृत्तिरिष्टा न भवति । तद्यथा ने+अनम् हो+अनम् इत्यादौ एङः पदान्तादति इत्यस्य प्रवृत्ति नाभिमता । अतः तत्र लक्षणप्रवृत्तिवारणाय सूत्रे पदान्तादित्युच्यते । अतो नयनं हवनमित्यादिकम् "एङः पदान्तादति" इत्यस्य प्रत्युदाहरणं वर्तते ।

वाक्याध्याहारो नाम सूत्रस्य तात्पर्याभिव्यक्तये अपेक्षितक्रियादीनामध्याहारस्तर्कः ऊहो वा । किंच वाक्यपदेन वार्तिकं गृह्यते । पाणिनीयंसूत्रेणासंगृहीतानां लक्ष्याणां किन्तु लोके प्रचलितानां साधुत्वाऽवगतये अध्वपरिमाणे चेत्यादीनां वाक्यानामूहितानां तत्तल्लक्षणे 'वान्तो यि प्रत्यये' इत्यादौ आरोपः, संग्रहः वाक्याध्याहार :। व्याकरणं निरङ्कुशशासकवत् शब्दे नियन्त्रणं न करोति; किन्तु तत् सेवकवत् भाषामनुसृत्य चलति । स्थितस्य गतिश्चिन्त्यते वैयाकरणैर्भाषाप्रसरणं तत्र च प्रयुक्तान् शब्दान् सूक्ष्मेक्षिकया विलोक्य । तदाधारेण सामान्यविशेषनियमनिर्माणात्मकमनुशासनं कुर्वदेव शास्त्रमिदं शब्दानुशासनमुच्यते । यदीदं निरङ्कुशशासकवद् व्यवहरेत् तदास्य नाम शब्दशासनमित्येवोचितं स्यात् । नचेदं तथा व्यवहरति, किन्तु भाषाप्रचलितशब्दप्रवृत्तिमनुसृत्य व्यवहरति । अतः शब्दानुशासनमुच्यते । यदि उत्सूत्रं कथ्यते नादो गृह्यते इत्यादिव्याकरणपदार्थविवेचनपरकपस्पशाह्निकसन्दर्भेण पतञ्जलिना निगमनपद्धति र्दर्शिता । किन्तु वैयाकरण[1] सूतसम्वादग्रन्थेनैतदपि विस्पष्टं प्रतीयते यत् स आगमनपद्धत्या

१. एवं हि कश्चिद् वैयाकरण आह—कोऽस्य रथस्य प्रवेता इति । सूत आह—"अहमायुष्मन् अस्य रथस्य प्राजिता । वैयाकरण आह—अपशब्द इति । सूत आह—प्राप्तिज्ञो देवानांप्रियः, न तु इष्टिज्ञः । इष्यत एतद्रूपम् । वैयाकरण आह—खल्वेतेन दुरुतेन बाध्यामहे इति । सूत आह—न खलु वेत्रः सूतः, सुवतेरेव सूतः । यदि सुवतेः कुत्सा प्रयोक्तव्या दुःसूतेनेति वक्तव्यम् । महाभाष्यम् २।४।५६ अत्र हि प्राप्तिज्ञ उपहसितः, प्रयोगज्ञश्च प्रशंसितः इति ।

अपि न केवलं परिचितोऽपितु कण्ठरवेणाङ्गीकृततन्महत्त्वः। तदुद्देश्यतावच्छेदकाक्रान्तेऽपि लक्ष्ये तस्य नित्यसूत्रस्याप्रवृत्तिरनभिधानहेतुना यत्साध्यते तेन प्रयोगस्यैव प्रधानता सिद्धचति।

पाणिनेरष्टाध्यायी लक्षणप्रधाना कृतिः। लक्षणानां ज्ञानमुखेन लक्ष्याणां ज्ञानमष्टाध्यायीसाध्यम्। निगमनपद्धतिरित्याख्यया शिक्षाशास्त्रिभिः साम्प्रतं प्रख्यापिताया एतस्याः पद्धतेः समानशीलाष्टाध्यायी पद्धतिर्बहुविधैर्दोषै दुष्टा न रोचते व्याकरणच्छात्रेभ्यस्तदध्यापकेभ्यो विद्वद्भ्यश्चेति लक्षणैकचक्षुष्कत्वं व्याकरणे न प्रशस्यते व्याकरणं शब्दानुशासनमुच्यते। संस्कृतभाषायां प्रयुक्तानां शब्दानां सूक्ष्माध्ययनाऽनन्तरं निर्मितसामान्यविशेषनियमनिर्धारणद्वारा लघुनोपायेन शब्दानां व्याकृतिर्व्याकरणकार्यम्। ततश्चेदं शास्त्रं शब्दानुशासिसत्तत्र शासनं करोति। एतत्तत्थ्यख्यापनायैव व्याकरणशास्त्रस्यापरपर्याये शब्दानुशासनशब्दे अनूपसर्गः प्रयुज्यते। ततश्च व्याकरणशास्त्रमिदं निरङ्कुशशासकवत् न शब्दान् शास्ति किन्तु आज्ञाकारिवृद्धसेवक इव तदनुसरदपि तस्य गतिक्रमे एकरूपतां मर्यादां च स्थापयति। लक्षणैकचक्षुष्कः लक्षणं सर्वतन्त्रस्वतन्त्रं मत्वा व्यवहरति। अतः तस्य कृते तदेव प्रमाणितं भवति रूपं यत् संघटितसूत्रं भवति। स सूत्रमाध्यमेन प्रयोगं पश्यति। अतस्तस्य प्रयोगे सूत्रस्याऽनिष्टप्राप्तेर्वारणमनभिधानेन हेतुना क्रियते। रघुनाथशब्दे प्राप्तस्य णत्वलक्षणस्य वारणाय लक्षणैकचक्षुष्कैरपि क्षणं लक्ष्यैकचक्षुष्कै र्भूयत एव, दीनानाथशब्दे लक्षणैकचक्षुष्कः कथं दीर्घं कुर्यात्? भाष्यकारेण यद्यपि सूत्रविपरीतकथनस्याग्राह्यत्वमुच्यते तथापि सोऽप्यनिष्टप्रवृत्तिं सूत्राणां वारयितुं लक्ष्याश्रयणं करोत्येव। लक्षणैकचक्षुष्कस्य लक्षणं वर्णयता यत्र तेन लिख्यते भविष्यति किंचिदनेन प्रयोजनमिति ज्ञानमात्रेण यः सन्तुष्यति यथाश्रुतग्राही च भवति तादृशः व्याकरणच्छात्रो लक्षणैकचक्षुष्को भवति। पूर्वोक्तेन तल्लक्षणेनैतादृशस्य च्छात्रस्योपहास एव कृतो भाष्यकृता। भविष्यति किंचिदनेन प्रयोजनम् इति प्रयोजनविषयकनिर्विकल्पज्ञानेन यस्तुष्यति तत्र प्रतिभाया उद्भवाभाव एव दृश्यते। लक्षणं प्रति तस्यायं विश्वासोऽन्धविश्वासस्य सीमातोऽतिदूरमेव वर्तते। पतञ्जलिना एकेन वैयाकरणसूतसम्वादेन लक्षणैकचक्षुष्कत्वं यथोपहसितं तथा सर्वैर्व्याकरणच्छात्रै र्महाभाष्यमधीयानै विदितमेव।[1]

पाणिनीयव्याकरणमष्टाध्यायीपद्धत्याधीतमाध्यापितं सदनेकेषां प्रश्नानामुत्तरं दातुमक्षममिव दृश्यते। नात्र रूपं प्रयोगं वा मुख्यतोऽभिलक्ष्यीकृत्य लक्षणानां क्रमो दृश्यते। उदाहरणायाजन्तपुल्लिङ्गो वृक्षशब्दः गृह्यताम्:— तस्य प्रथमैकवचने प्रयुज्ञानस्य वृक्ष इत्यस्य सिद्धये येषां लक्षणानामावश्यकता भवति तानि नैकस्मिन् सन्दर्भे पठितानि सन्ति। एवमेव षष्ठ्येकवचने वृक्षस्येति सिद्धये विहितस्य स्यादेश सूत्रस्य,[2] ओसि षष्ठीद्विवचने संपद्यमानस्य वृक्षयो रित्यत्रैत्वविधायकस्य[3] बहुवचने आमि सम्पद्यमानस्य वृक्षाणामित्यस्य निष्पत्तये नुडागम[4] दीर्घ[5]णत्व[6] विधायकानां सूत्राणां च विन्यासोऽत्यन्तव्यवधानपूर्णः। इत्थं सप्तम्यां वृक्षे वृक्षयोः वृक्षेषु इति रूपत्रयस्य साधनाय १।४।४५,२।३।३६,६,१,४७, ७।३।१०३, ८।३।५९ इत्याद्यङ्कैरङ्कितानि सूत्राणि परिशीलनीयानि भवन्ति। एवं रूपस्यैकस्य परि-

---

१. २।४।५६ सूत्रमहाभाष्ये। इदानीमुनुपदमेवोक्तम्।
२. टाङसिङसामिनात्स्याः ७।१।१२।
३. ओसि च ७।३।१०४।
४. ह्रस्वनद्यापो नुट् ७।१।५४।
५. नाभि ६।४।३।
६. अट्कुप्वाङ्नुम्व्यवायेऽपि ८।४।२।

ज्ञानाय समस्ताऽष्टाध्यायी सम्यक्कण्ठस्थीकरणीया भवति स्म । एवमात्मनेपदपरस्मैपद[1] संज्ञापश्चाद् क्रियते उपग्रह[2] विधायकानि च सूत्राणि पूर्वमुल्लिख्यन्तेऽष्टाध्यायीक्रमे ।

अतोऽपि अष्टाध्यायीक्रमः क्लेशबहुलः, यतो ह्यत्र क्रमेऽष्टाध्यायीसूत्रपाठः पृथक् पृथग्लिखितै र्धातुपाठोणादि-पाठगणपाठलिङ्गानुशासनैः सह संगतीकृत्य कण्ठस्थीकार्यः । वार्तिकानि कात्यायनकृतानि महाभाष्यं च पातञ्जलमध्येतव्यानि काशिकावृत्तिश्च जयादित्यवामनकृता मुखाग्रीकार्या । अष्टाध्यायीसूत्रपाठैः सह संयोज्यैतानि पठनीयानि । अन्यथा सूत्राणामर्थावगतिः शक्यते नैव कर्तुम् । यावदुपर्युक्तानि पुस्तकानि सम्पूर्णानि मुखाग्राणि न तावत् रूपैकमपि शक्यते वक्तुम्, इत्येतावन्तं छात्रक्लेशमनुभूयाष्टाध्यायीक्रमादतिरिक्तस्य पाणिनीयसूत्रसंकलनस्येच्छायाः प्रथमावतारः कस्यापि कारुणिकस्य सकलक्लेशापनोदनसमर्पितस्वजीवनस्य बौद्धवैयाकरणस्यैवाभवत् । इत्थं पठनपाठनक्रमे परीक्षापद्धौ च नव्यव्याकरणैतिनाम्ना बहुविख्यातस्य वर्षाणां पञ्चशतकाद् व्याकरणजगति एकच्छत्रं राज्यं विदधतो रूपप्रधानपद्धत्या पाठ्यमानस्य व्याकरणस्याविष्कर्ता बौद्धभिक्षु र्धर्मकीर्तिरेवेति वर्तमानेन नव्यव्याकरणजगतापि बौद्धस्य कृतज्ञेन भाव्यमिति जितं बौद्धेन । यदि धर्मकीर्तिना रूपावतारो न लिख्येत तर्हि रूपप्रधाना प्रक्रियेति कौमुदीतिनाम्नी परम्परा नैव प्रचलेत । अस्याः परम्परायाः महत्वस्य किमतोऽधिकं प्रमाणं यदनया व्याकरणपठनपाठनप्रणाली कार्यकलिता । अद्यत्वे सर्वत्रैव भारतवर्षेऽस्मिन् सर्वत्र संस्कृतसंस्थाने संस्कृतपाठशालेषु रूपावतारमूला प्रक्रियाप्रधाना पद्धति रङ्गीकृता दृश्यते । अस्यां पद्धतौ लघुकौमुदीमध्यकौमुदीसिद्धान्तकौमुदीप्रचारः समुपलभ्यते चेत् समुपलभ्यताम् । नानेन धर्मकीर्ते र्बौद्धभिक्षो र्यशो हीयतेऽपि तूपचीयते, तस्यैवास्याः शैल्या उद्भावकत्वात् आविष्कारकत्वाच्च । नव्यव्याकरणपरम्परायां रूपावतारप्रक्रियारूपमालाप्रक्रियाकौमुदीसिद्धान्तकौमुदीमध्यसिद्धान्तकौमुदीलघुसिद्धान्तकौमुदीत्यादिग्रन्थानां क्रमशो घृतकलेवराणां पूर्वपूर्वस्याधारभूतत्वात् "रूपावतारः" सर्वस्यादिपुरुष इव वर्तते ।

न केवलं संस्कृतपाठशालेषु किन्तु आङ्ग्लसंस्थानेऽपि नूतनशिक्षापद्धत्या सम्वादितयेयं रूपप्रधानाप्रक्रिया पद्धतिरेवाश्रीयते चिरात् । आङ्ग्लभाषाविद्वद्भिरपि एषु विद्यालयेषु पाठनाय यानि पुस्तकानि लिखितानि, तत्र सर्वत्रागमन पद्धतिमनुसृत्य रूपाणि प्रक्रियाश्चाऽक्षिकुक्षौ निधाय लक्ष्याण्येव प्राथम्येन स्थापितानि । अतस्तत्रापि धर्मकीर्तेरेव रीतिरङ्गीकृता दृश्यते ।

संस्कृतविद्यालयमहाविद्यालयविश्वविद्यालयेषु रूपावतारसमुद्भाविता कौमुदीप्रणाल्यैव व्याकरणशास्त्रस्य समस्तमपि पठनपाठनं चतुःपञ्चशताब्द्यात्मकादल्पकालादेव यदेतावद् व्यापकं जातम् यथाऽष्टाध्यायीक्रमेणापि व्याकरणस्याध्ययनाध्यापनं भवितुमर्हतीति न स्मर्यते, तदेतेनैव सुशक्यतेऽनुमातुमेतस्याः पद्धत्याः समयसम्वादित्वं, सरलत्वं पूर्णत्वमुपयोगित्वं तदाविष्कारकस्य महत्वंच । 'नहि कस्तूरिका मोदः शपथेन विभाव्यते, यदि सन्ति गुणाः क्वापि विकसन्त्येव ते स्वयम् ।'

संस्कृतभाषाया व्यावहारिकज्ञानायातीव साधीयान् यत्नोऽय रूपावतारः । शब्दधातुरूपं यथाऽवतरेत्तथात्राष्टाध्यायीसूत्राणि यथाकार्यं विन्यस्तानि । रूपं चात्र मुख्यं व्याख्येयम् तत्वमङ्गीकृतं, सूत्राणि च तत्साधनव्यग्राणि दर्शितानि अनुबन्ध—विकरणप्रयोजनानि लिखित्वा पारिभाषिकशब्दानां सरलं विवरणं प्रयोगाणां सूत्राणां चावतरणं च दत्वा प्रतिपादनशैली रुचिरा सम्पादिता । रूपाणां प्रकरणानां विधि-निषेधादिसूत्राणां चावतारात् प्राक् तेषां विषयाणां सामान्यतो निरूपणमत्र कृतं दृश्यते; येषां ज्ञानं विना वैयाकरणत्वमपूर्णं भवति ।

---

१. लः परस्मैपदम् १।४।९९ तङानावात्मनेपदम् १।४।१०० ।

२. अनुदात्तङितआत्मनेपदम् १।३।१२—१।३।७० व्याङ्परिभ्योरमः १।३।८३ शेषात् कर्तरि० १।३।७८ ।

तथाहि अइउणित्यादिचतुर्दशसूत्राणामवतारणातः पूर्वं तत्प्रयोजनसाधकमवतरणवाक्य लिख्यतेः—तत्रादौ तावत् प्रत्याहारः शास्त्रे संव्यवहारज्ञानार्थमुपवर्ण्यते । अइउणित्यादय एतन्मतेन प्रत्याहारसूत्राणि, न तावत् माहेश्वरसूत्राणि ।

वृक्षशब्दस्य रूपावतारणात् प्राक् अवतरणं लिखित्वा कति विभक्तयः तासां किं सूत्रप्रतिपादितं लक्षणम् ? कथं च तल्लक्षणं सम्भूतम् इत्यादि सर्वं ज्ञाप्यते । अवतारितानां रूपाणां क्रमशः ससूत्रं सिद्धिः क्रियते । अन्ते च श्लोक माध्यमेन वृक्षशब्दस्य सकलं रूपं लिख्यते येनाभ्याससौकर्य्यं भवेत्[1] ।

सूत्रस्याभीष्टार्थसम्पादनाय कस्मात् किं पदमनुवर्तते इत्यप्यत्र विवृतमस्ति ।

व्याकरणे पाणिनिना प्रयुक्तानां कित्वकृतनिरूपणानां शब्दानामर्थावगमने समापततः काठिन्यक्लेशस्य निराकरणाय धर्मकीर्त्तिना दत्तस्तत्परिचयोवैयाकरणानामतीवोपयोगी । स च क्वचिच्छन्दोव्याकृतिमूलकः क्वचित्पद्यात्मकः तथाहि—

[2]यथा बहुलशब्दस्य व्याख्या बहूनर्थान् लाति ददातीति बहुलम्-
क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव
विधे विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकम् वदन्ति ।

प्रथमं बहुलशब्दव्युत्पत्तिं प्रदर्श्य तन्मुखेन श्लोकवर्णिता बहुलशब्दव्याख्या झटित्यवबोधयोग्या भवति ।

[3]एवमेव चादयो सत्वे १-४-५७ इति सूत्रविवरणे द्रव्यस्य निर्दुष्टं लक्षणं दत्वा सत्वपदार्थस्य निर्वचन तन्मुखेन कृतम् । न दृश्यते सिद्धान्तकौमुद्यादौ एवंविधं प्रतिपादनम् ।

---

१. वृक्षस्तिष्ठति कानने कुसुमिता वृक्षं लता संश्रिता
वृक्षेणाभिहतो गजो निपतितो वृक्षाय देयं जलम्
वृक्षादानय मञ्जरीमभिनवां वृक्षस्य शाखोन्नता
वृक्षे नीडमिदं कृतं शकुनिना हे वृक्ष किं कम्पसे ।

एतत्पद्यमाधारीकृत्यैव सकलविभक्तिज्ञापकं रामशब्दाश्रितपद्यमिदं व्याकरणच्छात्राध्यापकेषु प्रचलितम् इति सम्भाव्यते ।

रामो राज्यमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः
रामान्नास्ति परात् परं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर
परन्तु पूर्वपद्यमनुकृत्य रचितमुत्तरं पद्यं न तथौचित्यपूर्णम् ।

'रामाय तस्मै नमः' इत्यत्रोऽपपदचतुर्थी न कारकविभक्तिः । एवमेव 'रामे चित्तलयः' इति भागो ज्ञानिनामपि काठिन्येन बोधगम्यः । बालेभ्यो नेदमुदाहरणं तथोपयुज्यते । किंचोदाहरणं तथा देयं यथा सर्वेभ्यः संस्कृतजिज्ञासुभ्यो रोचेत । रामशब्दोदाहरणन्तु भट्टोजिदीक्षितस्य वैष्णवत्वं साधयति । स कथं सर्वं व्याकरण-छात्रं रामानुयायिनं कर्तुमिच्छति ?

१. रूपावतारः प्रथमोभागः पृ० ६५ सूत्रम् मघवा बहुलम्—६-४-१२८ ।

२. रूपावतारः प्रथमो भागः पृ० १४ सू० चादयोऽसत्वे १-४-५६ सत्वं द्रव्यम्, असत्वमद्रव्यम्; असत्वे वर्तमानाश्चादयो निपातसंज्ञा भवन्ति । इदं तदिति सर्वनामप्रत्यवमर्शयोग्यं वस्तु द्रव्यमित्युच्यते । तथाचोक्तम्—

[1]एवमेव निपात एकाजनाङ् इति सूत्रे एकाच्पदे द्विगुबहुव्रीहिसमासयोः सन्देहं व्यावर्तयता ग्रन्थकारेण सविग्रहं द्विगुसमासं प्रदर्श्य अनाङ्पदव्यावर्त्यं चोल्लिख्य क्वाङ् ङित् क्वचाङिद् भवतीति कारिका सोदाहरणं व्याख्याता। अत्र धर्मकीर्ति र्यथा स्पष्टो न तथा नव्यव्याकरणस्यान्ये ग्रन्थकाराः।

अस्य ग्रन्थस्यान्यान्यपि सन्ति कानिचिद् वैशिष्ट्यानि वर्गीकरणप्रयुक्तानि तानि यथा—

(१) प्रकरणविभागेषु सर्वप्रथमं संज्ञावतारो वर्तते तत्र प्रकरणे प्रत्याहारसूत्राणि इत्संज्ञा प्रत्याहारसाधकसूत्राणि लोप-सवर्णग्राहक-सवर्णसंज्ञा-तत्काल-ज्ञापकोदात्तादिप्रतिपादकाऽनुनासिकसूत्राणि चावतरणवाक्यप्रतिपाद्यजिज्ञासा शृङ्खलितानि विज्ञाप्य स्थानप्रयत्नाः विस्पष्टं निरूपिताः। अत्र प्रत्यापत्तिलक्षणमपि लिखितम्। 'अ अ' इति प्रत्यापत्तिवचनमस्तीति ज्ञात्वापि प्रत्यापत्तिलक्षणं नैव ज्ञायते कौमुदीमूलमधीयानैः।[2]

(२) रूपावतारे संज्ञावतारे ताः दर्शिताः याः प्रत्याहारोपयोगिन्यः सावर्ण्यज्ञापिकाश्च सन्ति। रूपावतारप्रक्रियायां रूपाणां प्रामुख्यात् लक्ष्यसाधनबेलायामुपस्थितैर्विधिसूत्रैः सहैव संज्ञापरिभाषासूत्राणामुपस्थिति स्वभावात् परिभाषावतारो नाम पृथक्प्रकरणमत्र कृतं न दृश्यते। कार्यकालपक्षं वर्णयता भाष्यकारेणोद्दशः संकेतो महाभाष्ये कृतः। न वा संहिता वृद्धिगुणधातूपसर्गनिपातप्रभृतयः संज्ञाः संज्ञावतारप्रकरणे दर्शिताः। आसां संज्ञानां रूपावतारकाले समुपस्थितानां विधिसूत्रदेशे एव वाक्यार्थबबोधसम्भवेनात्र पुस्तके पृथङ्निर्देशस्यानौचित्यात्। इत्थमस्य पुस्तकस्य प्रकरणविभागो यथौचित्यपरिलसितो, न तथा प्रक्रियासिद्धान्तकौमुद्यादीनाम्:—

प्रक्रियाकौमुद्याः प्रथमप्रकरणं सन्ध्युपयोगिसंज्ञाप्रकरणमिति नाम्ना ख्यातं दृश्यते। तत्र च प्रकरणे कानिचित् संज्ञासूत्राणि कतिपयानि परिभाषातिदेशसूत्राणि च संकलितानि दृष्ट्वा तादृशवर्गीकरणस्य न केवलं निर्मूलत्वं किन्त्वस्तव्यस्तत्वञ्च च प्रतीयते। एवमेव सिद्धान्तकौमुदीगतं प्रथमप्रकरणस्य नामकरणमनुचितमयथार्थं चानुभूयते। अत्र प्रकरणे सर्वासां संज्ञानां समावेशादर्शनात् बहूनामन्यकार्यविधायकानां संज्ञेतरसूत्राणामिह समावेशकरणाच्च। अतः सिद्धान्तकौमुद्या अनेकटीकाकारैरेतत् प्रकरणस्य "संज्ञाप्रकरणमिति" नामकरणं सदोषमिति प्रकटीकृतम्[3]। व्यङ्ग्यचतुरेण

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते द्रव्यमित्युच्यते सोऽर्थोऽभेद्यत्वेन विवक्षितः
स्वरूपेणाथवा जात्या गुणेनाप्यथ संज्ञया सम्बध्यते यदा वस्तु तद् द्रव्यं परिकीर्तितम्।

१. रूपावतारः निपात एकाजनाङ्० १-१-१४।
एकश्चासौ अच् च एकाच्; निपातो य एकाच् आङ्वर्जितः स प्रगृह्यसंज्ञो भवति; इति प्रकृतिभावात् सवर्णदीर्घो न भवति; अ अवेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ। निपात इति किम्? आ+अटतुः आटतुः। एकाजिति किम् प्र+अयात्=प्राययात्। अनाङिति किम् आ+उदकान्तात् ओदकान्तात्।

ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः
एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित्

ईषदर्थे—आ+ऊष्णम्=ओष्णम्, क्रियायोगे—आ+इहि एहि; मर्यादायाम्=आ+अग्नात्; अभिविधौ आ+आर्येभ्यः=आर्येभ्यः; वाक्यं आ एवं नु मन्यसे; स्मरणे आ एवं किल तत्। अत्र तूभयत्रापि ङित्वाभावात् निपातए एकाजनाङ् इति प्रगृह्यसंज्ञाप्रयुक्तप्रकृतिभावात् वृद्धि र्न।

२. स्वरूपाद्धि प्रच्युतस्य पुनस्तत्प्राप्तिः प्रत्यापत्तिः रूपावतारे संज्ञावतारः पृ० ५।

३. लघुशब्देन्दुशेखरे नागेशेन लिख्यते संज्ञाप्रकरणान्ते इति संज्ञाप्रकरणमिति सिद्धान्तकौमुद्युद्धरणमुद्धृत्य टीकयता—

प्रथमाध्यायस्थितानां सन्धिकार्योपयोगिनीनां संज्ञानांप्रकरणमिति समाप्तमित्यर्थः। तेनाऽ ऽ ङितप्रगृह्यभसंज्ञालोपसंज्ञाद्यनुपन्यासेऽपि न क्षतिः। अ अ इत्यादुयुपन्यासस्तु प्रासंगिकः।

नागेशेनापि नामकरणस्यासारत्वमभिव्यक्तम् । अत्र प्रकरणेऽणादिप्रत्याहारसाधके लोपसंज्ञासूत्रस्योल्लेखस्यावश्यकत्वेऽपि तस्याच्सन्धिप्रकरणे समुल्लेखः अत्र चानुल्लेख भट्टोजिदीक्षितस्य संकलनकलागतो महादोषः । अन्येषां च पूर्वत्रासिद्धमित्यादीनासंज्ञासूत्राणामुल्लेखः वर्गीकरणस्य महती त्रुटिः । कौमुदीटीकाकारेण दाधिमथेनापि विलोकितेयं त्रुटिः ।[1] तेन 'केचित्' इति 'किम्' शब्देन तस्यास्त्रुटेः परिहाराभासं प्रदर्श्य विशेषोपहास एव कृतः ।

रूपावतारः यद्यपि नव्यव्याकरणपरम्परायाः प्रथमोग्रन्थस्तथापि वर्गीकरणजन्यतत्तद्दूषणास्पृष्ट इति कं न न चित्रीयते धर्मकीर्तेः प्रतिभा, सम्पादनकला च ।

(३) अत्र सन्धीनां षड् विभागाः कृताः सन्ति । इमे षट्सन्धयः संहितावतारस्यावान्तरभेदत्वेन परिगणिताः । 'तुक् स्वरः प्रकृतिश्चैव व्यञ्जनं च ततः परम् । ततो विसर्जनीयश्च स्वादिः षट् सन्धिरुच्यते" । सन्धीनां पञ्च विभागाः अच्सन्धिः, प्रकृतिभावसन्धिः, हल् सन्धिः विसर्गसन्धिःस्वादिसन्धिश्चेति उपलभ्यन्तेऽन्यत्रापि परन्तु तुक्सन्धीतिविभागोऽत्र नूतनः । तुग् वस्तुतः न स्वरसन्धिः, स्वरस्थानेऽजायमानत्वात् । नासौ हल्सन्धिः हलः स्थानेऽविहितत्वात् । न च नासावेव हल्सन्धिः, यद्धलः स्थाने विधीयते; किन्तु सोऽपि हल्सन्धिः यत्र हल् विधीयते, एवञ्च तकाररूपस्य हलोविधानात्तुक्सन्धिः हल्सन्धिरेवेति वाच्यम् एवं सति यण्सन्धेरपि हल्सन्धित्वापत्तेः; तत्रापि यवरलानां हलां विधीयमानत्वात्, विसर्जनीयस्थाने विहितस्य सकारादेः सत्वात् विसर्गसन्धेरपि हल्सन्धित्वापत्तेः, तुल्यन्यायात् स्वरस्य विधीयमानत्वे शिवोऽर्च्य इत्यादावपि स्वरसन्धित्वापत्तेः । अतो हलो विधीयमानत्वे न हल्सन्धिः, किन्तु हलः स्थाने विधाने अथवा हल आगमे चैवेति स्वीकारो ज्यायान् । तथा च तुक्सन्धेः स्वरव्यञ्जनविसर्ग-स्वादिविभागेऽसंभाव्यान्तर्भावस्य पृथग्विभागः कर्तव्य एव । इदं धर्मकीर्तेः सन्धिविभागे नूतनं दानम् । ह्रस्वस्य पिति कृति तुक्, छे च इत्यादिपञ्चसूत्रीविहितः तुक्सन्धिः स्वरप्रकृतिभावहल्विसर्गस्वादिसन्धिषु नैव समावेशार्हः । अतः तत्प्रकरणं पृथक्करणीयमेव । शितुक्, ङःसि धुट्, इत्यादिसूत्रविहितयोस्तुक्धुटोस्तु पूर्वानिर्दिष्टतुगपेक्षया भिन्नस्वभावत्वात् परिगणनं व्यञ्जनसन्धिमध्ये शक्यते कर्तुम् । तौ च तुग्धुटौ हल आगमीभूतौ अतो धर्मकीर्तिनाऽपि तौ व्यञ्जनसन्धिप्रकरणे परिगणितौ । किन्तूक्तपञ्चसूत्रीऽविहिततुकः स्वरस्यागमीभूतत्वान्न शक्यते हल्सन्धिमध्ये परिगणनं कर्तुम् । अतः तन्निरूपणप्रकरणेन प्रसिद्धपञ्चसन्धिव्यतिरिक्तेन भाव्यम् । अतः एवाऽत्र तुक्सन्धिप्रकरणं नाम पृथक्प्रकरणं कृतम् ।

(४) सन्धिरिति संज्ञाया व्यवहारो व्याकरणनिकाये समुपलभ्यमानग्रन्थेषु सर्वप्रथमं रूपावतारे, ततः प्रक्रियाकौमुद्यामुपलभ्यते । पाणिनीयाष्टाध्याय्यां क्वापि सन्धिशब्दो न प्रयुक्तः । पाणिनिना संहिताधिकारः कृतः अतः पाणिनितन्त्रे सन्धेः स्थानापन्नः शब्दः संहिताऽस्ति । धर्मकीर्तिना 'संहितावतार' इति नाम द्वितीयविषयविभागस्य चक्रे । तस्य चावान्तरभेदाः षट्सन्धयः दर्शिताः । सर्वमिदं प्रकरणसमाप्तौ लिखितेन समाप्तिसूचकेन वाक्येन स्पष्टं भवति ।[2]

---

१. इति संज्ञाप्रकरणमिति सूत्रस्य टिप्पणी दाधिमथकृताः—

प्रत्याहारसंज्ञोपयोगित्वेऽपि 'तस्य लोप इत्यस्यानुपन्यासस्तु' आचारादिति प्रथमोपायेनैव सकलेष्टसिद्धेः साधारणतया लोपस्य नात्यन्तमुपयोगोऽत्रेति बोधयितुम् इति केचित् । (सि कौ० सं० प्र० अन्ते) ।

२. इति संहितावतारे तुक्सन्धिः रूपावतारे पृ० ७ ।

" " स्वरसन्धिः " पृ० १३ ।

" प्रकृतिसन्धिः " पृ० १५ ।

संहितावतारसमाप्तौ च तदवतारे प्रतिपादितानां षण्णां सन्धीनां यथाक्रमं संग्रहः श्लोकबद्धः प्रतिपादितः अभ्यासौपयोगित्वादतीव प्रशस्यः[1] ।

रूपावतारस्य तृतीयावतारः विभक्त्यवतारोऽस्ति । तत्र विभक्तिपदस्य सुप्तिङ्रूपतया भेदद्वयं प्रदर्श्य प्रथमस्य प्रथमादिसप्तभेदानुपवर्ण्य एताः सप्तविभक्तयः प्रातिपदिकात् परे भवन्तीति समुल्लिख्य प्रातिपदिकस्याजन्तहलन्तत्वेन भेदद्वयं वर्णयित्वा प्रत्येकं पुंल्लिङ्गस्त्रीलिङ्गनपुंसकलिङ्गे ति त्रैविध्यमुक्त्वा क्रमप्राप्तस्याजन्तप्रातिपदिकस्य रूपावताराय वृक्षशब्दोऽवतारितः । अस्मिन् प्रारम्भिके सन्दर्भे दर्पण इव प्रातिपदिकविभक्तिसम्बन्धि सर्ववेद्यं प्रतिफलितमिव दृश्यते ।

ननु 'विभक्त्यवतारे' प्रारम्भे तिङो नाम गृहीत्वाऽपि केवलं सुब्विभक्तीनामेव निरूपणात् सुबवतार इत्येव नामकरणं ज्यायः इति चेन्न, इतः प्रारभ्याष्टमावतारं यावत् सुब्विभक्तेर्निरूपणं कृत्वा तदनन्तरं रूपावतारस्य द्वितीये भागे धातुप्रत्ययपञ्चिकाख्यया प्रसिद्धे तिङ्प्रत्ययस्य करिष्यमाणनिरूपणत्वात् । नचैवं विभक्त्यवतारस्याजन्तपुंल्लिङ्गादयो यथाऽवान्तरभेदास्तथैवाव्ययस्त्रीप्रत्ययादिभेदाः सन्तु तेषां स्वतन्त्रावतारत्वेन परिगणनमसंगतमिति वाक्यम्- विभक्तिपदेन पाणिनितन्त्रे सुपस्तिङश्चोभयोर्बोधे साधितेऽपि व्याकरणान्तरेण प्रसिद्धया च सुप एव ग्रहणदर्शनात् । अतएव भाष्ये विभक्तिपदेन प्रथमादिसप्तविभक्तीनां बोधः प्रतिपादितः ।[2] अथ च कारकप्रकरणस्य विभक्त्यर्थप्रकरण- मितिनामकरणं संगच्छते । अन्यथा भवन्मते तत्र तिङर्थनिरूपणप्रयासाभावात् तादृशं नामकरणमसंगतमेव स्यात् । स्वरूपाणामेकशेष एकविभक्तौ १-२-६४ इत्यत्रविभक्तिपदेन सुपः एव ग्रहीतुम् पाणिन्यभिप्रायः केन न ज्ञायते । एकविभक्तिचापूर्वनिपाते एकविभक्तावषष्ठ्यन्तवचनम् इत्यादौ च विभक्तिशब्दस्यार्थसंकोचोऽपि सम्भाव्यते ।

लिङ्गानां त्रैविध्येनाजन्तहलन्तशब्दयोस्तदाधारेण षड्विधत्वमेव दृश्यते नव्यव्याकरणपुस्तकेषु, तेनाजन्त- पुंल्लिङ्गाजन्तस्त्रीलिङ्गाजन्तनपुंसकलिङ्गे तिभेदत्रयमजन्तशब्दप्रयुक्तमेव हलन्तपुंल्लिलस्त्रीलिङ्गनपुंसकलिङ्गे ति भेदत्रयं हलन्तप्रातिपदिकप्रयुक्तमिति संकलनेन षड्लिङ्गप्रकरणानि दृश्यन्ते प्रक्रियाकौमुद्यादौ । रूपावतारे तु एभ्यः षड्लिङ्गे- भ्यः पृथक् हलन्तेष्वलिङ्गप्रकरणं नामैकं प्रकरणमपि कृतं दृश्यते । इत्थं हलन्तप्रातिपदिकानि द्विधा विभक्तानि प्रथमतस्तेन, लिङ्गविशिष्टानि हलन्तप्रातिपदिकानि अलिङ्गानि च । तत्र प्रथमस्य षड् भेदाः द्वितीयन्तु एकधैव ।

हलन्तेष्वलिङ्गप्रकरणे युष्मदस्मदोरूपावतारो दर्शितः । वस्तुतस्तु युष्मदस्मच्छब्दावलिङ्गौ । तयोः पुंल्लिङ्गे स्त्रीलिङ्गे नपुंसके वा प्रकरणे निरूपणं न युक्तम् । अतस्तयोर्निरूपणं यत्र करणीयमस्ति तत् प्रकरणं पुंल्लिङ्गादि- पदाघटितेनालिङ्गशब्दसम्पृक्तेन नाम्ना व्यपदेश्यम् । भाष्यकारेणापि त्वं ब्राह्मणी अहं ब्राह्मणीत्यादौ टाबभावाय' अलिङ्गे युष्मदस्मदी' इति समाधानं ददता तयो लिङ्गराहित्यमङ्गीकृतमेव । नच 'शिशीलुङ्नुम्विधिभ्यो युष्मदस्मदोर्विभक्त्यादेशः पूर्वविप्रतिषेधेन इति वार्तिकेन तत्र लिङ्गत्वं प्रतीयत एवेति वाच्यम् एतेन पुंस्त्वस्य नपुंसकत्वस्य च प्रतीतावपि पुंल्लिङ्गे पाठस्यानुपयुक्तत्वात् । उक्तवचनेन नैव राजादेशेन भाव्यम् । किन्तु स्थितस्य गतेश्चिन्तनमेव व्याकरण- कार्यम् । नच युष्मदस्मदोरूपेण त्वम् अहम् इत्यादिना पुंल्लिङ्गादिः प्रतीयते । अतः तयो निरूपणाय यत् प्रकरण तस्य प्रकरणस्य नाम अलिङ्गप्रकरण' मितिकर्त्तव्यमेव ।

---

१. तुक् स्वरः प्रकृतिश्चैव व्यञ्जनं च ततः पदम्
ततो विसर्जनीयश्च स्वादिः षट्सन्धिरुच्यते ।

२. सुदेवोऽसि वरुण यस्य ते सप्तसिन्धवः
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव । सप्तसिन्धवःसप्तविभक्तयः
महाभाष्यपस्पशाह्निके—व्याकरणप्रयोजनप्रकरणे ।

अव्ययावतारप्रकरणमप्यस्य रूपावतारस्य दधते किमपि वैशिष्ट्यम् । अव्ययस्य लक्षणम् भेदाश्चात्र स्पष्टं निरूपितानि सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् इति लक्षणन्तु काशिकायामुपलभ्यते । किन्तु अलिङ्गान्यसंख्यान्यविभक्तिभेदान्यव्यानि सुबन्तानीति लक्षणं धर्मकीर्तिकृतमेव । चन्द्राचार्येण असंज्ञकं व्याकरणं लिखितुं कृतसंकल्पेनाव्ययशब्दस्थानेऽसंख्यमिति प्रयोगः कृतः तेन इदं लक्षणं संवदते ।

अव्ययानां वर्गीकरणमप्यत्रान्यत्रानुपलब्धं विलोक्यते । धर्मकीर्तिना अव्ययस्य भेदद्वयं प्रथमतश्चक्रे १—स्वरूपतो निपातितान्यव्ययानि २—लक्षणलब्धान्यव्ययानि । तत्र द्वितीयभेदस्यापि त्रैविध्यम् अव्ययीभावकृदन्ततद्धितान्त भेदात् । तत्र स्वरूपतो निपातितान्यव्ययानि यथा—स्वर, अन्तर् पुनरित्यादयः लक्षणलब्धाव्ययेषु अव्ययीभावाव्ययम् यथा मध्येगङ्गम् प्रत्यहम्, कृदन्ताव्ययम् तुमुन्क्त्वाल्यप्प्रत्ययान्तं कर्तुमित्यादि । तोसुन्कसुनोः प्रयोगो वेदे भवति । तद्धिताव्ययानि=सुतराम् मातृवत्, सर्वतः, सर्वत्र इत्यादीनि ।

अव्ययेषु केचिच्छब्दाः रूपावतारे सि० कौमुद्या अव्ययमध्येऽपठिता उपलभ्यन्ते । तद्यथाः—**तक, हाहा, हाहौ, हैहा, मस्मसा, मसमसा, ईहा,** इत्यादयः । एषु बहवः आधुनिकभाषासु यथावत् अविकलं चोपलभ्यन्ते । 'तक' इत्यस्य पर्यन्तार्थे सर्वत्राधुनिकभाषासु व्यवहारो भवति संस्कृतज्ञैश्चास्य प्रयोगोऽपभ्रंषभ्रान्त्या परिहीयते । एवं हर्षोल्लासोद्गाररूपेण हाहा हैहाप्रभृतयः साम्प्रतिकभाषासु प्रयुज्यन्ते । 'मस्मसा' 'मसमसा' इत्यव्यये हिंसार्थे मैथिलीप्रभृतिभाषास्वधुनाऽपि प्रयुज्येते । ईहाशब्दोऽपि रूपकस्य दशभेदेष्वन्यतमपर्यायत्वेन प्रयुक्तः । इत्थमस्य प्रकरणस्य कोऽपि वर्तते महत्वविशेषः ।

रूपावतारस्य बहुषु वैशिष्टेचषु अन्यतमं वैशिष्ट्यमस्ति तस्य निरूपणस्य वैज्ञानिकत्वम् । तस्य प्रकरणावतरणं संक्षेपेण समस्तस्य प्रकरणस्य चित्रं प्रत्यक्षीकरोति । विषयवर्गीकरणसौष्ठवेन पुस्तकमिदं दर्पण इव आत्मसात् कृतान् विषयान् पाठकेषु प्रतिबिम्बयितुं प्रभवति ।

रीतिविशेषेण ग्रन्थोऽयं सर्वत्र समुपाश्रयणीयः सम्वृत्तः । रूपावतारस्य द्वितीये भागे धातुप्रत्ययपञ्चिकाख्ये धातुप्रत्ययेषूपदिष्टानामनुबन्धानां किम् किम् कार्यं (प्रयोजनम्) इति निरूपितम् ।[1] छात्रा जिज्ञासन्ते—धातुषु ङकारादयोऽनुबन्धाः किमर्थमुपनिबद्धाः तज्जिज्ञासासान्तये सर्वेषामनुबन्धानां कार्याणि पुस्तकेऽस्मिन् ज्ञापितानि । इदानीमनुबन्धविषयमधिकृत्य विश्वविद्यालयेषु शोधकार्याणि क्रियन्ते तदधिकारिभिः स्नातकोत्तरोपाधिधारिभिः, परन्तु धर्मकीर्तिनाऽस्य शोधकार्यस्य प्रस्तावना पञ्चशताब्दीप्रागेव लिखिता इति दृष्ट्वा को न धर्मकीर्तिप्रतिभां स्तौति ।

अत्र हि प्रथमं धातुगतानुबन्धानामकारादिक्रमेण फलानि दर्शितानि । तत्तदनुबन्धोद्देश्यककार्यविधायकसूत्राणामुल्लेखं कृत्वा अमुकानुबन्धोऽत्र सूत्रे विशेषणार्थं इति लिखितम् । तत्र यदि कार्यस्य स्पष्टमुल्लेखः क्रियेत तर्हि स्पष्टताऽधिक्यं स्यात् । प्रायः ग्रन्थकारेण सूत्राणि स्मारयता तन्मुखेन कार्यस्यावगतिः स्यादेवेति कार्योल्लेखः स्पष्टं न कृतः ।

धातूनामनुबन्धफलनिरूपणानन्तरमष्टादशतिङ्विभक्तिषु अनुबद्धानामनुबन्धानां फल निरूपितम् । ततो लकाराणां टित्त्वङित्त्वप्रयुक्तं भेदद्वयं स्वीकृत्य लडादिषु अकारेकारोकारऋकाराणां टकारङकाराणां च फलमुपन्यस्तम् । (रू० भा० २—पृ० ३) ।

---

१. रूपावतारः भागः २ पृ०—१—३ ।

धातुभ्यः न सर्वेभ्यः त्रिविधे वाच्ये प्रत्यया भवन्ति । कर्तृवाच्ये सर्वेभ्यः सकर्मकेभ्योऽकर्मकेभ्यश्चप्रत्ययाः विधीयन्ते, कर्मवाच्ये तु त एव धातवः प्रकृतयः क्रियन्ते ये सकर्मकाः सन्ति । भाववाच्ये केवला अकर्मका एव धातवः प्रकृतिभूता भवन्ति । इतीदृशं ज्ञानं धातुरूपावतारणात् प्राक् शिष्येभ्योऽवश्यं देयम् । अन्यथा आकाशे निरालम्बे भित्ति-निर्माणमिव व्याकरणज्ञानं विशेषतो धातुप्रत्ययज्ञानमसंभवमेव स्यात् । इत्थं विचारयता धर्मकीर्तिनाऽवतरणमर्मज्ञेन धातूनां भेदद्वयं प्रथममुपन्यस्यस्य विलक्षणं सकर्मकाकर्मकलक्षणमुल्लिखितम् ।[1]

धातुरूपप्रतिपादनेऽस्य रूपावतारस्य किमपि विशिष्टं महत्वमुपलभ्यते ।

अत्र धातुरूपनिरूपणक्रमोऽतीव वैज्ञानिकः हृद्यः सरलश्च । धातुरूपभेदस्य कारणत्वेन विकरणा, उप-ग्रहाश्चोपन्यस्ताः । विकरणाश्च दश भवन्ति शप्लुग्श्लुश्यन्श्नुशश्नमुश्नास्वार्थणिज्भेदात् । उपग्रहः परस्मैपदमात्मनेपदम् उभयपदञ्च । ये धातवः परस्मैपदिनः ये चात्मनेपदिनः ये चोभयपदिनोऽनुबन्धविशेषनियता स्तेऽपि लक्षणवशादितरपदत्वं गच्छन्तीत्यपि सामान्यज्ञानरूपेण निरूपणीयमिह सोदाहरणं निरूपितम् ।[2]

धातुरूपाणां निरूपणमिहाभिनवया पद्धत्या कृतं विलोक्यतेः—पद्धतिरियं लडादिप्रधाना पद्धतिरिति शक्यते वक्तुम् ।

दशविकरणेषु कृतेषु लट्लकारे यानिरूपाणि समुपपद्यन्ते, तेषामेकस्मिन् प्रकरणे निरूपणं कृत्वा कस्मिन् विकरणे कीदृशं परिवर्तनं जायते इत्यस्य तथा विवेचनमिह दृश्यते, यथा छात्रैः साम्यवैषम्यपर्यालोचनं कृत्वा तानि बुद्धिपूर्वकं ज्ञातुं प्रभूयते ।

प्रथमतः धातुप्रत्ययपञ्चिकेयं सामान्यतः परिच्छेदत्रये विभक्ता । तत्र प्रथमः परिच्छेदः, सार्वधातुकपरिच्छेदः, द्वितीय आर्धधातुकपरिच्छेदः तृतीयश्च कृदन्तपरिच्छेदः ।

तेषु सार्वधातुकपरिच्छेदे प्रकरणपञ्चकं वर्ततेः—१—लट्प्रकरणम् २—लङ्प्रकरणम् ३—लोट्प्रकरणम् ४—लिङ्प्रकरणम् ५—यक्प्रकरणम् ।

तत्र प्रथमं लटमधिकृत्य तत्तच्छबादिविकरणे यानि रूपाणि भवन्ति परस्मैपदे आत्मनेपदे च, तानि सर्वाणि दर्शितानि । एवमेव लङादिप्रकरणे सर्वविकरणीयानि रूपाणि साधनरीतिमनुसृत्य समुल्लिखितानि । इदमपि वैशिष्टमत्र द्रष्टव्यम् यत् आत्मनेपदपरस्मैपद प्रक्रिये न पृथक् प्रकरणयो निर्दिष्टे किन्तु तत्तद्धातुरूपनिर्देशसन्दर्भ एवोपसर्गविशेषयोग-मर्थविशेषयोगं च प्रदर्श्य सूत्रनिर्देशपुरस्सरमुपग्रहपरिवर्तनजन्यानि रूपाण्यपि यथास्थानं दर्शितानि । एतेन वैशिष्ट्येन छात्राणामुपग्रहोहापोहशक्त्या विकासोऽपि जायते । अन्यथा कस्यापि धातोर्विषये परस्मैपदित्वात्मनेपदित्वयोरन्यरस्यैकत्र प्रतिपादनात् तादृशो बद्धमूलो विचारोऽन्यत्र प्रकरणे तद्वैपरीत्येन प्रतिपादनेऽपि छात्रबुद्धि काठिन्येन त्यजति । अतएव वैयाकरणेन अपवादनिषेधविषयान् विहायैवोत्सर्गशास्त्राणि प्रकल्पयन्ति[3] अपवादशास्त्रणामुत्सर्गशास्त्रैरेकवाक्यतां कृत्वैव

---

१. तत्र सकर्मका धातवः कर्मापेक्षक्रियामाहुः । यथा कटं करोति, गामं गच्छति, ओदनं पचति इत्येव-मादयः । अकर्मका धातवः कर्मनिरपेक्षां क्रियामाहुः यथा आस्ते, शेते, तिष्ठति भवति इत्यादयः । यद्यपि लक्षणमात्माश्रयदोषग्रस्तं तथापि बालानां बोधोपयोगीति ।

२. रू० भा० २ पृ० ४ ।

३. प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते प्रकल्प्येत्यस्य परित्यज्येत्यर्थः इति नागेशः (परि० शे० प० सं० ६४) ।

वाक्यार्थबोधप्रथाऽत्र शास्त्रे चिरात् प्रचलिता वर्तते । धर्मकीर्तिनाऽत्र प्रकरणे उपग्रहविशेषस्य नियमोल्लेखेन सामान्य-विशेषनियमयोरुदाहरणानां च एकत्र समावेशं कृत्वा तद्विपर्ययजन्यदोषस्य परिहाराय स्तुत्यः प्रयत्नः कृतः ।

नामधातुप्रकरणत्वेनान्यै र्वैयाकरणै र्यस्य प्रकरणस्योल्लेखः कृतः स्वस्वग्रन्थे तस्य प्रकरणस्यात्र रूपावतारोत्तरविभागे सुब्धातुप्रकरणमिति प्रमाणसम्मतं नामोपलभ्यते ।

प्रातिपदिकाद्धात्वर्थे बहुलमिष्टवच्चेत्यादिना णिजादिप्रत्यये विहिते यत्र नामानि धातवो भवन्ति तस्य प्रकरणस्य नामधातुप्रकरणमिति नाम तु युक्तं प्रतिभाति; किन्तु सुप आत्मनः क्यजित्यादिना क्यजादिप्रत्यये कृते ये सुबन्ताः धातवो भवन्ति तेषां संकलनं यत्र क्रियते तस्य प्रकरणस्य नामकरणं सुब्धातुप्रकरणमित्येवयुज्यते न तु नामधातुप्रकरणमिति ।

सन्ति एतादृशान्यपि वार्तिकानि यैः प्रातिपदिकात् क्यच्क्विबादयो विधीयन्ते । यथा 'सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ दधिस्यति, दध्यस्यतीत्यादौ । यद्यपि नानेन प्रातिपदिकात् क्यज्-विधीयते किन्तु प्रातिपदिकोद्देश्यकक्यज्निमित्तकसुगसुक्विधानेन प्रातिपदिकात् क्यज्-विधानस्याभिव्यक्ति र्जायत एव । अत एव मान्तप्रकृतिकसुबन्तादव्ययाच्च क्वच् न इति निषेधवार्तिकमपि संगच्छते । एवमेव सर्वप्रातिपदिकेभ्यः किब्वा वक्तव्यः इति वार्तिकेन नाम्नः क्विब् विधीयते एतादृशप्रकरणस्य नाम नामधात्वित्यस्ति चेदस्तु, किन्तु सुबन्ताद् विधीयमानप्रत्ययाध्यायस्य नामकरणं नामधातुप्रकरणमिति सिद्धान्तकौमुद्यादौ कृतमयुक्तं प्रतीयते । सिद्धान्तकौमुद्यादौ प्रातिपदिकसुबन्तोभयोद्देश्यकविधानानां प्रत्ययानामध्यायः नामधातुप्रकरणमिति नाम्ना निर्दिष्टः । रूपावतारकृते धर्मकीर्तये न रोचतेऽमूदृक्षास्तव्यस्तता ।

व्याकरणप्रक्रियायां सूक्ष्मदृष्टिपाते कृते धातूनां पञ्च प्रकाराः दृष्टिगोचरा भवन्ति । ते सन्ति—

(१) भूवादिधातवः (दशगणीपठिताः धातवः) यथा भवतिप्रकृतिः ।
(२) अनुमितपाठा धातवः (ते धातवो येऽधुना तत्तद्गणे नोपलभ्यन्ते किन्तु सूत्रादिप्रयोगात् येषां पाठाः कदाप्यवश्यं स्युरित्यनुमीयते । यथा जृस्तम्भु ३।१।५८ इति सूत्रप्रयोगानुमित स्तम्भुधातुः ।
(३) धातुजधातवः (सनाद्यन्ता धातवः) चिकीर्षति, गोपायाञ्चकारेत्यादौ प्रकृतिभूतः ।
(४) नामधातवः (प्रातिपदिकात्प्रत्यये कृते यत्र धातुत्वं स्वीक्रियते) कृष्णति, दधिस्यति ।
(५) सुब्धातवः (सुबन्तात् प्रत्यये कृते यत्र धातुत्वमायाति) पुत्रीयति, अप्सरायते इत्यादौ ।

सिद्धान्तकौमुद्यादौ नामधातु-सुब्धात्वोः प्रकरणसाङ्कर्यं दृश्यते । धर्मकीर्तिना प्रातिपदिकात् विहितानां णिजादीनां संकलनं चुरादिप्रकरणे कृतम् । सुबन्तात् विहितानां च प्रत्ययानां परिगणनं सुब्धातुनामके प्रकरणे पृथक् कृतम् । पाणिनिना नामधातु इति नाम क्वापि न गृहीतम् । वार्तिके नामधातु-सुब्धात्विति द्वयमपि नामकरणमुपलभ्यते । "यथेष्टंनामधातुषु" सुब्धातुष्टिवुष्वष्कादीनां सत्वप्रतिषेधो वक्तव्य इत्यादौ उभयस्यापि शब्दस्य वार्तिककारेण प्रयोगकरणात् । वार्तिककारः स्वयमपि नामधातुसुब्धातुपार्थक्यविषये न स्पष्टो दृश्यते । अतएव तेन सन्यङोरिति सूत्रमुपक्रम्य कण्ड्वादेस्तृतीयस्येति वाच्यम् यथेष्टं नामधातुषु इति वार्तिकस्योदाहरणेषु सुब्धातुनामधात्वोरुभयोरुदाहरणानि दत्तानि ।[1] एवमेव 'सुब्धातुष्टिवुष्वष्कतीनामित्यस्योदाहरणेऽपि उभयविधमुदाहरणं दृश्यते ।

---

१. तत्रोदाहरणेषु पुपुत्रीयिषति पुतित्रीयिषति, पुत्रीयियिषतीति सुब्धातो स्तथा नामधातोः प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छती त्युदाहरणं दत्तम् । सि० कौ० प्रत्ययमालाप्रकरणम्) ।

वार्तिककारमाधारीकृत्य तत्वबोधिनीकारेणोक्तम्:—सुब्धातोरुदाहरणानि—षड् दन्ता अस्य इति षोडन् तमाचष्टे णिचि टिलोपो षोडयति एवं षण्ढं करोत्याचष्टे वा षण्ढयति षण्ढीयतीत्यत्र षण्ढशब्दात् क्यचि ईत्वे षण्ढीयति इति अत्र सर्वत्र धात्वादेः षः स इति सत्वं न।

इत्थमत्रापि नामसुब्धात्वोरुभयोरुदाहरणं ददत् वार्तिककारः न स्पष्टः तयोः पार्थक्य इति।

"यथेष्टं नामधातुषु" इति वार्तिकस्य सुब्धातुसम्बन्ध्युदाहरणं विलोक्य समाधानकर्त्रा भक्तेन वैयाकरणेन 'वार्तिकस्थं नामपदं प्रातिपदिकस्य मुख्यया वृत्या सूबन्तस्य चोपचाराद् बोधकम्। तथाच प्रातिपदिकसुबन्तान्यतर-प्रकृतिकप्रत्ययान्तत्वप्रयुक्तधातुसंज्ञकेषु प्रथमस्य द्वितीयस्य तृतीयस्य वा एकाचो द्वित्वं भवती वार्तिकाभिप्रायः' कल्प्यते।

यद्यपि सूत्रकारेण नामधात्विति सुब्धात्विति वा नाम कण्ठरवेण नोक्तम् तथापि प्रातिपदिकाद् धात्वर्थे बहुलमिष्टवच्चेति गणसूत्रेण' सुपः आत्मनः क्यच् इति सूत्रेण क्रमशः प्रातिपदिकात् अर्थात् नाम्नः सुबन्ताच्च प्रत्यय-विधानस्य पाणिनिना कृतत्वात्स्पष्टं ज्ञायते यत् पाणिनेः इदं विभागद्वयमपरिचितं नासीत्।

यच्चोक्तम् 'सुब्धातु' इति वार्तिके 'सुब्धातुपदं व्यर्थम् धात्वादेः षः स इति सूत्रे उपदेशस्याद्योच्चारणार्थक स्यानुवृत्तेः उद्देश्यश्च प्रातिपपदिकानां नोपदेश इति नियमेन तस्योपदेशत्वाभावात् अतएव भाष्ये तत्प्रत्याख्यातम् इति तेन प्रत्याख्यानेन नात्र तथा नामकरणे कोऽपि विपरीतः प्रभावः पतति। सुप आत्मनः क्यच् इत्यादिना सुब्न्तात् प्रत्ययविधानेन सुब्धातुरिति नामकरणे स्फुटं प्रमाणोपलब्धेः।

ग्रन्थस्यास्य ध्यातव्यं वैशिष्ट्यमस्ति सरलोदाहरणसंग्रहः वैकल्पिकप्रयोगाणामेकस्मित् पद्ये संग्रहेण रूपभेदाः सरलोपायेन ज्ञाताः भवन्ति।

(१) इति-पाणिनि (पाणिनि शब्दः लोके प्रकाशते इत्यर्थः) पाणिनीयानां कृते उदाहरणमिदमतीव परि-चितम्[1]।

(२) उशनस्शब्दस्य सम्बोधने सकारनकारादन्तात्मकं रूपत्रयं वारिप्रभृतिशब्दस्य च गुणघटितं तदघटितं च रूपमिह तथा मनोहारिच्छन्दसानिबद्धं यथा तदभ्यासे न किमपि काठिन्यं भवति (यद्यपि पद्यमिदं काशिकायामुप-लभ्यते तथाऽपि नैतेन सम्पादनकलाप्रावीण्यं धर्मकीर्तेरपह्नियते।[2]

(३) पद्यबद्धमस्योदाहरणं तथा सरसं यथा तत् काव्यमिव मन आवर्जयतिः—णमुल्प्रत्ययस्योदाहरण-मास्वाद्यताम् पद्येऽस्मिन्[3]:—

ईक्षमीक्षं तदा बाला **रोदं रोदं** चमूमनु।
आयमायं निवृत्ताया जीवेदेकाकिनी कथम्॥
नलिन्या इव तन्वङ्ग्याः तस्या पद्ममिवाननम्।
मया मधुव्रतेनेव **पायं** पायमरम्यत॥

---

१. रू० पृ० १६७।
२. रू० पृ० ११०।
३. रू० पृ० ३०३।

अधोरेखाङ्किताः प्रयोगा अत्र पद्ये गुम्फिता व्याकरणसूत्रसाधिता अपि व्याकरणदुःसौरभरहिता एव न जाता किन्तु किमपि मनोहारित्वमपि प्राप्ताः ।

(४) ग्रन्थकारेण भाष्यकारवत् दुरूहतत्वमपि पद्यात्मकं विधाय तथाऽलिख्यते यथा पञ्चतन्त्रे कथाच्छलेन बालकाः नीरसनीतितत्वम् इव अस्य पाठका बालका हसन्तो व्याकरणतत्वमभ्यसेयुः तज्ज्ञाश्च भवेयुरिति ।[1]

(५) समानकर्तृकयोः पूर्वकाले क्त्वा ३।४।२१ इति सूत्रे समानकर्तृकयोरित्युक्तत्वात् तत्र च द्विवचनसत्वात् समानः कर्ता ययोः धात्वर्थयोस्तत्र पूर्वकाले वर्तमानात् क्त्वाप्रत्ययो भवतीत्यर्थेयत्र क्रियाद्वयमस्ति तत्रैव पूर्वस्मात् क्रियावाचकपदात् क्त्वाप्रत्ययः सम्भाव्यते, न तु देवदत्तः स्नात्वा पीत्वा भुक्त्वा । व्रजति इत्यादावपि । इष्यते च तत्रापि तथाविधप्रयोगस्य शतशः लोके शास्त्रे च दर्शनात् । व्याकरणशास्त्रेण स्थितस्य गतिरवश्यमेव चिन्त्यनीया । अन्यथा तन्निर्मातृषु अल्पज्ञत्वमापतेत् । अतः पाणिनीयभक्तैः पाणिनीयव्याकरणे त्रुटिशङ्कापरिहाराय' तत्रत्यं द्विवचनम-तन्त्रमित्युच्यते । एवंच द्व्यधिकाक्रियास्वपि समानकर्तृकासु मुख्यक्रियातिरिक्तक्रियाभ्यः क्त्वाप्रत्ययः सिद्ध्यति ।

एतस्य सर्वस्य तत्वस्य प्रामाण्यसधनाय हृदयंगमत्वाय च धर्मकीर्तिना पद्यमेकमतिसुन्दरमुदाहृतम् ।

गत्वा स्नात्वा च दध्यन्नं भुक्त्वा पीत्वाऽम्बुशीतलम्[2] वटे शयित्वा क्रीडित्वा यातो मन्दातपे सुखी ।

(६) यद्यप्यस्य सर्वाण्युदाहरणानि परम्परागतानि भाष्यादौ वृतिग्रन्थादौ चोपलब्धान्येव सन्ति । तथापि क्वापि क्वापि तादृशान्यपि उदाहरणानि यानि ग्रन्थकारस्य धर्मसम्प्रदायादिकं प्रकाशयन्ति ।

"श्राद्धाय[3] निगर्हते" उदाहरणमिदं श्राद्धोद्देश्यक गर्हणां द्योतयदस्य सनातनधर्मेतरधर्मत्ववमर्थात् बौद्धत्वं दृढयति ।

(७) रूपावतारे "द्विमुनि व्याकरणस्य" इत्येव उदाहरणं दत्तम् । न तु भट्टोजिदीक्षितवत् वृत्तिग्रन्थस्यान्धानु-करणं विधाय त्रिमुनि व्याकरणस्येति त्रिमुनिव्याकरणमिति वा चोदाहृतम् । अनेनास्य व्याकरणेतिहासशास्त्रज्ञत्व-मपि प्रख्यातं भवति । पाणिनिकात्यायनौ गुरुशिष्यावास्ताम् अतः विद्यावंशभवत्वाद्" द्विमुनि व्याकरणस्य" इति तु भवत्युदाहरणम्" संख्या वंश्येन" २।१।१९ इति सूत्रस्य । पतञ्जलेस्ततशिष्यत्वेन ख्यातिर्नास्ति, प्रमाणाभावात् । अतः त्रिमुनिव्याकरणस्येति प्रयोगोऽस्य सूत्रस्योदाहरणं न भवितुमर्हति । भट्टोजिदीक्षितस्तु प्रायः व्याकरणशास्त्रेतिहासान-भिज्ञः वृत्तिमन्ध इवानुसृत्योभयमपि उदाजहार । वंशलक्षणमपि धर्मकीर्तिकृतमतीव स्पष्टं निर्दुष्टं च तेन लिख्यते: —विद्यया जन्मना वापि प्राणिनामेकलक्षणसन्तानो वंशः । एतादृशे वंशे जातः वंश्यः । अत्र सन्तानशब्दः अखण्ड-परम्परार्थं प्रकटयति । व्याकरणस्याखण्डगुरुशिष्यपरम्परायां पाणिनिकात्यायनो तु आगच्छतः तथा प्रसिद्धेः, पतञ्ज-लिस्तु पाणिनिकात्यायनप्रसूताखण्डगुरुशिष्यपरम्परायां नागच्छति । अतः 'संख्या वंश्येन" इति सूत्रेणात्र समासा-भावः ।[4] धर्मकीर्तिमनुकृत्य नागेश[5]भट्टोऽपि लिखति यत् त्रिमुनि व्याकरणस्येति यदि वर्तते आप्तप्रयोगस्तर्हि

---

१. रू० पृ० १५३, २१८ इत्यादौ ।

२. रूपावतार द्वितीय भाग पृ० ३०० ।

३. रूपावतःरे कारकवतारः पृ० १५३ ।

४. रूपावतारे समासावतारेऽव्ययीभावः पृ० १७० । सूत्रं संख्या वंश्येन २।१।१९ । विद्यया जन्मनावापि प्राणिनामेकलक्षणसन्तानो वंशः; तज्जो वंश्यः; संख्यावाचि रूपं वंश्यवांचिना सुबन्तेन विभाषा समस्यते सोऽव्ययीभावः द्वौ मुनी व्याकरणस्य वंश्यौ द्विमुनि व्याकरणस्य ।

५. ल० श० शे० अव्ययीभाव प्र० २।१।१९ ।

'तिष्ठद्गुप्रभृतिषु पाठं प्रकल्प्य साध्यः । अन्यथा एतस्य मुनित्रयस्य गुरुशिष्यपरम्परास्वरूपविद्यावंशभवत्वस्याप्रामाण्यात्' संख्या वंश्येन' इत्यस्याप्राप्त्या सिद्धि र्न स्यात् । नात्र भट्टोजिदीक्षित एवापराध्यति । वृत्तिग्रन्थेऽपि तथोपलब्धेः मूलतः स एवापराध्यति । अथ च यदि च त्रिमुनि व्याकरणस्य इति रूपं साधु, तदा द्विमुनि व्याकरणस्येतिप्रयोगस्यासाधुत्वं स्यात् । नहि त्रिपुत्रो जनः द्विपुत्रव्यपदेशेनाकार्यते लोकैः, तथैव व्याकरणवंशे त्रिमुनिपुत्रसत्त्वे 'द्विमुनि' व्याकरणस्येति प्रचलितः प्रयोगः नैव भाषायामागच्छेत् । अतः प्रचलितो द्विमुनिव्याकरणस्येति प्रयोगः त्रिमुनिव्याकरणस्येत्यस्यासाधुत्वं साधयति । विद्या तद्वतामभेदविवक्षायां यत् त्रिमुनिव्याकरणमिति साध्यते, तदपि बहुव्रीहिणासाध्यम् । नचैवं बहुव्रीहिसमासे कृते द्विवचनादौ द्वितीयाविभक्तिप्रभृतौ च वारिवत् रूपं स्यात् अनेनाव्ययीभावे कृतेऽव्ययत्वात् तृतीयां सप्तमीं पञ्चमीञ्च विना समानं रूपं भवतीति, भवतु, नाम का क्षतिः तिष्ठद्गु प्रभृतीनि चेति वा साध्यताम् ।

नागेशस्य मतमिदं धर्मकीर्तिग्रन्थमाधारीकृत्यैव प्राणितीत्यत्रापि जितं बौद्ध-वैयाकरणेनाधर्णीकृतनव्यव्याकरणकाननकेसरिनागेशभट्टसदृशमहावैयाकरणेन ।

(८) तद्धितस्यापत्यगोत्रापत्ययुवापत्यादिज्ञानं लक्षणमुखेन काठिन्येन भवति कुशाग्रबुद्धीनामेव तदपि, परन्तु लक्ष्यमुखेन धर्मकीर्तिदर्शितदिशाऽल्पबुद्धयोऽपि सारल्येनावगच्छन्त्यपत्यगोत्रापत्ययुवापत्यादिभेदम् । तेन लिख्यतेः—

परमप्रकृति र्गर्गो गार्गिस्तु तदनन्तरः
गोत्रे गार्ग्यस्तृतीयः स्यात् तुर्यो गार्ग्यायणो युवा ।

इत्थमिदानीं प्राप्ताधिकप्रचारस्य नव्यव्याकरणस्याविष्कर्तापि बौद्धवैयाकरणएवेति नव्यव्याकरणमधीयद्भिरधीयानै र्वा बौद्धवैयाकरणो धर्मकीर्तिः स्वोपज्ञतया समाद्रियत एव ।

द्वितीयोभागः

प्रथमोऽध्यायः

चन्द्रोपज्ञमसंज्ञकं व्याकरणम्

चन्द्राचार्येण व्याकरणस्य काठिन्यम् संस्कृतभाषायाः प्रचारे बाधकत्वेनान्वभावि। संस्कृत-व्याकरणमधीयानैः प्रथमं पाणिनिसूत्राण्यभ्यसनीयानि। तदनन्तरं कात्यायनकृतानि वार्तिकानि कण्ठस्थीकर्तव्यानि। तेषां च वार्तिकानां केन केन सूत्रविशेषेण सम्बन्धः इत्यप्यवश्यज्ञातव्यमासीत् ततश्चावश्यन्तैः पातञ्जलमहाभाष्यस्याध्ययनं महता गहनेन मननेन साकं विधातव्यम्। पाणिनिकात्यायन पतञ्जलीनां पृथक्पृथगध्ययनजन्यं कष्टं कुशाग्रबुद्धिनापि तेन स्वयमन्वभूयत। अतस्तेनैकं व्याकरणं तथा निर्मातुं प्रायत्यत यथा तद् लघु सदपि विस्पष्टं सम्पूर्णं च भवेत्। तेन स्वीयव्याकरणे लघुत्वमानेतुं यथासम्भवं सर्वे प्रयत्नाः कृताः। पाणिनीयव्याकरणे काठिन्यस्य क्लेशस्य च मूलकारणष्वेकं विविधानां संज्ञानां करणमस्तीतिकृत्वा स संज्ञासूत्राणि स्वव्याकरणान्निरस्तवान्। एतस्मात् कारणात् तस्य व्याकरणमिदमसंज्ञकव्याकरणाख्यया प्रसिद्धिमभजत्। अतएव चान्द्रव्याकरणवृत्तौ सरस्वतीकण्ठाभरणस्य हृदय-हारिण्यां टीकायां वामनीयलिङ्गानुशासने च लिखितमुपलभ्यते चन्द्रोपज्ञमसंज्ञकं व्याकरणम् **संज्ञाविहीनव्याकरणरचना चन्द्रस्यैवप्रतिभाविलासः**। पाणिनितन्त्रे संज्ञाविधानजन्याः काश्चिद्दुरूहताः निम्नलिखिताः सन्ति यासां निराकरणाय चन्द्राचार्यः प्रायतत—

१—एकस्य विधिसूत्रस्यार्थबोधार्थम् अनेकेषां संज्ञासूत्राणां सहकारः आवश्यकः। यथा 'पुगन्तलघूपधस्य च' पा० ७।३।८६ इति सूत्रस्यार्थबोधोऽङ्गसंज्ञालघुसंज्ञोपधासंज्ञानां ज्ञानं विनाऽसम्भवः।

२—बहूनां संज्ञाशब्दानां कलेवरं संज्ञिभ्यः स्थूलतरम्। अतः एतादृशीनां संज्ञानामुच्चारणे गौरवमपि। यथा सर्वनामस्थानसंज्ञा गृह्यतामुदाहरणाय प्रातिपदिकसंज्ञा वा। सर्वनामस्थानसंज्ञामकृत्वा तत्तत्सूत्रे 'शिसुटि' इतिकरणेमात्रा लाघवंस्पष्टम्। 'सुडनपुंसकस्य' (पा० १।१।४३) 'शि सर्वनामस्थानम्' (पा० १।१।४२) इति सूत्रद्वयाकरणजन्यं लाघवमन्यो लाभः। सर्वनामस्थानसंज्ञां विधाय तन्मुखेन विधिसूत्रोपस्थापने द्रविडप्राणायामश्चापतति। एवं प्रातिपदिकसंज्ञास्थाने 'नाम' शब्दप्रयोगेण लाघवं भवति विविधं च गौरवं स्वतः परिहृतं भवति।

संज्ञाशब्दानामर्धमात्रिकत्वमिति तु निर्मूलम्, उच्चारणकालेऽनुभूतानामर्धातिरिक्तमात्राणामीदृशन्यायशतेनाप्यपलापापासंभवात्। यदि संज्ञाशब्दा अर्धमात्रिकाः स्युस्तदा' महती संज्ञा क्रियते अतः सर्वनामसंज्ञायामन्वर्थताश्रयणमित्याद्याशयकः भाष्यग्रन्थो व्याकुप्येत। यदि च संज्ञाशब्दानामर्धमात्रिकत्वं स्यात् तदा 'ओरोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुमितिकथनमप्यसंगतं स्यात्। गुणशब्दस्य संज्ञाशब्दतया तस्यार्धमात्रिकत्वेन तत्स्थाने 'ओत्' करणे त्वन्मते गौरवस्य स्पष्टत्वात्।

३—वृद्धिरादैच् (पा० १।१।१) अदेङ्० गुण (पा० १।१।२) इत्यादौ आदैच्छब्दस्य वृद्धिसंज्ञा, अदेङ् शब्दस्य च गुणसंज्ञा विधीयते इत्थं संज्ञासूत्रैः शब्दानामेव संज्ञा विहिता दृश्यन्ते प्रायशः, किन्तु नवेति विभाषा (पा०

---

१. सरस्वतीकण्ठाभरणम्—हृदयहारिणी टीका ४।३।२४५—चान्द्रमसंज्ञकं व्याकरणम् चान्द्रवृत्तिः २।२।८६ चन्द्रोपज्ञमसंज्ञकंव्याकरणम् वामनीयलिङ्गानुशासन पृ० ७।

१।१।४४) इत्यनेन नवेत्यर्थस्य निषेधविकल्परूपस्य 'विभाषा' संज्ञा विधीयते। एवमेव लोपसंज्ञाऽपि 'अदर्शनं लोप' (पा० १।१।६०) इत्यनेन 'अदर्शन' शब्दस्य न क्रियते, किन्तु अदर्शनार्थस्य प्रसक्तस्य दर्शनाभावस्य विधीयते। एवं संज्ञा विधानेऽर्धजरतीयत्वमतीव सन्देहोद्भावकं भवति।

४—किंच संज्ञासूत्रप्रणयनात् प्राक् संज्ञाधिकारो न कृतः। अतः इमानि सूत्राणि विधिसूत्राणि इत्येवं भूता भ्रान्तिरुद्भवति। अपरं चात्र कः संज्ञी का संज्ञेति सन्देहोऽपि प्रतिपदमुत्पद्य पाठकं दुःखाकरोति। 'पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा। कुत एतत्? सतो हि कार्यिणः कार्येण भवितव्यम् तद्यथा लोकेऽपि सतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते' इति १।१।१ सूत्रस्थमहाभाष्यानुसारेण लोके यथा अयं देवदत्त इत्यादौ संज्ञिनः पूर्वम् संज्ञानां पश्चादुच्चारणं भवति तथा यदि पाणिनिनिकाये संज्ञिनां पूर्वं संज्ञानां च पश्चादुच्चारणं स्यात्तदा किंचित्समाधानमुपलभ्येत; किन्तु न तथा। उभयथा हि संज्ञिनः संज्ञाश्चोच्चारिताः अदेङ् गुणः १।१।२ तिङ शित् सार्वधातुकम् (पा० ३।३।११) इत्यादौ संज्ञिनः पूर्वं संज्ञाश्च परमुच्चारिताः किन्तु वृद्धिरादैच् पा० १।१।१ 'अपृक्त एकाल्प्रत्ययः' (पा० १।२।४१) आर्धधातुक शेषः (पा० १।१।४) तत्रोपपदं सप्तमीस्थम् (३।१।९२) इत्यादौ परमुच्चारिताः संज्ञिनः पूर्वं च संज्ञाः। वृद्धिरादैजिति सूत्रे विधेयाविमर्शदोषपरिहाराय महाभाष्यकारेणेह वृद्धिशब्दस्य मङ्गलार्थत्वं प्रकल्पयता यदुक्तम् "एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति॥ सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा, अदेङ्गुण इति यथा इति, तन्न रोचते विपश्चिद्भ्यः, एतदेकमेव सूत्रं यदि विधेयाविमर्शदोषदूषितं स्यात्तदैव "एतदेकमाचार्यस्य मङ्गार्थं मृष्यताम्" इति क्षिप्राशिषः स्वीकार्याः स्युः। तदेव तु न दृश्यते, "अ[1]पृक्त एकाल् प्रत्ययः" "आर्धधातुकं शेष[2]:" इत्यादावन्यत्रापि संज्ञावाचकशब्दस्य पूर्वोच्चारणस्य "विद्यमानत्वात् एवंच" सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञीत्यादि भाष्यग्रन्थो न विवेकपूर्णः।"भाष्यस्यान्धश्रद्धालुः कैयटः"[3] अपृक्त एकाल् प्रत्यय इति सूत्रं परिभाषासूत्रं मत्वा "एतदेकमाचार्यस्येति" ग्रन्थस्य सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञीपरोच्चारिता संज्ञेति ग्रन्थस्य चौचित्यसंसाधनाय यतते, परन्तु तदपि न बुद्धिविलसितम् तस्य संज्ञासूत्रतयाऽप्रसिद्धेः। किंचास्य सूत्रस्य परिभाषा सूत्रत्वे यथाकथंचिदङ्गीकृतेऽपि "आर्धधातुकं शेषः, तत्रोपपदं सप्तमीस्थम् ३।१।९२ कृदतिङ् ३।१।९३ इत्यादिसंज्ञासूत्रेषु पूर्वनिर्दिष्टस्य महाभाष्यप्रतिपादितार्थद्वयस्य व्यभिचारस्य स्पष्टतया तादृशातथ्यकल्पनयाऽपि तद्ग्रन्थस्यौचित्यसिद्धे र्न सम्भावनाऽपि। विधेयत्वेऽपि तस्य पूर्वपाठो मङ्गलार्थः। अपृक्त एकाल् १।२।४१ इत्यादौ तथाकरणं विधेयस्य प्रथमं प्रयोगे साधुत्वभ्रमनिवारणायेति वृद्धिरादैच् सूत्रस्य लघुशब्देन्दुशेखरे नागेशः। एतादृशकल्पनायाः पादशिरोरहिताया अर्थशून्यत्वात्। विधेयाविमर्शदोषात् पृथक्च्युतसंस्कृतदोषस्वीकारादेव विधेयाविमर्शेसाधुत्वभ्रमस्य निराकरणं विद्वन्निकाये परम्परासिद्धम्। न तदर्थं किमपि ज्ञापकमपेक्ष्यते।

---

१. १।२।४१ पा०।

२. ३।४।११४ पा०।

३. वृद्धिरादैज् पा० १।१।१ इति सूत्रे कैय्यटः—
इह तु मङ्गलार्थोऽन्यथा पाठकमः। अन्ये तु सिद्धिहेतवो भविष्यन्ति। अपृक्त एकाल् प्रत्ययः इति परिभाषा, न संज्ञेति नास्ति व्यभिचारः। अपृक्तशब्देन ह्येकाकी कथ्यते इत्यनेनानियमेन ग्रहणे प्राप्ते नियमः क्रियते।

तस्य तथापाठस्य तज्ज्ञापकत्वस्वीकारेऽपि "एकं मङ्गलार्थं मृष्यताम्" सर्वत्रैव हि व्याकरणे पूर्वोचारितः संज्ञीति भाष्यग्रन्थस्य सुसंगतिर्नैव सिद्धयति आर्धधातुकं शेष इत्यादौ व्यभिचारस्य तादवस्थ्यात् ।

'शेषोध्यसखि' (पा० १।४।७) तत्रोपपदम् सप्तमीस्थम् पा० ३।१।९२ कृदतिङ् ३।१।९३ इत्यादौ संज्ञायाः परोच्चारणं न दृश्यते । अनदीसंज्ञौ ह्रस्वौ यावित्तौ तदन्तं सखिवर्जं घिसंज्ञं स्यादिति, सप्तम्यन्ते पदे कर्मणि इत्यादौ वाच्यत्वेन स्थितं यत् कुम्भादि, तद्वाचकं पदमुपपदसंज्ञं स्यादित्यर्थे यावान् उद्देश्यांशो न तावान् विधेयांशात् पूर्वमुच्चारितः, किन्तु तदेकदेश एव प्रागुक्त इति पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा इति नियमाभावात्पाणिनीयतन्त्रे संज्ञासूत्रेषु कः संज्ञी का च संज्ञेति पदे पदे विचिकित्सा ।

५—अन्यच्च गुणानांच परार्थत्वादसम्बन्धः समत्वात् स्यात् इति न्यायविरोधोऽपि संज्ञासूत्रकरणे प्रतिपदमुत्पद्यते । पूर्वनिर्दिष्टन्यायानुसारेण यथा सर्वे सेवका राजानमेवोपसेवन्ते, न तु तेषां परस्परं सेव्यसेवकभावस्तथा सज्ञाशास्त्रैर्विध्युपकारकैरेव भवितव्यम्, तेषां परस्परमुपकार्योपकारकभावेन न भाव्यम् । पाणिनितन्त्रे च दृश्यते संज्ञाशास्त्राणां परस्परमुपकार्योपकारकभावः यथा वृद्धिर्यस्याचामादिस्तद् वृद्धम् इति संज्ञासूत्रस्योपकारकमन्यत् संज्ञासूत्रं वृद्धिरादैजित्यस्ति । तथाहि पदार्थज्ञानस्य वाक्यार्थबोधं प्रति हेतुत्वाद् वृद्धिर्यस्याचामादिस्तद् वृद्धम् इति सूत्रार्थबोधं प्रति वृद्धिपदार्थज्ञानस्यावश्यकत्वेन तद् बोधाय वृद्धिरादैजिति सूत्रोपस्थितेरनिवार्यतया सिद्धं वृद्धिसंज्ञासूत्रस्य वृद्धसंज्ञासूत्राङ्गत्वम् । संज्ञासूत्राणामकरणे तु नायं दोषः । चन्द्राचार्येण "वेणु श्चेन्नावशिष्येत मुरली नैव वदिष्यति" इति न्यायमनुसृत्य संज्ञासूत्राण्येव दूरमपास्तानि ।

६—या संज्ञा क्रियते आचार्येण तस्या स्तस्मिन् पारिभाषिकेऽर्थे एव प्रयोगो विधेयः । परन्तु पाणिनिना संज्ञाशब्दस्य प्रयोगः न केवलं संज्ञिन्येव कृतः किन्तु लोकप्रचलितेऽर्थेपि । पाणिनीयव्याकरणस्य विद्यार्थी "अदेङ् गुण" (१।१।२) इत्यादिना अदेङ्रूपार्थे गृहीतगुणशब्दसंकेत आदगुणः (पा० ६।१।८७) मिर्देगुणः (पा० ७।३।८२) इत्यादौ विहिततदर्थप्रयोगः, पूरणगुण २।२।११ इत्यत्र गुणशब्दस्य शुक्लादिगुणेऽर्थेऽप्रयुक्तस्य तादृशमर्थं ग्रहीतुमसामञ्जस्यमनुभवति । संज्ञाशब्दः रूढिवदेव भवेत् प्रयुक्तः । न तथाऽत्र शास्त्रे दृश्यते । स शास्त्रकारसंकेतितेऽर्थे लोकप्रसिद्धे चार्थे प्रयुक्तः विप्रतिपत्तिं जनयति । सा च विप्रतिपत्तिर्लक्षणस्य महत्सु दोषेषु परिगण्यते लक्षणकारैः । तत्र सूत्रे गुणशब्देन शुक्लादिग्रहणाय अदेङो वारणाय च "सुहितार्थशब्दगतार्थशब्दस्य द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकं शब्देन सम्बन्धकल्पनायां पूरणार्थकगुणार्थकसुहितार्थकशब्दैर्न समास इतीदृशेऽर्थे स्वीकृते पञ्चमशब्दशुक्लादिशब्दैः सह समासाभावो यद्यपि सिद्धयति, एवं "वोतो गुणवचनात्" (पा० ४।१।४४) इत्यत्र वचनग्रहणात् गुणसंज्ञकस्य ग्रहणस्य वारणं संभवति तथापि संज्ञाविधानाभावे एतादृशप्रयासाऽकरणे लाघवं सुतरामिति चन्द्राचार्येण संज्ञासूत्राणि नाङ्गीकृतानि । नदीपौर्णमास्याग्रहायणीभ्यः (वा० ५।४।११०) इत्यत्र नदीशब्देन न नदीसंज्ञका पत्नीधेन्वादिशब्दाः गृह्यन्ते किन्तु नदीशब्द एव गृह्यते । नदीसंज्ञाविधानात् पाणिनीयतन्त्राध्येतॄणां ध्यानं संज्ञिनं प्रत्येव समाकृष्टं भवति । नदी[1]भित्यत्र न नदीशब्दस्य ग्रहणम् नापि नदीसंज्ञकानां किन्तु नदीविशेषाणां गङ्गायमुनादीनामेव ग्रहणं भवति । यथा किल नागेशभट्टेन लघुशब्देन्दुशेखरेऽत्र सूत्रे लिख्यते बहुवचननिर्देशात् न संज्ञाया ग्रहणं, नापि शब्दस्वरूपमात्रस्य । शब्दसंज्ञात्वाच्च । किन्तु नदीत्यर्थग्रहणम् । तेन तद्वाचके प्रवृत्तिरिति तन्न मनोरमम्, यदि पाणिनीयशास्त्रे सर्वत्र संज्ञाशब्दात् एकवचनस्यैव प्रयोगः स्यात् तदानदीभिरित्यत्र बहुवचननिर्देशोऽर्थविशेषस्य ज्ञापकः स्यात् 'षड्भ्यो लुक्' (पा० ७।१।२२) षट्चतु[2]भ्यश्चेत्यादौ व्यभिचारदर्शनात् तादृशी कल्पना निराधारैव ।

१. पा० २।१।२० ।
२. पा० ७।१।५५ ।

तत्र सूत्रद्वये बहुवचननिर्देशेऽपि षट्शब्दात् षट्संज्ञका एव गृह्यन्ते न षडर्थका रसादिशब्दाः। किंच षड्भ्य इत्यत्र षष्शब्दः अन्ये च पञ्चादिशब्दाः गृह्यन्ते। नदीभिश्चेत्यत्र तु न नदीसंज्ञका, नापि नदीतिशब्दः गृह्यन्ते, यावत् पर्यन्तं एकरूपता न स्यात् तावत् कापि कल्पना व्याप्तिविरोधात् त्याज्यैव। किंच यदि तत्र बहुवचननिर्देशात् नद्यर्थकानामेव ग्रहणस्य कल्पना क्रियते, तदा नदीपौर्णमास्याग्रहायणीभ्य इति सूत्रेण किमपराद्धम्। अत्रापि बहुवचनेन तादृशी कल्पना कुतो न क्रियते, ह्रस्वनद्यापो नुट् इत्यत्रेवेहापि एकवचने कृते निर्वाहसंभवात् बहुवचननिर्देशात् कल्पना-विशेषस्य नदीभिश्चेत्यत्रैव करणे बाधायोगात्। अतः एषुः सूत्रेषु अभिमतार्थग्रहणाय तत्तत्कल्पनाकरणजन्यं गौरवं विहातुं चन्द्राचार्यः संज्ञासूत्राणि मूलतः परित्यजति।

७—किंच बहुगणवतुडति संख्या (पा० १।१।२३) इत्यनेन बहुशब्दगणशब्दयोः वतुडतिप्रत्ययान्तयोश्च संख्यासंज्ञा विधीयते तथाच पयोव्रतो ब्राह्मण इत्यादिवत् संख्यात्वं पाणिनीयतन्त्रे एष्वेव नियमितं स्यात् तथाच पञ्चादिशब्दानां संख्यात्वं न स्यात्। [1]ष्णान्ताः षडित्यादौ इष्यते च पञ्चप्रभृतीनामपि संख्यात्वम्। तदर्थम् संख्याया अतिशदन्तायाः[2] कन् इत्यत्रातिशदन्ताया इति पर्युदासेन ज्ञापिताम् 'उभयगतिरिह भवति' इति **परिभाषामाश्रित्यापत्तिपरिहारस्तु ज्ञानपूर्वकं किमपि पापं कृत्वा तत्परिहाराय विहितप्रायश्चित्तवत् न शोभते।**

लिखतीदं परिभाषेन्दु शेखरे नागेशः[3] 'संख्याग्रहणे बह्वादीनामेव ग्रहणं स्यात् प्रकरणस्याभिधानियामकत्व-सिद्धात् कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय इति न्यायात्। अस्ति च प्रकृते बह्वादीनां संख्या संज्ञा कृतेति ज्ञान-रूपं प्रकरणम् नतु लोकप्रसिद्धैकद्व्यादीनामित्यत आह—उभयगतिरिह भवति। इह—शास्त्रे। संख्याया अतिशन्दन्ताया कनिति निषेधोऽस्या ज्ञापकः। नहि कृत्रिमासंख्यात्यन्ता शदन्ता चास्ति इत्यादि।

कर्तरि कर्मव्यतिहारे (पा० १।३।१४) इत्यत्र कर्मशब्देन क्रिया गृह्यते लौके कर्मशब्दस्य क्रियार्थत्वात् नतु कर्तुरीप्सिततमस्य कर्मणः, एव कण्वमेधेभ्यः करणे विप्रतिसिद्धं चानधिकरणवाचि इत्यादौ करणाधिकरणशब्दाभ्या-मपि पाणिनीयकृतकरणाधिकरणसंज्ञारूपोऽर्थो न गृह्यते। किन्तु करोतिक्रिया द्रव्याह्यर्था गृह्यन्ते कुत्रोभयगतिः क्वा-कृत्रिमस्यैव कुत्र न कृत्रिमस्यैवेति ज्ञानाय लक्ष्यानुसारि व्याख्यानमेव शरणीकर्तव्यम्। आम्रेडितशब्देन द्विरुक्तस्य[4] पररूपस्यैव ग्रहणम् न तु द्विस्त्रिर्घुष्टमात्रस्येति निर्णयाय व्याख्यानमेव रक्षकम् इति संज्ञास्वीकारे सर्वतोमुखं गौरवम्।

८—काचित् संज्ञा तद्भावितस्य विधीयते, काचिच्च तद्भाविताऽतद्भावितयोरुभयोरपि क्रियते यथा संप्रसारण-संज्ञा तद्भावितस्य भवति वृद्धिसंज्ञा चोभयोः। एषोऽप्यनिश्चयः संज्ञासूत्रपरित्यागे हेतुः।

९—संज्ञासूत्रप्रणयनेऽन्योन्याश्रयदोषोऽप्यापद्यते यथा इग्यणः संप्रसारणम् (पा० १।१।४५) इत्यत्र। अनेन सूत्रेण सम्प्रसारणसंज्ञा यणः स्थाने य इक्, तस्य विधीयते। यदा च वचिस्वपियजादीनां किति इत्यादिना यणः स्थानेइग् जायते; तदा तस्येकः सम्प्रसारणसंज्ञा भविष्यति, यदा च सम्प्रसारणसंज्ञा भवेत् तदा च तेन सूत्रेण यणः स्थाने इको विधानं भवेत्, इत्यन्योन्याश्रयः। अन्योन्याश्रयाणि कार्याणि न प्रकल्पन्ते, यथा नौर्नावि बद्धा नेतरत्राणाय भवति तथैव सम्प्रसारणविधायकानि च सूत्राणि स्व-स्ववाक्यार्थबोधाय अन्योन्यमाश्रितानि स्वीयशब्दबोधपरतन्त्राणि, इष्टिरीजतुरित्यादिप्रयोगसाधकानि नैव भवेयुः। एषां तन्तूनां पटं वयेतिवदत्र भाविसंज्ञाश्रयणमिति समाधानं गौरवा-वहमथ चार्धजरतीयम् वृद्धिसंज्ञादौ भाविसंज्ञानाश्रयणात्।

---

१. २।१।२४।
२. पा० ५।१।२२।
३. परिभाषेन्दुशेखरः परिभाषा ९।
४. तस्य परमाम्रेडितम् पा० ८।१।२।
आम्रेडितं द्विस्त्रिरुक्तम्—अमरकोशः १।६।१२।

१०—संज्ञानां परस्परं बाध्यबाधकभावोऽपि कल्पनीयो भवति स्वादिष्वसर्वनामस्थाने (पा० १।४।१७) इति प्राप्ता पदसंज्ञा यचि भमिति भसंज्ञया बाध्यत, इत्येतदर्थमाकडारादेका संज्ञा इति सूत्रमपि कर्तव्यं भवति। विप्रतिषेधसूत्रेण (पा० १।४।२) तु न निर्वाहः, तेन तुल्यबलविरोधे परकार्यस्य प्राबल्यं बोध्यते। राज्ञि इत्यादौ प्राप्तयोः पद-भसंज्ञयोर्विरोधे सत्यपि न तुल्यबलत्वम्; भसंज्ञाया अनवकाशत्वेन प्रबलतरत्वात्। उभय इत्यत्र पाणिनिमते तयपः स्थाने जातस्यायचः स्थानिवद्भावेन तयप्प्रत्ययान्ततया 'प्रथमचरमेति विकल्पेन प्राप्ता सर्वनामसंज्ञा निरपेक्षत्वेनान्तरङ्गतया सर्वादीनि सर्वनामानीत्यनेन नित्यसर्वनामसंज्ञया बाध्यते। सर्वोऽयं बाध्यबाधकभावः गुणानां च परार्थत्वादसम्बन्धः समत्वादिति सिद्धान्तप्रतिकूलः।

११—एकत्र महासंज्ञाकरणादर्थविशेषस्यावगतिः स्वीक्रियते अपरत्र नेति पार्थक्यमपि संज्ञासूत्रस्वीकारे दूषणम्। सर्वत्र सिद्धान्तेन समानेन भवितव्यम्। यदि काऽपि महासंज्ञा कुत्रचिदन्वर्थतां धत्ते; तर्हि सर्वत्र महासंज्ञयाऽन्वर्थया भवितव्यम्। पाणिनीयसंज्ञातन्त्रे न सर्वा महासंज्ञाऽन्वर्थाऽस्ति, न वा सर्वान्वर्थताविरहिताऽस्ति।

सर्वनामेति महासंज्ञाऽन्वर्था। अतएव तत्र महासंज्ञाकरणेन प्रधानप्रसिद्धस्वीयसर्वार्थवाचकानामेव सर्वनामसंज्ञा स्वीक्रियते। अतएव संज्ञोपसर्जनीभूता न सर्वादयः। सर्वो नाम कश्चित्तस्मै सर्वाय देहीत्यादौ अतिसर्वायदेहीत्यादौ च न सर्वनामसंज्ञाकार्यम्। करणसंज्ञाधिकरणसंज्ञादौ चान्वर्थसंज्ञाजन्यः प्रकर्षः नाश्रितः। आश्रयणे क्रियतेऽनेनेति "व्युत्पत्त्यैव साधकत्वे लब्धे साधकग्रहणमेव साधकतमपरं भविष्यति। एवंच साधकतमं करणमिति सूत्रे तमब्ग्रहणं व्यर्थं स्यात्। व्यर्थेन तेन ज्ञाप्यते अस्मिन् कारकाधिकारे शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयते इति। तेनाधारोऽधिकरणमित्यत्र शब्दसामर्थ्यगम्यप्रकर्षानाश्रयणम्। अन्यथाऽधिक्रियतेऽनेनेति अधिकरणमिति व्युत्पत्त्यैवाधारत्वे लब्धे आधारग्रहणसामर्थ्यात् प्रकृष्टस्याधारस्यैवाधिकरणसंज्ञा स्यात्। तेन सर्वावयवव्याप्त्या य आधारस्तत्र तिलेषु तैलम्, दध्नि सर्पिरित्यादावेवाधारसंज्ञा, सप्तमी च स्यात्। गङ्गायां घोष इति गौणाधारे सप्तमी न स्यात्। इष्यते च तत्रापि। एवं महासंज्ञासु क्वापि शब्दसामर्थ्यगम्यप्रकर्षाश्रयणम् क्वापि च तदनाश्रयणम् इत्यनियमोऽपि पाणिनीयतन्त्रस्य महादोषः। सर्वनामस्थानप्रातिपदिकप्रभृतिसंज्ञाशब्देषुनाश्रिता काप्यन्वर्थता। सर्वनामसंज्ञादौ चाश्रिता। सर्वनामस्थानप्रातिपदिकेत्यादावन्वर्थतानाश्रयणे न तथा दृश्यते किमपि ज्ञापकं प्रमाणं यथाऽधिकरणमित्यादौ तथापि तत्रान्वर्थतानाश्रयणमित्यत्र कारणमीश्वर एव जानाति।

१२—यदि चोच्यते 'यन्न व्येति' अर्थात् न परिवर्तते इत्यव्ययम् इत्यन्वर्थसंज्ञाद्वारा सर्वत्र लिङ्गवचनविभक्तिषु समानरूपतां ज्ञापयितुमव्ययसंज्ञा विधीयते। यदि तादृशी संज्ञा न विहिता स्यात्, तदा के शब्दाः सर्वलिङ्गवचनविभक्तिषु समानरूपा; के च परिवर्तनशीला इत्येतादृशस्य शब्दविभागस्य ज्ञानं वैयाकरणस्य न स्यात्। एवं परस्मैपदम् इति महासंज्ञया ज्ञायतेः—परस्य कृते अर्थात् परगामिनि क्रियाफले गम्यमाने येषां तिबादि-मसन्तानां प्रयोगः क्रियते, तेषां परस्मैपदमिति संज्ञा भवतीति। तङां तु आत्मनेपदमिति संज्ञास्ति अतः यत्र क्रियाफलं कर्तृगामि भवेत्, तत्रात्मनेपदं यत्र च परगामि भवेत् तत्र परस्मैपदमिति प्रयोगनियमज्ञानयोभयसंज्ञाकरणमावश्यकम्। तेन यज्ञफलस्य कर्तृगामित्वे यजते, परगामित्वे यजतीति प्रयोगव्यवस्था तत्तत्संज्ञयैव सिद्ध्यति। सूदकर्तृकपाके पचतीति, स्वयंपाकि-कर्तृकपाके 'यजते' इति च सूपपद्यते।

एवमेव सर्वस्मै नाम्ने यः प्रयुज्यते स शब्दः सर्वनामेत्युच्यताम्। सर्वेषां नाम्नां स्थाने आपन्नप्रयोगशक्तयः शब्दाः सर्वनामेतिपरिज्ञानाय सर्वनामसंज्ञा विधानमिति, तदपि न समीचीनम् सर्वनामस्थानसंज्ञादिषु तादृशस्य कस्यापि तर्कस्य कल्पनाऽसम्भवात्। यदि सर्वनामाव्ययादिसंज्ञावत् सर्वनामस्थानसंज्ञायाः निर्वचनं क्रियते तदा सर्वेषां नाम्नां स्थानेऽर्थात् प्रकृतित्वे या विभक्तयः सम्भवन्ति ता एव सर्वनामस्थानसंज्ञका भवितुमर्हन्ति तथा च 'शि' सर्वनाम-

स्थानं न भवितुमर्हति स्त्रियां पुंसि वा तदविधानात्। सुः औडपि च सर्वनामस्थानं नोच्येताम् दाराः आपः इत्यादौ तयोरदर्शनात्।

किंच न व्येति इत्यव्ययलक्षणं प्रत्येकेत्याद्यव्ययीभावेऽव्याप्तम्। तृतीयापञ्चमीसप्तमीविभक्तिषु प्रत्येकेन प्रत्येकस्मात् प्रत्येकस्मिन् इत्यादौ विकारदर्शनात्। सर्वनाम्नोऽपि तल्लक्षणम् अतिव्याप्तम् आत्मशब्दे, तस्य स्वशब्दवत् सर्वेषा नाम्नां स्थाने प्रयोगदर्शनात्। द्वि-प्रभृतिशब्दानां द्विवचनमात्रप्रयौगविषयाणां सर्वेषां नाम्नां प्रातिनिध्येन प्रयोगाभावात् उक्तलक्षणस्याव्याप्तिदोषदुष्टत्वमपि।

यदुच्यते परस्य कृते परस्मैपदम्, कर्तुरात्मगतफलत्वे आत्मनेपदमिति तदपि न शोभनम्, उभयपदिनां स्वरितञितां धातूनां कर्तृगामिनि परगामिनि च क्रियाफलत्वे आत्मनेपदपरस्मैपदव्यवस्थासम्भवेन तादृशबोधे गृहीते दोषाभावेऽपि अन्यत्र तथा स्वीकारे दोषसहस्रमापद्येत। भावे कर्मणि च लकारे कर्तृगामिनि परगामिनि च क्रियाफले सर्वत्रात्मनेपदस्यैवेष्टत्वात्। तत्र परस्मैपदात्मनेपदयोरुक्तान्वर्थत्वस्यासंघटनात् तथा स्वीकारे सर्वत्र दोषापत्तिः। केवलपरस्मैपदप्रयोज्यधातुषु जुहोतीत्यादिषु कर्तृगामिक्रियाफलेऽपि जुहोमीत्यादीनामेव साधुत्वेन परस्मैपदस्यैवेष्टत्वात्। 'विरमति' इत्यादौ कर्तृगामिक्रियाफलेऽपि परस्मैपस्यैव च दर्शनात् उक्तार्थाङ्गीकारेऽव्याप्तिः। 'राजा शत्रून् जयति विजयते वा" इत्यादौ क्रियाफलगतवैशिष्ट्याभावेऽपि उपसर्गादिकृतपदवैशिष्ट्यस्य सुवचत्वं त्वया कथमपि नोपपादयितुं शक्यम्। आत्मनेपदपरस्मैपदयोस्तादृशनिर्वचनभ्रान्ता एव छात्राः 'भाररूपकर्तृभिन्नगामिफलत्वे किन्ते भारो बाधति "इतीदृशमशुद्धं प्रयुञ्जाना" "**भारो न बाधते राजान् यथा बाधति बाधते इत्येतादृशोपहासभाजनतां गच्छन्ति।**" यद्यप्यात्मनेपदविधायकानि आङोयमहनः इत्यादीनि बहूनि एतादृशानि सूत्राणि सन्ति, यानि स्वाङ्गकर्मकाणामेव धातूनामात्मनेपदं विदधति। अतः 'परस्य शिर आहन्ति' इत्यादावात्मनेपदं न भवति, तथापि नायं सर्वत्रात्मनेपदप्रयोगनियमः। परस्मैदस्यान्वर्थत्वं तु स्वस्य शिरः हन्तीत्यादौ सर्वत्र व्यभिचरत्येव। पाणिनीयव्याकरणस्यच्छात्राः पृच्छन्ति फलसमानाधिकरणव्यापारवाचकाः सर्वे अकर्मकाः प्रायः कर्तृगामिफलवन्तः कथं नात्मनेपदिनः? 'उत्तिष्ठति रामः पाठात् 'जवेन पीठादुददिष्ठदच्युतः' 'जरा जर्जरिते शरीरे व्याधिरुत्तिष्ठते, 'उत्तिष्ठमानस्तु परोनोपेक्ष्यः पथ्यमिच्छता' इत्यादौ क्रियाफलस्य कर्तृगामित्वाविशेषेऽपि पदविशेषव्यवस्था भवन्मते नोदयेत।

किंच परस्मैपदमात्मनेपदमित्यत्र 'पद' शब्दप्रयोगोऽपि न युज्यते; तथाहि तिबादेः परस्मैपद (लः परस्मैपदम् पा० १।४।९९) संज्ञा, 'तादेश्चात्मनेपदसंज्ञा (तङानावात्मनेपदम् (पा० १:४।१४०) क्रियते। 'भवति' घटकः तिप्-प्रत्ययः 'वर्तते' घटकः 'त' प्रत्ययश्च न पदम्, 'सुप्तिङन्तं (पा० १।४।१४) पदमिति स्वयमुक्तस्य लक्षणस्यात्रासंगमनात्। परस्मैक्रियाफलाय प्रयुज्यमानं पदं यजतीति सम्पूर्णं वर्तते, न तस्य भवद्भिः परस्मैपदसंज्ञा विधीयते, यस्य च तिपः विधीयते सा, न स पदम्। अतएव प्राचीनव्याकरणे परस्मैभाषा आत्मनेभाषेति नाम कृतं दृश्यते। धातुपाठे परस्मैभाषात्मने भाषेति शब्दः प्रयुक्तः। 'वैयाकरणाख्यायां चतुर्थ्याः' पा० ६।३।७ 'परस्य च' ६।३।८ इत्यनयोरुदाहरणरूपेण आत्मनेभाषापरस्मैभाषेत्यपि दत्तम्।

इत्थं न केवलमनयोरन्वर्थताश्रयणं भ्रान्तिजनकं नामकरणमपि स्वसूत्रार्थाननुकूलम्।

भवतु नाम नदीशब्दस्य नदीसंज्ञा। मतिशब्दस्य वैकल्पिकनदी संज्ञा, सापि ङिति विभक्ताविति कस्मैचिदपि युक्तिदर्शिने न रोचते, निराधारत्वात्। अस्मिन् शास्त्रे यदि सर्वत्र स्वकृतया संज्ञया व्यवहारः स्यात् तदापि

स्यात् किमपि सामञ्जस्यम् किन्तु यदा '[1]नदीभिश्च' 'नदीपौर्णमास्याग्रहायणीभ्यः' विशिष्टलिङ्गो नदीदेशोऽग्रामाः इत्यादौ नदीशब्दस्य सरितार्थे प्रयोगो दृश्यते तदा विचिकित्सातीव वर्धते ।

केचित् प्राचीनव्याकरणे नद्यादिगणः प्राय आसीत् । तद्गणपठिताः शब्दा नदीसंज्ञया पाणिनिनाऽख्याताः । टिवुभादिसंज्ञावत् लवुसंज्ञांविहाय नदीदृशपुष्टशरीरसंज्ञाकरणे एतदेव मूलमित्याहुः भवतु नाम नदीसंज्ञा करणे किमपि मूलम् परन्तु तादृशीं संज्ञां विधायाऽत्रैव शास्त्रे स्थाने स्थाने तत्संज्ञाया बोधपरिहाराय अर्थग्रहणाय च बहुवचननिर्देशादिप्रयासः गौरवावह एव ।

१३—पञ्चन् षष् सप्तन्नष्टन् नवन् दशन् इतीमे शब्दाः षट् सन्ति अतः एषां षट् संज्ञाकरणं समूलम्[2] परन्तु षड्भ्यो लुक् (पा० ७।१।२२) इत्यत्र बहुवचनं शैलीविरुद्धम् । पाणिनिना संज्ञाशब्दात् प्रायः एकवचनस्यैव प्रयोगः क्रियते । यथा 'घेर्डिति' (पा० ७।३।१११) 'आण् नद्या' (पा० ७।३।११२) वृद्धि रेचि ६।१।८८ इत्यादौ । अतः षड्भ्य इत्यत्र बहुवचननिर्देशः सूत्ररचनाशैलीविरुद्ध इत्यपि संज्ञासूत्रकरणे दोषः । किंच 'जक्षित्यादयः षट्' (पा० ६।१।६) ष्णान्ताः षट् (पा० १।१।२४) इत्युभयत्र षट्शब्दः प्रयुक्तः । एकत्र स जक्षित्यादय इत्यस्य विशेषणम् उद्देश्यकुक्षिप्रविष्टः, उत्तरत्र संज्ञाबोधकः विधेयमध्यगत इति पार्थक्यसाधनायापि व्याख्याविशेषः आश्रयितव्यः ।

१४—'वोतो गुणवचनाद्' (पा० ४।१।४४) इत्यादौ गुणसंज्ञकस्य ग्रहणवारणाय वचनग्रहणमपि कर्त्तव्यं भवति । इत्थं संज्ञां विधाय तद्वारणप्रयासापेक्षया तदकरणमेव श्रेयः । "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।"

१५—संज्ञा-करणे यत्रैकया संज्ञया बहूनां संज्ञिनां ग्रहणं भवति तत्र संज्ञाशब्देन विधौ सर्वे संज्ञिनोऽहमहमिकया पृथक् पृथक् प्राप्ता भवन्ति, तत्रेष्टस्य संज्ञिनो विधानायान्येषां च निवारणाय दीर्घप्रपञ्च आश्रयणीयो भवति । यथा 'ओर्गुणः' 'पा० ६।४।१४६) इत्यनेन गौरवम् इत्यत्र गुरुशब्दगतान्त्योकारस्य अत् एकार ओकरश्च प्राप्यन्ते तत्रौकारस्य विधानाय अकोरैकाररूपस्य च गुणस्य निवृत्तये स्थानेऽन्तरतम इति सूत्रं प्रवर्तनीयं भवति । एवं सार्वधातुकार्धधातुकोरित्यनेन चेता स्तोता इत्यादौ इकारस्य स्थाने एकाररूपस्य उकारस्य स्थाने ओकाररूपस्य गुणस्य व्यवस्थार्थं तत्तत्सूत्रपरिभाषादिकमाश्रयणीयं भवति । करोतीत्यादौ ऋकारस्य स्थाने तस्य अकारेणादेशेन एकारौकाराभ्यां चादेशाभ्यां स्थानप्रयत्नसाम्याभावात् आनन्तर्याभावात् तस्य स्थाने नाकारः, नवा एकारो नचौकारो वा गुणो भवितुमर्हति । तत्रैष निर्णयः क्रियते अकारस्यादेशस्य न कोऽपि स्थानी अन्तरतमः न वा ऋकारस्य स्थानस्य कोऽपि आदेशः गुणेष्वन्तरतमः इत्यन्येन सहान्तरतमाभाव एवाऽनयोरन्तरतमभावं जनयति दग्धाश्वरथन्यायात् । एवंच ऋकारस्य स्थानेऽकारः गुणो भवतीति महता प्रयत्नेन साध्यते गुणसंज्ञां स्वीकुर्वताचार्येण अथवा अर् गुणोभवतीति मत्वा रेफस्य ऋकारेण स्थानसाम्यं विलोक्य तत्स्थाने गुणः इत्यादिनिर्णये वृथाऽऽयामः ।

ओरोदितिन्यासं विहाय ओर्गुण इतिकरणे उच्चारणकर्कशत्वम् मात्रागौरवम् प्रक्रियागौरवंच ।

१६—संज्ञाविधाने इत्संज्ञादि दोषोऽप्यापद्यते । विधीयते निष्ठा[3] संज्ञा क्तक्तवत्वोः ततश्च 'निष्ठा' (पा० ३।२।१०२) सूत्रेण क्तस्य क्तवतश्च विधानं भवति । इत्थं विधीयते निष्ठा तस्या एव उपदेशत्वम् भावघञन्तस्याद्योच्चारणार्थकोपपूर्वकदिशिक्रियानिष्पन्नस्योपदेशशब्दस्य आद्योच्चारणार्थकत्वस्वीकारात् । तच्चाद्योच्चारणं प्रत्यासत्या एतच्छास्त्रप्रवर्तकाचार्याणामेव । आद्यत्वं चात्राज्ञातस्वरूपज्ञापकत्वम् । अतएव एकाच उपदेशेऽनुदात्तात् (७।२।१०) सूत्रे कैयटेन इत्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते इति । आदेच उपदेशेऽशिति ६।१।४४ इति सूत्रेऽपि

---

१. अत्र च बहुवचननिर्देशान्न संज्ञाया ग्रहणम् नापि शब्दस्वरूपस्य शब्दसंज्ञात्वाच्च किन्तु नदीत्यर्थग्रहणम् । तेन तद्वाचके सर्वत्र प्रवृत्तिरिति नदीभिश्चेतिसूत्रे (२।१।२०) लघुशब्देन्दुशेखरे नागेशः ।

२. ष्णान्ता षट् १।१।२४ ।

३. क्तक्तवतूनिष्ठा पा० १।१।१६ ।

येषां स्वरूपज्ञानायापूर्वमुच्चारणं तेषामेवोपदेशव्यवहार इति यदुक्तं तत् सर्वम् संगच्छते। इत्संज्ञाविधौ उपदेश शब्दस्य आद्योच्चारणार्थकत्वे आदे च सूत्रे[1] उद्देशश्च प्रातिपदिकानां नोपदेभः इति, इत्संज्ञा[2] सूत्रे प्रत्यक्षमाख्यानमुपदेश इति भाष्यमपि प्रमाणम्। एवंच उपदेशेऽजनुनासिक इत् (पा० १।३।२) इति सूत्रभाष्यारीत्या 'निष्ठा' (३।२।१०२) लृटः सद् वा (३।३।१४) इति विहितानां क्तक्तवतुशतृशानचामनुबन्धानामित्संज्ञा न सम्पद्यते। निष्ठायाः सतश्चाद्योच्चारणसत्वेऽपि तत्संज्ञाद्वारा विहितानां तत्तत्प्रत्ययानामुदेशत्वाभावात्। यदि च तत्रेत्संज्ञासम्पादनायेत्-संज्ञासूत्रे पठितस्योपदेश शब्दस्य करणघञा सिद्धिः क्रियते। करणे बाधकस्य ल्युटो बाध्येन घञा बाधाय अगतिकगतिम् बाहुलकंचाश्रीयते तदा पाणिनितन्त्रे प्रयुक्तस्योपदेशशब्दस्य व्युत्पत्तिद्वयस्वीकारात् एकरूपत्वभङ्गः अर्धजरतीयत्वं चायाति। किंच सेट् (नक्त्वा सेट् पा० १।२।१८) निष्ठा किन्नेत्युच्यते सेटि (निष्ठायां सेटि पा० ६।४।५२) निष्ठायां परीभूतायां णिलोप उच्यते तत् सर्वं न सम्भवति, यतो हि निष्ठासंज्ञा अनुबन्धविशिष्टस्य क्तस्य क्तवतश्च विधीयते। अनुबन्धविनिर्मुक्तस्य च तस्य इट् भवति यस्येट्, तस्य न निष्ठा संज्ञा, यस्य च निष्ठा संज्ञा, तस्य नेट्, इत्थं निष्ठा सेट् इति परस्परविरोधिनोः सामञ्जस्यं भज्यते संज्ञासूत्रस्वीकारे। किंच इत्संज्ञा सूत्रेऽपि एकाच उपदेशे ७।२।१० आदेच उपदेश इत्यादाविवोपदेशशब्दस्य भावसाधनत्वस्वीकार एव भाष्यस्वारस्यम् दृश्यते। अतएव तस्मिन्निति निर्दिष्टे पूर्वस्य १।१।६६ इति सूत्रे षष्ठीप्रकल्पकत्वं तस्येति पक्षे गुप्तिज्किद्भ्यः सन् ३।१।५ इत्यादावपि षष्ठीप्रकल्प्त्यापत्तिः। न च सनः सनेवाऽदेशो भविष्यतीति बाधकाभाव इति वाच्यम् उपदेशे इत्युच्यमाना इत्संज्ञा न प्रकल्पेत इत्युक्तं भाष्ये तथा चोपदेशपदस्याद्योच्चारणपरत्वे निश्चिते 'निष्ठा' 'लृटः सद्वा' इत्यादिसूत्रैः विहितानां तत्तत्प्रत्ययानामित्संज्ञाऽभावापत्तिः संज्ञासूत्रविधानेऽपरिहार्यो दोषः।

१७—प्रातिपदिकमिति संज्ञा क्रियते पाणिनिना। एतादृश्याः महत्याः संज्ञायाः करणे किमपि प्रयोजनं न पश्यति चन्द्राचार्यः। यास्कः गवादिशब्दं नामेति निजगाद। पाणिनिना यत् प्रातिपदिकं प्रोक्तम् तन्नाम्नो नातिरिच्यते[3]। फिटसूत्रकारेण प्रातिपदिकस्य स्थाने फिट् शब्दः प्रयुक्तः। पाणिनिना यद्यपि प्रातिपदिकस्य स्थाने फिट्-शब्दः प्रायो न प्रयुक्तस्तथापि नामशब्दः पाणिनितन्त्रे दृश्यते प्रयुक्तः[4]। 'सर्वनाम' शब्देऽपि घटकत्वेन नामैव प्रयुज्यते। नामशब्दश्च Nown प्रभृतिना व्याकरणान्तरप्रयुक्तेन शब्देनाधिकं संवदतेऽतः सर्वत्र नाम शब्द एव प्रयोक्तव्यः। क्वचिन्नाम्ना व्यवहारः क्वचिच्च प्रातिपदिकेनेत्यत्र प्रयोजनविशेषं विचारं विचारमप्यपश्यन् चन्द्राचार्यः प्रातिपदिकशब्दप्रयोगं जहौ।

डा० रमाशङ्करभट्टाचार्येण यदुच्यते अन्वर्थतारहिताः सर्वा महासंज्ञाः पाणिनिना प्राचीनव्याकरणेभ्यो गृहीता इति, नानेन महासंज्ञाकरणजन्यगौरवापराधः क्षालितो भवति। अनुकरणं शिष्टाप्रतिषिद्धमेवानुकरणीयं भवति। नीरक्षीरविवेकबुद्धया सारभूतस्य निर्दुष्टस्यैव पदार्थस्यादानं प्रशस्यते अन्यदीयाया महासंज्ञाया निःसाराया ग्रहणे अविमर्शकारिता दोषः।

---

१. ६।१।४५।
२. उपदेश इति किम् 'अभ्र आं अपः' कः पुनरुद्देशोपदेशयो विशेषः। प्रत्यक्षमाख्यानमुपदेशः गुणैः प्रापणमुद्देशः। उपदेशेजनुनासिक इत् सूत्रभाष्यम्।
३. यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते। शब्दशक्तिप्रकाशिका १४।
४. यथेष्टं नामधातुषु (वा० सि० प्रत्ययमालाप्रकरणम्)।

१८—संज्ञानामकरणेऽव्यवस्थाऽपि दृश्यते । तद्यथा, यदि धातुप्रत्ययप्रत्ययान्ततदादिभिन्नस्यार्थवच्छब्दस्वरूपस्य कृदन्ततद्धितान्तसमासानां च प्रातिपदिकसंज्ञा क्रियते प्रातिपदिकस्थानापन्नशब्दानां कृते सर्वं प्रातिपदिकमित्याद्येवोचितम् । परन्तु दृश्यते नाम्नः स्थाने प्रातिपदिकस्य प्रयोगः सर्वादिशब्दानां कृते सर्वनामेति प्रयोगः । उभयत्र समरूपतायै पाणिनितन्त्रे प्रातिपदिकम् सर्वप्रातिपदिकम् इति, नाम सर्वनामेति वा प्रयुक्ताभ्यां भवितव्यम्, न च तथा दृश्यते । अतोऽव्यवस्थेयमपि पाणिनेः संज्ञा प्रणयने दोषः ।[1] पाणिनितन्त्रे क्वचित् प्रातिपदिकम् क्वापि च नामेति प्रयुज्यते ।

१९—पाणिनिव्याकरणे ह्रस्व[2]दीर्घौ संज्ञे स्तः । तौ उद्देश्यीकृत्य लघुगुरुसंज्ञे (ह्रस्वं लघुः' पा० १।४।१० संयोगे गुरुः 'दीर्घंच' पा० १।४।११-१२) च विहिते । ह्रस्वदीर्घसंज्ञाभ्यामेव अथवा लघुदीर्घसंज्ञाभ्यामेव निर्वाहे सिद्धे उभययुग्मकरणं व्यर्थम् । विधिसूत्रेषु ह्रस्वदीर्घसंज्ञे प्रायः विधेयरूपेण प्रयुक्ते, लघुगुरुसंज्ञे चोद्देश्यरूपेणेति विषयविभागेऽपि न कमपि प्रयोजनविशेषं पश्यामः ।

२०—किंच पाणिनेः संज्ञाः अवर्गीकृता अस्तव्यस्ता च वर्तन्ते । तासामव्यवस्थितमवस्थानं दृष्ट्वा चन्द्राचार्येण ज्ञातं यदाचार्यस्य मानसे संज्ञानां निर्माणे कापि पूर्वसुनियोजिता योजना नासीत् । संज्ञायाः किमपि प्रकरणं नास्ति । अतएव संज्ञाप्रकरणात् प्राक् संज्ञाधिकारो न कृतः । कर्तुमशक्यश्च संज्ञाधिकारः, एकत्र प्रकरणे संज्ञासूत्राणामग्रन्थनात् । दूषणमिदं पतञ्जलिदृष्ट्यगोचरीभूतं नासीत् । अतः संज्ञाधिकरस्य करणीयत्वमाशङ्क्य तस्य कर्तुमशक्यत्वं प्रतिपादितं अष्टमेऽपि हि संज्ञा क्रियते 'इत्यादिना ग्रन्थेन[3] । संज्ञाधिकारं विनाऽपि संज्ञायाः प्रतीतिसाधनाय महाभाष्यकरेण कियान् बुद्धिव्यायामः कृत इति को न वेत्ति । संज्ञाध्यायस्याऽभावः, तस्याः अवैज्ञानिकं यत्र कुत्रचिदवस्थानं च पाणिनीयव्याकरणस्य महती त्रुटिः । सूक्ष्मदृष्ट्या विवेचने कृते पाणिनिसंज्ञानां वर्गीकरणस्य हेतुद्वयं 'शब्दः अर्थश्च' भवितुमशकत् । अथवा आधेयः आधारश्च । काश्चिच्छंज्ञाः शाब्द्यः काश्चिच्चार्थ्यः । तद् यथा वृद्धिगुणादिका संज्ञा शब्दी लोपविभाषादिसंज्ञा चार्थी । अतः आत् एच्छब्दस्य वृद्धिसंज्ञा विधीयते, अदर्शनार्थस्य नवेत्यनयोरर्थस्य च लोपविभाषादिसंज्ञा विधीयते । एवमेव कापि संज्ञा आधारस्य भवति कापि चाधेयस्य । यथा टिघुभादिसंज्ञाः सर्वदोद्देश्यकुक्षिप्रविष्टाः । अतएवोद्देश्यसंज्ञा इमाः । विधेयस्य कस्यापि कार्यस्याधारीभूता आधारसंज्ञा उच्यन्ते । घेर्ङिति (पा० ७।३।१११), अच्च घेः (पा० ७।३।११९), भस्य टेर्लोपः (पा० ७।१।८८), नेर्गद (पा० ८।४।१७) इत्यादिभिर्विधीयमानानि कार्याणि टि-घु-भ-संज्ञाआधृत्य जायन्ते । गुणलोपादिसंज्ञाः सर्वदा विधेया एव । अतएव आधेया इमाः । इतीदृशमाधारमादाय यदि संज्ञासूत्राणां क्रमिकसन्निवेशः क्रियेत (अथवा शाब्दीनां संज्ञानां प्रथमतः आर्थीनांच ततोनिवेशो विधीयेत) तदा काऽपि व्यवस्था स्यात्, किन्तु संज्ञासूत्राणां नास्ति किमपि प्रकरणं, न वा किमपि सकारणं वर्गीकरणम् । तथाहि दृश्यतां संज्ञा-सूत्राणामव्यवस्थितत्वम् :—

संज्ञासूत्राणां प्रारम्भः वृद्धिरादैजितिसूत्रात् क्रियते । वृद्धिसंज्ञासूत्रानन्तरं गुणसंज्ञासूत्रम् 'अदेङ् गुणः' वर्तते । ततः परं संज्ञासूत्रं नास्ति किन्तु परिभाषासूत्रम् 'इको गुणवृद्धी' इति वर्तते । इत्थं क्रमभङ्गो जातः । एतत्सर्वं दृष्ट्वा प्रतीयते मुनिः पाणिनिः तदनुयायिनोऽन्ये च पाणिनीयवैयाकरणाः संज्ञापरिभाषयो र्मध्ये किमपि मौलिकमन्तरं

---

१. सर्वप्रातिपदिकेभ्यः किब्वा वक्तव्यः (वा० ना० धा० प्र०) यथेष्टं नामधातुषु (वा० सि० कौ० प्रत्ययमालाप्रकरणम्) ।

२. ऊकालोऽज्झ्रस्वदीर्घप्लुतः १।२।२७ ।

३. महाभाष्यम् १।१।१ ।

विलोकयितुमक्षमा एवाभवन्। सरस्वतीकण्ठाभरणकारेण यथा परिभाषासूत्राणाम् एकत्र पृथक्स्वतन्त्रे चरणे निवेशः कृतः न तथा पाणिनिना। तेन तु संज्ञा[1] परिभाषोभयविधानि निषेधातिदेशसूत्राणां च यथेच्छं संमिश्र्य विरचितानि। मन्ये, संज्ञापरिभाषाविषये वर्तमाना सन्ति बहवो धर्माः समानाः। अतः एकत्रान्यस्या भ्रमो जायते, यथा संज्ञाविषये यथोद्देश्यकार्यकालौ द्वौ पक्षौ भवतस्तथा परिभापाविषयेऽपि। उभे अपि विधिशास्त्रोपकारिके स्तस्तथापि व्यवहारत उभे भिन्ने, विधिसूत्रप्रवृत्तौ उपस्थितस्याऽनियमस्य स्थाने नियमसम्पादिका परिभाषा, विधिसूत्रेषु प्रयुक्त-शास्त्रीयशब्दशक्तिग्रहनिर्णायकं सूत्रं च संज्ञासूत्रम् इति विषयविभागस्य पाणिनीयैः प्रदर्शितस्य रक्षार्थमुभय-विधसूत्राणां यथापृथगध्यायावस्थानत्वमुचितं न तथाऽत्र दृश्यते। प्रकरणसाङ्कर्यादेवापृक्तसूत्रविषये कैय्यटनागेशयोः संज्ञापरिभाषासन्देहः। कैयटः 'अपृक्त एकाल' सूत्रं परिभाषासूत्रं मेने, नागेशश्च संज्ञासूत्रम्[2]।

अस्मिन्नध्यायेऽत्र पादे चतुर्थं पञ्चमंषष्ठं च सूत्रम् गुणवृद्धिनिषेधकमस्ति[3]। अत्र प्रकरणे निषेधसूत्रोल्लेखः नोपयुज्यते। एभिः सूत्रैर्यदि गुणवृद्धिसंज्ञा प्रतिषिध्येत तदापि किमपि समाधानं स्यात् परन्त्विमानि गुणवृद्धिविधित्व-निषेधकानि सन्ति। नेदानीम् गुणवृद्धिविधायकानि सूत्राणि पाणिनिना विरचितानि। अतः एषां संज्ञासूत्रान्तःपातित्वं न केवलं गड्डुभूतम् किन्तु विधिं बिना निषेधानुपपत्याऽसंगतमपि।[4]

निषेधसूत्रानन्तरं पुनः (हलोऽनन्तरासंयोगः १।१।७, मुखनासिकावचनोऽनुनासिकः १।१।८, तुल्यास्यप्रयत्नं सवर्णम् १।१।९) इति० संयोगानुनासिकसवर्णसंज्ञाविधायकं सूत्रत्रयमस्ति। ततश्च सवर्णसंज्ञानिषेधकं नाज्झलौ १।१।१० इति सूत्रं प्रस्तुतवान् पाणिनिः। सवर्णसंज्ञानन्तरम् प्रगृह्यसंज्ञाप्रकरणमारभ्यते[5] प्रगृह्यसंज्ञासूत्रेभ्यः परं घुसंज्ञा[6] घ[7] संज्ञयोः सूत्रयोर्मध्ये अतिदेशसूत्रम् (आद्यन्तवदेकस्मिन् १।१।२१) इति निर्मीयते। संज्ञासूत्रयो र्मध्ये ऽतिदेशसूत्रविन्यासस्य विचार्यापि किमपि कारणं नैव दृश्यते। अत्रैवाध्याये संख्या[8] षट्[9] निष्ठा[10] सर्वनाम[11] १।१।२५) संज्ञाकारकाणि सूत्राणि सन्ति। ततः स्वरादिनिपातमव्ययम् १।१।३७ इत्यादिना अव्ययीभावश्च १।१।४१) इत्यन्तेन सूत्रपञ्चकेन अव्ययसंज्ञा विधीयते। द्वाभ्यां सूत्रा[12]भ्यां सर्वनामस्थान संज्ञां विधाय विभाषा[13] सम्प्रसारणेति संज्ञा द्वयं विधीयते। विभाषा संज्ञा आर्थी संज्ञाऽस्ति। न वेत्यर्थयो निषेधविकल्पयोस्तद्विधानात्। सम्प्रसारणसंज्ञा-

---

१. वृद्धि रादैच् १।१।१ अदेङ् गुणः १।१।२ इको गुणवृद्धी १।१।३।
२. कैयटः 'अपृक्त एकाल' सूत्रम् परिभाषा सूत्रं मन्यते (१।१।१ महा० प्र०) तत्रैवोम् द्योते नागेशः।
३. न धातुलोपार्धके १।१।४ क्ङिति च १।१।५ दीधीवेवीटाम् १।१।६।
४. प्राप्तौ सत्यां निषेधः इति पाणिनीया गुरवश्छात्रान् शिक्षयन्ति परन्तु पाणिनीये तन्त्रे प्राप्तिसूत्रे-ष्वसत्स्वपि निषेधसूत्राणि दृष्ट्वाऽपि ते किमपि न शङ्कन्ते, महच्चित्रम्।
५. ईदूदेद् द्विवचनं प्रगृह्यम् १।१।११—ईदूतौच सप्तम्यर्थे १।१।१९।
६. १।१।२०।
७. १।१।२२।
८. बहुगणवतुडति संख्या १।१।२३।
९. ष्णान्ता षट् डति च।
१०. क्तक्तवतू निष्ठा १।१।२६।
११. सर्वादीनि सर्व नामानि १।१।२७ अन्तरं बहिर्यो० १।१।३६।
१२. १।१।४२-१।१।४३।
१३. १।१।४४-१।१।४५।

व्यर्थस्यैव भवति। काशिकाकारेणापि अर्थस्यैषा संज्ञेतिस्वी[1] कृतम्। भर्तृ[2]हरिः सम्प्रसारणसंज्ञाशब्दार्थोभयसंज्ञां सम्भावयति, इयं शब्दस्य संज्ञार्थस्येति सन्देहस्य कारणम् संज्ञासूत्राणां निर्मूलोऽक्रमोविन्यासः। नवेतिविभाषासूत्र-सान्निध्यात् यथा अर्थस्य संज्ञा संभाव्यते तथा आद्यन्तौ टकितौ (१-१-४५) इति सूत्रपूर्ववर्तित्वाच्छब्दस्येयं संज्ञा संदिह्यते। यदि सर्वाः शब्दगता अर्थगताश्च संज्ञाः सक्रमेकैकप्रकरणे विन्यस्ताः स्युः नैतादृशः सन्देह उद्भवेत्।

सम्प्रसारणसंज्ञायाः पश्चात् दश आगमादेशसम्बद्धानि सूत्राणि[3] विरच्य प्रकरणमिदं पुनः खण्डितं भवति। अत्रैवातिदेशसूत्रद्वयं (स्थानिवदादेशोऽनल्विधौ १।१।५६ अचः परस्मिन् पूर्वविधौ १।१।५७) तन्निषेधकं सूत्रद्वयं (न पदान्त० १।१।५८ द्विर्वचनेऽचि १।१।५९) च विरच्यते। अतः परं लोपसंज्ञा विधीयते। लोपसंज्ञाह्यर्थस्य संज्ञा। लुक्श्लुलुपः संज्ञा अपि तथैव। अत्रैवार्थसंज्ञाप्रकरणे टिसंज्ञोपधा संज्ञा चारच्येते। इमे संज्ञे शब्दसंज्ञे। अतः अर्थ-संज्ञातः प्रागारब्धव्ये। किंच वृद्धिगुणसंज्ञादिवत् लोपसम्प्रसारणादिसंज्ञा आधेयसंज्ञाः सन्ति टिसंज्ञोपधासंज्ञे तु घुसंज्ञावदाधारसंज्ञा। अतः उभयोरचनायां सन्दर्भ-भेदोऽपेक्षितोऽत्रोपेक्षितः।

प्रथमाध्यायस्य प्रथमपादान्ते वृद्धि र्यस्याचामादिस्तद् वृद्धम् १।१।७३ त्यदादीनि च १।१।७४, एङ् प्राचां देशे १।१।७५ इतिसूत्रैर्वृद्धिसंज्ञाविहिताऽस्ति। वृद्धसंज्ञापि टुयुपधासंज्ञावदाधारसंज्ञाऽस्ति अतः ताभ्यां सहैवाऽस्या अपि संज्ञाया अवस्थितिर्युक्ता ताभ्यां सहास्य अविन्यासश्चिन्त्य एव।

इत्थं प्रथमाध्यायस्य प्रथमपादे संज्ञासूत्राणां विन्यासे वर्तमानाया अस्तव्यस्तताया: प्रदर्शितेनानेनाभासमात्रेण पाणिनिकृतस्य संज्ञासूत्रप्रकरणस्य दोषयुक्तत्वं स्पष्टम्।

प्रथमाध्यायस्य द्वितीपे पादेऽपि संज्ञा क्रियन्ते। अस्याध्यायस्यारम्भे प्रत्ययेषु ङित्वादिक[4]मतिदिश्यते ततः पुनः संज्ञाप्रकरणमारभ्यते संज्ञाप्रकरणयोः मध्ये एषामतिदेशसूत्राणां तृतीयाध्यायगोचरप्रत्ययानुद्दिश्य विहितान्य-धर्मस्यान्यत्रारोपकाणां तृतीयाध्याये समुपयुक्तपाठानां विन्यासो निष्प्रयोजनः प्रक्रमभङ्गदूषणदूषितश्च। प्रदीपोद्योतटीके अपि दोषमिमं ददर्शतुः। किम् पाणिनिः संज्ञातिदेशयोः पार्थक्यं न विवेद। अथवा विदित्वाऽपि पूर्वयोजनाभावादेतादृशं दूषणमकरोत्? यदि चातिदेश आरोपितसंज्ञा एवेत्युच्यते तर्हि अतिदेशसूत्राण्येव संज्ञासूत्रस्थाने रचितव्यानि। अत्र प्रकरणे ऊकालोऽज्झ्रस्वदीर्घप्लुतः १।२।२७—उदात्तस्वरितपरस्य सन्नतरः १।२।४० इति ह्रस्वादिसंज्ञाः विधीयन्ते। इमाः संज्ञाः शब्दसंज्ञाः। अतः वृद्धिप्रभृतिसंज्ञाप्रकरणे एव ता विन्यसनीयाः। अत्रत्य एषां विन्यासः क्रमभङ्गत्वसूचकः।

अतः परम् अपृक्तसंज्ञायाः अपृक्त एकाल् प्रत्ययः १।२।४१ इति प्रत्ययमुद्दिश्य विहितायाः अतएव प्रत्यया-ध्याये विन्यसनीयाया विधानमस्ति।

तदनन्तरं (तत्पुरुषः सामानाधिकरणः कर्मधारयः १।२।४२, प्रथमानिर्दिष्टं समास उपसर्जनम् १।२।४३—अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५ कृत्तद्धितसमासाश्च १।२।४६) कर्मधारयोपसर्जनप्रातिपदिकसंज्ञाः सन्ति। ततः पश्चात्पादसमाप्ति यावत् (ह्रस्वोनपुंसके प्रातिपदिकस्य १।२।४७, जात्याख्यायामेकस्मिन् बहुवचनमन्यतर-स्याम्, सरूपाणामेकशेष एकविभक्तौ १।२।५८ १।२।६४) इत्यादिह्रस्व-बहुवचनैकशेषादिविधायकानि सूत्राणि सन्ति। सर्वत्र मध्येसंज्ञासूत्रमन्यविधसूत्रसद्भावः स्पष्टः तेन सर्वत्र क्रमभङ्गो दोषः।

---

१. वाक्यार्थः संज्ञी काशिका १।१।४५।

२. उभयथा ह्याचार्येण शिष्याः प्रतिपादिताः केचिद्वर्णस्य केचिद्वाक्यस्य १।१।४५ सूत्र महाभाष्यदीपिका टीका।

३. आद्यन्तौ टकितौ १।१।४६ मिदचोऽन्त्यात् परः १।१।४७ एच् इग्घ्रस्वादेशे १।१।४८ षष्ठी स्थाने-योगा। १।१।४९ स्थानेऽन्तरतमः १।१।५० उनण् रपरः १।१।५१ अलोन्त्यस्य १।१।५२ ङिच्च १।१।५३ आदेः परस्य १।१।५४ अनेकाल्शित् सर्वस्य १।१।५५।

४. गाङ् कुटादिभ्योऽञ्णिन्ङित् १।२।१ रलो व्युपधाद्धलादेर्लयः संश्च १।२।२६।

प्रथमाध्यायस्य तृतीये पादे पाणिनिना [1]धात्वित्संज्ञात्मनेपदपरस्मैपदावग्रहविधायकानि सूत्राणि क्रियन्ते। धातुसंज्ञासूत्रमत्र प्रथममस्ति। इत्संज्ञा सूत्रे 'उपदेशेऽजनु०' 'हलन्त्य' मिति तु पश्चाद् रचिते। तथा च उपदेश एवानुबन्धलोपस्ततो धातुसंज्ञा इति कैय्यट[2] विरोधः। किंच डुकृञ् आदिषु धातुत्वे जाते पश्चात् ककारस्य लोपे कृतेऽकार्षीत् इत्यादौ न धातुलोप इति वृद्धिनिषेधः स्यात्।

प्रथमस्यायस्य चतुर्थे पादेऽपि नदीघिलघुगुर्वङ्गपदैकवचनद्विवचनबहुवचनापादानसम्प्रदानाधिकरणकर्म प्रभृतयः निपातोपसर्गगतिपरस्मैपदात्मनेपदप्रथममध्यमोत्तमसंहिताः संज्ञाः पादान्ते चावसानसंज्ञा[3] विरच्यन्ते। अत्र द्रष्टव्यम् परस्मैपदसंज्ञा त्वत्र पादे विधीयते किन्तु आत्मनेपदपरस्मैपदोपग्रहस्य विधायकानि सूत्राणि अनुदात्तङित्-नेर्विश-व्याङ्परिभ्यो रम इत्यादीनि तृतीये पादे एव विरचितानि। आत्मनेपदसंज्ञासूत्रं तङानावात्मनेदम् परस्मैपद-संज्ञाविधायकसूत्रम् लः परस्मैपदमित्यपठित्वाऽपि पाणिनि र्यदा तङस्तिबादेश्च विधानं करोति पाणिनीयाश्च पाणिनिमुखेन तृतीयपादे सामान्यत आत्मनेपदपरस्मैपदमज्ञापितमपि ज्ञात्वेव यदा तन्तमुपग्रहं यथास्थानं विधातुं पारयन्ति तदा संज्ञाविधानस्य किम्प्रयोजमिति न विद्मः।

अतएव 'उपदेशेऽजनुनासिक इत्' १।३।२ सूत्रस्य प्रौढमनोरमायां भट्टोजिदीक्षितेन वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणतया अस्य सूत्रस्यान्तर्वर्तिनोऽनुनासिकपदार्थस्य ज्ञानस्यावश्यकत्वं प्रदर्श्य सिद्धान्तकौमुद्यां मुखनासिकावचनोऽनु-नासिक १।१।८ इतिसूत्रोपन्यासस्य प्रथमकर्तव्यतामाशङ्क्य नासिकामनुगत इति योगाश्रयणेनैवानुनासिकपदार्थबोधे सिद्धेऽनुनासिकसंज्ञासूत्रस्य मन्दप्रयोगजनत्वं प्रतिपादितं संगच्छते[4]।

---

१. भूवादयो धातवः १।३।१ उपदेशेऽजनुनासिक इत् १।३।२ हलन्त्यम् १।३।३। अनुदात्तङित आत्मपदम् १।३।१२—विभाषोपपदेन प्रतीयमाने १।३।७७ शेषात् कर्तरि परस्मैपदम् १।३।७८—लुटि च क्लृपः १।३।९३।

२. न धातुलोप आर्धधातुके १।१।३ सूत्रमहाभाष्ये धातुग्रहणं किम् लुञ् लविता पुञ् पवितेति प्रतीक-मादाय प्रदीपे लिखति कैय्यटः—

अनुबन्धो न धात्वेकदेशः यस्मादुपदेश एवेत्संज्ञा। प्रयोगे तु लू शब्द एव धातुसंज्ञः। केवल-भसौ ञित्कार्यं लभते। लूशब्दस्यैव क्रियावाचित्वमिति तस्यैव धातुसंज्ञा युक्ता।

अनेन ग्रन्थेन धातुसंज्ञासूत्ररचनात् प्रागेवेत्संज्ञालोपसूत्रयो रचना युक्ता। किंच लोप-संज्ञासूत्रं प्रथममेव कृतम् इत्संज्ञासूत्रं च पश्चात्। प्रक्रियायामित्संज्ञा प्रथमं भवति 'तस्य लोपः' इत्या-दिना इत्संज्ञामुपजीव्य लोपविधानात्, उपजीव्योपजीवकक्रमावलेहनमपि पाणिनीयतन्त्रस्य महद्दू-षणम्।

३. यूस्त्र्याख्यौ नदी १।४।३ ङिति ह्रस्वश्च १।४।६ शेषोध्यसखि १।४।७ ह्रस्वं लघु १।४।१०, संयोगे गुरुः १।४।११ यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम् १।४।१३ सुप्तिङन्तं पदम् १।४।१४ स्वा-दिष्व० १।४।१७ यचि मम् १।४।१८—ध्रुवमपायेऽपादानम् १।४।२४ भुवः प्रभवः १।४।३१ कर्मणा यमभिप्रैति स सम्प्रदानम् १।४।३२—अनुप्रतिगृणश्च १।४।४१ साधकतमं करणम् १।४।४२ चादयोऽ सत्वे १।४।५७ गतिश्च १।४।६० लःपरस्मैपदम् १।४।९९ तङानावात्मनेपदम् १।४।१०० तिङस्त्रीणि-त्रीण्येक०-विरामोऽवसानम् १।४।११०।

४. यद्यप्यत्रोपजीव्यविरोधादनुनासिकसंज्ञा प्रथमं वक्तुमुचिता, तथापि नासिकामनुगत इति योगाश्रयणेनैव गतार्थत्वात् 'अनुनासिकसंज्ञासूत्रं मन्दप्रयोजनम्' इति ध्वनयितुं नेहोपन्यस्तम्। उपदेशेऽजनुनासिक इत् १।३।२ सूत्रस्य प्रौढमनोरमा।

संज्ञासूत्राणि न केवलं प्रथमाध्यायस्य पादचतुष्टये वर्तन्ते किन्तु द्वितीयाध्यायस्य प्रथमे पादे तत्पुरुषः २।१।२२ द्विगुः २।१।२३ सख्यापूर्वो द्विगुः २।१।५२ इति सूत्रैस्तत्पुरुषद्विगुसंज्ञाः, तृतीयाध्यायस्य प्रथमे पादे सनाद्यन्ता धातवः ३।१।२२ तत्रोपपदं सप्तमीस्थम् ३।१।९२ कृदतिङ् ३।१।९३ इति सूत्रै धातूपपदकृत्संज्ञाः, चतुर्थे च तिङशित् सार्वधातुकम् ३।४।११३ आर्धधातुकं शेषः ३।४।११४ इति सार्वधातुकार्धधातुकौ च संज्ञा विहिताः दृश्यन्ते, चतुर्थाध्यायस्य प्रथमेऽपि अपत्यं पौत्रप्रभृति गोत्रम् ४।१।१६२ जीवति तु वंश्ये युवा ४।१।१६३) इति गोत्रयुवसंज्ञे षष्ठाध्यायस्य प्रथमेपादे पूर्वोऽभ्यासः ६।१।४ उभे अभ्यस्तम् ६।१।५ जक्षित्यादयः षट् ६।१।६ इतिसूत्रैर भ्यासाभ्यस्ते अष्टमस्याध्यायस्य प्रथमे तस्य परमाम्रेडितम् ८।१।२ इति आम्रेडितसंज्ञा विन्यस्ता वर्तन्ते ।

सम्पूर्णायामष्टाध्याय्यां यत्र तत्र विकीर्णानां संज्ञासूत्राणां विन्यासगतवैचित्र्यमिदं भाष्यकारस्य दृष्ट्याः तिरोहितं नास्ति । अतएव वृद्धिसंज्ञासूत्रे सज्ञाधिकारं विधाय सर्वासां संज्ञानां तस्मिन्नेकस्मिन् प्रकरणे विन्यासस्यौचित्यं मन्वानोऽपि भाष्यकारः पाणिनेः सज्ञासूत्रनिर्माणगतामस्तव्यस्ततां दृष्ट्वा तथा करणस्यासम्भवत्वं वक्ति । **अष्टमेऽपीह संज्ञा क्रियते ।** अत्रापिशब्दः अन्यस्याध्यायस्य का कथा इत्यर्थसूचनार्थः ।

किंच नाम्रेडितस्यान्तस्य तु वा इति विधिः षष्ठा[1]ध्याये वर्तते आम्रेडितसंज्ञासूत्रंचाष्टमा[2]ध्याये, एवमेव गोत्रयुवसंज्ञामधिकृत्य तत्तत्कार्य-विधायकानि सूत्राणि पूर्वमेवोपन्यस्तानि तत्तत्संज्ञासूत्रे च पश्चात् इत्यन्या विडम्बना पाणिनितन्त्रे ।

तत्तत्संज्ञासूत्रोपजीविनां विधिसूत्राणां पूर्वं तत्तत्संज्ञासूत्राणां च पश्चादुपन्यासः सूचयति यत्संज्ञासूत्राणामकरणेऽपि विधिसूत्रप्रवृत्तिनिवृत्तौ न कापि बाधा ।

१८—विकल्पेन विधिप्रवृत्तये विभाषासंज्ञाविहिताऽस्ति किन्तु पाणिनिना विकल्पबोधनाय 'विभाषा' 'वा' अन्यतरस्यामित्यादिशब्दाः प्रयुज्यन्ते, अथ च शाकल्यस्येत्यादिव्यक्तिवाचकनामानि 'उदीचाम्' 'प्राचा' मित्यादि शब्दाश्च प्रयुक्ता भवन्ति विकल्पबोधनाय । पारिभाषिकशब्दानां बहुत्वेक्लिष्टतोत्पद्यते । शिष्याणामेतेषां विकल्पबोधकानां शब्दानां ज्ञानद्वाराबुद्धि-वैशद्याय विविधपर्यायोल्लेखस्यौचित्यप्रतिपादनन्तु नास्मभ्यम् रोचते, पर्यायज्ञानाय कोशस्योपयोगित्वे स्वीकृतेऽपि व्याकरणस्य तथाऽस्वीकारात् ।

आचार्यनामग्रहणद्वारा अनेकानेकमुनिसंमतत्वसूचनात् ग्रन्थस्य दृढतरप्रामाण्यप्रतिपादनरूपपूजार्थत्वमपि शाकल्यादिनाम्नः न युज्यते तथा सति बहूनां प्रयोगाणां साधुत्वविप्रतिपत्तिरूत्पद्यते । तथाहिः—लोपः शाकल्यस्येत्यत्र सम्बुद्धौ शाकल्यस्येत्यत्रोभयत्र च शाकल्यनामोल्लेखात् विष्णो इति विष्ण इति विष्णविति इति रूपत्रयं साधु न सम्भाव्यते शाकल्यमतेन विष्णो इतीत्यादौ विकल्पेन प्रगृह्यसंज्ञायां कृतायाम् विष्णो इतीति, प्रगृह्यसंज्ञाविकल्पे विष्णविति्येव स्यात् नतु वलोपद्वारा विष्ण इतीति । शाकल्येन तु अत्र प्रगृह्यसंज्ञा विधीयते विकल्पेन तेनैव कथं लोपः क्रियेत ?

शाकल्यादिशब्दा यदि विकल्पार्थमात्रप्रतिपादनपरा स्तदा विष्णो इति विष्ण इति विष्णविति इति रूपत्रयमपि साधु सम्भाव्यते । एवंच पाणिनेः विकल्पार्थप्रतिपादनप्रणाल्यां नैकरूपत्वम् ।

१९—पाणिनिना स्वयमविहिता अपि संज्ञाः स्वातन्त्र्येण स्वतन्त्रे प्रयुक्ताः । यथा आङ् इति तृतीयैकवचनस्य संज्ञाऽत्र शास्त्रे व्यवहृता दृश्यते आङि० चापः ७।३।१०५ इत्यत्र । भावकर्मणोः कृते'ण्यदर्थ' इति संज्ञाया व्यवहारोऽप्युपलभ्यतेऽत्र निष्ठायामण्यदर्थे ६।४।६० इतिसूत्रे, एवं प्रथमाद्वितीयातृतीयाप्रभृतयः संज्ञाः स्वयमकृता एव मुनिना प्रयुक्ताः ।

---

१. ६।१।९९ ।

२. ८।१।२ तस्य परमाम्रेडितम् ।

किंच कालस्य सामान्यस्य तत्प्रकारस्य च विश्लेषणमकृत्वैव पाणिनिना यथास्थानं वर्तमानानद्यतनादिव्यवहारः कृतः। एतेन तद्व्याकरणम[1] कालकं ख्यातम्।

२०—पाणिनेरनुनासिकशब्दप्रयोगोऽपि भ्रान्तिजनकः। क्वाप्येष शब्दः अमङ्णनवर्णप्रत्यायनाय प्रयुक्तः यथा यरोऽनुनासिकेऽनुनासिको वा पा० ७।४।४५ इत्यत्र। क्वापि च चन्द्रविन्दुमुद्रया लिपौ दृश्यमानाय अयोगवाहविशेषाय प्रयुक्तः यथा अत्रानुनासिकः पूर्वस्य तु वा (पा० ८।३।२) आङोऽनुनासिकश्छन्दसि पा० ६।१।१२६ इत्यादौ। चन्द्राचार्येणास्याः भ्रान्तेः परिहाराय वर्गपञ्चमानामनुनासिकानां प्रत्यायनाय अमूप्रत्याहारः प्रयुक्तः यथा यरो अमि अम् वा (चा० ६।४।१४०) अमोऽतो नुक् (६।२।१३४), अमः किति वौ च (६।२।१७) इत्यादौ। अनुनासिकस्थाने अमूप्रयोगे महालाघवं भवतीत्यपरो लाभः। अयोगवाहविशेषात्मकस्यानुनासिकस्य प्रत्ययाय तेनानुनासिकशब्दः प्रयुक्तः[2]। अतएव न भ्रान्तिः।

नचासंज्ञकव्याकरणे अनुनासिकसंज्ञाप्रयोगे प्रतिज्ञाहानिरिति वाच्यम् अनुनासिकेति न पाणिने र्नूतनोद्भावना; किन्तु लोके प्रातिशाख्ये च प्रसिद्धस्य तस्य सूत्रनिर्माणेन स्वीकृतिमात्रम्। अतएव भट्टोजिदीक्षितेन मनोरमायामनुनासिकसंज्ञासूत्रस्य [3]मन्दप्रयोजनत्वमुक्तम्। वर्णसूत्रे च चन्द्राचार्येण अनुननासिकस्य परिचयो दत्त एव। अतएव प्रातिशाख्यादौ लोके च विख्याता बहवोऽमूदृक्षाः शब्दा अत्र प्रयुक्ता न प्रतिज्ञां तामपहन्तुमीशाः। यथा विसर्गानुस्वाराद्यतनादिशब्दाः पाणिनिना अपरिचायिता अपि तस्य तन्त्रे बोधगम्यास्तथा अनुस्वारदीर्घादिशब्दा अपि चन्द्राचार्येण विख्यातत्वादिमे पाणिनीयाः मूलतस्त्वपाणिनीयाः पारिभाषिकशब्दा यौगिकार्थबलज्ञातव्यार्था निजव्याकरणे प्रयुक्ताः। दृश्यताम् उदाहरणायः—

शब्दाः	यत्र प्रयुक्ता, चान्द्रं तत्सूत्रम्
अनुनासिकः	अणोऽनुनासिकः ३।४।१५० अत्रानुनासिकः पूर्वस्य ६।४।६।
दीर्घः	दीर्घात् ६।४।१४७ अकोऽकि दीर्घः ५।१।१०६ घातो र्वोऽनचीको दीर्घः ६।३।१०८।
पदम्	रषान्नोण एकपदे ६।४।१०१ एवं ५।१।११५।
भावः	वा भाव—
करणम्	करणयोः ६।४।११०।
धातुः	धातोः सीलुङो श्च धो ढः ६।४।९९ दादे र्धातो घः ६।३।६३ एवं ५।१।९३, ५।१।७७,
समासः	समासेऽङ्गुलेः सङ्गः ६।४।६६ एवं ५।१।९७, ५।१।९०।
लोपः	खरि लोपः ६।४।३० भोभगोअघोभ्योऽशि लोपः ६।४।२४ सुपः प्रकृते र्नो लोपः ६।३।४८, द्वित्वे पूर्वस्यात्र लोपः ६।२।१११, १।४।१९, ५।४।५७, ५।३।१३०, ५।३।१०४, ५।३।९६, ५।३।७५, ५।३।६३, ५।३।२२, ५।१।६३, ५।२।८७, ४।४।३६।
ईषत्स्पृष्टः	व्योरीषत्स्पृष्टौ च ६।२।२७।
अनुस्वारः	अनुस्वारः ६।४।७।
गुरुः	गुर्वैकैकमनृद्वा ६।३।११८, १।३।५८।
प्लुतः	वाक्याचां प्लुतोऽन्त्यः ६।३।११५।

१. पाणिन्युपज्ञमकालकं व्याकरणम् (चा० ८।३।२)।
२. अणोऽनुनासिकः चा० ६।४।१५७।
४. १।३।२ प्रौढमनोरमा।

लुक्	लुक्यरि रः ६।३।१००, रुग्रिकौ च लुकि ६।२।१३६, निजां लुक्येत् ६।२।१२७ एवं ६।१।१०१, ५।३।६६, ४।४।६४, ४।२।६५ ।
संयोगः	यण्संयोगादातः ६।३।७५ स्कोः संयोगाद्योरन्ते च ६।३।५८, संयोगस्य पदस्य ६।३।५२, एव ५।३।१३३, ५।३।१००, ५।३।७६ ।
ह्रस्वः	ह्रस्वात् ६।३।५६, केऽणो ह्रस्वः ६।२।७०, ह्रस्वः ६।२।११६, एवं ६।२।७५, ६।२।४५, ६।१।१०८, ६।१।५६, ५।२।४२, ५।१।६६, ५।१।६८, २।२।८४ ।
सम्बुद्धिः	न सम्बुद्धौ ६।३।४६, एवम् ५।४।५१ ।
परसवर्णः	द्वित्वे पर सवर्णः ६।३।३४ ।
आमन्त्रितम्	आमन्त्रितं पूर्वमसद्वत् ६।३।२४, एवम् ६।३।४[1] ।
प्रथमा	सपूर्वात् प्रथमान्ताद्वा ६।३।२१ ।
अन्वादेशः	अन्वादेशे ६।३।२० ।
द्वितीया	त्वामौ द्वितीयायाः ६।३।१६ ।
एकवचनम्	एकवचनस्य तेमे ६।३।१८ ।
बहुवचनम्	बहुवचनस्य वस्नसौ ६।३।१७ ।
पदं, वाक्यं च	अपादादौ पदादेकवाक्ये ६।३।१५[2] ।
षष्ठी, चतुर्थी	युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयान्तयोर्वानौ वा ६।३।१६ ।
द्वितीया	द्वितीयायाम् १।३।१४५, एवम् २।१।४३ ।
लघुः	दीर्घो लघोः ६।२।१४१ एवम् ६।२।१४१ एवं ६।२।४ सन्वल्लघूनि णौचङ्यनग्लोपे ६।२।१४० ।
समासः	पत्युः समासे ६।२।५१ एवं ५।३।७०, ५।१।१३४, ५।१।१३२, ५।१।११०, ५।१।६०, ४।४।५२, २।१।१२ ।
सम्बोधनम्	सम्बोधने सौ ६।२।४४ ।
समाहारः	समाहारे ५।३।१४३ एवं ४।४।८६ ।
उपदेशः	उपदेशेऽज्झनग्रह० ५।३।७३ ।
बहुलम्	ङ्यापोस्त्वनाम्नो बहुलम् ५।२।७३ एवं ५।२।११, ५।२।१४१, ३।३।७, १।१।१३० ।
द्विवचनम्	ईदूदेद्द्विवचनम् ५।१।१२५ ।
प्लुतः	न प्लुतोऽनितौ ५।१।१२३ ।
वृत्तिः	सर्वादयो वृत्तिमात्रे ५।२।४१ ।
सप्तमी	सप्तम्या बहुलम् ५।२।११ एवं ४।२।१२१, १।३।१४१, २।१।८८ ।
पञ्चमी	पञ्चम्याः स्तोकादिभ्यः ५।२।२, ४।३।५, १।३।१४४ ।

---

१. आमन्त्रितसंज्ञाविधानं विनैव यथाऽत्र निर्वाहस्तथा 'वाक्यादेरामन्त्रितस्यासूयासम्मत्योः' (६।३।४ इति सूत्रे दर्शितः वृत्तौ 'आमन्त्र्यते इत्यामन्त्रितम् सम्बोध्यमानमुच्यते' इति ग्रन्थेन ।

२. पद्यते गम्यतेऽनेनार्थ इति पदम् सुबन्तं तिङन्त च ।
पदसमूहो वाक्यम् ।

गोत्रम्	प्राणिजाति वयोऽर्थोद्गात्रादिभ्योऽञ् ४।१।१४५, ३।१।८ ।
विप्रतिषेधः	विप्रतिषेधः १।१।१६ ।
कर्ता	कर्तुर्विप् १।१।२७ कर्तरि शप् १।१।८२, एवं १।१।१३९, १।२।६, १।२।५८, १।२।६८, १।३।१३८ ।
करणम्	कृञः करणे ल्युन् १।२।४० ।
भविष्यत्	भविष्यति लृट् १।३।२ ।
अनद्यतनम्	अनद्यतने लुट् १।३।३ ।
विधिः सप्रश्नः	विधिसंप्रश्नप्रार्थनेषु १।३।१२१ ।
तृतीया	उपदंशस्तृतीयायाम् १।३।१३९, २।१।९६ ।
षष्ठी	षष्ठी चाऽनादरे २।१।९१, षष्ठी सम्बन्धे २।१।९५, २।२।२२ ।
प्रथमा	अर्थमात्रे प्रथमा २।१।९३ ।
चतुर्थी	हितसुखाभ्यां चतुर्थी च २।१।९७, २।२।१७ ।
कारकम्	कारकं बहुलम् २।२।१६ ।
जातिः	जातेरस्त्रीविषयाद्योपान्तात् २।३।७१ एवं ४।३।७६, २।३।५९ ।
विभक्तिः	चा० २।१।१ वृत्तिः (तान्येतानि सप्तत्रयाणि विभक्तयो भवन्ति विभागो विभक्तिरिति कृत्वा प्रयुज्यते विभक्तिपदम्) ।

पाणिनिप्रयुक्ताः संज्ञाः तासां स्थानापन्नाश्चान्द्रशब्दाः । निम्नलिखिताद् विवरणाद्ज्ञातव्याः ।

पा० संज्ञा	चान्द्रशब्दाः	उदाहरणम्
वृद्धिः १।१।१	यथास्थानविशेषम् आत्, ऐच्, आदेच् औत्	मृजेरात् ६।१।१ आदैजेवाद्यटः ५।१।८३ हलि पित्यौत् ६।२।३० ।
गुणः १।१।२	अदेङ्	आददेङ्० ५।१।८२ इकोऽदेङ् क्रियायाः ६।२।१ ।
संयोगः १।१।७	संयोगः (यौगिकः)	यण् संयोगादातः ६।३।७५ ।
अनुनासिकः १।१।७	अम् प्रत्याहारः (वर्गपञ्चमकृते)	अमः किति वौ च ५।३।१७ यरोऽमि अम् वा ६।४।१४० ।
अनुनासिकः	(अभ्र आँ इत्यत्र प्रयुक्तस्य कृते) अनुनासिकः (योगार्थसम्पन्नः)	अणोऽनुनासिकः ६।४।१५० ।
सवर्णः १।१।९	सस्थानः, सवर्णश्च (विपरीतार्थेऽसमः असवर्णः अपि प्रयुक्तः)	द्वित्वे परसवर्णः ६।३।३४ इकोऽसस्थाने ह्रस्वश्चासमासे ५।१।१३२ द्वित्वे पूर्वस्यासमे ५।३।८४ ।
प्रगृह्यम् १।१।११	न सन्धीयते	(न शब्दात् सन्धिप्रकरणपठिताल्लभ्यते) न प्लुतोऽनितौ ५।१।१२३ एवं ५।१।१२५ इत्यादि ।
घुः १।१।२०	दाधा	प्रादिभ्यः दाधः किः १।३।७१ ।
घः १।१।२२	तरतमेति	तरतमरूपकल्पचेलड् ब्रूवमतहते ड्यो ह्रस्वः ५।२।४२ ।
संख्या १।१।२३	संख्या (एकद्वयादि लोकप्रसिद्धार्थे) संख्यात्वातिदेशः (कतिगणादीनाम्)	ष्णः संख्याया लुक्, संख्याया अतिशतः कन् ४।१।३२, २।२।२१ कति गणौ तद्वत् वतोः ४।१।३४, ४।१।३३ ।

षट् १।१।२४	ष्णः संख्यायाः	ष्णः संख्याया आनुक् २।२।२१ (षड्भ्यो लुक् इत्यस्य स्थाने)।
	संख्याया अनतः	संख्याया अनतः २।१।३३ (षट्चतुर्भ्यश्च इत्यस्य स्थाने)।
निष्ठा १।१।२६	ततवत्	ततवति ५।३।६८ (निष्ठायां सेटि इत्यस्य स्थाने)।
सर्वनाम १।१।२७	सर्वादिः	सर्वादिभ्यः स्मैस्मातौ २।१।६।
अव्ययम् १।१।३७	असंख्यम्, विपरीतार्थे संख्यम्	असंख्यं विभक्ति० २।२।२। एवं ५।३।१४२ खिति ससंख्यस्य मुम् च ५।३।७५।
सर्वनामस्थानम्, १।१।४२	शि सुटि	शि सुटि ५।३।७ सर्वनामस्थाने—पा० ६।४।८ इत्यस्य स्थाने।
सम्प्रसारणम् १।१।४५१	इग् यणः	ष्यङः प्रधानस्य पुत्रपत्योः स्वयोरिग्यणः ५।१।११।
लोपः १।१।६०	लोपः (यौगिकः)	वस्मसोर्लोपः १।४।२९ सोर्लोपोऽनन्त्यस्य १,४।३६।
लुक् १।१।६१	लुक् (यौगिकः)	दाधागातिस्थाभूपोऽतङि लुक् १।१।६२।
श्लुः १।१।६१	(लुगेव व्यवहृतः)	हूनां द्वे च १।१।८४ (जुहोत्यादीनां शपो लुग् भवति द्वित्वं च)।
लुप् १।१।६१	(लुप्तु लुब्योगाप्रख्यानात् पा० १।२।५४ इति पाणिनिनैव प्रत्याख्यातम् चन्द्रेणापि प्रत्याख्यातम्। अणन्तं तु जनपदनाम नभवतीति अणोऽभावात्।)	
उपधा	उपान्त्यम् उपान्तम्	ज्वरत्वरावश्रिवुमवां सोपान्तस्य ५।३।१९।
१।१।६५	सोपान्तम्	हलोऽनिदितः क्ङित्युपान्तस्य ६।३।२३।
वृद्धम् १।१।७३	आदैजाद्यच्	आदैजाचश्छः ३।२।२४।
ह्रस्वः १।२।२७	ह्रस्वः	अस्वार्थानामडलेकानां ह्रस्वः ६।२।४५ स्वपि ह्रस्वः २।२।८४ ६।२।३९।
दीर्घः	दीर्घः १।२।२७	क्तिचि दीर्घश्च ५।२।३१ अकोऽकि दीर्घः ५।१।१०६, अत आद् यञि।
प्लुतः १।२।२७	प्लुतः	प्लुतस्तुकि ५।३।३२।
उदात्तः १।२।२८	उदात्तः	उच्चैदात्तः (चान्द्रवर्ण सूत्र सं० ४४) विधि सूत्रेऽपि स्वरभागे प्रयोगः यथा सम्भाव्यते तथा वर्णितम्।
अनुदात्तः १।२।२९	अनुदात्तः	नीचैरनुदात्तः (चा० वर्ण सू० सं० ४५)।
स्वरितः १।२।३०	स्वरितः	समाहारः स्वरितः (चा० व० सू० ४६)।
अपृक्तम् १।२।४१	अल्	अस्तिसिचोऽलः ६।२।३६, वरनचः ५।१।६४ इति अनच्-प्रयोगोऽपृक्तकार्यसाधकः।
उपसर्जनम् १।२।४४	अप्रधानम्	गोऽप्रधानस्यान्त्यस्य २।२।९५।
उपसर्जनम् १।२।४३	विवक्षावलेन पूर्वप्रयोगकार्यं संसाध्य प्रत्याख्यातम्[1]	

१. द्रष्टव्ये चा० सू० २।२।४८ वृत्तिः चा० सू० २।२।१८ वृत्तिश्च।

प्रातिपदिकम् १।२।४५	त्यक्तम्	नामशब्दप्रयोगमङ्गीकृत्य ।
प्रातिपदिकम् १।२।४६	,,	
एकशेषः १।२।६४	(प्रत्याख्यातः)	
इत् १।३।२	इत् (अनंशचिह्नमित् १।१।५ सूत्रे)	आदिरिता समध्यः १।१।१ ।
नदी १।४।३	स्त्री यू	स्त्री यूभ्याम् २।१।३५ ङ्यूङः ६।२।४६ ।
घिः १।४।७	इत् उत्	इदुद्भ्यामौत् ६।२।६१ ।
लघुः १।४।१०	लघुः (ख्यात्या प्रयोगः)	ल्यपि लघोः ५।३।७० ।
गुरुः १।४।११	गुरुः	गुरोर्हलः १।३।८५ ।
अङ्गम् १।४।१३	प्रकृतिः	प्रकृतेः ५।३।१ ।
पदम् १।४।१४	पदम्	अपदादौ पदादेकवाक्ये ६।३।१५ ।
भम् १।४।१८	यच्यशिसुटि (प्रकृतिः)	यच्यशिसुटि ५।३।१२६ ।
बहुवचनम् १।४।२१	बहुवचनम्	बहुवचनस्य वस्नसौ ६।३।१७ ।
द्विवचनम् १।४।२२	द्विवचनम्	ईदूदेद्द्विवचनम् ५।१।१२५ ।
एकवचनम् १।४।२२	एकवचनम् एकत्वम्	एकवचनस्य तेमे ६।३।१८ तवकममकावेकत्वे ३।२।६४ ।
अपादानम् १।४।३२	अवधिः	अवधेः पञ्चमी २।१।८१ ।
सम्प्रदानम्	१।४।२२ सम्प्रदानम्	सम्प्रदाने चतुर्थी २।१।७३ ।
करणम् १।४।४२	करणम् (योगिकार्थे)	बह्वं करणम् १।१।११३ ।
अधिकरणम् १।४।४५	आधारः	आधाराच्च १।१।२६ सप्तम्याधारे २।१।८८ ।
कर्म १।४।४९	व्याप्यम्, आप्यम्	व्याप्यात् काम्यात् १।१।२३ । क्रियाप्ये द्वितीया २।१।४३ ।
कर्ता १।४।५४	कर्ता (यौगिकार्थे)	कर्तुविप् १।१।२७, एवं १।१।६८, १।१।७८, १।१।८२, १।१।१३९, १।१।५८ ।
निपातः १।४।५६		(न दृश्यते) ।
उपसर्गः १।४।५९	प्रादिः	प्रादिभ्यो दाधः किः १।३।७१ ।
गतिः १।४।६०	प्रादिः	प्रादिकारकोपदा उत्तरपदम् (सूत्रमिदं ५।१।८१ सूत्रस्य वृत्तिग्रन्थेन वैदिकभागस्थितिकमनुमीयते ।

कर्मप्रवचनीयसंज्ञा १।४।८३	त्यक्ता	तत्संज्ञाविधायकसूत्रस्थाने ताद्शैः सूत्रैस्तत्कार्यमेव विहितम् ।
परस्मैपदम् १।४।९९	अतङानः अतङ्	क्रमोतङाने १।६।१०४ अतङणलतुस् १।४।११ ।
आत्मनेपदम् १।३।१००	तङ्, तङानः	तङि वा १।१।७२, टित्तङामेत् १।४।१५ न तङानैः ५।४।१२२ ।
प्रथमः १।४।१०१	प्रथमः	एकद्विहुषु २।२।४८ ।
मध्यमः	मध्यमः	युष्मदि मध्यमत्रयम् २।१।४६ ।
उत्तमम्	उत्तमम्	अस्मद्युत्तमम् २।१।१४७ ।
विभक्तिः १।४।१०४	सुप्, तिङ्, विभक्तिः,	अष्टनो वा सुप्यात् ५।४।५२, एवम् ५।४।२९ ।
संहिता १।४।१०९	परित्यक्ता	(संहितायामिति न वक्तव्यमाधारस्यौपश्लेषिकत्वात्[1]) ।
अवसानम् १।४११०	विरामः	वा विरामे ६।४।१४९ ।
द्विगुः २।१।५२	संख्यादिः	संख्यादिः समाहारे २।२।७६ ।
बहुव्रीहिः २।२।२३	अन्यार्थः (वृत्तौ अन्यपदार्थः)	अनेकमन्यार्थे २।२।४६ संख्याया अवहोरन्यार्थे ४।४।९५
द्वन्द्वः २।२।२९	चार्थः	चार्थसमासे २।१।१२ ।
आमन्त्रितम् २।३।४८	आमन्त्रितम्	आमन्त्रितं पूर्वमसद्वत् ६।३।२४ ।
उपपदम् ३।१।९२	उपपदम्	उपपदविभक्तेः कारकविभक्तिर्बलीयसी (पाणिनीयाभिप्रेतार्थे नदृश्यते प्रयोगः ।)
सार्वधातुकम् ३।४।११३	तिङ् शित्	तिङ् शिति, यगलिङाशीर्लिङि १।१।८० ।
आर्धधातुकम् ३।४।११४	लिङाशीर्लिङतिङ्शितम्	लिङाशीर्लिङतिङ्शिति ५।३।६१ ।
गोत्रम् ४।१।१६२	गोत्रम्[2]	गोत्राल्लुक् २।४।११८ ।

१. छे (चा० ५।१।७०) इतिसूत्रवृत्तिः ।

२. एको गोत्रे पा० ४।१।९३ इति सूत्रस्य कार्यन्तु 'अद्यात्' चा० २।४।१७ इति सूत्रेण अपत्ये येऽणादयो भवन्ति ते परमप्रकृतेरेव भवन्ति । इत्यर्थकेन साधितम् ; सर्वपूर्वजानां हि तदपत्यम् । उपचाराद्वा तच्छब्देनाभिधानम् । उपगोरपत्यमौपगवः । तस्यापत्यमौपगवः । देवदत्तस्यापत्यं दैवदत्तिः । तस्यापत्यम् दैवदत्तिः । गर्गस्यापत्यं गार्ग्यः । तस्यापत्यं गार्ग्यः ।

युवा ४।१।१६३	गुर्वायत्ते
आम्रेडितम् ८।१।२	द्विरुक्तम्
हेतुः ३।१।२६	प्रयोजकव्यापारः १।१।४६
संज्ञा	नाम, संज्ञा
प्राचाम्, उदीचाम्	वा
स्फोटायनादि-व्यक्तिवाचकसंज्ञा	वा
विभाषा	वा
अन्यतरस्याम् वा	वा
अकर्मकः	अव्याप्यः
अनुपसर्गः	अप्रादिः
समासः (अधि० २।१।३)।	एकार्थम्, समासः
कर्मधारयः १।२।४२	विशेषणैकार्थम्
तद्धितः ४।१।७६ अधि० ४।१।७६	अणादिः
धातुः १।३।२	धातुःक्रियार्थः
सम्बुद्धिः २।३।४९	सम्बुद्धिः, सम्बोधनसुः
कृत्यः ३।१।९५	तव्यादिषट्कम्
अभ्यासः ६।१।४	द्विरुक्तिम्
प्रत्ययः ३।१।१	परः
अवसानम् १।४।११०	विरामः

पौत्रादेरस्त्रियां गुर्वायत्ते २।४।१८[1]।
भत्सने द्विरुक्तं पर्यायेण ६।३।१२३ एवं ६।३।१२४।

प्रयोजकव्यापारे १।१।४६।
नाम्नि क्तिच् १।३।३७ नखमुखात् नाम्नि संज्ञायाम् २।३।६०, एवम् २।३।६९।
गुर्वेकैकमनृद्वा ६।३।११८ (गुरोरनृतः ८।२।८६ इत्यस्य स्थाने) मातरपितरौ चार्थे वा ५।२।२० यकाभ्याम् ००० वा ६।१।७१।
अच्ययङ् ५।१।१२१ (अत्र वेत्यनुवर्तते)।

घेश्वेर्वा १।१।६९।
हृक्रोर्वा २।१।४५।
ओष्ठोत्वोः समासे वा ५।१।९७।
अव्याप्यात् १।४।९१।
अप्रादे र्वा १।४।८९।
सुप् सुपैकार्थम् २।२।१ समासेऽनुत्तरस्य ६।४।३९, पत्युः समासे ६।२।५१।
विशेषणमेकार्थेन २।२।१८।
आपत्यस्यानात्यणादौ ५।३।१५५ श्वयुवमघोनामनणादौ ५।३।१२९।
दादेधातोर्घः ६।३।६३ एकाचो हलादेः क्रियार्थाद्००० १।१।४०।
सम्बुद्धौ च ७।३।१०६, सम्बोधने सौ ६।२।४४।
तव्यादिषट्केऽवश्यमः ५।२।९०।
लिट्यश्वेर्द्विरुक्ते ५।१।२१।
ये परेऽवावौ ५।१।७६।
वा विरामे ६।४।१४९।

---

१. गोत्राद् यून्यस्त्रियाम् पा० ४।१।९४ इत्यस्य स्थाने।

द्वितीयोऽध्यायः

लाघवम्

सूत्रशैल्याः प्रथमो गुणः लाघवं मन्यते। सूत्रशब्दस्य तन्तुरूपोऽर्थो मुख्यः। तन्तुर्लघुकलेवरो भवति। अतः गौणलक्षणया अल्पाक्षरत्वं बोध्यते सूत्रशब्देन। अतएव[1] सूत्रलक्षणे सर्वप्रथममल्पाक्षरमुक्तम्। चान्द्रव्याकरणे लाघव[2]मानेतुं यथासम्भवं सर्वत्राऽऽयासः कृतो दृश्यते। प्रायस्तेन तत्र साफल्यमपि प्राप्तम्।

(१) मात्रा लाघवम् वर्णलाघवं व्यञ्जनलाघवं वा सर्वप्रथमं विलोक्यताम्। यथा अकोऽकि दीर्घः चा० ५।१।१०६ इति। अकः सवर्णे दीर्घः पा० ६।१।१०१ इति पाणिनिसूत्रे चतस्रः मात्राः, त्रीणि व्यञ्जनानि चाधिकान्यासन्। "तस्माच्छसो नः पुंसि" ६।१।१०३ पा० सू० "तस्मिन्निति निर्दिष्टे पूर्वस्य" (पा० १।१।६६) तस्मादित्युत्तरस्य (पा० १।१।६७) इत्यादीनां स्थानेषु ततः शसो नः पुंसि (चा० ५।१।११०) सप्तम्यां पूर्वस्य (चा० १।१।७) पञ्चम्यां परस्य (चा० १।१।८) इत्यादीति लघुसूत्राणि रचितानि।

(२) क्रमविशेषाङ्गीकारलाघवमपि चान्द्रव्याकरणे वर्तते। पाणिनितन्त्रे एकस्य शब्दस्यानेकधा प्रयोगो गौरवं जनयति चन्द्राचार्येण क्रमविशेषमुद्भाव्य तत्र स शब्दस्तथा पठितो यथा तत्तत्सूत्रेषु स शब्दः धाराप्रवाहन्यायेनैवानुवर्तनीयो भवेत्। यथा पाणिनितन्त्रे "मिदचोऽन्त्यात्परः" (१।१।४७ उरण् रपरः १।१।५१ विप्रतिषेधे परं कार्यम् १।४।२ 'प्रत्ययः ३।१।१ 'परश्च' ३।१।२ इत्यादौ परशब्दस्य पुनःपुनःप्रयोगो दृश्यते; किन्तु चान्द्रव्याकरणतन्त्रे एकस्मिन् एव प्रकरणे सूत्राणीमानि पठित्वा पौनःपुन्येन पाठजन्यं गौरवमपाकृतम् लाघवं च सम्पादितमष्टानां मात्राणां षण्णां च व्यञ्जनानामकरणजन्यम्। यथा मिदचोऽन्त्यात्परः (चा० १।१।१४ ऋकोऽणो रलौ १।१।१५ विप्रतिषेधे १।१।१६ ततः प्रत्ययप्रकरणम् प्रारभ्यते येन सनादेः प्रत्ययेति नाम विनैव परत्वं सिद्धयति असंज्ञकेऽत्र व्याकरणे प्रत्ययस्थाने 'पर' शब्दः प्रयुक्तः।) एवमेव न लोपः प्रातिपदिकान्तस्य ८।२।७ संयोगान्तस्य लोपः ८।२।२३ इत्यनयोः स्थाने सुपः प्रकृते र्नो लोपः ६।३-४८ संयोगस्य पदस्य ६।३।५२ इति सूत्रे दृश्येते। सर्वजनाट्ठञ् च पा० ५।१।९।५ वा० महाजनान्नित्यम् पा० ५।१।९।६ इत्यनयो वार्तिकयो" र्जनशब्दस्य द्विःप्रयोगो निवारितश्चन्द्रेण सर्वात् ४।१।११ वहतश्च ठञ् ४।१।१२ इति सूत्रद्वयं पञ्चविंशाज्जनान्तात्तदर्थात् ४।१।१० इति सूत्रादव्यवहितोत्तरं पठित्वा 'जनान्ता'दित्यस्यानुवृत्तिं विधाय। न सम्प्रसारणे सम्प्रसारणम् ६।१।३७ इत्यस्य स्थाने 'न तस्मिन्' इतिसूत्रकरणम् क्रमविशेषस्यैव माहात्म्यम्। प्रकरणात् 'यणइक्' इत्यायाति ५।१।४१ तस्मिन् (यण इकि (अनुवृत्या लब्धे) न इत्यर्थलाभः प्रकरणविशेषन्यासस्य फलम्।

पाणिनिसूत्रकात्यायनवार्तिकप्रतिपाद्यानामेकस्मिन् प्रकरणक्रमे समावेशादपि बहूनां शब्दानां पौनःपुन्येनाकरणजन्यलाघवं यथा :—

---

१. अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।

२. लघुविस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम् (चान्द्र व्याकरण मङ्गलश्लोकः—पृ० १ इत्यत्र लघुत्वमानेतुं स स्पष्टं प्रतिजानीते)

पा० सूत्र का० वार्तिकानि	चा० सूत्राणि
आङो दोऽनास्य विहरणे १।३।२०	आङो दः १।४।५४
आगमेः क्षमायाम् १।३।२१ वा० २	न स्वप्रसारणे १।४।५५
आङि नुपृच्छ्योः १।३।२१ वा० ३	गमेः क्षान्तौ १।४।५६
	नु प्रच्छ- १।४।५७

एकत्राङ्गृहीतं सर्वत्रानुवर्तते चान्द्रसूत्रेषु ।

(३) वार्तिकोक्तानां तत्वानां सूत्रेष्वेव समावेशेन 'वाच्यम् 'वक्तव्यम्' 'उपसंख्यानाम्' इत्यादि शब्दानामकरणीयताजन्यम् सूत्रप्रतिपादितनियमेषु वार्तिकप्रतिपाद्यविषयसंकोचस्य पश्चात्कर्तव्यस्याकरणजन्यं च लाघवम् । यथा तव्यत्तव्यानीयरः पा० सू० ३।१।९६ सूत्रस्य वार्तिकमस्ति केलिमर उपसंख्यानम् (का० वा० ३।१।९६।६) चान्द्रव्याकरणे तव्यानीयरकेलिमरः १।१।१०५ इत्यत्र वार्तिकोक्तकेलिमरः सूत्रे समावेशात् 'उपसंख्यानम्' इति न वक्तव्यं भवति, बुद्धौ अर्हार्थे सूत्रोपस्थापितप्रत्ययत्रयस्याप्रामाण्यम् तत्र च चतुर्थस्य प्रत्ययस्य केलिमरः समावेशप्रयुक्तो बौद्धिक ऊहापोहस्वरूप आयासोऽपि परिहृते भवतः । यथा वा 'पोरदुपधात्' पा० ३।१।९८ शकिसहोश्च ३।१।९७ इति पाणिनीयसूत्रद्वयस्य 'यतिजनेरूपसंख्यानम् इति वार्तिकस्य 'अत्यल्पमिदमुच्यते तकिशसिचतियतिजनीनासुपसंख्यानमिति वक्तव्यमिति महाभाष्यकारस्य च वक्तव्यानां धातूनामेकत्र समावेशं विधाय 'पुशकितकिचतियतिशसिसहियजः' इति सूत्रं विरचितं चन्द्राचार्येण । जनिवध्योश्चात्र निर्देशस्तेन परित्यक्तः । ताभ्यां ण्यति विहितेऽपि जनिवध्योरातो (वृद्धेः) निषेधात् जनिवध्योरिगुपान्तानां च स्वरं वक्ष्याम इति स्वरविधाननिश्चयद्वाराभीष्टसम्पादनात् ।

एवं तान्ततव्योऽप्यत्र परित्यक्तस्तव्यस्यैव विकल्पेन स्वरितत्वविधानात् । न चैवं स्वरसूत्रनिर्माणगौरवमिति वाच्यम् कर्तव्यमित्यत्र स्वरितत्वाभावं दृष्ट्वाऽत्र तव्यप्रत्ययः अपरत्र तदभिन्नरूपे कर्तव्यमित्यत्र स्वरितत्वं दृष्ट्वा तव्यत्प्रत्यय इति कल्पनाया लक्षणैकचक्षुष्काणां सूत्राण्यधीत्य भाषामधीयानानां कृते ऽयोग्यत्वात् तव्यस्य वा स्वरितविधानस्यावश्यकत्वात् प्रत्ययविधायके तव्यतो ग्रहणमकृत्वा स्वरितविधायके प्रकरणे विकल्पक्रमे तव्यदिति करणे गौरवाभावाच्च ।

पाणिनिव्याकरणे 'जातुयदोर्लिङ्' (पा० ३।३।१४७) जातुयदो लिङ्विधाने 'यदा यद्योरूपसंख्यानम्' पा० ३।३।१४७-१ इति सूत्रवार्तिकयोश्चान्द्रे व्याकरणे 'यद्यदियदाजातुषु' (चा० १।३।११३) इति सूत्रे समावेशात् लाघवं स्पष्टम् ।

(४) प्रपञ्चार्थंस्वीकृतशब्दावलीपरित्यागलाघवम् । पाणिनीये व्याकरणे यस्य विस्तरस्य प्रपञ्चमात्रप्रयोजनमस्ति, चान्द्रे स परित्यक्तः । यथा पा० व्याकरणे 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्' (पा० ३।१।२५) इति सूत्रे चूर्णान्तशब्दानां ग्रहणमकृत्वा 'चुरादिभ्यो णिच्' १।१।४५ इत्येव सूत्रं चान्द्रे व्याकरणे दृश्यते । सर्वे च ते शब्दाश्चुरादौ पठिताः । तत्र च गणसूत्रमस्त्येव 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति ।

(५) धातुनिर्देशे इक्ष्तिपौ प्रत्ययौ पाणिनिना विहितौ । तत्र क्तिप्प्रत्यये कृते शबादिकार्याणामवश्यं भावित्वाच्छब्दस्वरूपं स्थूलं महद्दीर्घं च जायते । चन्द्रेण यथासम्भवं क्तिपा निर्देशः परित्यक्तः । इत्थमप्यक्षरलाघवं तेन सम्पादितम् यथा पाणिनिसूत्रस्य 'उपसर्गात् सुनोति-सुवति-स्यति स्तौति-स्तोभति-स्था-सेनय-सेध-सिच्-सञ्जस्वञ्जाम् (पा० ८।३।६५) इत्यस्य स्थानापन्ने चान्द्रे 'प्रादीनां सुसूसोस्तुस्तुभस्थासेनिसेधसिचसञ्जस्वञ्चाम्' इति (पा० ६।४।५०) सूत्रे क्तिम्निर्देशः परित्यक्तः ।

न च तथा निर्देशः शितपाशपेति परिभाषया यङ्लुकि सूत्राप्रवृत्यर्थ इति वाच्यम् तस्याश्चान्द्रपरिभाषासूत्रेषु अपरिगणनात् । तस्याः परिभाषाया भाष्याद्दष्टत्वात । 'यङो बहुलम्' (चा० १।१।८६) इति सूत्रस्थबहुलग्रहणादेव यङ्लुकि सकलेष्टसिद्धेः । भवतेरः (पा० ७।४।७३) इत्यत्रेवोक्तसूत्रे शितपानिर्देशस्य प्रयोजनविशेषाभावस्य वैयाकरणैः स्वीकाराच्च[1] ।

यथा वा 'भवतेरः (पा० ७।४।७३) इत्यस्य स्थाने भुवोऽत् (चा० ६।२।१२६) अस्यतितृषोः क्रियान्तरे कालेषु (पा० ३।४।५७) इत्यत्र शितपो निर्देशं विहाय चन्द्रेण कृतं सूत्रमस्ति "असुतृषः कालेषु विच्छदे (चा० १।३।१४६) इति ।

(६) लघुकलेवरकपर्यायप्रयोगेण लघुत्वं सम्पादितम् चन्द्रेण ।

(क) पाणिनीयव्याकरणे प्रभृतिशब्दस्य आदिशब्दस्य च प्रयोगो दृश्यते; चान्द्रे केवलमादिशब्द एव प्रयुक्तः स्वल्पशरीरत्वात् । तद्यथा 'पारस्करप्रभृतीनि च' संज्ञायाम् (पा० ६।२।१५७) 'साक्षात्प्रभृतीनि च' (पा० १।४।७४) पद्दोमास्हृन्निशसन्यूषनूदोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (पा० ६।१।६३) इति सूत्राणां स्थाने 'पारस्करादीनि नाम्नि' (चा० ५।१।१४२) 'साक्षादादीनि च' (चा० २।२।३६) पन्निशमासहृद्यूषनूदोषञ् शसादौ वा (चा० ५।४।७७) इति सूत्रेषु प्रभृतिपर्यायस्यादिशब्दस्य लाघवगुणान्वितस्य प्रयोगः । एवम् अदिप्रभृतिभ्यः शपः २।४।७२ इत्यस्य स्थाने चान्द्रेव्याकरणे अदादिभ्यो लुक् १।१।८३ इति सूत्रं दृश्यते । एतादृशेन प्रयोगेण एकरूपताऽपि सम्पाद्यते अयं द्वितीयो लाभः आनुषङ्गिकः । गणसूचनाय पाणिनिना प्रायः प्राचुर्येण आदिशब्द एव प्रयुक्तः । अदिप्रभृतिभ्यः शप इत्यत्र दृश्यते व्यभिचारः । 'नित्यं सपत्न्यादिषु' (पा० ४।१।५५) षिद्गौरादिभ्यश्च' (पा० ४।१।४१) 'न क्रोडादिबह्वचः' (पा० ४।१।५६) नद्यादिभ्यो ढक् (पा० ४।२।९ये) तालादिभ्योऽण् (पा० ४।३।१५२) दिवादिभ्यः श्यन् (पा० ३।१।६९) तुदादिभ्यः शः (पा० ३।१।७७) रुधादिभ्यः श्नम् (पा० ३।१।७८) इत्यादौ यथा, किन्तु 'अदिप्रभृतिभ्यः शपः २।४।७२ 'इति गणसूचनायापि 'प्रभृतिशब्दः' प्रायुज्यत । पार्थक्येऽस्मिन् न किमपि प्रयोजनं पश्यामः ।

चान्द्रव्याकरणे सर्वत्र आदिशब्दप्रयोगेण लाघवमेकरूप्यं बोधसारल्यं च सम्पादितम् ।

(ख) लघुपर्यायस्यान्यविधोऽपि प्रयोगो विलोक्यते चान्द्रे यथा—

पा० व्याकरणे	चान्द्रे
शरीरावयवाद्यत् ५।१।६	देहांशाद्यत् ४।१।६
शरीरावयवाच्च ४।३।५५	देहांशात् ३।३।१८
इतो मनुष्यजातेः ४।१।६५	इतोनृजातेः २।३।७३
अनुकम्पायाम् ५।३।७६	दयायाम् ४।३।६३

(ग) लघुपर्यायप्रयोगेण लाघवसम्पादनस्यान्यादृशमप्युदाहरणमस्ति तद्यथा 'वा' शब्दस्य व्यापक-प्रयोगः । पाणिनितन्त्रे विकल्पार्थप्रत्यायनाय[2] 'वा' 'अन्यतरस्याम्' 'बहुलम्' विभाषा उभयथा शाकल्यस्य,स्फोटायनस्य,

---

१. दृश्यताम् परिभाषेन्दुशेखरे नागेशस्य शितपा शपेति परिभाषाविचारेऽन्तिमा पङ्क्तिः ।

२. पाणिनीये यथा इरितो वा ३।१।५७ हृक्रोरन्यतरस्याम् १।४।५३ तृतीयासप्तम्योर्बहुलम् २।१।४२ विभाषा घेट्ख्योः ३।१।४९ छन्दस्युभयथा, ३।४।११७ व्योर्लघु० ८।३।१८, लोपः शाकल्यस्य ८।३।१९ अवङस्फोटायनस्य १।१।२३ ऋतो भारद्वाजस्य (७।२६३ गिरेश्च सेनकस्य ५।४।११२ ओतोगार्ग्यस्य

भारद्वाजस्य, सेनकस्य, गार्ग्यस्य, गालवस्य, काश्यपस्य, शाकटायनस्य चाक्रवर्मणस्य आपिशलेरिति दश नामानि, उदीचां प्राचामित्यादि च प्रयुक्तानि किन्तु चान्द्रे व्याकरणे सर्वत्र 'वा' शब्दं प्रयुज्य लघुत्वमानीतम् ।

(घ) संज्ञायामित्यस्य स्थाने 'नाम्नि'[1] शब्दप्रयोगः ।

(ङ) प्रतिषेधार्थे वातिककारेण प्रतिषेधः, दोषः, न, निषेधः, वर्जम्, वर्ज्यः अ, अन् (नञः समासे लुप्ते रूपे) शब्दाः प्रयुक्ताः[2] किन्तु चन्द्राचार्येण प्रायः सर्वत्र 'न'[3] एव प्रयुक्तः । नञो वृत्तिगतं रूपद्वयम् अ[4] अनिति च प्रयुक्तं दृश्यते । इत्थं महल्लाघवं सम्पादितम् ऐकरूप्यं च ।

(च) उत्तरपदस्य स्थानेऽन्तशब्दप्रयोगेण लाघवम् यथा 'आत्मन्विश्वजनभोगोत्तरपदात्खः (पा० ५।१।९) स्थाने भोगान्तात्मनः खः (चा० ४।१।९) इति ।

(७) **गणकल्पनाप्रयुक्तं लाघवम्**

दीर्घकलेवराणां वार्तिकानां सूत्राणां च ह्रस्वशरीरत्वं नूतनगणकल्पनया विधाय स्वशास्त्रे लघुत्वं सम्पादितमाचार्येण । यथा—

कात्यायनस्य वार्तिकान्यासन् 'नान्तस्य टिलोपे सब्रह्मचारि-पीठ-सर्पि-कलापि-कुथुमि तैतिलि-जाजलि-लांङ्गलि-शिलालि-शिखण्डि-सूकर-सद्म-सुपर्वणामुपसंख्यानम्, चर्मणः कोशे, अश्मनो विकारे, शुनः संकोचे, अव्ययानां च सायं प्रातिकाद्यर्थम् इति पा० ६।४।१४४ वा० १-५ सर्वस्य स्थाने चन्द्रः कलाप्यादिगणं नूतनं कल्पयित्वा सूत्रितवान् कलाप्यादीनाम् (चा० ५।३।१४०) ।

पाणिनेः सूत्रम् 'नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या (६।३।७५) इति अधिकृत्य नखादयः ५।२।९५ इति सूत्रं रचितम् तत्र च नखादिगणकल्पनया लाघवं साधितम् ।

८।३।२० अड्गार्ग्यगालवयोः ७।३।९९ तृषिमृषिकृषेः काश्यपस्य १।२।२५ लङः शाकटायनस्य, ३।४।१११ ईड्ड चाक्रवर्मणस्य ६।१।१३० । प्राचां ष्फस्तद्धितः ४।१।१७ चान्द्र व्याकरणे यथा इरितो वा १।१।७४ हृक्रोर्वा २।१।४५ धेश्वेर्वा १।१।६९ तृतीयासप्तम्यो र्वा २।१।४२ व्योरीषत्स्पृष्टौ च ७।४।२७ (वानुवृत्तिः) ।

१.

चान्द्रसूत्रम्	पा० सूत्रम्
न नाम्नि ४।४।१४३	न संज्ञायाम् ५।४।१५५
नाम्नि क्तिच् १।३।७७	क्तिच्क्तौ च संज्ञायाम् ३।३।१७४
नाम्नि जन्या ३।४।८१	संज्ञायां जन्याः ४।४।८२
नाम्नुदकस्योदः ५।२।६५ इत्यादि	उदकस्योदः संज्ञायाम् ६।३।५७

२. समासप्रत्ययविधौ प्रतिषेधः २ उगिद्वर्णग्रहणवर्जम् ३ यणः प्रतिषेधो वाच्यः ४, तस्य दोषः संयोगालोपलत्वणत्वेषु ४६, ओङःश्यां प्रतिषेधो वाच्यः ५५, अनव्ययस्येति वाच्यम् ३६ त्यकनश्च निषेधः ७६, नीवह्योर्न १२३, शब्दायते र्न १२९ अप्रत्ययादिभिरिति वाच्यम् १५८, न धातुलोपार्धधातुके पा० सू० पदान्ताट्टोरनाम् ८।४।४२ अनाम्नवतिनगरीणामिति वाच्यम् १७८ द्विपर्यन्तानामेवेष्टिः ३७१ अप्राणिष्वित्यपनीयनौकाकान्नशुकश्वृगालवर्ज्येषु इति वाच्यम् ८५४ ।

३. न नि मुः (चा० ६।३।२९ न पात्रादयः चा० २।२।८०

४. भक्षेरहिंसायाम् चा० २।१।४९ नुक्चानेकहलः चा० ६।२।१२४

गणपाठेषु प्रथमस्य शब्दस्य मात्राव्यञ्जनस्थौल्ययुक्तस्य स्थाने तद्गुणपठितान्यशब्दमानिवेश्य गणनाम-लघुत्वसम्पादनद्वारा सूत्रे लाघवमानीतम् तथाहिः—

विभाषा हविरपूपादिभ्यः ५।१।४ पा० सूत्रस्य स्थाने वा हविर्यूपादिभ्यः ४।१।३ इति चा० व्याकरणे ।

(८) संज्ञासूत्रपरित्यागात् मात्राव्यञ्जनप्रक्रियालाघवम् अनेकदोषपरिहारश्च सम्पादिते यथा (यरोऽनुना-सिकेऽनुनासिको वा (पा० ७।४।४५) इति सूत्रस्थाने 'यरो अमि अम्वा (चा० ६।४।१४०) इति करणेन। अस्य बहून्यु-दाहरणानि दत्तानि । प्रक्रियालाघवानेकदोषपरिहारादयोऽपि तत्र वैशद्येन निरूपिता. । चन्द्रोपज्ञमसंज्ञकं व्याकरणमिति-भागो विलोकनीयः।

(९) वार्तिकोक्तनिवेश्यानां सूत्रे संकलनाल्लाघवं यथा 'न टो रनवतिनगर्योरादेः' (पा० ६।४।१३७) इति सूत्रं कृत्वा 'न पदान्ताट्टोरनाम्' (पा० ८।४।४२) 'अनानवतिनगरीणां चे' ति वक्तव्यम् (पा० ८।४।४२।१) इतिसूत्र-वार्तिकयोरकरणजन्यं लाघवं साधितम् । सूत्रे 'रोमन्थं वर्तयति हनुचाले' चा० १।१।३३) इत्यत्र पा० सूत्रं कर्मणो रोमन्थतपोभ्यांवर्तिचरोः ३।१।१५ वार्तिकं च हनुचलने इति वक्तव्यम् (३।१।१५) समाहृते; तत्रापि चलने इत्यस्य स्थाने चाले इति कृत्वाऽर्धमात्रालाघवं सम्पादितम् ।

(१०) समानस्य कार्यस्य विधायकानां सूत्राणां विधायकयोर्वा एकत्र समाहारे लाघवं यथा-वदव्रजल्रः (चा० ६।१।८) इत्यत्र चान्द्रसूत्रे 'अतोल्रान्तस्य (पा० ७।२।२) 'वदव्रजहलन्तस्याऽचः' ७।२।३ इति पा० सूत्रद्वयस्य समाहरणं दृश्यते ।

(११) सूत्रे बहुवचनद्विवचनयोःस्थाने एकवचनप्रयोगजन्नं लाथवमपि बहुत्र दृश्यते । पाणिनितन्त्रे सूत्रेषु यथेच्छं विना हेतुं बहुवचनद्विवचनप्रयोगो दृश्यते यथा 'ह्रस्वनद्यापो नुट्' (पा० ७।१।५४) इत्यत्र बहुत्वेऽपि एकवचनप्रयोगः । 'शद-न्तविंशतेश्च' (पा० ५।२।४६) इत्यत्र द्वित्वेऽप्येकवचनं प्रयुक्तम् । ऋन्नेभ्यो ङीप् पा० ४।१।५ इत्यत्र द्वित्वेऽपि बहुवचनम्, नदीभिश्च' पा० २।१।२० इत्यत्रैकत्वेऽपि बहुवचनम् पाणिनिना प्रयुक्तम् । यद्युच्यते, ४।१।५ सूत्रे ऋदन्तानां नकारान्तानां च बहुत्वाद् बहुवचनम्, २।१।२० सूत्रे नदीविशेषाणां गङ्गायमुनादीनां ग्रहणाय बहुवचनम् इति तदपि न, तथा सति' 'आदेशप्रत्यययोः' (पा० ८।३।५९) इत्यादावपि आदेशानां प्रत्ययानां च बहुत्वाद् बहुवचनस्य युक्तत्वम् मन्यताम् । बहुवचनस्य कार्यान्तरसाधकत्वमपि न युक्तम् तथा सति 'षड्भ्यो लुक्' पा० ७।१।२२ इत्यत्रापि बहुवचनसत्वात् तादृशकल्पनान्तरापत्तेः । न त्वेवं कुतो नदीविशेषाणां ग्रहणमिति चेत् श्रूयताम्, व्याख्यानादेवेति । एवंचैकवचने कृतेऽपि व्याख्यानान्नदीविशेषग्रहणस्य सम्पादनसंभवात् बहुवचनप्रयोगो व्यर्थ एव । कथनस्यास्य तात्पर्य यत् पाणिनि-सूत्रेषु वचनव्यवस्थाऽस्तव्यस्ता । अतश्चन्द्राचार्येण प्रायः एकवचनमेव प्रयुक्तम्, गणपाठसम्बद्धेषु सूत्रेषु तु बहुवचनमेव ।

एवंचैकवचनप्रयोगाल्लाघवं जातम् । यथा—

पा० सूत्राणि	चान्द्रसूत्राणि
सर्वकूलाभ्रकरीषेषु कषः ३।२।४५	कूलाभ्रकरीषाच्च कषः १।२।२६
मितनखे च ३।२।३४	मितनखात् १।२।१८
लषपतपदस्थाभूवृषहन-कमगमश्रुभ्य उकञ् ३।२।१५४	लषपतपदस्थाभूश्रुवृषहनकमगम उकञ् १।२।१०२

नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च ४।१।५५ (अङ्गगात्रकण्ठेभ्यश्चेति वक्तव्यम् इति ४।१।५४ काशिकायां चान्द्रप्रभावः)	नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाङ्ग-गात्रकण्ठात् २।३।६२
कबरमणिविषशरभ्यो नित्यम् वा० ४।१।५५-२	कबरमणिविषशरात् २।३।६४
समवप्रविभ्यः स्थ; १।३।२२	संविप्रावात् १।४।६५
द्वित्रिचतुर्भ्यः सुच् ५।४।१८	द्वित्रिचतुरः सुच् ४।४।७

(१२) निपातनप्रयुक्तं प्रक्रियालाघवम् यथा 'इदम् अयम् इयम्' चा० ५।४।७२ इति निपातनेन दर्शितम्। पाणिनिना एकस्य अयमित्यस्य साधनाय 'इदोऽय् पुंसि' (पा० ७।२।१११) इति विशेषसूत्रम् इदमोम (पा० ७।२।१०८) इति लिङ्गत्रयसाधारणसूत्रं च निर्मितम् एवमेव इयमित्यस्य साधनाय यः सौ (पा० ७।२।११०) इति सूत्रमस्ति। इदं सर्वं न ह्येकमुदाहरणं योगारम्भं प्रयोजयति 'इति वैयाकरणसिद्धान्तविरुद्धमपि। उक्तसिद्धान्ते योगारम्भमित्यस्य सामान्ययोगारम्भमिति तात्पर्ये स्वीकृतेऽपि न पूर्वनिर्दिष्टसिद्धान्तविरोधपरिहारः।

चन्द्राचार्येण एकेनैव सूत्रेण लिङ्गत्रये प्रथमैकवचने सम्पद्यमानं रूपत्रयं साधितम्।

(१३) 'छन्दसि' 'भाषायाम्' इति भागद्वयाकरणात् अनेकत्रानयोः शब्दयोः विन्यासजन्यगौरवं यथा पाणिनीयव्याकरणे वर्तते तथाऽत्र नास्ति। अत्र षष्ठाध्यायसमाप्तिपर्यन्तं प्रथमं लौकिकाः शब्दाः निष्पादिता, अनन्तरं च वैदिकशब्दविशेषाः। वैदिकानां शब्दानां निष्पादनाधिकरणत्वादेवान्तिमा अध्यायौ विलुप्तौ वेदानां पठन-पाठनयोः विलुप्तप्रायत्वात्। सिद्धान्तकौमुद्या अपि वैदिकस्वरप्रक्रिये उपेक्षिते एव वर्तेते। अष्टाध्यायीक्रमे तु 'लौकिकवैदिकयोः शब्दयोः साधनाय सह सूत्रनिर्माणात् सन्दर्भबोधायोभयज्ञानस्यावश्यकत्वात्तथोपेक्षा नाभवत्।

(१४) सूत्रनिष्ठस्य कस्यापि पदस्य व्याख्याविशेषमाश्रित्य तत्रैव तत्सूत्रोक्तानां बहूनां भागानां समावेशं दर्शयित्वा लाघवं दर्शितम्। तद् यथा :—'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (पा० ३।३।१६१) इत्यस्य स्थाने 'विधिसंप्रश्नप्रार्थनेषु' (चा० १।३।१२१) इति सूत्रं कृत्वा विधिं व्यापकार्थं व्याख्याय तत्रैव निमन्त्रणा-मन्त्रणाधीष्टानामन्तर्भावो दर्शितः। विधिं वृत्तौ व्याचक्षाणश्चन्द्राचार्य एवं वदति स्मः-' विधिरप्राप्तनियोगः, स इष्टार्थोऽपि चाइष्टार्थोऽपि। प्रत्याख्याने सप्रत्यवायः निष्प्रत्यवायो वा सत्कारपूर्वको वा न्यक्कारपूर्वको वा सर्वोऽप्यप्राप्त-नियोगः विधिरेव। संप्रश्नः संप्रधारणा। प्रार्थनं याचनमिष्टार्थशसनं च। कटं कुर्याद् भवान्। यजेत्। दद्यात्। सर्वत्र विधौ लिङ्। यत्र पाणिनीया आमन्त्रणे निमन्त्रणे च' इह भवान् भुञ्जीत, इह आसीत भवान् इत्यादौ लिङमिच्छन्ति 'तत्रापि विधिरेव; यतः यत्राङ्गीकृतस्य प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम्, यत्र च प्रत्याख्याने कामचारस्तदामन्त्रणम् उभयत्रापि अप्राप्तनियोगत्वाद् विधिरेव। सत्कारपूर्वको नियोगोऽध्येषणमुच्यते तदपि विधिरेव। न्यक्कारपूर्वको नियोगः प्रैषः, तत्र लोट्लकारः वक्ष्यते[1]।

(१५) सम्पूर्णानामनावश्यकत्वेनानुभूतानां सूत्राणां परित्यागात् लाघवमिह दृश्यते। तथाहि :—

(क) बहूनि एतादृशानि विशिष्टसूत्राणि सन्ति येषां कार्याणि सामान्यसूत्रेणैव सिद्ध्यन्ति। चन्द्रेणेदृशानि

---

१. चा० १।१।१२१ सूत्रवृत्तिः।

चत्वारि सूत्राणि प्रत्याख्यातानि । यथा कृञो हेतुशीलानुलोमेषु १।२।७ सूत्रं सामान्यं टप्रत्ययविधायकं स्वीकृत्य दिवादीनि चत्वारि पा० सूत्राणि ३।२।२०-२३ प्रत्याख्यातानि ।

(ख) तान्यपि सूत्राणीह परित्यक्तानि येषां स्वीकारे समापततामव्याप्त्यतिव्याप्तिदोषाणां निवारणाय लोकप्रयोग एव शरणीकर्तव्यो भवति । चन्द्रेण प्रथमत एव लोकप्रसिद्धप्रयोगान् शरणीकृत्य तानि सूत्राणि परित्यक्तानि । यथा वर्णात्कारः (पा० ३।३।१०८ सू० वा० २) इति स्वीकृतेऽपि एवकारः एवङ्कारः ओङ्कार इत्यादीनां तेन वार्तिकेनासिद्धचा तेषां साधनाय कारशब्देन समासस्वीकारस्या निवार्यतया तादृशसमासेनैव ककारः अकारः इत्यादिसिद्धेः तद्वार्तिकं चन्द्रेण न स्वीकृतम् ।

(ग) प्रकारान्तरेण सिद्धकार्याणामर्थादन्यथासिद्धानां बहूनां सूत्राणामपि बहिष्करणमिह दृश्यते ।

तत्र प्रथमो यथा—

सप्तम्यां जने र्डः 'पञ्चम्यामजातौ', उपसर्गे च संज्ञायाम्, अनौ कर्मणि, अन्येष्वपि दृश्यते (पा० सू० ३।२।९७-१०१) इतीमानि पञ्चसूत्राणि न्यक्कृत्य चान्द्रव्याकरणे केवलमेकमेव सूत्रं कृतम् 'डः' १।२।६५ इति ।

द्वितीयो यथाः—

चार्थे एकार्थीभावे (द्वन्द्वेसमासे) अन्यस्मिन् च समासे पूर्वप्रयोगार्थानि यान्यनेकानि सूत्राणि पाणिनीयानि दृश्यन्ते तानि चान्द्रव्याकरणे परित्यक्तानि । पूर्वप्रयोगसूत्राणां व्यवस्थितार्थप्रत्यायकत्वाभावात् । काव्ये शास्त्रे लोके च यथेच्छं शब्दानां पूर्वप्रयोगदर्शनात् । किंच स्वयं पाणिनिनाऽपि स्वकृतस्य पूर्वप्रयोगनियमस्य[1] निर्वाहो न कृतः । अतश्चन्द्रगोम्याचार्येण लक्ष्यानुसारितत्तद्विवक्षाबलमवलम्ब्य पूर्वप्रयोगसूत्राणि मूलत एव परित्यक्तानि ।

अतोऽत्र 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पा० १।२।४३) उपसर्जनं पूर्वम् (पा० २।२।३०) राजदन्तादिषु परम् (पा० २।२।३१) द्वन्द्वे घि । अजाद्यदन्तम् । अल्पाच्तरम् (पा० २।२।३२-३४) अनेकप्राप्तावेकस्य नियमोऽनियमः शेषेषु । ऋतुनक्षत्रामापूर्व्येण समानाक्षराणाम् । अभ्यर्हितम् । लघ्वक्षरम् । (अपर आह-सर्वतएवाभ्यर्हितं पूर्वं निपततीति वक्तव्यम् लघ्वक्षरादपि इति भाष्यम्) वर्णानामानुपूर्व्येण । भ्रातुश्च ज्यायसः । संख्याया अल्पीयस्याः । धर्मादिष्वनियमः । २।२।३४ सू० वा० २-९ । सप्तमीविशेषणे बहुव्रीहौ २।२।३५ । बहुव्रीहौ सर्वनामसंख्ययोरूपसंख्यानम् । वा प्रियस्य । गड्वादेः परा सप्तमी । २।२।३५ वा० १-३ । निष्ठा २।२।३६ । जातिकालसुखादिभ्यः परा निष्ठा वाच्या । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ । द्वन्द्वे ध्यन्तादजाद्यदन्तं विप्रतिषेधेन उभाभ्यामल्याच्तरम् । वा हिताग्न्यादिषु २।२।३७ । कडाराः कर्मधारये २।२।३८ । इत्यादीनि पूर्वप्रयोगबोधकानि सूत्राणि अत्र परित्यक्तानि । तथाहि-एतस्मिन्नेकार्थी-भावकाण्डे यदेवपूर्वमुक्तं तस्यैवपूर्वप्रयोगो भवति । अतः उपसर्जनं पूर्वम् इतिसूत्रं तन्मूलकमुपसर्जनसंज्ञासूत्रं च व्यर्थमेव । क्वचिद् दन्तानां राजा राजदन्तः इत्यादौ पूर्वोक्तनियमोपेक्षाऽपि दृश्यते बहुलाधिकारेण । तादृशस्य प्रयोगस्य समाधानं सुकरम् । क्वचित् क्रमं प्रत्यनादरात् पूर्वकालस्यापि परनिपातः, लिप्तवासितः, नग्नमुषितः, सिक्तसम्मृष्टः, मृष्टलुञ्चितः अवक्लिन्नपक्वः, उप्तगाढः । एतादृशस्य प्रयोगस्य समाधानाय, विवक्षैव शरणीकर्तव्या । चार्थे यदेकार्थ्यम् (यदा द्वन्द्वसमासः) तत्र क्वचिदिदुदन्तं पूर्वं निपतति, यथा अग्निवातौ, पटुगुप्तौ । क्वचिद् व्यभिचारः, परनिपात दर्शनात् यथा चित्रास्वाती, भार्यापती । जम्पती, दम्पती पुत्रपती, पुत्रपशू । क्वचिदनियमः, उभयोरपि यथाकामं पूर्वप्रयोगदर्शनात्-सर्पिर्मधुनी, मधुसर्पिषी अन्तादी, आद्यन्तौ ।

---

१. पाणिनिसूत्रेषु विभाषावृक्ष...शकुन्यश्ववडवपूर्वापराधरोत्तराणाम् २।४।१२ गन्धस्येदुत्पूतिसुसुरभिभ्यः ५।४।१३५ इत्यादिषु पूर्वप्रयोगनियमः व्यभिचरितः ।

गुणवृद्धी, वृद्धिगुणौ पटुमृदुशुक्लाः पटुशुक्लमृदवः । क्वचिदजाद्यदन्तं पूर्वं निपतति-अश्वखरम्, उष्ट्रखरम् । क्वचिद् विपर्ययोऽपि दृश्यते-शूद्रार्यम्, आर्यशूद्रम् । अवन्त्यश्मकम् विष्वक्सेनार्जुनौ । क्वचिदनियमोऽपि विलोक्यते—धर्मार्थौ, अर्थधर्मौ । शब्दार्थौ अर्थशब्दौ, कामार्थौ, अर्थकामौ चन्द्रार्कौ, अर्कचन्द्रौ, इन्द्राग्नी अग्नीन्द्रौ, चन्द्रार्केन्द्राः, अर्कचन्द्रेन्द्राः । क्वचिदल्पाक्षरं पूर्वं निपतति-प्लक्षन्यग्रधौ धवखदिरौ । क्वचिदस्यापि विपर्ययो दृश्यते—नियमस्य—उलूखलमुसले तण्डुलकिण्वम्, चित्ररथबाह्लीकौ, स्नातकराजानौ अक्षिभ्रुवम्, दारगवम् । क्वचिदनियमः—धनपतिरामकेशवाः विपूयविनीयजित्यामुञ्जकल्कहलिषु पा० ३।१।११७ यदुच्यते ऋतुनक्षत्राणामानुपूर्व्येण तुल्याचाम् हेमन्तशिशिरौ । कृत्तिकारोहिण्यौ । अतुल्याचामल्पाचः पूर्वनिपातः—ग्रीष्मवसन्तौ, तदयुक्तम् अन्यथापि दर्शनात् :—शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् (चरक संहिता सूत्र० २७।२२६) श्रवणाधनिष्ठाऽश्विनीषु यायान् नरः फलोपचयकामः यच्च संख्याभ्रातृवर्णानामपि क्रमात् पूर्वनिपातमिच्छन्ति पञ्च च षट् चेति पञ्चषट् । युधिष्ठिरार्जुनौ, ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः इत्यादौ यथा, तदप्ययुक्तम्, व्यभिचारदर्शनात् द्व्येकयोर्द्विवचननैकवचने (पा० सू० १।४।२२) त्रिद्विदृष्टिविवर्जिताः' अर्जुनभीमसेनौ । शूद्रविट्क्षत्रियविप्राणाम् । यच्च निर्दिष्टं लघ्वक्षरं पूर्वं प्रयुज्यत इति तदपि सव्यभिचारम् 'काशकुशावलम्बनम्', गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु, पा० २।४।७७ फलसेनावनस्पतिमृग (पा० सू० ।।।४।१२-वा० १) इत्यादिदर्शनात् ।

अभ्यर्हितं पूर्वं निपततीति यदुक्तम्, तदपि न, वासुदेवार्जुनौ इत्यादौ तथा दर्शनेऽपि नरनारायणावित्यादौ व्यभिचारदर्शनात् ।

'नागृहीतविशेषणा बुद्धि विशेष्य उपजायते' इति नयेन विशेषणं पूर्वं निपतति; नीलोत्पलम्, चित्रगुः, । सर्वादीनामपि विशेषणत्वादेव पूर्वनिपातः । सर्वश्वेतः सर्वकृष्णः । तथा संख्याया अपि विशेषणत्वादेव पूर्वनिपातः पञ्चरक्तः, सप्तोन्नतः; द्वयन्यः त्र्यन्यः । सप्तम्यन्तस्यापि विशेषणत्वादेव पूर्वप्रयोगः कण्ठेकालः, बहेगडुः । गडुकण्ठः, गडुशिराः, वज्रपाणिः इत्यादयस्तु गडूपलक्षितः कण्ठोऽस्य इत्यादिरीत्या सिद्धयन्ति । अन्यथा शिरसिगडुरिति एवं वज्रपाणिः इत्यत्रापि वज्रोपलक्षितः पाणिरस्येति विवक्षा बोध्या । अन्यथा पाणिवज्रः । क्तान्तस्यापि विशेषणत्वादेव पूर्वनिपातः कृतकटः, भिक्षित-भिक्षः । कटं कृतमनेनेति विग्रहे कामचारः, महाहवरिपुस्कन्धघृष्टचक्राय चक्रिण इति प्रयोगदर्शनात् । उद्यतासिः अस्युद्यत इति विशेषणविशेष्ययोर्यथेष्टत्वाद् उभयमपि सम्भवति । एवमाहिताग्निः अग्न्याहितः, जातदन्तः दन्तजातः, जातपुत्रः पुत्रजातः, जातश्मश्रुः श्मश्रुजातः, पीततैलः, तैलपीतः, ऊढभार्यः भार्योढः, तथा जातिकालसुखादिभ्यः—सारङ्गजग्धी, जग्धसारङ्गा । पलाण्डुभक्षितः, भक्षितपलाण्डुः मासजातः जातमासः, सुखहीना, हीनसुखा, एवमेव गुडप्रियः प्रियगुडः । एवमुत्तरपदार्थेऽपि कडारजैमिनिः जैमिनिकडारः, गडुलकाणः काणगडुलः, खञ्जकुण्ठः, कुण्ठखञ्जः, खोडखलतिः खलतिखोडः, गौरवृद्धः, वृद्धगौरः, भिक्षुपिङ्गलः पिङ्गलभिक्षुः, तनुवटरः, वटरतनुः कृष्णश्वेतः, श्वेतकृष्ण इत्यादि प्रयोगाः सेत्स्यन्ति । पाणिनिना पूर्वप्रयोगनियमस्य स्वनिर्मितस्य पालनं स्वीयायामष्टांध्याय्यामकृत्वा स्वयमप्यत्र प्रकरणेऽनास्था दर्शिता यथा—

विपूयविनीयजित्यामुञ्जकल्कहलिषु ३।१।११७ ।

एवञ्च पूर्वप्रयोगसाधकानि सूत्राणि चान्द्रव्याकरणे निरस्तानि । स्पष्ट चेदं चान्द्र २।२।४८ सूत्रवृत्तौ ।

तृतीयो यथा—

पञ्चमीविभक्तिविधायकानि अष्टादशसूत्राण्यत्रान्यथासिद्धकार्याणि दर्शयित्वा प्रत्याख्यातानि सर्वत्र 'अवधेः

पञ्चमी' (चा० २।१।८१) इति सूत्रेणावधि मत्वैव पञ्चमीसाधनात् । 'ग्रामाद् गच्छति' इत्यत्र गमनावधिर्ग्रामः । चौरेभ्यो बिभेति । चौरेभ्यस्त्रायते इत्यनयो र्भयत्राणयोरवधि श्चौराः । गतिरिव भयस्यापि भाव-वाचक संज्ञात्वात् । यवेभ्यो गां वारयति, यवेभ्यो गां निषेधयति इत्यत्रापि गोकर्मकवारण-निषेधनयोरवधिभूतेभ्यो यवेभ्यः पञ्चमीसिद्धेः । उपाध्यायादन्तर्धत्ते । उपाध्यायादधीते । शृङ्गाच्छरो जायते । हिमवतो गङ्गा प्रभवति । अधर्माज्जुगुप्सते । अधर्माद्विरमति । अधर्मात् प्रमाद्यति । अन्यो देवदत्तात् भिन्नो देवदत्तात् व्यतिरिक्तो देवदत्तात् । आरादेवदत्तात् इतरो देवदत्तात् । इत्यत्र अन्तर्धानादेरिव भिन्नत्वबुद्धेरवधिभूतेभ्यः पञ्चमीसिद्धेः ।

पूर्वो ग्रामात्, प्राग्ग्रामात्, दक्षिणा ग्रामात्, दक्षिणाहि ग्रामात्, सर्वत्र ग्रामोवधित्वेन विवक्षित एव । नटस्य शृणोति इत्यत्र सम्बन्धो विवक्षितः नावधिरतः षष्ठी । अतः नियमपूर्वकविद्यास्वीकार इत्यर्थकस्य 'उपयोगे' इतिनिवेशस्यापि नास्त्यावश्यकत्वम् । एवमेव सम्बन्धविवक्षायां पुरो ग्रामस्य, दक्षिणतो ग्रामस्य, उपरि शैलस्य, उपरि ग्रामस्येत्यादौ षष्ठी अनिवार्यैव । अवधिविवक्षायां तु तसर्थैरपि योगे पञ्चमी भवत्येव । ततः पश्चात् तत उपरिष्टात् इत्यादौ यथा । प्रासादमारुह्य प्रेक्षते इत्यर्थके प्रासादात् प्रेक्षत इत्यत्रावधेरेव पञ्चमी । एवमासन उपविश्य प्रेक्षते इत्यर्थके आसनात् प्रेक्षत इत्यादावपि (आरूढप्रासादावधिकप्रेक्षणमित्यर्थः) । एवं प्रश्नाख्यानयोरपि कुतो भवान् ? पाटलिपुत्रात् इत्यत्र । तथा देशकालमानेऽपि पाटलिपुत्राद् राजगृहं सप्त योजनानि सप्तषु योजनेष्विति वा एवं कार्तिक्या आग्रहायणी मास इति ।

इत्थं चान्द्रव्याकरणे 'ध्रुवमपायेऽपादानम्, भीत्रार्थानां भयहेतुः, पराजेरसोढः वारणार्थानामीप्सितः, अन्तर्द्धौ येनादर्शनमिच्छति आख्यातोपयोगे । जनिकर्तुः प्रकृतिः, भुवः प्रभवः, अन्यारादितरर्ते दिक्शब्दांञ्चूत्तरपदाजाहियुक्ते (पा० १।४।२४-३१) इति सूत्राणि ल्यब्लोपे कर्मण्यधिकरणे च । जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् इति वार्तिक-द्वयं 'प्रश्नाख्यानयोश्च, यतश्चाध्वकालनिर्माणम्, तद्युक्तात् काले सप्तमी, अध्वनः प्रथमा २।३।२८।१-३ इत्यादीनि च प्रत्याख्यातानि ।

एतत्तु स्पष्टं प्रतीयते यत् चन्द्रगोमिनाचार्येण परमाग्रहादेतेषां प्रत्याख्यानं कृतम् । अवधित्वस्वीकृतिः क्वापि क्वापि मनसाऽननुमोदिताऽपि बुद्धचाऽऽहितैव यथा प्रासादात् प्रेक्षते इत्यत्र प्रेक्षणस्यावधिः प्रासाद इति नानुभूत्यनुमोदितः । अतएव कातन्त्रविस्तरे उक्तम्-पाणिनीयतन्त्रोदितं प्रत्याख्यातुं मया यदुक्तम् तत् चान्द्रव्याकरणोदितम् । किम्मतं स्वीकरणीयं किंवाऽस्वीकरणीयम् इत्यत्र विषये मम पक्षपातः नास्ति मया तु केवलं चान्द्रतत्वमनूदितम् । एतावत्त्वव-श्यमेव वक्तव्यम् यत् तन्त्रान्तरप्रणीतानां सूत्राणां परमाग्रहहेतुकेन प्रत्याख्यानेन आयासद्वैगुण्यमापद्यते मनसि प्राप्त-संस्काररूपाणां नियमानां तर्कद्वारा झटिति निराकरणमप्यसंभवमेव । बद्धमूलस्य तस्य संस्कारस्य निराकरणाय नूतनस्य च विचारस्य स्थापनाय बौधिकमायासद्वयं भवतीतिकातन्त्रविस्तरस्य तात्पर्यम् ।[1]

अत्रेदं वक्तव्यम् पाणिनीयं तन्त्रं येनाधीतं भवतु नाम तस्य बुद्धौ ते ते सिद्धान्ताः बद्धसंस्काराः, परन्तु प्रथमत एव चान्द्रव्याकरणमधीयतां न केऽपि पूर्वसंस्काराः सन्ति, न वा तेषां निराकरणप्रयासः समापतति इति कथमायासद्वैगुण्यमिति न जानीमहे ।

(ख) वर्तमानसमीप्ये वर्तमानवद् वा (पा० ३।३।१३१) आशंसायां भूतवच्च पा० ३।३।१३२ क्षिप्रवचने लृट् पा० ३।३।१३३ आशंसावचने लिङ् पा० ३।३।१३४ नाद्यतनवत् क्रियाप्रबन्धसामीप्ययोः पा० ३।३।१३५, भविष्यति मर्यादावचनेऽपरस्मिन्, कालप्रविभागे चानहोरात्राणाम्, परस्मिन् विभाषा पा० ३।३।१३६-१३८ इत्यष्टौ सूत्राणि

---

१. चान्द्रव्याकरणम् भाग १ पृष्ठ १८० टिप्पणी ।

प्रत्याख्यातानि चान्द्रव्याकरणे, एतेषां कार्यस्यान्यथैव सिद्धत्वात् । यथा कदा त्वमागतोऽसि देवदत्त, एष आगच्छामि आगच्छन्तमेव मां विद्धि । कदा गमिष्यसि ? एष गच्छामि, गच्छन्तमेव मां विद्धीत्यर्थः इत्यादौ लङ्विधानार्थं वर्तमानसामीप्ये वर्तमानवद् वा इति सूत्रमनावश्यकम् वर्तमानतैवाऽत्र लटा गम्यते, भूतभविष्यत्ता तु अर्थप्रकरण-शब्दान्तरादिभिः प्रतीयते, यथा गङ्गासमीपं तटं गङ्गैव तथा वर्तमान-समीपो वर्तमान एव । वर्तमानसमीपो भूतस्त-त्फलस्यानुवृत्तेर्वर्तमानः, भविष्यन्नपि तदर्थसाधनानुष्ठानात् वर्तमान एव । क्रियाकालविवक्षायां तु यथाप्राप्तं भूतभविष्य-त्प्रयुक्तं कार्यमिष्टमेव-यथा अद्यागमम् अद्य गमिष्यामीत्यादौ ।

आशंसायां भूतवच्चेत्यपि सूत्रमनावश्यकमेव, यत आशंसायां भविष्यत्कालोऽपि व्यापारः सिद्धेरभिप्रेतत्वात् अत्यन्ताशंसितत्वविवक्षया वर्तमानवद् भूतवद् वा प्रतिभाति । उपाध्यायश्चेदागच्छति युक्ता व्याकरणमधीमहे । उपाध्यायश्चेदागतः । एतदधीतं व्याकरणम् । उपाध्यायश्चेदागमत् एते व्याकरणमध्यगीष्महि । भूतविशेषस्या-विवक्षितत्वात् लङ्लिटौ न भवतः । यथास्वं कालविवक्षायां यथा प्राप्तमेव-उपाध्यायश्चेदागमिष्यति ! युक्ता व्याकरण मध्येष्यामहे । उपाध्यायश्चेदागन्ता युक्ता व्याकरणमध्येतास्महे ।

क्षिप्रवचने पुनरप्राप्तस्यैव क्षिप्रत्वमाशास्यत इति भूतवद् वर्तमानवद् वा विधिर्नभवति, सिद्धेरभिप्रेतत्वाभावात् यथा उपाध्यायश्चेत् क्षिप्रमागमिष्यति क्षिप्रं व्याकरणमध्येष्यामहे । क्षिप्रतायाश्च विवक्षितत्वात् अनद्यतनविवक्षा नास्तीति लुड्पि न भवति ।

अशंसावचने लिङ् (पा० ३।३ ११४) इति सूत्रमप्यनावश्यकमेव विधिसंप्रश्नप्रार्थनेषु (पा० १।३।१२१) इति सूत्रस्य वक्ष्यमाणत्वात् तत्र प्रार्थनं याचनमिष्टार्थशंसनंच इष्टार्थाशंसने तेनैव लिङ्सिद्धेः । यथा उपाध्यायश्चेदाग-च्छेत् आशंसे युक्तो व्याकरणमधीयीय ।

नाद्यतनवत् क्रियाप्रबन्धसामीप्ययोः (पा० ३।३।१३५) इति निषेधसूत्रमपि नावश्यकम् क्रियाप्रबन्धसामीप्ययोः प्रकर्षविवक्षाया अभावादनद्यतनवद् विधेरभावस्य स्वतः सिद्धत्वात् । यावज्जीवं भृशमन्नमदात् । यावज्जीवं भृशमन्नं दास्यति । येयं पूर्णमास्यतिक्रान्ता एतस्यामुपाध्यायोग्नीनाधास्यते इत्यादिसिद्धेः ।

भविष्यति मर्यादावचनेऽवरस्मिन् (पा० ३।३।१३६) इत्यपि सूत्रमनावश्यकम्, विवक्षयैव सकलेष्टसिद्धेः । तथाहिः—भविष्यति मर्यादावचनेऽवरस्मिन् प्रविभागे विवक्षायाः सन्निकर्षस्यापनपरत्वात् लुड् न भवति तेन योऽय-मध्वा गन्तव्य आ पाटलिपुत्रात् तस्य यदवरं कौशम्ब्यास्तत्रौदनं भोक्ष्यामहे । योऽयं संवत्सर आगमी, तस्य यदवर-मागृहायण्याण्यास्तत्र युक्ता अध्येष्यामहे । भूतस्य तु भेदेनानुभूतत्वादनद्यतनविवक्षाप्यस्ति । योऽयमध्वा गत आ पाटलिपुत्रात् तस्य यदवरं कौशाम्ब्यास्तत्रौदनमभुञ्जमहि । योऽयं सम्वत्सरोऽतीतस्तस्य यदवरमागृहायण्यास्तत्र युक्ता अध्यैमहि । मर्यादावचनाभावेऽपि विप्रकर्षपरत्वात् विवक्षया अनद्यतनविधिर्भवत्येव । योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं कौशाम्ब्यास्तत्रोदनं भोक्तास्महे योऽयं कालआगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे ।

परस्मिन् पुनः प्रविभागे विप्रकृष्टपरत्वात् अनद्यतनविवक्षाप्यस्त्येव । योऽयमध्वा गन्तव्य आ पाटलिपुत्रात् तस्य यत् परं कौशाम्व्यास्तत्रोदनं भोक्तास्महे ।

भविष्यत्सामान्यविवक्षायायां लृडपि भविष्यत्येव एवं कालकृतेऽपि परस्मिन् प्रविभागे यथाविवक्षं लृड्-लुटौ सिद्धौ । योऽयं सम्वत्सर आगामी तस्य यत् परमाग्रहायण्या स्तत्र युक्ता अध्येतास्महे अध्येष्यामह इति वा ।

अहोरात्राणामहोरात्रै र्वा प्रविभागे भेदस्य विवक्षितत्वात् अवरस्मिन्नपि प्रविभागेऽनद्यतनविवक्षाऽत्येव । योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्त अध्येतास्महे । योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे इत्यादि ।

अतएव प्रकरणमिदं विवक्षाबलमाश्रित्य चन्द्राचार्येण परि[1]त्यक्तम् ।

काशिकाऽपि चन्द्रस्यानुकरणं कृत्वा प्रकरणमिदं व्यर्थं समर्थयति 'योऽहि मन्यते गच्छामीति पदं वर्तमाने काल एव वर्तते । ततः कालान्तरप्रतीतिस्तु वाक्याद् भवति । न च वाक्यगम्यः कालविशेषः पदसंस्कारवेलायामुपयुज्यते इति तादृशं वाक्यार्थज्ञं प्रतिपत्तारं प्रकरणमिदं नारम्भणी[2]यम् । (काशिका वृत्ति र्यथा चान्द्रवृत्तेरुत्तरकालवर्तिनी तथा प्रतिपादितम् जयादित्यचर्चाप्रकरणे) ।

एवमेव 'धातुसम्बन्धे प्रत्ययाः' (पा० ३।४।१) इति पाणिनिसूत्रं चान्द्रव्याकरणे निष्प्रयोजनमिति कृत्वा प्रत्याख्यातम् । धात्वर्थानां सम्बन्धे यत्र काले प्रत्यया उक्ता स्ततोऽन्यत्रापि तेषां विधानाय सूत्रमिदं पाणिनीयैः स्वीक्रियते । तिङ्वाच्यक्रियायाः प्राधान्यात् तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः । एवंच तिङ्वाच्यक्रियायाः कालानुरोधेन कृदन्ततद्धितान्तनिष्ठकालस्य परिवर्तनम् । एवंच सोमयाजी अस्य पुत्रो भविता इत्यादौ भवितेति लुडर्थक्रियानुरोधात् सोमेन इष्टवान् इति भूतार्थे विहितः 'करणे यजः' इतिणिनिः प्रत्ययः अनद्यतने भविष्यति भवति तेन सोमेनेक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनमित्यर्थः सम्पद्यते । 'वसन् ददर्शावतरन्तमम्बरात्' इति माघश्लोके वर्तमानकालार्थस्य शतृप्रत्ययस्य ददर्शेति भूतकालानुरोधेन भूते विधानम् । तेनातीतवासकर्तृकं दर्शनमित्यर्थः सम्पन्नः । एवंचोषित्वा ददर्शेत्यर्थः । एवं यशौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् इत्यत्रापि बोध्यम् । 'कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः, न विव्यथे तस्य मनो नहि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः' इति 'लृटः सद् वा' (पा० ३।३।१४) इति भविष्यति विहितस्य सत् प्रत्ययस्य भूतार्थे विधानं सम्भवं जातम् ।

गामानासीदित्यादौ तदस्यास्त्यस्मिन्निति मतुप् (पा० ५।२।९४) इति मतुप् प्रत्ययोऽस्त्यर्थेऽर्थात् वर्तमाने विहितोऽनेन आसीदिति भूतार्थकतिङन्तक्रियानुरोधेन भूते क्रियते । तेन गोमानासीदित्यस्य गावोऽस्यासन्निरयर्थः गोमान् भविता इत्यस्य गावोऽस्य भवितार इत्यर्थ ।

(ग) धातुसम्बन्धे प्रत्ययाः पा० ३।४।१ इति सूत्रस्वीकारे 'भाविकृत्य मासीदिति लोकप्रयोगो न सिद्धचति। सूत्रपद्धत्या भाविशब्दस्य भूतकालवाचकत्वे स्वीकृते सत्यतीतं भवनमित्यर्थात् आसीदित्यस्यापि एककर्तृकमतीतभवनमित्यर्थात् भाव्यासीच्छब्दयोः युगपत् प्रयोगोऽनुपपन्नः स्यात् 'भावि' शब्दार्थस्याऽसीच्छब्देनैव लाभात् । ततश्चैतावन्तं कालं भावितया व्यवहृतं तदिदानीमासीदित्यर्थोऽत्राऽवश्यस्वीकार्यः । स्वीकृते तु गोमानासीदित्यत्रापि गोमानिति व्यवहारविषयः आसीदित्यर्थोऽस्तु ।

'वसन् ददर्श' इत्यादौ भूतार्थे शत्रन्तस्य लक्षणा स्वीकार्या । 'सोमयाज्यस्य पुत्रो भविता 'इत्यादौ भूत एव णिनिप्रत्ययोऽस्तु, भवितेति लुडन्तसमभिव्याहारे सति सोमयाजीति व्यवहरिष्यमाण इत्यध्याहारेण णिनेर्भविष्यदर्थे लक्षणया वा प्रयोगः सुसिद्धः स्यात्, इति सूत्रमिदं व्यर्थम् । न चाध्याहारलक्षणाप्रयुक्तक्लेशपरिहाराय सूत्रमारम्भणीयम् इति वाच्यम् सूत्रारम्भस्य स्वतोमहाक्लेशकरत्वात् । सूत्रे समारब्धेऽपि 'भाविकृत्यमासीदिति' लोकप्रख्यातस्य प्रयोगस्य संगतित्वसिद्धयेऽध्याहारादिकस्यावश्यमाश्रयणीयतया तेनैव पथा सकलसूत्रोदाहरणे निष्पन्ने सूत्रं व्यर्थमेव ।

---

१. द्रष्टव्यम् चान्द्रव्याकरण वृत्तिः १।३।१०६ सूत्रस्याधस्तात् ।

२. काशिका (पा० सूत्र ३।३।१३१) ।

तदेतत् सर्वमभिप्रेत्य चन्द्राचार्येणोक्तम्-स्वव्याकरणवृत्तौ १।३।१८ सूत्रस्य अर्हशक्त्योरित्यस्य सोमयाजीति भूत एव कालः। अस्य पुत्रो जनिता इति पदान्तरसम्बन्धे भविष्यत्कालता गम्यते। एवं कृतः कटः श्वो भविता। भावि कृत्यमासीत्, गोमानासीत्। गोमान् भवितेति।

(घ) क्रियासमभिहारे लोट् लोटोहिस्वौ वा च तध्वमोः ३।४।२ (पौनः पुन्ये भृशार्थे च द्योत्ये धातो र्लोट् स्यात् तस्य च हिस्वौस्तस्तिङामपवादः, तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तः तिङ्संज्ञौ च। तध्वमोर्विषये तु हिस्वौ वा स्तः, पुरुषैकवचनसंज्ञे तु नानयोरतिदिश्येते हिस्वविधानसामर्थ्यात्। तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्तरि, आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु) इति समुच्चयेऽन्यतरस्याम् ३।४।३ (अनेककक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात्) यथा विध्यनुप्रयोगः पूर्वस्मिन् ३।४।४ (आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः) इति समुच्चये सामान्यवचनस्य ३।४।५ (समुच्चये लोड्विधौ सामान्यार्थकस्य धातोरनुप्रयोगः स्यात्। अनुप्रयोगाद् यथायथं लडादयस्तिबादयश्च। ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिः) इति च सूत्राणि क्रियासमभिहारे द्वे वाच्ये इति वार्तिकं च चान्द्रव्याकरणे परित्यक्तानि। सूत्र-वार्तिक-कार्यस्यान्यथासिद्धत्वात् तथाहिः—लुनीहि लुनीहीत्येवायं लुनाति। अधीष्वाधीष्वेत्येवायमधीते इति सर्वत्र लोडेव, स च मध्यमपुरुषैकवचनयोः। तथासति गणकार्ये कृते लुनीहि अधीष्वेतिपदे सिद्धे तस्याभीक्ष्ण्ये, द्विर्वचनम् वीप्साभीक्ष्णयो र्द्वे (चा० ६।३।१) इति सूत्रेण। एतादृशेन प्रयोगेणैतदुक्तं भवति एवमसौ त्वरावान् यदन्यानपि प्रेरयन्निव तां क्रियां करोतीति। एवं लुनीत लुनीते त्येवायं लुनाति। अधीध्वमधीध्वमित्येवायमधीते। तथा कालान्तरेष्वपि लुनीहि लुनीहीत्येवायमलावीत्; लुलाव, लविष्यति लविता। एवं स्वशब्देऽपि अधीष्वाधीष्वेत्येवमयमध्यगीष्टेत्यादि योज्यम्। एवं समुच्चयेऽपि मठमट, बिहार मटेत्येवायमटति छन्दोऽधीष्वव्याकरणमधीष्वेत्येवायमधीते। व्यापारभेदे तु निसर्गतः सामान्यवचनस्यैव व्यापकत्वादनुप्रयोगो भवति। ओदनं भुङ्क्ष्व सक्तून् पिव, धानाः खादेत्येवायमभ्यवहरति इति कृत्वा सूत्र पञ्चकमिह प्रत्याख्यातम् चान्द्रव्याकरणे। अत्रेदं बोध्यम्—

लुनीहि लुनीहीति लुनाति इत्यत्र क्रियासमभिहारे लोट्स्वीकारे पुनः पुनरतिशयेन वा लवनाभिन्नमेक कर्तृकं लवनमित्येव शाब्दबोधः। यङ्प्रप्यये कृते लोलूयते इत्यस्यापि स एवार्थः एवंचानयोर्न कोऽपि विशेषः सिद्धयति। अतः भाषागतं वैशिष्ट्यं यत् किलैतादृशह्यन्तप्रयोगश्रवणादधिगतं भवति, सुरक्षयितुं यङन्तादस्य किमपि वैशिष्ट्यमवश्यस्वीकर्त्तव्यम्। तदस्ति देवदत्तोऽयं लवने तथा त्वरावान् यदेतस्य लवनंदृष्ट्वा दर्शका लवनमतिसरलं कर्म मत्वा तत्र प्रवृत्तो भवति। एवञ्च लुनीहि लुनीहीत्येवायं लुनाति इत्यत्र प्रतीयते यत् असौ देवदत्तः एवं त्वरावान् यदन्यानपि प्रेरयन्निव तां क्रियां करोति। एतादृशस्य वैशिष्ट्यस्यावगतये सूत्राणि त्यक्तव्यानि। लोट् (चा० १।३।१२२) इत्येव लोट् लकारःकार्यः। एतेन सूत्रेण लोट्स्वीकारे तु क्रियासमभिहार एवार्थे विहितस्य लोटः पूर्वोक्तार्थप्रत्यायकत्वं कथंकारं स्यात् ? समुच्चये सामान्यवचनस्येति सूत्रस्वीकारे तु 'मठमट विहारमटेत्येवायमटति' छन्दोऽधीष्व व्याकरणमधीष्वेत्येवायमधीते इत्यादिप्रयोगो न स्यात्, तेनाटतेः पश्चात् प्रयोगस्याननुशासनात्। सूत्रास्वीकारे तु यत्र स एव धातु र्लोटः प्रकृतिभूत्वेन विवक्षितस्तत्र स एव पुनःपुनरागमिष्यति, तत्र तु लोटः प्रकृतित्वेन विभिन्नाः क्रिया विवक्षिता स्तत्र सामान्यवचनस्यैव धातोर्व्यापकत्वादनुप्रयोग औचित्याद् भविष्यति इत्थं प्रकरणमिदं प्रत्याख्यातम्।

(ङ) एवमेव णमुल्प्रकरणे बहूनि सूत्राणि चान्द्रव्याकरणे परित्यक्तानि। अन्यथाकारं भुङ्क्ते, एवंकारं भुङ्क्ते, कथंकारं भुङ्क्ते इत्थंकारं भुक्ते इत्यादौ णमुल्प्रत्ययार्थंविहितम् 'अन्यथैवं कथमित्थंसुसिद्धाप्रयोगश्चेत्' पा०

३।४।२७ इति सूत्रं न कर्तव्यम् 'अन्यथाकारं भुङ्क्ते' इत्यादेः घञन्तेन क्रियाविशेषणेन सिद्धत्वात् । ओदनपाकं शेते इत्यादिसिद्धये यथाव्युत्पत्तेः स्वीकारस्यावश्यकत्वेन तेनैव सिद्धे सूत्रस्यास्य वैयर्थ्यात् ।

'यथातथयोरसूयाप्रतिवचने' (पा० ३।४।२८) इति सूत्रमपि न कर्तव्यम्, 'यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन 'इत्यादेरपि घञन्तक्रियाविशेषणत्वादेव सिद्धे. ।

कन्यादर्शं वरयति सर्वाः कन्या वरयतीत्यर्थः ब्राह्मणवेदं भोजयति यं यं ब्राह्मणं जानाति, लभते विचारयति वा तं सर्वं भोजयतीत्यर्थः इत्यादौ णमुलर्थं 'कर्मणि दृशिविदोः साकल्ये' (पा० ३।४।२९) इति सूत्रमपि न कर्तव्यम् घञन्तक्रियाविशेषणेनैव सिद्धत्वात् । 'यावज्जीवमधीते' 'चर्मपूरं ददाति' उदरपूरं भुङ्क्ते' इत्यादिसिद्धयर्थं कृतस्य 'यावति विन्दजीवोः' (पा० ३।४।३०) चर्मोदरयोः पूरे ३।४।२१ इति सूत्रस्याप्यनावश्यकत्वं प्रतिपादितम् चन्द्राचार्येण, अत्रापिघञन्त क्रियाविशेषणत्वस्वीकारेण निर्वाहसम्भवात् ।

'वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्' इति (पा० ३।४।३२) कर्मण्युपपदे पूरेर्णमुल् स्यात् ऊकारलोपश्च वा समुदायेन वर्षप्रमाणे गम्ये तात्पर्यकस्य इति सूत्रस्योदाहरणे स्तः गोष्पदप्रं वृष्टो देवः गोष्पदपूरम् वृष्टो देवः इति । गोष्पदं यथा पूरयेत् तथा देवः वृष्टः इत्यत्रगोष्पदपूर्वकात् पूरधातो र्णमुलि गोष्पदपूरम् इत्यवस्थायाम् ऊकारलोपे गोष्पदप्रं विकल्पे गोष्पदपूरम् इति च रूपं सिद्धचति इति पाणिनीयास्तन्न गोष्पदं प्रातीति गोष्पदप्रमुदकं गोष्पदप्रं वृष्टो देवः । तथाच सर्वा विभक्तयः, समासे च विभक्तिलोपः । गोष्पदप्रवृष्टिरित्यादौ यथा । गोष्पदपूरंवृष्टो देव इत्यादौ तु क्रियाविशेषणत्वेनेष्टसिद्धिः ।

एवं चेलक्नोपं वृष्टो देवः, वस्त्रक्नोपं वृष्टो देवः, वसनक्नोपं इत्यादावपि घञन्तक्रिया-विशेषणत्वमङ्गीकृत्य चेलेक्नोपेरिति सूत्रं प्रत्याख्यातम् । सूत्रसत्वेऽपि वस्त्रक्नोपं वसनक्नोपं वृष्टो देव इत्यादि सिद्धचर्थं घञन्तक्रियाविशेषणस्वीकारस्यावश्यकत्वात् 'स्वंरूपं शब्दस्याशब्दसंज्ञा' स १।१।६८ इति नियमेन चेलपूर्वकस्यैव क्नोपेः कार्यविधानात् । न च व्याख्या नादर्थग्रहणम् गात्रस्नायं वृष्टो देवः पुरुषस्नायं वृष्टो देव इत्यादयर्थं घञन्तक्रिया-विशेषण स्वीकृतेर्विनाऽनिवार्हात् ।

'निमूलकाषं कषति' 'समूलकाषंकषति' 'शुष्कपेषं पिनष्टि', 'चूर्णपेषम्', रूक्षपेषम्, समूलघातं हन्ति, अकृतकारं करोति, पाणिघातं वेदीं हन्ति, उदपेषं पिनष्टि तैलपेषं पिनष्टि, हस्तवर्तं वर्तयति, स्वपोषं पुष्णाति, गोपोषं रैपोषं वा पुष्णाति चारकबन्धं बद्धः, कौञ्चबन्धंबद्धः, जीवनाशं नष्टः पुरुषवाहं वहति, ऊर्ध्वशोषं शुष्कः' ऊर्ध्वपूरं पूर्णः इत्यादीनि सर्वाणि घञन्तक्रियाविशेषणत्वेन सिद्धचन्ति । अतः तत्साधकानि 'निमूलसमूलयोः कषः शुष्कचूर्णरूक्षेषु पिषः, समूलाकृतिजीवेषु हनु कृञ् ग्रहः, करणेहनः, स्नेहने पिषः हस्ते वर्तिचरोः, स्वे पुषः संज्ञायाम् (पा० ३।४।२७-४२) इति पाणिनीयसूत्राणामनावश्यकत्वं प्रतिपादितम् चान्द्र (१।३।१३५) सूत्रवृत्तौ ।

(च) अव्यये यथाभिप्रेताख्याने कृञः क्त्वाणमुलौ, तर्यच्यपवर्गे, स्वाङ्गेतस्प्रत्यये कृभ्वोः, नाधार्थप्रत्यये च्व्यर्थे, तूष्णीमि भुवः, अन्वच्यानुलोम्ये, (४।४।५९-६५) सूत्रसप्तकमन्यथासिद्धकार्यं मत्वा प्रत्याख्यातम्-नीचैःकारमाचष्टे, उच्चैःकारमाचष्टे इति घञा क्रियाविशेषणस्वीकारेण च सिद्धेः नीचैः कृत्वा, नीचैःकृत्येति क्त्वा ल्यप् चापि भवति एवं तिर्यक्कारम् तिर्यक्कृत्य तिर्यक्कृत्वा इत्यादि । मुखतः कारम्, मुखतः कृत्वा मुखतः कृत्येत्याद्यपि । मुखतोभावम्, मुखतोभूय मुखतोभूत्वेत्याद्यपि च ।

एवं तुमुन्विधायकेन तुमुन् भावे क्रियायां तदर्थायाम् चा० १।३।६ इति सामान्यसूत्रेणैव' शक्नोति भोक्तुम्, घृष्णोति भोक्तुम्, जानाति भोक्तुम्, ग्लायति भोक्तुम्, घटते भोक्तुम्, आरभते भोक्तुम्, प्रक्रमते भोक्तुम्, लभते भोक्तुम्,

उत्सहते भोक्तुम्, अर्हति भोक्तुम्, अस्ति भोक्तुम् विद्यते भोक्तुम् 'इत्यादिसिद्धेः'।[1] पारयति भोक्तुम्, प्रभवति भोक्तुम्, इत्यपि। प्रभुर्भोक्तुम्, समर्थो भोक्तुम् पर्याप्तो भोक्तुम् अंलभोक्तुमित्यादीन्यपि तेनैव सूत्रेण (१।३।६) सिद्धानि। अतः पर्याप्तिवचनेष्वलमर्थेषु पा० ३।४।६६ सूत्रमपि चन्द्रेण वृथा मत्वा न कृतम्। प्रभुर्भोक्तुवित्यादौ सर्वत्र भवतेः सम्भवात् क्रियार्थायां क्रियायां सामान्यसूत्रेण तुमुनः प्राप्तेरक्षतत्वात्। यथा भोक्तुं मनः, श्रोतुं श्रोत्रम्, द्रष्टुं चक्षुः, योद्धुं धनुः, वक्तुं जडः, गन्तुं मन्दः, कर्तुमलस इत्यादौ विशेषसूत्रं विनाऽपि भवतेः सर्वत्र सत्वात् तुमुन् भवति, तथैव पूर्वोक्तोदाहरणेषु प्रभुर्भोक्तुमित्यादिषु तस्यसिद्धे विशेषसूत्रं विनाऽपि सम्भवात्। न च यदि भवति स्तत्र विद्यते कथं नोच्चार्यत इति वाच्यम् उच्चारणस्य वक्तुरायत्तत्वात् स्पष्टं चेदं चान्द्र (चा० १।३।१५०) सूत्रस्य वृतौ।

(छ) पाणिनेः 'सुपि स्थ इति ३।२।४ सूत्रे कृतं स्थ इति पदं परित्यज्य सुपः १।२।३ इति सूत्रं कृत्वा सुपः परादाकारान्तात् क्रियार्थात् को भवतीत्यर्थं विधाय समस्थः, विषमस्थः, पादपः, द्विपः; कच्छपः इत्यादि संसाध्य बहूनि सूत्राणि परित्यक्तानि।

(ज) यथावश्यकं तथाऽऽदेशमेव विधाय अतिदेशसूत्रं चान्द्र व्याकरणे परित्यक्तुं यथासम्भवं प्रयतितम्। एतेन शास्त्राकरणजन्यं लाघवं प्रक्रियालाघवं च संजांतम्। तद्यथा—

सेर्ह्यपिच्चेति ३।४।८७ सूत्रस्य स्थाने सेर्हिङ् (चा० १।४।२१ इति सूत्रं कृत्वा हेः साक्षात् ङित्त्वं शास्ति। तेन पाणिनीयतन्त्रे हेरपित्करणम् अपित्वाच्च सार्वधातुकमपिदिति ङित्करणं चात्र परिहृतं भवति।

आडुत्तमस्य पिच्च (३।४।९२) इति पा० सूत्रं लोट उत्तमपुरुषस्य आडागमं तं च पितं विदधाति। पित्वविधानेन वस्मसोरिड्वहिमहिङोश्च स्वतोऽपित्त्वेन अपित्सार्वधातुकत्वात् ङित्वेऽपि 'ङिच्च पिन्न, पिच्च ङिन्ने' ति नियमेन विशेषविहितेन पित्त्वेन ङित्वस्य बाधात् गुणादिकं कार्यं भवति। चन्द्राचार्यस्तु मेरानिमनुशास्ति, मिपः स्वतः पित्त्वेन आनेरपि पित्त्वमव्याहतमेव। तेन पचानि करवाणि इत्यादि सिद्धम्। करवै इत्यत्र आडागमस्यावश्यकतैव नास्ति 'एत ऐ' इत्यस्य स्थाने 'इडादीनामैप्' (चा० १।४।२६) इति ऐकारस्य पकारानुबन्धसहितस्य विधानेनैव रूपसिद्धेः। वस्मसोः वहिमहिङोस्तु 'वमोष्टाप्' (चा८ १।४।२७) इति टाब् विधीयत एव। इत्थं चन्द्रगोमिना[2] ऐपि टापि च पानुबन्धं कृत्वा साक्षात्पित्वं संसाध्य 'पिच्चे' ति प्रत्याख्यातम् उत्तमस्येत्यपि च।

अतएवोच्यते चान्द्र १।४।२७ वृत्तौ टकार आदेशो विध्यर्थः, पकारोऽदेङ्भावार्थः इति।

(झ) वार्तिकोक्त समावेशनीयस्य सूत्रे समावेशप्रयुक्तस्य लाघवस्य अन्यथासिद्धानां लक्षणानां प्रत्याख्यानस्य चोदाहरणं 'न गतिहिंसाशब्दार्थहसः' १।४।५० इति चान्द्रसूत्रमस्ति। अस्मिन् सूत्रे न गतिहिंसार्थेभ्यः (पा० १।३।१५) प्रतिषेधे हसादीनामुपसंख्यानम् इति सूत्रप्रतिपाद्यानां वार्तिकवक्तव्यानां समाहृतसमावेशो दृश्यते। हसादीत्यत्रादिशब्दस्य प्रकारवाचित्वात् हसादिपदेन हसप्रकाराः शब्दक्रियाः गृह्यन्ते। अतः सूत्रे स्पष्टतामानेतुं शब्दार्थेतिपदं प्रयुक्तम्। व्यतिगच्छन्ति, व्यतिघ्नन्ति, व्यतिहसन्ति इत्यादीनि क्रमश उदाहरणानि।

---

१. शकघृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमून् (पा० ३।४।६५) इति सूत्रं चान्द्रव्याकरणे परित्यक्तम्।

२. चन्द्रगोमिना, चन्द्रगोमिनः इत्यादौ कुमति च ८।३।१५ इति णत्वं तु न, क्षुभ्नादित्वाद् क्षुभ्नादिषु च ८।४।३९ इति निषेधात् तस्य च गणस्याकृतिगणत्वात्। अतएव भाषावृत्तौ (पृ० ५६३) शास्त्रवाक्यानि, छात्रगामिना, प्रष्ठोऽग्रगामिनि (पा० ८।३।९२) चन्द्रगोमिना इत्यादौ णत्वमाशङ्क्य क्षुभ्नादित्वात्तद्वारणं कृतम्। दुर्घटवृत्तौ (पृ० १४१) शरणदेवेनापि चन्द्रगोमिना' मित्यत्र क्षुभ्नादिषु चेति णत्वनिषेधो दर्शितः। एतेन ज्ञायते चन्द्रगोमिना, चन्द्रगोमिनामितिणत्वरहितप्रयोगः शिष्टप्रचलितो

अत्र प्रकरणे पाणिनीयम् इतरेतरान्योन्योपपदाच्च १।३।१६ इति सूत्रं परस्परोपपदाच्चेति वक्तव्यम् इति कात्यायनवार्तिकं च प्रत्याख्याते, इतरेतरस्य परस्परस्यान्योन्यस्य वा व्यतिलुनन्ति इत्यादौ इतरेतरादिशब्दैः क्रिया-विनिमयस्याभिहितत्वात् विनिमये (चा० १।४।४६) इति सूत्रस्य स्वतोऽप्राप्त्या तङानानां स्वतोऽप्राप्तेः।

हरतेरप्रतिषेधः (१।३।१५ वा० १) इति प्रतिप्रसववार्तिकमपि चान्द्रव्याकरणे न स्वीकृतम् संप्रहरन्ते राजान-इत्यत्र हरतेर्हिंसार्थत्वाभावात् 'न गतिहिंसाशब्दार्थहसः (चा० १।३।१५) इति निषेधाप्राप्तेः।

व्यतिहरन्ते भारम्, व्यतिवहन्ते भारम् इत्यादावपि नात्मनेपदप्रतिषेधापत्तिः। नेतौ धातू गत्यर्थौ, अपि तु देशान्तरप्रापणार्थौ।

स्पष्टंचैतत् सर्वं चान्द्रसूत्र (१।४।५०) वृत्तौ।

गोयीचन्द्रस्तु 'व्यतिवहन्ते भारम्' व्यतिहरन्ते भारम् इत्युदाहरणं भाष्यार्थविरुद्धमाह[1]। चन्द्राचार्यस्तु सप्र-माणं वदति, भाष्यकारस्य स न पुच्छभूतः। सप्रमाणोचितकथने न स भाष्यकाराद् बिभेति। युक्तियुक्तं बालकोदी-रितमपि तस्य ग्राह्यम् युक्तिहीनं पातञ्जलं वाक्यमपि न तस्य प्रामाण्यम्।

वस्तुतस्तु चान्द्रे (१।४।५०) सूत्रे पाणिनीये (१।३।१५) सूत्रे द्वन्द्वान्ते (चार्थान्ते) श्रूयमाणत्वादर्थशब्दस्य गत्यादिना प्रत्येकमभिसम्बन्धः कर्मव्यतिहारे (क्रियाविनिमये) प्राप्तस्यात्मनेपदस्य (तङानानां) चानेन निषेधः क्रियते। तत्रार्थग्रहणाभावेऽपि सप्तम्युपादाने कृतेऽर्थार्थलाभे सिद्धेऽर्थग्रहणसामर्थ्यात् ये शब्दान्तरमनपेक्ष्य गतिहिंसयो वर्तन्ते, तेषामेवात्र ग्रहणं स्यात्, हरतिस्तूपसर्गवशात् हिंसायां वर्तते यथा संप्रहरन्ते राजान इत्यादौ। अतस्तस्य स्वतो निषेधाप्राप्तिरित्थं 'हरतेरप्रतिषेधः' इति वार्तिकं व्यर्थमेव। फालितार्थकथनपरं वचनं तु चन्द्रस्यानभीष्टमेव।

एवं सति 'व्यतिहरन्ते भारम्, व्यतिवहन्ते भारम् इत्यत्रापि हृ-वह-धातू न स्वतो गत्यर्थौ किन्तूपसर्गवशादेवेति निषेधोऽयुक्तएव।

(ञ) संज्ञाविधायकसूत्राणां परित्यागात् सूत्राकरणजन्यं प्रक्रियायां तत्तत्सूत्रासंगमनजन्यं लाघवमिह यत्र तत्र दर्शितम्। तत्र संहिताधिकारश्चान्द्र व्याकरणे परित्यक्तः, छे चेत्यादिषु सर्वत्र सन्धिसूत्रेषु औपश्लेषिकाधारे सप्तमीस्वीकारेणैव तादृशस्य सन्निकर्षस्य सिद्धेः।

(ट) कर्मण्यण् ३।२।१ इति प्राप्तस्याणो बाधकत्वेन "शीलिकामिभक्ष्याचरिभ्यो णः" पूर्वपदप्रकृति स्वरत्वं च ईक्षिक्षमिभ्यां ४ ३।२।१-७-८ इति वार्तिकद्वयं कृतम् मांसशीला मांसकामा मांसभक्षा कल्याणाचारा, कल्याणप्रतीक्षा, दुःखक्षमा इत्यादौ अणं बाधित्वा णे कृते टाप् सिद्धयति, अन्यथाऽणि कृते टिड्ढेति ङीप् प्रसक्त्या रूपसिद्धिरिति पाणिनीयाः।

बौद्धवैयाकरणैरनुमोदितोऽन्वाख्यातश्चेति। भागवृत्तिसंकलने (पृ० २३) चन्द्रगोमिनोऽप्यभीष्टमिति लिखन् श्रीयुधिष्ठिरमीमांसकोऽपि णत्वाभावमेव स्वीकृतवान्। अतश्चान्द्रव्याकरण (भा १ पृ० २२०) टिप्पण्यां कातन्त्रविस्तरे कृतं चन्द्रगोमिणेति णत्वघटितं यद्रूपमुद्धृतं तत्प्रयोगानभिज्ञस्य कस्यापीति मत्वा मयोपेक्षितम्। अथ च बौद्धवैयाकरणपुरुषोत्तमदेवशरणदेवदृष्टानुमोदितदन्त्यनघटितरूपमेव यथास्थानं प्रयुक्तम्। प्रष्ठोऽग्रगामिनि (पा० ८।३।९२) इत्यत्र नकारमुच्चारयन् पाणिनिरप्येतादृशे प्रयोगे णत्वाभावमेव संकेतयति।

१. चान्द्र व्याकरणम् प्रथम भाग पृ० १३९।

चान्द्रास्तु मांसे शीलमस्याः। मांसे कामोऽस्याः मांसं भक्षोऽस्याः, कल्याणः आचारोऽस्याः कल्याणे प्रतीक्षास्या दुःखे क्षमोस्या इत्यन्यार्थसमासेनैवेष्टे सिद्धे वार्तिकद्वयं न स्वीकुर्वंति (चा० १।२।१ सू० वृत्तौ) वस्तुतस्तु मासं कामयते इत्यत्र प्राप्तस्य व्याप्यादण् १।२।१ इति अणः बाहुलकादेव बाधे सिद्धेऽचा घञा वा सकलेष्टसिद्धौ वार्तिकप्रत्याख्यानं कर्तव्यम्। यत्र चाण् प्रत्ययेनेष्टसिद्धिस्तत्राण् भवत्येव बहुलग्रहणात् यथाऽम्भोधिगामीति। वार्तिके स्वीकृते तु पयष्कामीति न सिद्धयतीति तु न दूषणम्, कामीति ण्यन्तनिर्देशः ण्यन्तादण् भवत्येव। ण्यन्तस्य तु णे पयःकामेति भवति अत्र न सत्वम् अतः कृकमिकंसेत्यत्र ण्यन्तरहितस्योपादानात्। तस्माद्वार्तिकास्वीकारेऽपि बहुलग्रहणप्रतापात् सकलेष्टसिद्धिः प्रदर्शिता चन्द्रेण। न च बहुवीहि (अन्यार्थ) समासस्वीकारे बहुभक्षा इत्यत्र बहो नञ्वदुत्तरपदभूम्नि (पा० ६।२।१७५) इत्यनेन, एतत्स्थानापन्नेनान्येन वा चान्द्रसूत्रेणोत्तरपदान्तोदात्तत्वं स्यादिति वाच्यम्, तत्र बहवो भक्षा यस्य इति न स्वीक्रियते किन्तु भावे अजन्तेन बहुषु भक्षोऽस्येति उत्तरपदार्थस्य बहुत्वाभावात्तदप्राप्तेः।

इत्थमत्र वार्तिकद्वयमन्यथासिद्धप्रयोजनं दर्शितं चन्द्रेण।

(ठ) शमादिभ्यः[1] सम्पृचादिभ्यः[2] वौ कषादिभ्यः[3] अपेलषेः[4] प्रे लप्[5]सृ द्रुमथादिभ्यः धिनुण्, निन्दादिभ्यो[6] वुञ् च प्रत्याख्यातौ। शमः अस्यास्तीति शमीत्यादिसिद्धेः। एवं च दमी तमी श्रमी भ्रमी क्षमी क्लमी उन्मादी, सम्पर्की अनुरोधीत्यादेः विकाषी अपलाषीत्यादेश्च सूत्रं विनैव निष्पत्तिः यतो हि विरोधी, प्रयामी, प्रयासी, विसारी विसर्गी, संवादी, विवादी, अनुवादी, विदाही, संचारी, व्यभिचारी, विघाती इतीदृशाः परःशताः प्रयोगाः सन्ति, येषां सिद्धिः निर्दिष्टैः सूत्रैर्न भवितुं शक्नोति, विपूर्वंकरुधादीनां तत्र पाठादर्शनात् एतेषां सिद्ध्ये विरोधोऽस्या स्तीत्युगायस्यैवाश्रयणीयत्वेन तेनोपायेनैव शमीत्यादीनामपि सिद्धिसम्भवे सूत्रकरणं गौरवमात्रफलकम्। रोगी, भोगीत्यादि शमाद्यनुक्तानामपि सिद्ध्यै उगायान्तरमाश्रयणीयमेव। शमादिभ्यस्तृन्नपि यथादर्शनं बहुलाधिकाराद् भवत्येव प्रवदिता, प्रवसिता इत्यादौ।

निन्दादिभ्यो वुञ्विधानमपि अनर्थकमेव, निन्दक इत्यादेः ण्वुला सिद्धेः। यथा किल सूत्रोक्तानाम् निन्दक-हिंसक-क्लेशक-खादक-विनाशक-परिक्षेपकपरिराटक- परिवाहक-व्याभाषकासूयकपरिदेवकाक्रोशकेतिशब्दानामाकृतयस्तथैव घातकमारकेत्यादीनां सूत्रानुक्तानामपि, तच्छीलार्थप्रतीतिरपि समानैव। अतः यदि तेषां निष्पत्तये यत्नो न विधीयते तदैषामपि सिद्धये यत्नविशेषस्त्याज्य एव। स्पष्टंचैतत्सर्वं चान्द्र (१।२।९६) सूत्रवृत्तौ।

(ड) प्रत्ययसंख्याजन्यं लाघवम्:—

भीरुः भीरुकः भीलुक इति रूपत्रयं सिद्धयति चान्द्रव्याकरणे, केवलं भियः क्रुरिति १।२।१२१ इति क्रु-प्रत्ययेन एकेन विहितेन भीरुः क्रुणा सिद्धयति, ततः कनि भीरुकः इति लत्वेन भीलुक इति। भियः क्रुक्लुकनौ ३।२। १७४ इति वदतो पाणिनेर्मतेन भीरुः भीलुक इति रूपद्वयं जायते। भियः क्रुकनपि वक्तव्य इति भाष्यानुसारेण भीरुक इत्यपीष्टम्। सरस्वतीकण्ठाभरणे सर्वं संकलय्योक्तम् भियः क्रुकुकन्लुकनः १।४।२४७।

(ढ) बहुलाधिकारजन्यं लाघवम्:—

सम्पदादिभ्यः क्विप् (चा १।३।९३) सम्पद् विपत् प्रतिपत् परिषत्। अत्र क्तिनपि इष्यते इति वार्तिकं चन्द्रेण परित्यक्तम् बहुलाधिकारात् क्तिन् स्यादेव, तेन संपत्तिः विपत्तिरित्यादि सिद्धयेत्।

---

१. पा० ३।२।१४१।
२. पा० ३।२।१४२।
३. पा० ३।२।१४३।
४. पा० ३।२।१४४।
५. पा० ३।२।१४५।
६. पा० ३।२।१४६।

(ण) अन्यथा सिद्धत्वान्न केवलं चन्द्राचार्येण सूत्राण्येव प्रत्याख्यातानि किन्तु गणसूत्राण्यपि तथाहिः-नृनरयोर्वृद्धिश्चेति सूत्रं चन्द्राचार्येण परित्यक्तम्। तन्मतेन नृनरयोः स्त्रियां वृत्यभावात्। नारीति तु नरस्यापत्यं स्त्रीति विग्रहे तस्येदमित्यणि अणन्तत्वान्ङीपि सिद्धयति[1]।

न चैवं नरत्वेन नृत्वेन वा जात्या विशिष्टा स्त्रीत्यर्थो नस्यादिति वाच्यम् रुढ्या नरत्वजातिविशिष्टस्य बोधसंभवात्। रूढ़ि र्योगाद् बलीयसीति सिद्धान्तोऽप्यत्रानुकूलः। अतएव बसेस्तव्यत् कर्तरि णिच्च 'इति वचनं वास्तुनि भवोवास्तव्य इति दिगादित्वात् संसाध्य प्रत्याख्यातं भाष्यकारेण। कैयटेनाप्युक्तम् :—नित्यानां शब्दानां यथा कथंचिदन्वाख्यानं कार्यम् इति। रूढ्या सर्वदोषपरिहार इति तदाशय इति नागेशः[2]।

किंच किन्नरीति कुत्सिता नरीति विग्रहसिद्धस्य सिद्धिरपि वार्तिकस्वीकारे न भवति। अथ च नुर्नरस्य च धर्म्या नारीति ऋतो[3]ऽञ् इति सूत्रेण नरस्य चेति वक्तव्यमिति वार्तिकेन चाद्युदात्तनार्याः सिद्धेः। एवंच ङीनः नकारेत्वप्रयुक्तकार्यविशेषार्थं गणसूत्रमिति परास्तम्।

(त) लोकप्रसिद्धानामर्थानां परिचायकसूत्रनिर्माणं विना प्रयोगात् तत्तत्सूत्राकरणजन्यं लाघवम् यथा—(क) लोपलुक्, पदवाक्यह्रस्वदीर्घप्लुतादयोऽत्र विना तत्परिचायकसूत्रणि प्रयुक्ताः। (ख) यथासंख्यं हि लौकिकन्यायसिद्धम् 'शत्रुंमित्रं विपत्ति च जय रञ्जय भञ्जय' इत्यादौ 'यथासंख्यमनुदेशः समानाम्' इतिसूत्रमनमनधीयानेनापि यथा यथासंख्येन तात्पर्यमवबुध्यते तथा व्याकरणेऽपि सिद्धे सूत्रमिह न कृतम्।

(थ) रूढशब्दान्वाख्यानजनकसूत्राणां प्रत्याख्यानजन्यमपि लाघवमिह दृश्यते:—

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् इति (५।१।५९) पा० सूत्रमिह प्रत्याख्यातम्। द्वौ च पञ्च च तौ परिमाणमस्येति पङ्क्तिः दशेत्यर्थः पञ्चन् शब्दात् तिप्रत्ययस्टिलोपः कुत्वम्। प्रायः प्राचीनकाले पञ्चानां वर्ग एव पङ्क्तिरभवत्। ततः पङ्क्तिशब्दः दशानां वर्गार्थे प्रयुक्तः। अतएवोच्यते पङ्क्तिरथो दशरथ इति। छन्दःविशेषोऽपि पङ्क्तिरुच्यते तत्र पञ्चानां पादानां सद्भावात्[4] ततश्चायं शब्दः संख्यानियममतिक्रम्य क्रमविशेषे प्रयुक्तः ब्राह्मण-पङ्क्तिः पिपीलिकापङ्क्तिरित्यादौ यथा।

द्वौ दशतौ परिणाममस्येति विंशतिः द्वयो र्दशतो विन्भावः शतिश्च प्रत्ययः अपदत्वंच निपात्यते। अपदत्वान्नकारस्यानुस्वारः। एवं त्रयाणां दशतां त्रिन्भावेन शत्प्रत्ययेन च त्रिंशदिति त्रयो दशतः परिमाणमस्येति विग्रहः। एवं चतुर्णाम् चत्वारिः पञ्चानां पञ्चा इत्यादेशः शत्प्रत्ययः। षट् दशतः परिमाणमस्या इति षष्टिः, षण्णां दशताम् षष् आदेशः तिप्रत्ययः अपदत्वं च निपात्यते। एवं तिप्रत्यये सप्तानां दशतां सप्त, अष्टानां दशतामशी नवानां दशतां नवेति चादेशे कृते सप्ततिः अशीतिः नवतिश्च सिद्धयन्ति।

तम् प्रत्यये दशानां दशतां शभावे कृते शतमिति सिद्धयतीति पाणिनीयाः।

चन्द्रस्तु अयुतप्रयुतनियुतादिशब्दा यथा लोकप्रसिद्धार्थवत्वात् स्वीयार्थबोधाय कामपि व्युत्पत्तिं किंचनान्वा-

---

१. २।३।७९ सूत्रवृत्तौ।

२. शाङ्गरवादिभ्यो ङीन् सूत्रस्य लघु श० शेखरस्य स्त्री प्रत्यय प्रकरणम्।

३. पा० ४।४।४९।

४. पञ्च पदानि परिणाममस्य पङ्क्तिश्छन्द इति काशिका। पदशब्दोऽत्र पादपर्याय इति हरदत्तः। (पदमञ्जरी पा० ५।१।५९)।

ख्यानं च नापेक्षन्ते तथा पङ्क्त्यादिशब्दा अपीति विचार्य सूत्रं प्रत्याख्यात[1]वान् ।

भोजेन तु सरस्वतीकण्ठाभरणे सूत्रद्वयमेतेषां साधनाय [2]कृतम् ।

(द) व्यापकार्थकसूत्रनिर्माणप्रयुक्तानेकसूत्राकरणजन्यं लाघवं निर्दोषता च । पाणिनेः 'तेन तुल्यं क्रिया चेद् वतिः' 'तत्र तस्येव' 'तदर्हम्' (५।१।११५-११७) इति सूत्रत्रयापेक्षया 'इवे वतिः' (४।१।१३५) इति चान्द्रसूत्रं व्यापकविषयकम् । तेन राजेव वर्तते राजवत् । राज्ञेव व्यवहर्तव्यमनेन राजवत् । ब्राह्मणस्येव वृत्तमस्य ब्राह्मणवत् । मथुरायामिव पाटलिपुत्रे प्रासादाः मथुरावत् । देवमिव भवन्तं पश्यामि देववत् । पर्वतादिव आसनादवरोहति पर्वतवत् । देवमर्हति यद्दर्शनम्, पर्वतमर्हति यदवरोहणम्, ब्राह्मणमर्हति यद्दानमित्यर्थे तदर्हम् इति पा० ५।१।११७ इति सूत्रेण वतिप्रत्ययो यदिष्यते स तु इवार्थसद्भावादनेनैव सिद्धः । गुणसाम्ये देवदत्तवत् स्थूलः, द्रव्यसाम्ये देवदत्तवद् गोमान् इत्यत्रापि इष्टस्य वतेः सिद्धिरनेन सूत्रेण भवति ।

अष्टाध्याय्यामेकस्मिन् सन्दर्भेऽपि एकः शब्दो वारम्वारं पठितः । तज्जन्यं गौरवं चान्द्रेऽनुवृत्या परिहृतम् यथा—

पा०	सूत्रम्	
अवारपारात्यन्तानुकामं	**गामी**	५।२।११
अनुग्वल	**गामी**	४।२।१५
चान्द्रे पारावारावारपारात्यन्तानुकामं	**गामी**	४।२।१७
अनुग्वलम्		४।२।१८

(घ) कात्यायनेन 'कटच्' प्रत्ययो रजस्यर्थे कृतः 'कटच् प्रकरणेऽलाबूतिलोमाभ्यो रजस्युपसंख्यानम् इति । भङ्गायाश्च (पा० ५।२।२९।१-४) तेन अलाबूकटम्, तिलकटम् उमाकटम् भङ्गाकटम् इति सिद्धम् । गोष्ठादयोऽपि स्थानादिषु पशुनामादिभ्यः विहितास्तेन च गोगोष्ठम् महिषीगोष्ठम् । भाष्यकारेण कटच्पटचौ गोयुग-तेल-शाकट-शाकिनशब्दाश्च प्रत्ययत्वेन स्वीकृताः । तेन उष्ट्रकटः, अविपटः, उष्ट्रगोयुगम्, इङ्गुदीतैलम् इक्षुशाकटम् मूलशाकिनम् इत्यादिसिद्धचतीत्युक्त्वा उपमानाद्वा सिद्धमित्युक्तम्[3] ।

चन्द्राचार्यास्तु वृत्तौ[4] 'कटशब्दस्तद्रजोवाचकः । अतएव अलाबूकटम् तिलकटमित्यादयः सेत्स्यन्ति । कटशब्दः संघातेऽपि वर्तते पटशब्दः विस्तारेऽपि प्रयुज्यते । तेन उष्ट्राणां संघातः उष्ट्रकटः, अवीनां विस्तारः अविपटः इति सिद्धम् । गोष्ठशब्दः स्थानपर्यायः तेन महिषीगोष्ठम्—गोगोष्ठम् इति भवेत् । नरपुङ्गववत् सर्वत्र समासः । घृतादन्यत्र स्नेहे तैलमिति रूढिः, तेनेङ्गुदीतैलमिति । शाकटशाकिनौ क्षेत्रपर्यायौ । अतः इक्षुशाकटम् मूलशाकिनम् इत्यादि सिद्धचन्तीत्याहुः ।

अत्रेदं वक्तव्यम् आदौ सर्वेऽपीमे शब्दाः संकुचितार्थाः आसन् । यथा तैलगोष्ठगोयुगशब्दाः गृह्यन्तामुदाहरणाय । तथाहि तैलशब्दः प्रारम्भे तिलविकारार्थे एव प्रयुक्तः । तिलानामुत्पादनबाहुल्यात् अत्र देशे शनैः शनैः तैलशब्दः घृतादन्यत्र स्नेहे रूढो जातः । रूढिमूलया गौण्या लक्षणया सर्वोऽपि स्नेहस्तैलपदबोध्यो जातः । एवं गोष्ठपदम् गवां स्थानबोधकमासीत् । शनैः शनैः तत् पशूनां स्थानबोधकमभवत् । एवं च गोयुगशब्दः वृषयुग्मस्य बोधकः पश्चात्

---

१. चा० ४।१।६२ वृत्तिः ।

२. स० क० भ० ५।१।४३-४४ ।

३. पा० ५।२।२९ ।

४. ४।२।३५ सूत्रस्य ।

पशुयुग्मस्य बोधको जातः। सर्वमिदमुदाहरणं **भाषाविज्ञानेऽर्थविस्तारस्य** वर्तते। तैलशब्दः रूढिमूलाया गौण्या उपादानलक्षणाया उदाहरणमतो मन्यते यतोऽज्ञ मुख्यार्थस्य तिलस्नेहरूपस्याप्युपादानं वर्तते। गोष्ठगोयुग-शब्दस्तु जहदजहल्लक्षणाया उदाहरणम् गोत्वार्थस्यपरित्यागेऽपि पशुरूपस्य सामान्यार्थस्य तत्रात्यागात् भाषायान्त्वा-गत्यायं शब्दः पशुत्वरूपसामान्यार्थमपि परित्यक्तवान्। इदानीं साहित्यगोष्ठी कविगोष्ठीत्यादौ मानवसभार्थे गोष्ठी-शब्दप्रयोगो दृश्यते। राजस्थाने गोष्ठापभ्रंशः 'गोठः इति शब्दः' मित्रमण्डली-प्रीतिभोजे प्रयुज्यते।

एतत्सर्वं दृष्ट्वा वैयाकरणाश्चिन्तिता जाताः। इङ्गुदीतैलम् सर्षपतैलम्, सर्पतैलम् इत्यादौ सर्वत्र प्रत्ययवत् प्रयोगं दृष्ट्वा तेऽवदन् स्नेहने तैलच् इति। गोगोष्ठम्, उष्ट्रगोयुगम्, अश्वगोयुगम् इत्यादौ तौ प्रत्ययाविति तैरङ्गीकृतम्। प्रत्ययस्वीकारे एतानि तैलानि हेमन्ते सुखानि इत्यादौ तैलशब्दस्य तिलस्नेहसर्षपादिस्नेहानुपक्रम्य प्रयुक्तस्यानन्वयत्व-मापद्येत। अत ईदृशे शब्दे लक्षणाऽवश्यस्वीकर्तव्येति विचार्य चन्द्राचार्येण इमे प्रत्ययाः न स्वीकृताः। तत्तद् विधायकानि वचनानि चापरिहृतानि।

(न) नवीनानुबन्धासज्जनप्रयुक्तं प्रक्रियालाघवमपि चान्द्रव्याकरणस्य वैशिष्ट्यम्। तेषु केऽप्यनुबन्धा इमे सन्ति—

पा० अनुबन्धाः	चान्द्रा अनुबन्धाः
चकारः मात्रचि ५।२।३७	टकारः मात्रटि ४।२।३८
	(टित्वादेव ङीपं संसाध्य टिड्ढेति सूत्रे मात्रज् ग्रहणं प्रत्याख्यातम्)
चकारः दघ्नचि द्वयसचि च ५।२।३७	टः दघ्नटि, द्वयसटि च ४।२।३९
चकारः अयचि ५।२।४३	टः अयटि ४।२।४८
	(न तयप् स्थानिकः किन्तु स्वतन्त्रः परः)
पकारः तयपि ५।१।४२	टः तयटि ४।२।४६

उभयी स्थितिः पञ्चतयी शाला इत्यादौ टित्वादेव ङीपि सिद्धे तयब्ग्रहणं टिड्ढेत्यत्र प्रत्याख्यातम्।

उक् थुक्तिथुक् इत्यादौ ५।२।५१।५।२।५२ टः थटि तिथटि च ४।२।५६, ४।२।६०

(प) अकच् क्व भवेत् सर्वनाम्नष्टेः; सुबन्तस्य वा टेः प्राक् इति प्रश्नस्य स्पष्टमुत्तरं पाणिनीयतन्त्रे नास्ति। यदि सर्वनाम्नष्टेरित्युच्यते तदा त्वयका मयिका त्वयकि मयकि इति न सिद्धयेत्। युष्मकद् आ इति स्थिते मपर्यन्तस्य त्वादेशे शेषे लोप इत्यस्य आत्वयत्वनिमित्तेतरविभक्तौ परतः प्रवृत्या इह प्रवृत्यभावात् दकारस्य यत्वे पररूपे त्वकया इति रूपापत्तेः।

पूर्वोक्तदोषवारणाय यदि चोच्यते 'सुबन्तस्य टेः प्राग् भवति' युष्मकाभिरित्यादि न सिद्धयति युष्मद् अक भिरिति स्थिते दकारस्यात्वाप्रसक्त्या कघटकाकारस्यात्वे कृतेऽनिष्टरूपापत्तेः। अतः भाष्यकारेण अनोकारसकार-भकादाविति वक्तव्यम् इत्युक्तम्। भाष्यकारस्य समावेशं सरलीकुर्वन् काशिकाकारः प्राह ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच् अन्यत्र सुबन्तस्य टेः प्रागकजिति वक्तव्यम् इति।

इत्थं गौरवग्रस्तमेतत्तात्पर्यं चन्द्रेण 'सुपः' ४।३।६१ इति लघ्वक्षरं सूत्रं कृत्वा सर्वादीनाम् ४।३।६० इति योगादनन्तरं च पठित्वा नियमार्थं च स्वीकृत्य सर्वादीनामजेव यः सुप् ततः पूर्वोऽकज् भवति इति नियमद्वारा प्रत्यायितम्।

योगविभागस्य, स्थाने न्यासस्य च प्रतिभा चन्द्रस्यातीव प्रशस्या। न जाने, एतेन तेन कियन्ति कार्याणि सारल्येन लाघवेन विस्पष्टरूपतया च साधितानि।

पाणिनितन्त्रे यत्र यत्राख्यायाम् वचने इत्यादि प्रयुक्तम् तत्र चान्द्रे केवलं सप्तम्यन्तादि पदं प्रयुज्य लाघवं दर्शितम्। स्वयं पाणिनिना यथेच्छं शैलीद्वयमाश्रितम्। चन्द्रेण तु एकरूपता दर्शिता तथाहि—

पा० सूत्राणि	चा० सूत्राणि
अल्पाख्यायाम् ५।४।१३६	अल्पे ४।४।१२५
ब्रह्मणो जनपदाख्यायाम् ५।४।१०४	जनपदात् ४।४।८८
	जातौ डतमज्—
वा बहूनां जातिपरिप्रश्ने ५।३।९३	बहुभ्यः ४।३।७६

शब्दसमानाकारकादेशविधायकवचनस्य प्रत्याख्यानस्यैकमुदाहरणं वर्तते पुत्रडादेशस्यास्वीकृतिः।

कात्यायनेन वार्तिकं कृतम्—

सूतोग्रराजभोजकुलमेरूभ्यो दुहितुः पुत्रड् वा (पा० ६।३।७० वा ९)। वार्तिकमिदमनावश्यकं प्रतिपादयता चन्द्रेण प्रोक्तम् सूतादिभ्यो दुहितुः पुत्रड् न वाच्यः। पुत्रशब्दस्य गौरादिपाठात् २।३।७७ (इति)। चन्द्रेण गौरादिषु पुत्रशब्दं पठित्वा पुत्रीति संसाध्य सूतपुत्रीत्यादिः समासेन निष्पादितः। पुत्रीति पृथक्पदनिष्पत्यैव दुहितुः पुत्रीति वाक्यम् वार्तिकापठितात् शैलशब्दात् परोऽपि पुत्रीशब्दः शैलपुत्रीत्यादौ प्रयुज्यते। इश्यते चेदं सर्वं सूत्र [1]वृत्तौ।

काशिकाकारेणापि वार्तिकं न स्वीकृतम् शाङ्र्गरवादिषु पुत्र शब्दं पठित्वा तेनैवेष्टसाधनात् अन्यत्रापि (शैलपुत्रीत्यादौ) पुत्रीति प्रयोगदर्शनात्। चन्द्रेण तु शाङ्र्गरवाद्यो ङीन् इति सूत्रं न स्वीकृतम्।

काशिकाकारस्य तु सर्वत्रायं प्रयासः, यत् चान्द्रव्याकरणे दर्शिता सुधारणा मुनित्रयकृतौ येन केन प्रकारेण प्रदर्शनीयेति।

सरस्वतीकण्ठाभरणे तु[2] वार्तिक मिदं स्वीकृत्य तस्यान्ते शैलादिभ्य इतिपठित्वा शैलपुत्रीत्यादिसाधनोपायो दर्शितः।

एकशेषस्य प्रत्याख्यानं इश्यते चान्द्रे। पाणिनीयानि यान्येकशेषविधायकानि सूत्राणि तानि सर्वाणि चान्द्रे परित्यक्तानि। एकोऽपि शब्दोऽनेकस्याभिधायको भवति यथा रोदसीशब्दो द्यावापृथिव्योः। एवंच विवक्षया देवदत्तौ इत्यत्र एक एव देवदत्तशब्दो देवदत्तद्वयस्य बोधकः स्यादलमेकशेषविधानेन ? भिन्नजातीयानामपि चार्थानां तन्त्रेणोच्चारणे विवक्षावशादेकशब्देनाभिधानं भवति यथा अक्षाः पादाः माषा इत्यादौ तदा सजातीयानान्तु भवत्येव। सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिवेत्यादौ एकमेव सकलकलमिति पदम् सकलाकला यस्मिन् इति सकलकलम्, कलकलेन सहितमित्युभयार्थस्य श्लेषेण बोधकं स्यात्, एकशेषविधानं व्यर्थमेव। इत्थं सरूपाणाम् (पा० १।२।६४) इति सूत्रं व्यर्थमेव। बैदबैदाविति भेदविवक्षायाम्, अभेदविवक्षायान्तु बैदा विति भवत्येव, तदा प्रतिषेधाभावात्। सूत्रारम्भे तु न स्यात्।

गार्ग्यायणश्च गार्ग्यश्चेति गार्ग्याविति साधनाय वृद्धो यूना पा० १।२।६५ इति सूत्रं यदारभ्यते तदपि निरर्थकम्, गार्ग्यायणस्य गार्ग्यत्वानपायात् अभेदविवक्षायां गार्ग्याविति सिद्धेः।

गार्गी च गार्ग्यायणश्चेत्यत्र गार्ग्या इति सिद्धये निर्मितं स्त्री पुंवच्च पा० १।२।६६ इति सूत्रमपि न कर्तव्यम्

---

१. चा० ५।२।८६।

२. सूतोग्रराजभोजमेरुकुलशैलादिभ्यो दुहितुः पुत्रट् ६।१।१०५।

गार्ग्यामपि गार्ग्यत्वमस्त्येवेति प्रकारीभूतगार्ग्यत्वाद्, गार्ग्यायणस्यापि बोधसंभवात् ।

कुक्कुट्यामपि कुक्कुटत्वमस्तीति कुक्कुटी च कुक्कुटश्चेति कुक्कुटौ इति सिद्धे पुमान् स्त्रिया १।२।६७ इति सूत्रमनावश्यकम् । एवं मातर्यपि पालकत्वात् पितृत्वमस्तीत्यभेदविवक्षायां पितरौ भेदविवक्षायां च मातापितराविति सिद्धे पिता मात्रा १।२।७० इति सूत्रमनारम्भणीयम् । एवमेव श्वशुरश्च श्वश्रूश्च श्वशुरौ श्वश्रूश्वशुराविति पुत्रश्चदुहिता चेति पुत्रौ दुहितृपुत्राविति भ्राता च स्वसा यति भ्रातरः स्वसृभ्रातराविति्यभेदभेदविवक्षयां सिद्धे, 'श्वशुरः श्वश्रूवा' १।२।७१ 'भ्रातृपुत्रौ—१।२।६८ इति सूत्रद्वयमनाश्यकं साधितम् । श्वशुरत्वस्य पत्नीजनकत्वस्य श्वशुर इव श्वश्रूवामपि सत्वात् । सहोदरत्वस्य भ्रातरीव स्वसरि, अपत्यत्वस्य पुत्र इव दुहितरि विद्यमानतया तत्तद्धर्ममानीयाभेदविवक्षायामेकेनैवोभयोः प्रतीतिसम्भवात् ।

एवं 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् १।१।६९ इत्यप्येकशेषसूत्रमनावश्यकमेव नपुंसकस्य तु सर्वलिङ्गसामान्यरूपत्वात् नपुंसकानपुंसकाभिधाने तस्यैव प्रयोगस्य स्वभावसिद्धत्वात् ।

इत्थं शुक्लश्च शुक्ला च शुक्लं च तानीमानि शुक्लानि । शुक्लत्वस्य सर्वत्र सत्वादेकेनैवानेकार्थाभिधानसम्भवान्नपुंसकस्य च पूर्वयुक्त्योपपत्तेः अभेदविवक्षायां तदिदं शुक्लमित्येकवचनमपि विना वचनं स्यादेव ।

स च देवदत्तश्चेति तौ इत्यत्र 'त्यदादीनि सर्वैनित्यम् (पा० १।२।७२ इति सूत्रं विनापि त्यदादीनां सामान्यवचनत्वादन्यार्थाभिधानेऽपि प्रयोगः सभवति ।

त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते इति वार्तिकमप्यनावश्यमेव । स च यश्चेति यौ इति वत् क्वचित् पूर्वशेषस्यापि दर्शनात् स च यश्चेति तौ इत्यस्यापि साधुत्वात् ।

किंच पुमान् शिष्यते स्त्रिया सहोक्तावित्यपि न नियमः, गौश्च गौश्च । गौश्चेति वृषभधेनुवाचकानामेकशेषे गाव इमा इति भाष्योक्तेः विवक्षाबलस्यैव शरणीकर्त्तव्यतया तद्बलेनैवात्र स्त्रीलिङ्गत्वं तासामपनीतपुंस्कत्वात्साध्यं तदनुसारेण इमौ च इयं चेति इमा इत्यत्रापि स्त्रीलिङ्गत्वम् ।

इत्थमेकशेषं विना सर्वमिष्टं विवक्षाबलेन संसाध्य तत्प्रकरणस्य द्वादशाधिकानि सूत्राणि प्रत्याख्यातानि चन्द्राचार्येण । नच प्रत्यर्थं शब्दाभिनिवेशः इति प्रत्यर्थं शब्दा अभिनिविशन्ते इति महाभाष्यस्य चान्द्रव्याकरणस्य चोदाहरणेन एकस्यार्थस्य कृते एकस्य शब्दस्याभिनिवेशे वृक्षद्वयस्य विवक्षायां वृक्षवृक्षाविति वारणाय एकशेषस्वीकार आवश्यक इति वाच्यम् अर्थं अर्थं प्रति प्रत्यर्थम् अर्थौ अर्थौ प्रति प्रत्यर्थम् अर्थानर्थान् प्रति यत्तदपि प्रत्यर्थमिति महाभाष्येण एकस्येव अर्थद्वयस्य अनेकार्थस्य च कृते एकशब्दप्रयोगस्य स्वीकारात् ।

पा घ्रा—(पा० ७।३।७८) सूत्रे ऋसृधात्वोः स्थाने ऋच्छ-धावादेशौ विहितौ । चन्द्राचार्येण ऋच्छति धावती त्याद्योः (ऋछ गतौ ६।२१ ऋ प्रापणे १।२८४ गृघृ सेचने १।२८५ घृ क्षरणे ३।६) इत्यादिना प्रकृत्यन्तरत्वात्सिद्धि दर्शयित्वा इमौ परित्यक्तौ । न चैवं ऋधातोः सृधातोः पृथक्प्रयोगापत्या अरति सरतीद्यापद्येत ? अर्तेः शिति प्रयोगो न भविष्यति, घरतीत्यादिवत् । यथा गृ घृ सेचनार्थे सामान्यतः पठनेऽपि घरति इति प्रयोगः सर्वविधसेचनक्रियायां का कथा किन्तु घृतेन सेचनक्रियायामपि सर्वत्र न भवति, जिघर्म्यग्निं हविषा घृतेन इत्यस्यैवाभिधानात्; तथैव अर्तेः शिति प्रयोगो न स्यात् ।

सरतीति तु इष्टमेव विसरति प्रसरति इत्यादिदर्शनात् । आदेशविधाने तु तस्य नित्यत्वात् शिति धावतीत्येव स्यात् ।

---

१. चा० ६।१।१०६ सू० वृत्तिः ।

२. वा० सं० ३।३७२ ।

किंच धावतीति प्रयोगः शीघ्रगत्यर्थकः। यदि धावादेशः सर्तेः स्यात् तदा धावति स्म, ससार इत्यनयोः समानार्थकत्वमेव स्यात्। न च तथानुभूयते प्रयोगपटुभिः। अतः चन्द्रेण सर्तेर्धावतेश्च स्वतन्त्रप्रकृतित्वमङ्गीकृतम्[1] चन्द्रस्येङ्गितज्ञो भोजराजः पृथक् सूत्रं कृतवान् "सर्तेर्धावो वेगितायां गतौ (स० क० ७।१।१३५)।

पूर्वविप्रतिषेधवचनाकरणजन्यं लाघवं यथा 'विप्रतिषेधे' (चा० १।१।१६) इति सूत्रवृत्तौ प्रोक्तम्:—

परुशब्दश्चायमिष्टवाची। तेन पूर्वविप्रतिषेधादयो न पठितव्या भवन्ति।

अयमाशयः 'विप्रतिषेधे (चा० १।१।१६) इति सूत्रेऽनुवृत्तः परशब्दः इष्टवाचकः। तेन यत्र पूर्वं कार्यमिष्टं तत्र तदेव भवेत। शास्त्रं हि नामेष्टसिद्धयर्थम्। इत्थं तुल्यबलविरोधे इष्टं कार्यं भवति। तच्चेष्टं कार्यं प्रायः परसूत्रविहितमेव। किन्तु यदि क्वापि पूर्वसूत्रविहितकार्ये कृते इष्टसिद्धिस्तदा पूर्वकार्यमेव स्यात्। तेन 'नुमचिर-तृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेन[2]' इत्यादीनां चान्द्रेऽनावश्यकत्वमनुभूय प्रत्याख्यानं कृतम्।

लघूकरणस्य विविधा रीतयो याश्चन्द्रेणाङ्गीकृतास्ता उदाह्रियन्तेऽधस्तात्।—

पा० सूत्राणि	चान्द्र सूत्राणि
ल्युट् च कर्मणि च करणाधिकरणो श्च ३।३।११५-११७	ल्युट् च १।३।९७
पुंसि संज्ञायां घः प्रायेण ३।३।११८	घः १।३।१००
सर्वत्र विभाषा गोः ६।१।१२२	गोरो वा ५।१।१२०
अवङ् स्फोटायनस्य ६।१।१२३	अच्यवङ् ५।१२१
इन्द्रे च नित्यम् ६।१।१२४	अक्षेन्द्रे च ५।१।१२२
एङः पदान्तादति ६।१।१०९	एङोऽति ५।१।११५
अतो रोरप्लुतादप्लुते ६।१।११३	हशि चातो रोः ५।१।११९
हशि च ६।१।११४	

१. चा० ६।१।१०६ सूत्रवृत्तिः।

२. वा० सं० ३९२।

तृतीयोऽध्यायः

विस्पष्टता

भारविणा वाग्मिनो वाचश्चत्वारोगुणा वर्णिताः—स्फुटता, अर्थगौरवम्, पृथगर्थता, सामर्थ्ययोगश्च[1] । सूत्रलक्षणे यद्यपि अल्पाक्षरत्वं प्रशस्तम् किन्तु असंदिग्धत्त्वम्, सारवत्त्वम् विश्वतोमुखत्वम्, अस्तोभत्वमनवद्यत्वं चापेक्षितम् । यद्यपि सन्देहे व्याख्यानतो विशेषप्रतिपत्तिरत्राश्रिता परिभाषासूत्रपाठे, तथापि यावच्छक्यं सन्देहावसरोऽपाकर्तव्यः सूत्रकारैः । सारवत्वमित्यस्य बलवत्त्वम् दृढांशयुक्तत्वं चार्थः अर्थो हि शब्दस्य प्राणाः विस्पष्टता चार्थस्य जीवनम् । चन्द्राचार्यस्य सर्वमिदमवगतमभिप्रेतं च स्वसूत्रशरीरेऽतस्तेन मङ्गलश्लोके लघुत्वेन सह विस्पष्टतापि वाञ्छिता । सूत्रं स्वयं स्वाभिप्रायं यथा वदेत् तथा स तन्निर्मातुं प्रायतत । विस्पष्टत्वमानेतुं तेन पाणिनिसूत्रेषु यत् परिवर्तनादिकं विहितं तदधोऽदीयते दृष्टान्तरूपेण—

१—क्लिष्टार्थकशब्दपरित्यागः

पाणिनीयसूत्रेषु बहवः शब्दाः क्लिष्टार्थाः । संभाव्यते पाणिनिना ते शब्दाः पूर्वव्याकरणतो गृहीता स्वप्रयोगकाले लोकविख्याताः किन्तु पश्चाल्लोके विलुप्तप्रयोगतया व्याख्यासापेक्षाः; इत्थमपि शक्यते वक्तुम् यत् पाणिनिकाले ते लोकप्रचलिताः किन्तु चान्द्रव्याकरणनिर्माणकाले अप्रचलिताः । इत्थम्भूताः शब्दा अर्थप्रत्यायनमन्थराश्चन्द्रगोमिनापरित्यक्ताः ।

यथा प्रकाशनस्थेयाख्ययोश्च (पा० १।३।२३) इति पाणिनिसूत्रे 'स्थेय' पदं निर्णयार्थे प्रयुक्तत्वात् क्लिष्टार्थकम् । अतश्चन्द्रगोमिना 'स्थः प्रतिज्ञा-निर्णय-प्रकाशनेषु' (चा० १।४।६४) इति सूत्रितम् । नचैवं मात्रागौरवं शङ्क्यम्' 'आङः स्थः प्रतिज्ञाने (पा० १।३।२२-१ वा०) प्रकाशनस्थेयाख्ययोश्चेति वार्तिकसूत्रयोः स्थाने प्रकरणविशेषरीतिविशेषस्वीकृतिमूलकैकसूत्ररचनया आख्ययोश्चेत्यस्याकरणाच्च चान्द्रे मात्रालाघवस्य स्पष्टत्वात् । तेनात्र मात्रालाघवमन्यथा दर्शितम् अन्यथा च विस्पष्टत्वम् । एवमेव गन्धनावक्षेपण० १।३।३२ इति पाणिनीयसूत्रस्थं गन्धनपदं परिवर्त्य तत्स्थाने 'सूचन' पदं विस्पष्टार्थं विन्यस्तम् । विप्रतिषिद्धं चानधिकरणवाचि २।४।१३ सूत्रं परिवर्त्य 'विरोधिना मद्रव्याणाम्' इति सूत्रकरणे विस्पष्टतैव हेतुः । 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम् २।४।२१ इति सूत्रे आचिख्यासापदमस्ति महाक्लिष्टम् । आख्यातुमिच्छा आचिख्यासा इति सनन्तात्कृता सिद्धस्यास्य रूपस्य स्थाने चान्द्रव्याकरणे उपज्ञोपक्रमं तदादित्वे (२।२।६८) इत्यत्र तदादित्वे इति स्पष्टार्थकं पदम् प्रयुक्तम् ।

---

१. स्फुटता न पदैरपाकृता
न च न स्वीकृतमर्थगौरवम्
रचिता पृथगर्थता गिराम्
न च सामर्थ्यमपोहितं क्वचित् ।
(किरातार्जुनीयम् सर्ग २ श्लोक २७) ।

कतिपयानि सांकेतिकान्युदाहरणान्यधोदीयन्ते

पा० व्याकरणे	चान्द्रे व्याकरणे
कष्टाय क्रमणे ३।१।१४	कष्टकक्षसत्रगहनाय **पापे** १।१।३२
(वा०) सत्रकक्षकष्टगहनेभ्यः **कण्वचिकीर्षायाम्**	
धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३।१।२२	एकाचो हलादेः क्रियाथात् भृशाभीक्ष्ण्ये यङ् १।१।४०
अवद्यपण्यवर्यागर्ह्यं**पणितव्या**निरोधेषु ३।१।१०१	अवद्यपण्यवर्यागर्ह्यं**विक्रेया**निरोधेषु १।१।११२
(पणितव्यशब्दापेक्षया 'विक्रेय' शब्दः लघुः)	न केवलमर्थेन सरलः किन्तु कलेवरेणापि
उपसर्या **काल्या प्रजने** ३।१।१०४	**ऋतुमत्युपसर्या** १।१।११५

अत्र ऋतुमतीशब्दः लघुशरीरः प्रसिद्धश्च लोके, काल्या प्रजने इति शब्दापेक्षया) नच 'ऋतुमती' शब्दः अश्लीलः, प्रजनशब्दस्यापि तथात्वात् पुंयोगादाख्यायाम् इत्यादौ पुंयोगशब्दस्यापि तथात्वापत्तेः ।

इक्ष्तिपौ **धातुनिर्देशे** ३।३।१०८	इ-कि-क्तिपः**स्वरूपे** १।३।९६
चित्रीकरणे च ३।३।१५०	आश्चर्ये १।३।११५
उताप्योः समर्थयोर्लिङ् ३।३।१५२	उताप्योर्बाढार्थे लिङ् १।३।११७
अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ३।३।१४५	क्रोधामर्षयोः १।३।१११
सम्भावनेऽलमिति चेत् **सिद्धा**प्रयोगे ३।३।१५४	सम्भावनेऽलमर्थे **तदर्थाप्रयोगे** १।३।११८
प्रेषातिसर्गप्राप्तकालेषु कृत्याश्च ३।३।१६३	**प्रैषानुज्ञा**प्राप्तकालेषु १।३।१२३

(कर्तुमिच्छतोऽनुज्ञानमनुज्ञा, यथा-अस्तु, एवं कुरु) अत्रातिसर्गशब्दोऽनुज्ञार्थप्रतिपादनेऽसमर्थ एव प्रतिभाति ।

परिक्लिश्यमाने च ३।४।५५	पीडायाम् १।३।१४७

(अस्योदाहरणम् 'उरः प्रतिपेषं युध्यन्ते इत्यत्र कृत्स्नमुरः पीडयन्त इत्यर्थे पीडायामित्यस्यैव लघुकलेवरस्याथ च स्पष्टार्थस्य करणौचित्यात् ।)

विशिपतिपतिस्कन्दां **व्याप्यमानासेव्य-मानयोः** ३।४।५६	विशिपतिपदिस्कन्दां **वीप्साभीक्ष्ण्ययोः** १।३।१४८

(वीप्साभीक्ष्ण्यार्थे व्याप्यमानासेव्यमानशब्दौ प्रयुक्तौ व्याख्यावलेन तमर्थं बलात् स्वीकर्तुं पाठकान् बाधेते । अतः नात्र केवलं क्लिष्टार्थता किन्तु असमर्थताऽपि ।) व्याप्यमानशब्दस्याभीक्ष्ण्यमर्थं महता क्लेशेन प्रतिपादयतोच्यते गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन सम्बन्धो व्याप्तिः, क्रियायाः पौनःपुन्यमासेवा इति । एतत्सर्वं क्लेशं परिजिहीर्षुश्चन्द्रः सूत्रितवान् 'पीडायाम्' इति ।

२—प्रकरणं विस्पष्टं विधातुं चद्राचार्येण योगविभाग आश्रितः । यथा झेर्जुस्-विधिप्रकरणं गृह्यताम् ।

अत्र पाणिनीयानि सूत्राणि सन्ति—

झेर्जुस् ३।४।१०८ सिजभ्यस्तविदिभ्यश्च ३।४।१०९ आतः ३।४।११० लङः शाकटायनस्यैव ३।४।१११ द्विषश्च ३।४।११२। अत्र चान्द्रसूत्राणि दृश्यन्ते झेर्जुस् १।४।४० सिचः १।४।४१ आतः १।४।४२ लङो द्विषश्च वा १।४।४३ विदः १।४।४४ अति १।४।४५ इति चन्द्रेण झेर्जुस्, आतः इति सूत्रद्वयं यथापूर्वमकल्पि । आत इति सूत्रं यथा तत्र सिज्लुगन्तादादन्तादेव परस्य झेर्जुसादेशो नान्यत्रेति नियमं करोति तथेहापि । अतएव अदुः अधुरित्यादौ जुस् सिद्धयति

न तु अभूवन् इत्यादौ। लङः शाकटायनस्यैव द्विषश्चेति सूत्रद्वयमेकीकृतं, शाकटायनग्रहणमपहाय 'वा' इति प्रयुक्तम् सिजभ्यस्तविदिभ्यश्चेति सूत्रं त्रिधा विभक्तम् सिचः, विदः अति इति। अतीत्यस्य अदविषय इत्यर्थः।

एवं कृते स्पष्टता जाता, द्वन्द्वप्रयुक्तपूर्वप्रयोगदोषश्च परिहृतः।

पाणिनीये (३।४।१०९) सूत्रे सिजिति, च्लेः स्थाने जातः प्रत्ययः, अभ्यस्तेति संज्ञा, विदिरिति धातुश्चेति त्रयाणां भिन्नस्वभावानामेकत्रीकरणेन सन्देहो जायते। चान्द्रे तु तेषां पृथक्करणात् विस्पष्टता।

३—अस्यतितृषोः क्रियान्तरे कालेषु ३।४।५७ असुतृषः कालेषु व्यवच्छेदे १।३।१४९

अत्र क्रियामन्तरयति व्यवधत्त इति क्रियान्तरः तस्मिन् धात्वर्थे वर्तमानादस्यतेस्तुष्यतेश्च कालवाचिषु द्वितीयान्तेषूपपदेषु णमुल् स्यात्, द्वयहात्यासं गाः पाययति द्वयहमत्यासम्। द्वयहतर्षम् द्वयहन्तर्षम् इत्यादौ अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते अर्थादेव पाययित्वा द्वयहमतिक्रम्य पुनः पाययतीत्यर्थके व्यवच्छेदे एव णमुल इष्टत्वेन 'व्यवच्छेदं' इत्येव वक्तव्ये तस्य स्थाने 'क्रियान्तर' इति कथनं न केवलं क्लिष्टं किन्तु **निहतार्थमपि**, उभयार्थकस्य शब्दस्याप्रसिद्धेऽर्थे प्रयोगात्।

४—**अल्पायाससाध्यता**रूपा अक्लिष्टताः—

अनुदात्तेतो धातोरात्मनेपदं विधीयते अनुदात्तङित आत्मनेपदम् १।३।१२ तत्र अनुदात्तेतो धातवो धातुपाठेनैव ज्ञायन्ते। एवञ्च पाठविशेषेणैव धातवस्तङानौ लभन्ते। इत्थं 'तङाना यथापाठम् १।४।४६ इति सूत्रं विधायैव चन्द्राचार्येण तङानौ साधितौ।

५—असन्दिग्धाल्पाक्षरत्वमेव प्रशस्यते। सन्देहास्पदं तु अल्पाक्षरं सूत्रं चन्द्रेण न कदापि निर्मातुं प्रयतितम्। मात्रागौरवं सहित्वाऽपि तेन विस्पष्टता सुरक्षिता, सन्देहाय दत्ताश्रयं पाणिनिसूत्रं चान्यथाकृतम्ः—यथा—

स्वाङ्गेऽध्रुवे (३।४।५४) इति पाणिनिसूत्रे विशेषपदविन्यासेन पूर्वरूपसन्धिसम्भवात् मात्रैकस्य लाघवं भवति, तथापि चन्द्रेण अध्रुवे स्वाङ्गे १।३।१४६ इति सूत्रमेव विधाय मात्रैकगौरवं सोढम्; किन्तु तादृशं लाघवं स्वीकृत्य स्वाङ्गे ध्रुवे इति सूत्रमुच्चार्यं किमत्र ध्रुवत्वं विवक्षितम् अध्रुवत्वम्वेति सन्देहजनकं कार्यं न कृतम्। पूर्वरूपस्थले परशब्दः अकारादि व्यञ्जनादि वेति सन्देहो यदा महाभाष्यकारस्य पतञ्जलेरपि होढो दादेर्धातोर्घ इत्यत्र होढः, दादेर्धातोर्घ इतीदृशो योगविभागः, अथवा होढोऽदादेरित्येको योगः धातोर्घ इत्यपर इति सन्देहो जायते तदाऽन्यस्य का कथा ?

किंच पाणिनीयन्यासे विशेषणस्य परप्रयोगोऽपि दोषः। यद्यपि व्यस्ते विशेषणस्य परप्रयोगो न व्याकरणदुष्टस्तथापि अर्थप्रतीतिव्यवधानकारक इति दोष एव। इत्थमत्र विस्पष्टतामानेतुमनवद्यतां च सम्पादयितुं पदव्यत्यासेन सूत्ररचना कृता चन्द्राचार्येण।

६—आङो दोऽनास्य विहरणे पा० सू० १।३।२० सूत्रमिदमव्याप्तिदोषग्रस्तमप्यस्ति क्लिष्टार्थमपि। आङ्पूर्वकादृतेर्मुखविकसनादन्यत्रार्थे वर्तमानादात्मनेपदमनेन विधातुमिष्यते सूत्रकारेण यथा विद्यामादत्ते इत्यत्र 'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रवि' रित्यादौ च। मुखविकसने तु मुखं व्याददाति इत्यादौ नात्मनेपदम्। विपादिकां व्याददाति, नदीकूलं व्याददाति इत्यादौ मुखविकसनम्, आस्यव्यादानम्वा नास्ति पादस्फोटरूपाया विपादिकाया नदीकूलस्य चामुखत्वात्। तथा च तङा भाव्यम् यदि च तत्र दोषवारणाय सूत्रे आस्यग्रहणमविवक्षितमित्युच्येत तदा निरर्थकत्वापत्त्या सारवत्वस्य अनवद्यत्वस्य चाभावेन सूत्रलक्षणमेवात्र न संघटेत। किंच विहरणशब्दः विकसनार्थस्य व्यादानरूपार्थस्य च अवाचकः। सति तात्पर्ये सर्वे सर्वार्थवाचका इति सिद्धान्तानुसारेण विहरणशब्दः विहारार्थवाचको व्यादानादेरपि वाचकःस्यादिति तु न शङ्कयम् तथा सति अवाचकदोषोच्छेदापत्तेः।

एतत्सर्वदूषणपरिहाराय कत्यायनेन वार्तिकद्वयं निर्मितम्:—आङो दोऽव्यसनक्रियस्य, स्वाङ्गकर्मकाच्चेति चन्द्रेण तु योग-विभागेन क्लिष्टनिरर्थकावाचकशब्दपरिहारेण लक्षणमिदं विस्पष्टमनवद्यं च कृत्वोपस्थापितम् तद् यथा:—आङो दः (१।४।५४) इति प्रथमो योगः, न स्वप्रसारणे १।४।५५ इति द्वितीयो योगः । आङ् पूर्वकाद्दाते स्तङाना भवन्ति इति प्रथमयोगार्थः । प्रसारणे वर्तमानाद्दातेस्तङानौ न भवतः, तच्चेत् प्रसारणं स्वस्य भवतीति द्वितीयस्यार्थः । अतएव आस्यं व्याददाति, विषादिकां व्याददाति, नदीकूलं व्याददाति इत्यादौ सर्वत्र स्वप्रसारणत्वात्-तङां निषेधः निषेधसूत्रेस्वग्रहणं क्रियते । अतः यत्रान्यस्य मुखप्रसारणमप्यस्ति तत्र निषेधाप्राप्त्या तङानौ भवत एव । यथा व्याददते पिपीलिकाः पतङ्गस्य मुखम् इत्यादौ ।

चन्द्राचार्यः लाघवमीहमानः यथासम्भवं निषेधांशं विधिसूत्रे एव पर्युदासनञा संनिवेश्य निषेधसूत्रस्य संख्याः स्वल्पीचकार; तथाप्यत्र पाणिनिना पर्युदासरूपेण प्रयुक्तस्य 'आङो दोऽनास्यविहरणे (पा० १।३।२०) इति सूत्रस्थानास्यविहरणपदस्य स्थाने प्रसज्यप्रतिषेधार्थकनञा न स्वप्रसारणे' (चा० १।४।५५) इति सूत्रकरणं सूचयति चन्द्राचार्यः कियता कौशलेन लाघवं स्पष्टार्थत्वं निर्दोषत्वं च स्वसूत्रे सम्पादयितुं समर्थ इति तस्य न केवलं लाघवं शरीरगुणः प्रियमस्ति; किन्तु आन्तरिकगुणः सारवत्ता निरवद्यता विस्पष्टता च ततोऽप्यधिकप्रियाऽस्ति ।

'व्यादत्ते विहगपतिर्मुखं स्वकीयम्' इत्यादिप्रयोगस्य का गतिरिति चेच्छ्रूयताम्:—सूत्रमिदमकर्त्रभिप्रायार्थम् क्रियाफलस्य कर्तृगामित्वविवक्षायाम् 'फलवति' चा० १।४।१२४ इति तङानौ स्यातामेव ।

७—पाणिनीयाः क्लिष्टाः शब्दाः

१—प्रत्यवसानम् (३।४।७२)
३—अभिज्ञावचनम् (३।२।१२२)
५—अकृच्छ्रेण (३।२।१३०)
७—समर्थाभ्याम् (१।३।४२)
९—अपह्नवः १।३।४४)
११—अनाध्यानम् (१।३।४६)
१३—उपमन्त्रणम् (१।३।४७)
१५—समुच्चारणम् (१।३।४८)
१७—स्वकरणम् (१।३।५६)
१९—प्रतिज्ञाने (१।३।५२)
२१—अनवने (१।३।६६)

२३—हेतुभये (१।३।६८)
२५—सम्माननम् (१।३।७०)
२७—शालिनीकरणम् (१।३।७०)
२९—कर्त्रभिप्राये क्रियाफले (१।३।७४)
३१—निगरणम् (१।३।८७)

तत्स्थानापन्नाश्चान्द्राः शब्दाः

२—आहारः (१।२।७१)
४—स्मृत्युक्तिः (१।२।७८)
६—शक्तौ १।२।७५)
८—आरम्भे (१।४।८८)
१०—निह्नवः (एकमात्रालाघवमपि) (१।४।९०)
१२—अस्मृतिः (लघुरपि) १।४।९२)
१४—उपच्छन्दनम् (१।४।९३)
१५—सहोक्तिः (लघुरपि) (१।४।९६)
१८—उद्वाहः (विवाहः) (१।४।१०९)
२०—प्रतिज्ञायाम् (१।४।९९)
२२—अपालने (गुरुरपि सरलतया ख्याततया च प्रयुक्तः) (१।४।११९)
(भुजो भक्षे इति चान्द्रपाठः इति दुर्गवृत्तिः)
२४—प्रयोजके (१।४।१२०)
२६—पूजा (१।४।१२२)
२८—अभिभवः (१।४।१२२)
३०—फलवति कर्तरि (१।४।१२४)
३२—आहारः (१।४।३९)
(अत्र पाणिनीये ग्राम्योऽपि दोषः)

३३—प्रत्यवसानम् (१।४।५२)
३४—आहारः (२।१।४४)
३५—श्रद्धाप्रतिघातः (१।४।६६)
३६—तृप्तिः (२।२।२९)
३७—अपवर्गः (३।४।६०)
३८—समाप्तिः (२।२।४२)
३९—आनुलोम्यम् (३।४।६४)
४०—आनुकूल्यम् (२।२।४५)
४१—अविप्रकृष्टाख्यानम् (२।४।५)
४२—सन्निकृष्टपाठम् (२।२।५२)
४३—शाश्वतिकविरोधः (२।४।९)
४३—नित्यवैरम् (२।२।५५)
४५—अनिरवसितानां शूद्राणाम् (२।४।१०)
४६—कारूणाम् (२।२।५६)
४७—विप्रतिषिद्धम् (२।४।१३)
४८—विरोधि (२।२।६५)
४९—अनधिकरणवाचि (२।४।१३)
५०—अद्रव्यम् (२।२।६५)
५१—तदाद्याचिरख्यासायाम् (२।४।२१)
५२—तदादित्वे (२।२।६८)
५३—उपसर्जनम् (४।१।५४)
५४—अप्रधानम् (२।३।६१)
५५—अलंकारः (४।३।६५)
५६—भूषणम् (३।३।२४)

(अलंकारः उपमाद्यलंकारेऽपि प्रयुज्यते इति न तस्य झटिति कुण्डलादिबोधकता)

५७—अत्याकारः (५।१।१३४)
५८—अधिक्षेपः (४।१।१५०)
५९—तदवेतम् (५।१।१३४)
६०—अवगतम् ४।१।१५०)
६१—अपनयनम् (५।४।४९)
६२—प्रतीकारः (४।३।२)
६३—संख्याया क्रियाभ्यावृत्तिगणने (५।४।१७)
६४—वारसंख्यायाः (४।४५)
६५—व्याहृतार्थाम् (वाचो व्याहृतार्थायाम् ५।४।३५)
६६—सन्देशे (वाचः सन्देशे ४।४।१८)

(पूर्वमन्येनोक्तार्थत्वात् सन्देशवाग् व्याहृतार्थेत्युच्यते इति काशिकाकारेण पाणिनिसूत्रे प्रयुक्तस्य व्याहृतार्थायामिति पदस्य सन्देशार्थत्वं साध्यते। एतेनैवास्य क्लिष्टत्वं स्पष्टम्। अथ चेत्थमपि न केवलं सन्देशवाग् व्याहृतार्था। अपि तु महाव्याहृतयः, व्याहृतार्थाः श्रुतयः स्मृतयः, काव्यानि च व्याहृतार्थानि तर्हि सर्वाणि वाचिकानि शक्यन्ते वक्तुम् यदि नकारात्मकमुत्तरं, तर्हि कथम् व्याहृतार्था इति सन्देशपर्यायः ?

किञ्च वाचि व्याहृतार्थायाम् सत्याम् वाचष्ठग् इति सूत्रार्थलाभाय पाणिने 'वाचि सत्याम्' इति पदद्वयमध्याहरणीयम्। तथाध्याहारे कृते पुनरुक्तदोषः।)

चन्द्राचार्यस्य सूत्रं स्पष्टं तथाकथिताध्याहारादि दूषणरहितं च।

६७—आनुलोम्यम् (५।४।६३)
६८—आनुकूल्यम् (४।४।४७)
६९—प्रातिलोम्यम् (५।४।६४)
७०—प्रातिकूल्यम् (४।४।४८)
७१—गन्धनम् (१।२।१५)
७२—सूचनम् (५।३।४७)
७३—उपयमनम् (१।२।१६)
७४—उद्वाहः (५।३।४८)
७५—आह्वानम् (७।२।८४)
७६—हूते (६।३।११६)
७७—गततराच्छील्ये (१।३।२१ वा० ५)
७८—गतिशीले (१।४।६१)
७९—शप उपालम्भे (पा० १।३।२१ वा० ५)
८०—शपःशपथे (१।४।६३)

(उपालम्भशब्दः शपथरूपार्थं प्रत्याययितुमसमर्थ एव । अतोऽभीष्टस्य तादृशस्यार्थस्य ग्रहणे क्लिष्टता, तादृशशब्दप्रयोगे सूत्रस्य निन्द्यत्वं च)

८१—आङः स्थः प्रतिज्ञाने (पा० १।३।२२-वा० १) ८२—स्थः प्रतिज्ञानिर्णयप्रकाशनेषु (१।१।६५)

प्रकाशनस्थेयाख्ययोश्च १।३।२३

८—(स्थेयाख्यशब्दस्य निर्णयार्थप्रतिपादने मन्दगतिः) उपसर्गविशिष्टाद्धातो र्यङ् न भवतीति व्याकरण सिद्धान्तं सिद्धान्तकौमुद्याद्यध्ययनेन काठिन्येन ज्ञातं भवति । चान्द्रव्याकरणवृत्त्या तु झटिति, इति विस्पष्टताया द्वितीयमुदाहरणम्:—तथाच एकाचो हलादेः क्रियार्थाद् भृशाऽऽभीक्ष्ण्ये यङ् १।१।१० इति सूत्रस्य वृत्तौ क्रियार्थादिति किम् प्राप्ति भृशमित्युक्तम् । अत्रोपसर्गसहितत्वात् प्रकृतिप्रात् इति हलादिरपि, न क्रियार्था अर्थात् न क्रियावाचिका, प्रादयो हि क्रियाया न वाचकाः, किन्तर्हि विशेषद्योतकाः एवंच क्रियार्थत्वाभावान्न यङ् इति स्पष्टमुक्तम् ।

चान्द्रव्याकरणस्य सर्वमुचितं परिवर्तनं परिवर्धनं प्रस्तावं सुधारं च पाणिनीयव्याकरणे द्रष्टुकामेन काशिकाकारेण तु चन्द्रमनुकृत्यैवोक्तम्:—धातोरितिकिम् सोपसर्गादुत्पत्तिर्माभूत् भृशं प्राटति हेमचन्द्रेणापि प्रात्तीत्येव प्रत्युदाहरणं दत्तम् ।

९—रहस्यमतीव प्रियं पाणिनेः । समये समये तस्येयं रहस्यप्रियता सूत्रेषु विलोक्यते । टिघुभादिसंज्ञा निर्माणे सैव तत्प्रवृत्तिः कार्यं करोति । सर्वनाम्नो विशेषतस्तदः प्रयोगाधिक्यं तदेव द्योतयति । अवगतमेव सर्वेषाम् यथा किलानेन 'सप्तम्या' मित्यस्य स्थाने 'तस्मिन्निति निर्दिष्टे' (१।१।६६) इत्यत्र तस्मिन् इति प्रयुक्तम् पञ्चाम्यामिति प्रयोक्तव्ये तस्मादिति (पा० १।१।६७) प्रोक्तम् । इदमप्यत्रैव लेखे चर्चितम् यत् चन्द्राचार्यः सरलं वक्तुकामः यथासम्भवं प्रसादशैलीप्रियः रहस्यं स्पष्टयन् तत्र तत्र सप्तम्यां (चा० १।१।७) पञ्चम्यां (१।१।८) मितीदृशमेव पदं प्रायुङ्क्त । रहस्यमयस्य सर्वनाम्नः प्रयोगस्यातीव विख्यातमुदाहरणमस्ति समासाच्च तद्विषयात् ५।३।१०६ अस्योदाहरणं काकतालीयमित्यस्ति काकतालीयमित्यत्र छः प्रत्ययः आकस्मिकेऽर्थे भवति एतच्चापय्ययदीक्षितेन स्पष्टीकृतम् अवितर्कितसम्भवमित्यस्य सामान्यधर्मं प्रतिपादयता ।

चन्द्रेण च सर्वं रहस्यं स्पष्टं व्याहरतोक्तम्:—आकस्मिके' (चा० १।३।८३) इति ।

'इव' इत्यस्य इवे संज्ञाप्रतिकृत्योः १।३।७८ इति पूर्वसूत्रादनुवर्तनात् इवार्थे वर्तमानादित्यर्थस्य लाभात् तद्विषयादिति सर्वनाम्ना तिरोहितस्यार्थस्य अनुवृत्त्यैव साधनादव्यात्यभावः ।

१०—उदाहरणं चान्द्रव्याकरणस्य यथा स्पष्टं न तथा सिद्धान्तकौमुद्याः । काशिका तु तत एव सर्वं गृहीतवती । अतो न सन्तुलितोदाहरणदानश्चेयस्तस्याः । तथाहिः—

एबे चानियोगे (पा० ६।९।१ वा० ३) इत्यस्योदाहरणं सि० कौमुद्यां क्वेव भोक्ष्यसे इति दत्तम् प्रत्युदाहरणं च तवैव इति । अत्र विचार्यते क्वेव भोक्ष्यसे इत्यत्रानवधारणं न 'एव'शब्दमात्रद्योत्यम् किमापि तत्प्रतिपादनात् ।

चान्द्रवृत्तौ अस्योदाहरणे अद्येव इहेवेति दीयेते । अनयोरेवकारोऽनिर्धारणेऽवश्यं वर्तमानो गम्यते । प्रत्युदाहरणमपि इहैव तिष्ठ, मा गाः इति वाक्यप्रयोगादधिकं स्पष्टम् ।

विस्पष्टताथं मात्रागौरवमपि सोढम् भवति चन्द्रस्य । अतएव डः सि धुट् ८।३।२९ इति पाणिनीयसूत्रस्थाने स 'डः सो धुट्' ६।१।१९ सूत्रं करोति । अत्रैकस्य मात्राया गौरवम् चान्द्रे, परन्तु पाणिनीयतन्त्रवत् उभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति नियममाश्रित्य 'ङः' इति पञ्चमीबलेन 'सि' इति सप्तम्याः षष्ठीप्रकल्पनगौरवमिह न, षष्ठ्याः स्पष्टमुक्तत्वात् । डकारस्य तु धुट् विधातुं न शक्यते श्वलिट्त्साथे इत्यत्र ष्टुत्वापत्तेः परादिकरणे तु न टोरनवतिनर्योरादेः (चा० ६।१।१३७) इति ष्टुत्वप्रतिषेधः सिद्धयति ।

---

१. यत्तया मेलनं तत्र लाभो मे यश्च तद्रतेः ।
तदेतत्काकतालीयमवितर्कितसम्भवम् ॥
कुवलयानन्दे उपमालंकारः ।

चतुर्थोऽध्यायः

(क) वृत्तिरपि चन्द्रस्य

चान्द्रव्याकरणसूत्राण्यधिकृत्य लिखितैका वृत्तिः साम्प्रतमुपलभ्यते । सा कस्येति जिज्ञासासां चन्द्रस्यैवेति **मम विचारः** । अत्र निम्नलिखितानि अन्तर्बाह्यसाक्ष्याण्युपलभ्यन्ते :—

(क) अन्तःसाक्ष्याणि यथाः—

१—वृत्तौ वक्ष्याम इत्यादादुत्तमपुरुषस्य प्रयोगः । तव्यस्य वा स्वरित्वं वक्ष्यामः (१।१।१०५) । जनिवधो-रिगुपान्तानां च स्वरं वक्ष्यामः (१।१।१०८) स्वरविशेषमष्टमे वक्ष्यामः (१।१।१४५) (ग) पूङ्यजोश्च शानच्याद्युदात्तत्वं वक्ष्यामः (१।२।६) । कथं दयालुः तन्द्रालुः श्रद्धालुरिति ? मत्वर्थीयं वक्ष्यामः (४।२।१५७) (१।२।१०४) । स्वरे विशेषं वक्ष्यामः (३।१।६७) । स्वरविशेषं तु स्वराध्याये वक्ष्यामः (४।४।९३) ।

वृत्तेस्तत्तत्सूत्राणां च समानकर्तृत्वे एवैतादृशाः प्रयोगाः संगच्छन्ते ।

२—यानि यानि पाणिनीयकात्यायनवचनानि चन्द्रेण प्रत्याख्यातानि, तेषामन्यथासिद्धत्वं वृत्तौ एव दर्शि-तम्[1] । चान्द्रस्य व्याकरणस्य सूत्राणां निर्दुष्टत्वं वृत्त्यैव सम्पाद्यते । अतः प्रतीयते चन्द्रेण तत्तत्सूत्रप्रत्याख्यानं विधाय प्रत्याख्यानकारणानां प्रतिपादनायावश्यलेखनीया वृत्तिरवश्यं लिखिता भवेदिति ।

मङ्गल[2]श्लोके चन्द्रेण 'सम्पूर्णशब्दलक्षणनिर्माणस्य प्रतिज्ञा कृता । वृत्तिं विना कुतः सम्पूर्णता ? वृत्तावेव उदाहरण-प्रत्युदाहरणलक्षण-पदकृत्यगणपाठानां सत्ता वर्तते । एतैं विना शब्दलक्षणमपूर्णमेव तिष्ठति । पतञ्जलिना सुष्ठूक्तम्[3] न केवलं लक्षणेन शब्दव्याकृतिर्भवति किन्तु व्याख्यानेन । व्याख्यानं नामोदाहरणप्रत्युदाहरण वाक्याध्या-हारादिस्वरूपमभिधेयनिर्वचनम् । तच्च वृत्तिरूपमेवेति सिद्धम् । शब्दलक्षणस्य सम्पूर्णतायैं अकामेनाऽपि प्रतिवादिना वृत्तेश्चन्द्रकर्तृत्वमवश्यमभ्युपगन्तव्यम् ।

वृत्तेश्चन्द्रकर्तृत्वे निम्नलिखितानि बाह्यसाक्ष्याणि वर्तन्तेः—

(१) मन्तु अपराधे । रोष इत्येके । मन्तूयति । चन्द्रस्तु त्रितमाह इति कण्ड्वादिभ्यो यक् (पा० सू० ३।१।२७) सूत्रे भट्टोजिदीक्षितः सिद्धान्तकौमुद्याम् । अनुबन्धसहितमन्तुञ् धातुः वृत्तौ धातुपाटे च पठितः । अतो ज्ञायते वृत्तिश्चन्द्रस्य कृतिरिति दीक्षितोऽपि विश्वसिति ।

---

१. १।३।१०६, १२८, १३५, १५०।१।४।५०।२।२।१६, ४८।५।३।१४० ।

२. सिद्धं प्रणम्य सर्वज्ञं सर्वीयं जगतो गुरुम्
लघु विस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम् । चा० व्या० पृष्ठ १ ।

३. पस्पशाह्निकव्याकरणपदार्थविचारावसरे न केवलं चर्चापदानि व्याख्यानं...समुदितं व्याख्यानं भवति ।

(२) १।१७५ सूत्रे चन्द्रेण ग्लुञ्च ग्रहणं न कृतम्। न्यग्लुञ्चदिति रूपन्तु ग्लुचेरित्युक्त्वा कथं तत्र गत्यर्थतेति प्रश्नस्य समाधानं ग्लुचिरपि गत्यर्थो भविष्यति। 'अनेकार्था हि धातवः' इति धातुपाठान्तपठितस्य श्लोकस्य चतुर्थचरणमुपन्यस्तम्। तत्र गोयीचन्द्रः संक्षिप्तसारस्य तिङन्त भागे प्रोक्तवान् धातूनामनेकार्थत्वेनेष्टार्थसिद्धिमभ्युपगन्तुं चन्द्र एव परं परमपण्डितः इति—

धातूनामनेकार्थत्वस्य चर्चा तथेष्टसिद्धिकथन्तु वृत्तौ एवोल्लिखितमितिवृत्तेः कर्ताऽपि चन्द्र इति गोयीचन्द्रस्य विश्वासः।

(३) 'भूवादित्वान्न दीर्घत्वम्' चा० १।१।८८ सूत्रस्य वृत्तिः। चन्द्राचार्य एव 'धातुपाठस्य प्रथमगणं भूवादिगणमाह। अन्ये सर्वे भ्वादिरिति प्रयुञ्जते। वृत्तिर्यदि कस्याप्यन्यस्य स्यात् तदा स भ्वादिरिति लिखेत्।

(४) कृजोहेतुशीलानुलोमेषु (चा० सू० १।२।७) सूत्रे वृत्तौ हेत्वादिषु किम्? कुम्भकारः कर्मकारः श्लोककारः शब्दकारः इत्याद्युक्तम्। अन्यच्चोक्तम् कुम्भादिकरणशीलेषु तु बहुलाधिकारारान्न भविष्यति इति। अत्र सन्दर्भे सरस्वतीकण्ठाभरणे (सं० १।४।३० सूत्रं प्रकम्य) गोयीचन्द्रेणोक्तम् शब्दादिगणे कुम्भकर्मपदक्रमाणां पाठ श्चन्द्रादिमतमाश्रित्य कृत इति। अनेन वृत्तिप्रोक्तं मतं चन्द्रस्येति वदता वृत्तेश्चन्द्रस्य कृतित्वमुक्तमेव।

(५) प्रत्यनुभ्यां गृणो व्याप्ये (चा० २।१।७७) इति सूत्रमधिकृत्य वृत्तौ उदाहरणं दत्तमस्ति। ग्रामाय गच्छतीति तादर्थ्ये चतुर्थी। ग्रामं गच्छीतीति क्रियाप्ये द्वितीया (चा० २।१।४३) सू० वृत्तिग्रन्थमुपक्रम्य टिप्पण्यामुक्तम्—'चन्द्रेण तादर्थ्ये सर्वमिदमुक्तम् इति सुपद्मवृत्तिः (२।२।२८) चन्द्रगोमीतु यथाविवक्षंद्वितीयाद्युत्पत्ति मन्यते इति कातन्त्रविस्तरः इत्यपि तत्रैवोक्तं टिप्पण्याम्।[1]

एतेन सिद्धयति वृत्युक्तस्य तत्त्वस्य चन्द्रोगोमिनो मतत्वेन स्वीकृतिः। सा च वृत्तेस्तत्कर्तृत्वस्वीकृतिपूर्विकैव स्यात्।

(६) अवधेः पञ्चमी (चा० २।१।८१) इति सूत्रस्य वृत्तौ लिखितम् अवधि—विवक्षायामतसर्थैरपि योगे पञ्चमी भवत्येव-ततः पश्चात् तत उपरिष्टात् इति। वचनमिदं चन्द्रगोमिन इति स्वीकुर्वन् कातन्त्रविस्तरो लिखतिः—

चन्द्रगोमी त्वाह—अवधिविवक्षायामतदर्थैरपि पञ्चमी भवत्येवेति। (टिप्पणी चा० व्या० सूत्र २।१।८१) वृत्तिगतमिद वचनं यदि चन्द्रस्य, तदा वृत्तिस्तु सुतरां तस्य रचनेति सिद्धम्।

(७) रायमतिक्रान्तं कुलम्, अतिरिकुलम् नावमतिकान्तं कुलमतिनु कुलम्, इत्यत्र ऐकारस्य औकारस्य च इकारः उकारश्च क्रमशो ह्रस्वो जायते। स्थानसाम्यप्रतिपादनाय वृत्तौ प्रोच्यतेः—अतिरि—कण्ठतालव्यस्य स्थाने कण्ठतालव्य इकारः। अतिनु—कण्ठोष्ठ्यस्य स्थानेकण्ठोष्ठ एव उकार इति। इकारस्य कण्ठतालव्यत्वमुकारस्य च कण्ठोष्ठ्यत्वं चान्द्रवर्णसूत्राभ्यां (४।५) संख्याकाभ्यामेव प्रतिपादितम् अत स्तर्क्यते यत् 'वर्णसूत्राणि चन्द्रस्य रचना, अतः वृत्तिरपि चन्द्रस्यैव। चन्द्रेणैव इदुतोः कण्ठतालु—कण्ठौष्ठस्थानत्वमङ्गीकृतम्।

(८) लोहितादिभ्यः शकलान्तेभ्यः (चा० २।३।२०) इति चान्द्रसूत्रम्। लोहिताऽदिशकलान्तगणः गर्गादिगणान्तर्गणः। चन्द्रेण २।४।२४ इति सूत्रस्यवृत्तौ पाणिनि (४।१।१०५) सूत्रपठितशब्दानां किंचित् स्थानपरिवर्तनेन गणोऽयं कल्पितः तत्र शब्दानां यथा स्थानपरिवर्तनं कर्तव्यं यथा च कृतं तथा परिवर्तने को हेतुरिति सर्वं वृत्तावेव दृश्यते। तथाचोक्तम् चा० सू० (२।३।२०) वृत्तौ—कुरुकतानुडुहौ तु लोहितात् प्राक् पठितव्यौ। नह्यनयो र्लोहितादि कार्यमिष्यते, नापि शकलादिकार्यम् इति। अतो निर्णेतव्यम् येन चन्द्रेण सर्वत्र लोहितादिकतन्तेभ्यः (पा० ४।१।१८)

१. चा० व्या० भा० १ पृ० १७७ टि०।

इति सूत्रस्थलोहितादिकतन्तस्थाने लोहितादिभ्यः शकलान्तेभ्य (चा० २।३।२०) इति परिवर्तनं कृतं तेनैव गणसंस्कारः (सुधारः) गणपाठश्च कृतो लिखितश्च तथा परिवर्तनहेतुज्ञापिका वृत्तिरिपि लिखितेति ।

यद्यपि निम्नलिखितानि अन्तःसाक्ष्याणि बहिःसाक्ष्याणि च वृत्तिः कस्याप्यन्यस्य रचनेति विप्रतिपत्तिं जनयन्ति तथाहि—

१—प्रत्याहारसूत्राणां वृत्तौ प्रथमपुरुषप्रयोगः[1] । ऋहलो ण्यतं वक्ष्यति (१।१।१३० सूत्रेण) इत्यत्र वक्ष्यतीत्यत्यत्र प्रथमपुरुष[2] प्रयोगः कथं बहुश्रेयसीति ? ईयस ईत्वं वक्ष्[3]यति (४।४।१४५) इति सूत्रेण) । सपत्ने तु भ्रातृव्यशब्दस्याद्युदात्तत्वं वक्ष्यति (२।४।६४) इति तथापि संस्कृतवाङ्मये ग्रन्थकर्ता स्वस्मै प्रथम पुरुषं प्रयुङ्क्त इति नाविदितं संस्कृतमर्मज्ञानाम् । साहित्यदर्पणस्य लेखको विश्वनाथः तस्य वृत्तेरपि कर्त्ता वृत्तौ प्रथमपुरुषस्योत्तमपुरुषस्य च क्रियायाव्यवहारं कृतवान्[4]। मम्मटोऽपि तथैव स्ववृत्तौ प्रथमपुरुषं प्रयुक्ते[5] । न्यायसिद्धान्तमुक्तावल्यामपि पुरुषद्वयप्रयोगो विलोक्यते ।[6] नागेशग्रन्थेऽपि प्रथमपुरुषप्रयोग उपलभ्यते[7] ।

इत्थं प्रथमपुरुषप्रयोगः वृत्तेरन्यकर्तृत्वसाधनस्य हेतु र्न भवितुमर्हति ।

चन्द्रोपज्ञमसंज्ञकं व्याकरणम् (२।२।६८) ।

इत्युदाहरणम् उपज्ञोपक्रमं तदादित्वे २।२।६८ इति सूत्रे दत्तम् । अस्य सूत्रस्य प्रथममुदाहरणं पाणिन्युपज्ञमकालकं व्याकरणमित्यस्ति । तृतीयं च नन्दोपक्रमाणि मानानीति । उदाहरणसाहचर्यात् एतस्मादुदाहरणाच्च ज्ञायते यद् वृत्तिकारश्चन्द्रगोमिनः कश्चिदतिरिक्त इति । यदि हि चन्द्र एव वृत्तिकारः स्यात् तदा मुदुपज्ञमित्येव ब्रूयात् । चन्द्रेत्यन्यपुरुषवद् व्यवहारेण ज्ञायते चान्द्रव्याकरणस्यासंज्ञत्वे विख्याते जाते कश्चिदन्यः प्रथमं पाणिनिव्याकरणवैशिष्ट्यं तदनन्तरं चान्द्रं वैशिष्ट्यं विशिनष्टि । अयमपि तर्को न युक्तः ।

अहंकारः प्रदशितो मा भवत्वितिहेतोरपि अस्मच्छब्द प्रयोगस्त्यज्यते संस्कृतविद्वद्भिः । असंज्ञकव्याकरणनिर्माणं गगनकुसुमवल्लोकैः मन्यते स्म । साफल्येन तत्कृत्वा चन्द्रेण जीवनकाले एव 'चन्द्रोपज्ञमसंज्ञकं व्याकरणमितीदृशं यशो

---

१. वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम् प्रत्याहार सूत्रम् १-१३ ।
२. चा० १।१।१०७ ।
३. २।२।८६ ।
४. ग्रन्थारम्भे—वाग्देवतायाः साम्मुख्यमाधत्ते । सा० द० प्र० परि० मं० श्लोकावतरणम् ।
अस्य ग्रन्थस्य—काव्यफलान्याह सा० द० प्रयोजनावतरणम् । द्वितीयश्चेदोमिति ब्रूमः स० द० प्र० प० काव्यस्यात्मा ध्वनिरिति लक्षणखण्डनग्रन्थः ।
५. काव्यप्रकाश मङ्गलश्लोकावतरणम् ग्रन्थारम्भे—ग्रन्थकृत् परामृशति । काव्यप्रकाशप्रयोजनावतरणम्-इहाभिधेयं सप्रयोजनमिति काव्यफलान्याह ।
६. निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः । (श्लो-२)
विघ्नविधाताय—ग्रन्थतो निबध्नाति मं० श्लोकावतरणम् ।
७. नागेशः कुरुते सुधीः—परिभाषेन्दुशेखरस्य मङ्गलश्लोकांशः ।

लेभे। मन्ये, यशोवाक्यमिदं रूढितामगच्छत्। यथा हैदराबादस्य गान्धीनगरे भाषणं दातुकामेन महात्मना गान्धिना यदा स्वयं विज्ञापनं कृतम् सदा तेन लिखितं गान्धीनगरे मम भाषणं भविष्यतीत्येव। नतु तेन 'मम नगरे मम भाषणं भविष्यतीति। एवमेव चन्द्रेण स्वनाम्ना विख्याता ख्यातिरविकलं वृत्तावलेखीत्यपि सम्भवः।

अथचेदमुदाहरणं धर्मदासेन लेखकेन चन्द्रस्यातिविलक्षणसाफल्यमिति कृत्वा पश्चाल्लिखितमित्यपि संभाव्यते। एकस्योदाहरणस्य प्रक्षिप्तत्वमपि सम्भवति। 'नैकाकी चणकः भाण्डं भनक्ति' नैकमुदाहरणमनेकप्रमाणसिद्धं तत्थ्यमन्यथा कर्तुं प्रभवति।

यक्तूक्तम् पाणिनीयपारिभाषिकशब्दप्रयोगः वृत्तेरन्यकर्तृत्वं साधयति कथं धनक्रीता ? आबन्तेनायं समासः, अत्र समासशब्दप्रयोगः (चा० २।३।५५) तान्येतानि सप्तत्रयाणि सप्तविभक्तयो भवन्ति अत्र 'विभक्ति' शब्दप्रयोगः (२।१।१)। चन्द्रोहि असंज्ञकव्याकरणनिर्माणाय कृतप्रतिज्ञः कथं पाणिनिसंज्ञां प्रयुञ्जीत (२।२।६८)। 'इदमपि न विचारविलसितम्:—

चन्द्रेण यौगिकत्वमाश्रित्य समासादिशब्दानां[1] सूत्रेष्वपि यत्र तत्र सर्वत्र निःसंकोचं प्रयोगः कृतः। सूत्रे यौगिकत्वमाश्रित्य यथा धात्वादिपदप्रयोगः सुसंगतस्तथा वृत्तावपि भवितुमर्हति। अतएव २।१।१ सूत्रस्य वृत्तौ विभक्तिपदप्रयोगहेतुं ददतोक्तम् विभागो विभक्तिरिति कृत्वा स्वादयो विभक्तयः उच्यन्ते नतु सुप्तिङौ विभक्तिरिति कृत्वेति।

बहुक्रोष्टृष्णीत्युदाहरणन्तु ददानश्चन्द्रवृत्तिकारो भ्रान्त इति गोयीचन्द्र[2]कथनन्तु चन्द्र एव वृत्तिकार इति विग्रहेण योज्यम्।

न गतिर्हिंसाशब्दार्थहसः १।४।५० सूत्रे चान्द्रवृत्तौ दृश्यते कथं व्यतिहरन्ते भारम् व्यतिवहन्ते भारमिति ? नैतौ गत्यर्थौ। किन्तर्हि ? प्रापणार्थौ इति।

एतत्प्रतीकमादाय गोयीचन्द्रो लिखति 'धर्मदासस्तु भाष्यार्थं विरुद्धमेव व्यतिवहन्ते भारम्, व्यतिहरते भारमित्युदाजहारेति। एतेन ज्ञायते यद् वृत्तिरियं धर्मदासस्य।

पुस्तकसमाप्तौ च दृश्यते 'श्रीमदाचार्यधर्मदासस्य कृतिरियम्' तेनापि ज्ञायते यद् वृत्ति धर्मदासस्य रचनेति; एतदपि न समीचीनम्।

यदि धर्मदासः वृत्तिकर्ता स्यात् तदा तेन वृत्तेः किमपि मङ्गलमवश्यं कृतं स्यात्। अथ च वृत्तेरन्यकर्तृत्वे चन्द्रगोमिनो मङ्गलश्लोकस्य तत्र व्याख्याऽवश्यं देया स्यात्; यथा किल चान्द्रपञ्चिकायां पूर्णचन्द्रेणादीयत। शब्दरत्न कर्त्रा च प्रौढमनोरमामङ्गलश्लोकोध्यायं ध्यायमिति व्याख्यातः।

अतः धर्मदासस्य कृतिरित्यस्य तात्पर्यं तत्कर्तृकलेखनं सम्पादनम्वेत्येव।

'व्यतिवहन्ते भारम्' इत्यस्य परिवर्धनं प्रायः धर्मदासेन कृतमत एव गोयीचन्द्रस्तथाह। एतेन स्थालीपुलाकन्यायेन समस्ताया वृत्ते धर्मदासकर्तृत्वस्वीकृति र्नयुक्ता पूर्वोक्तप्रमाणविरोधात् गोयीचन्द्रस्य पूर्वोक्तवचनविरोधाच्च।

वृत्तिरियं काशिकातः प्राक्कालिकी, काशिकावृत्तौ अस्याः सर्वतोमुखप्रभावोपलब्धेः।

काशिकायां चान्द्रवृत्तेः प्रभाव इति तत्थ्यस्य साधकानि प्रमाणानि निम्नलिखितानि सन्तिः—

(क) उभयत्र न केवलमर्थसाम्यं दृश्यते किन्तु शब्दसाम्यं शैलीसाम्यं चोपलभ्यते। तथाहिः—

---

१. समासेऽङ्गुलेः सङ्ज्ञः ६।४।६६।

२. पा० ७।१।९५ चा० व्या० भा० १ पृ० २३९ टि०।

अइउ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहाराथाम् । तस्योच्चारणं भवत्येकेन ऋको-ऽणो रलौ (चा० १।१।१५) इत्यकारेण (चा० व्या० अइउण् सूत्र भाग १। पृ० १-२) ।

(ख) अइउ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहरार्थम् । तस्य ग्रहणं भवत्येकेन उरण् रपरः (अ० सू० १।१।५१) इत्यकारेण । (काशिका अइउण् सूत्र) ।

इत्थं चतुर्दशानां प्रत्याहारसूत्राणां व्याख्यानमुभयत्र समानैः शब्दैः समानया शैल्या च समानं कृतं विलोक्यते।

उदाहरणरूपेण चान्द्रव्याकरणसूत्राणि यत्रोद्धृतानि तत्र काशिकायां पाणिनीयसूत्राणि । इतीत्थं स्पष्टं विलोक्यते चान्द्रवृत्तेः पूर्ववर्तिन्याः प्रभावः काशिकायाम् ।

अतएव प्रो० कीलहार्नेन लिखितम्-काशिका-कारेण चन्द्रगोमिनः सकलसामग्रीणां यथासम्भवमुपयोगः स्ववृत्तिरचनायामकारि[1] । अतएव च प्रो० बेल्वल्करमहोदयेन लिखितम्-चन्द्रगोमिनोपस्थापितानां सर्वेषां संशोधनानां पाणिनीयसम्प्रदायेऽन्तर्निधानमेव काशिकाकारस्योद्देश्यम्[2] । युधिष्ठिरमीमांसकेनाप्युक्तम्:—काशिकाकारेण स्ववृत्ति-रचनायां यथापाणिनीयतन्त्रस्य प्राचीनवृत्तीनामाश्रयणं कृतं तथा चान्द्रादिप्राचीनव्याकरणानां तद्वत्तीनां चाश्रयणं विहितम्[3] इति ।

चान्द्रवृत्तेः काशिकातः प्राचीनत्वं काशिकाग्रन्थेनापि सिद्धचति । काशिकायां प्वादीनां ह्रस्वः (अ० सू० ७।३।८०) सूत्रं विवृण्वता टीकाकारेण मतान्तरमुपस्थापयतोक्तम्-येषामागणान्ताः प्वादयस्तेषां जानातीत्यत्रापि ह्रस्वः प्राप्नोति 'ज्ञाजनयोर्जा (अ० सू० ७।३।७९) इति दीर्घकरणसामर्थ्यान्न भवति (काशिका अ० सू० ७।३।८०) । इदं मतं चन्द्राचार्यस्येति ज्ञायते, प्वादीनां ह्रस्वः (चा० ६।१।१०८) इति सूत्रचान्द्रवृत्तौ 'प्वादयः आगणान्ताः, कथं जानाति ? ज्ञाजनयोर्जा (चा० ६।१।१०७) इति दीर्घोच्चारणात्' इत्युक्तेः । एवंच स्पष्टं यत् काशिकावृत्तिश्चान्द्र-वृत्तेरनन्तरकालिकी रचनेति ।

न च 'आगणान्ताः' इति पदमशुद्धम् 'आङ्० मर्यादाभिविध्योः' (पा० २।१।१३) इति समासे आगणान्तम् प्वादयः इति स्यात्, समासविकल्पे 'आङ् मर्यादावचने' (पा० १।४।८९' पञ्चम्यपाङ्परिभिः' (पा० २।६।१०) आभ्यां पञ्चम्यां जातायां आ गणान्तात् प्वादयः इति स्यादिति वाच्यम् गणशब्देन सह प्रथमं समासे कृते 'आगण' मिति संसाध्य ततः आगणमन्तो येषामिति समासेन 'आगणान्ता' इत्यस्य साधुत्वात् एवं च 'आगणान्ता' इत्यस्य गणसमा-प्त्यन्ताः गणान्तान्ता इति वार्थः ।

वृत्तिरियं शैल्या शब्दैश्चातिसरला, उदाहरण-प्रत्युदाहरण-शङ्कासमाधानादिसहिता गणपाठपूर्णा, चन्द्रा-चार्यस्य वैयाकरणसिद्धान्तप्रतिपादनक्षमा । लघुविस्पष्टसम्पूर्णशब्दलक्षणे यत् साफल्यमर्जितं चन्द्रेण तस्य कारणेषु मुख्यतमं कारणमेषा स्वोपज्ञा प्रसन्नगम्भीरपदा वृत्तिरेव । यदीयं वृत्तिर्न स्यात् चन्द्रस्य रहस्यं बहुत्रास्पष्टमेव स्यात् । **अस्मिन् शोधप्रबन्धे प्रतिपदं वृत्तेर्वैशिष्ट्यं वैलक्षण्यं च स्फुटीभविष्यति ।**

एतामेव वृत्तिम् उदाहरणप्रत्युदाहरणवाक्याध्याहारानुवृत्तपदप्रतिपादनशङ्कासमाधाननिर्देशनसंहितां सर्वतो-भावेन पूर्णां विलोक्य काशिकाकारः काशिकां वृत्तिं लिलेख । चान्द्रव्याकरणाच्चान्द्रवृत्तेश्चोपादेयानि तत्वानि यथा-सम्भवं नीत्वाऽपि काशिकायां काशिकाकारेण यच्चन्द्रनामोल्लेखनं न चक्रे तत्र कारणं, सम्प्रदायविशेषभक्तेऽत्र देशे

---

१. सं० व्या० शास्त्र का इति० भा० १ पृ० २१० ।

२. स एव पृ० २१० ।

३. सं० व्या० शास्त्र का इति० भाग १—पृ० २११ ।

दृष्ट्वचान्द्रव्याकरणोपेक्षस्य तस्य मनसि जाता "चन्द्रनामग्रहणे इयमपि वृतिः कदाचिदुपेक्षिता स्यादितीदृशी" काप्याशङ्का ।

यद्यपीयं चान्द्रवृत्तिर्मुख्यतया शब्दस्य व्युत्पत्तिपक्षमधिकृत्य तं व्याकर्तुमेव लिखिता अतोऽत्र व्युत्पत्तिपक्षस्य प्राधान्यं नैसर्गिकमेव तथापि यथावसरमत्र शब्दस्य दार्शनिकः पक्षोऽपि प्रस्तुतः ।

उदाहरणाय पञ्चपाणि स्थलानि उद्धियन्तेः—

(१) प्रादयो हि क्रियाया न वाचकाः किन्तर्हि विशेषद्योतकाः (चा० १।१।४० सू० वृत्तिः) ।

(२) नागवत् स्थूला स्त्री नागी, नागवद्दीर्घा स्त्री नागा इति प्रतिपादनायोच्यते वृत्तौ 'नागी भवति स्थूला चेत्; नागान्या । जातौ तु नागैव, तस्याः स्थौल्याभावात् (चा० २।३।२८) सू० वृत्तिः (अत्र गोण्या लक्षणायाः स्वीकृतिरभिधेयसत्तायां च स्वीकृतायां जातेश्च पदार्थत्वस्वीकृतिरस्ति) ।

(३) ब्राह्मणस्योच्चै (गृहम्) इत्यत्र सापेक्षत्वान्न भविष्यति (समासः) (चा० २।२।२३ सू० वृत्तिः) ।

(४) वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति । तच्छायानुकारिणो हि ते, न पुनस्त एव । पृथक् प्रयत्ननिर्वत्यं हि वर्णमिच्छन्त्याचार्याः । नुग्[1] विधिलादेशणत्वेष्वृकारे प्रतिविधातव्यम् (चा० व्या० भा० १ पृष्ठ-४) ।

यथा मृगतृष्णिकायां जलाभासे सत्यपि जलकार्यपिपासाशान्त्यादिकं न तेन भवितुमर्हति तथा तत्र वर्णाभासे सत्यपि न वर्णप्रयुक्तकार्यम् । राम+अवतारः इत्यत्र रामघटकोऽकारः अवकारघटक आद्याकारः पृथक् प्रयत्ननिवर्त्यः, न तथा अग्ने इन्द्रम् इत्यत्र एकार घटक इकारः पृथक्प्रयत्ननिर्वत्यः अतस्तस्येकाररूपतया ग्रहणाभावान्न तत्र अकोऽकि दीर्घः (चा० ५।१।१०६) ।

(५) संज्ञाशब्दानामन्यच्च प्रवृत्तिनिमित्तमन्यच्च न्युत्पत्तिनिमित्तमिति तत्थ्यं प्रकाशयता तेनोच्यते 'संज्ञा शब्देषु व्युत्पत्तिमात्रं यथाकथंचित्कर्तव्यम् इति (चा० ५।१।९५ सू० वृत्तिः) एवंच नखनकुलादिशब्दसिद्धेरूपायमात्रं सूत्रं, व्युत्पत्तिश्च सूत्रप्रवृत्तिमात्रज्ञापिका नतु अर्थस्य ज्ञापिका ।

एवमन्यान्यपि बहूनि ज्ञातव्यानि वृत्याऽनया ज्ञातानि भवन्ति यथा—

(१) चन्द्राचार्यमतेन पाणिनिकात्यायनपतञ्जलि वैशिष्ट्यमेकशब्देनात्र प्रातिपादितम् । विलोक्यताम्—

(क) 'पाणिन्युपज्ञमकालकं व्याकरणम्' (चा० २।२।६८ सू० वृत्तिः)

(ख) ख्यातौ-पाणिनेः ख्यातिः, इतिपाणिनि । (चा० २।२।२ सू० वृ०)

(ग) नयते पाणिनिर्व्याकरणे पूजामधिगच्छतीत्यर्थः (चा० १।४।८२ सू० वृ०)

(घ) नयते कात्यायनो व्याकरणे । प्रमेयं निश्चिनोतीत्यर्थः । उक्तानुक्तदुरुक्तचिन्तकत्वरूपं कात्यायन-वैशिष्ट्यमत्रोदाहरणवाक्यमुखेन प्रतिपादितम् । (चा० १।४।८२ वृत्तिः) ।

(ङ) वदते पतञ्जलि र्व्याकरणे । ज्ञानपूर्वकं वदतीत्यर्थः । (चा० सू० १।४।९३ वृत्तिः)

(२) चन्द्रस्य लक्षणकरणपाटवम् समानार्थकत्वेन प्रतिभासमानानां शब्दानां मिथः सूक्ष्मभेदप्रतिपादनकला च वृत्या ज्ञायतेः यथा—

(अ) वृत्तिरप्रतिबन्धः । उत्साहश्चैतसिको धर्मः इत्यादि (चा० १।४।८४ सू० वृत्तिः)

(आ) सूचनमपकारप्रयुक्तं परदोषाविष्करणम् । अवक्षेपणं तिरस्कारः । सेवा परचित्ताऽऽराधनम् । साहसं यदबुद्धिपूर्वकरणमित्यादि (चा० सू० १।४।७८ वृत्तिः)

---

१. नुक् चानेक हलः (चा० ६।२।१२४) ।

(इ) विधिरप्राप्तनियोगो दृष्टार्थो वा, ऽदृष्टार्थो वा, प्रत्याख्याने सप्रत्यवायो वा निष्प्रत्यवायो वा सत्कारपूर्वको वा न्यक्कारपूर्वको वा—। यत्राङ्गीकृतस्य प्रत्याख्याने प्रत्यवायस्तन्नियमन्त्रणम् । इह भवान् भुञ्जीत । यत्र प्रत्याख्याने कामचारस्तदामन्त्रणम् । इह भवानासीत् । सत्कारपूर्वको नियोगोऽध्येषणम् माणवकं भवान् अध्यापयेत् । न्यक्कारपूर्वको नियोगः प्रैषः इत्यादि (चा० सू० १।३।१२१) ।

इमां चन्द्रोपज्ञवृत्तिं विहाय नान्या कापि वृत्तिरुपलभ्यते । अतश्चन्द्रमवगन्तुमियमेव जिज्ञासूनां शरणम् ।

अस्या वृत्तेश्च न कापि टीका प्रकाशिता वर्तते । चान्द्रव्याकरणपञ्जिकाख्यैका टीका तिब्बते महापण्डितेन राहुलसांकृत्यायनेनोपलब्धा । तस्या आलेख्यप्रतिलिपिः (फोटोस्टेटकापी) तेन कृताऽऽनीता च । सेदानीं पटनास्थे जायसवालशोधसंस्थाने (जायसवाल रिसर्च इंस्टिट्यूटपटना) सुरक्षिता वर्तते । तस्य सौजन्यान्मम मार्गदर्शकेन श्रीरामचन्द्रपाण्डेयमहाभागेनैकाऽऽलेख्यप्रतिलिपिरूपलब्धा । तस्य कृपया मया तामध्येतुमवसरो लब्धः । अस्या श्चान्द्रव्याकरणपञ्जिकायाः समालोचनं स्वतन्त्रेऽध्यायेऽत्रैव क्रियते । तत एव तस्या वैशिष्ट्यं वैलिक्षण्यं चावगन्तव्यम् ।

चतुर्थोऽध्यायः

(ख) चान्द्रव्याकरणे स्वरवैदिकाध्यायौ, याविदानीं न प्राप्येते

चन्द्राचार्यः सुगतमतानुयायीति हेतोस्तेन वैदिकशब्दसिद्धिदर्शकानि सूत्राणि न रचितानीति बहूनां समालोचकानां मतम् तन्न रोचते चान्द्रव्याकरणस्य सूक्ष्माध्ययनकारिभ्यो विद्यार्थिभ्योऽस्माद्दशेभ्यः, तथाहि—

(१) मङ्गल[1]श्लोके तेन सम्पूर्णशब्दलक्षणनिर्माणस्य प्रतिज्ञां विधाय स्वव्याकरणं सम्पूर्णशब्दलक्षणात्मकमेवोपवर्णयितुं प्रतिज्ञातम् । यदि चात्र स्वरवैदिकप्रक्रिया न स्यात्, तदा कथमस्य सम्पूर्णता स्यात्, महाभाष्यादौ कृतस्य शब्दस्य लौकिकवैदिकभेदाभ्यां द्विधा विभिन्नस्यैकस्मिन् वैदिकभागे प्रकाशपातनप्रयासाकरणात् ।

(२) संक्षिप्तसारं टीकयता गोयीचन्द्रेण 'विश्वजनादेरुत्तरश्छोद्वि र्वा भवति । प्राप्ते विभाषेयम् । वामनेनास्य छान्दसत्वमुक्तम् । चन्द्रेणाऽपि भाषाभागे नोक्तम्' इति लिखितम् । तत्र 'भाषाभागे' इति घटकभागपदेन प्रतीयते, यत् चान्द्रव्याकरणस्य भागद्वयमासीत्—भाषाभागः छान्दसभागश्च । सिद्धा[2]न्तकौमुद्यामपि तथैव विभागः दृश्यते । प्रथमं लौकिकानां शब्दानां तदनन्तरं वैदिकानां साधनप्रयत्नस्य तत्र स्फुटत्वात् । अनुभूयते चास्माभिः सर्वैर्वैदिकभागस्याध्ययनोपेक्षाऽध्यापनानादरश्च । तत्रोपलब्धानां टीका ग्रन्थानां न तथा बाहुल्यम् यथा लौकिकशब्दलक्षणभागस्य यदेयं दुःस्थितिरुपलब्धातिप्रचारस्य पुस्तकस्याप्यस्ति वैदिकविभागस्य, तदा प्रान्ते कुहचित् सम्प्रदाये वैकस्मिन्, लब्धपठनपाठनस्य चान्द्रव्याकरणस्य तस्य छान्दसभागस्य कीदृशी दुरुपेक्षा सम्भवेदिति शक्यतेऽनुमातुम् । अतः तस्य पठनपाठनोपेक्षैव विलयहेतुः । पुरुषोत्तमदेवेन बौद्धवैयाकरणेन भाषावृत्तिनामक-लौकिक-संस्कृतव्याकरणग्रन्थलेखकेन 'चन्द्रगोमी भाषासूत्रकारः' इति यल्लिलेख, तस्य कारणं तत्काले समागते चान्द्रव्याकरणे छान्दसभागस्यानुपलब्धिः सम्भाव्यते । अतएवाद्दष्टचान्द्रव्याकरणच्छान्दसभागेन तेन तथालिखितमितिमन्तव्यम् ।

(३) बहूनि व्याकरणस्यैतस्य स्वरप्रदर्शकसूत्रसद्भावसूचकानि प्रमाणानि समुपलभ्यन्तेऽन्तःसाक्ष्यरूपाणि सम्प्रति समुपलभ्यमाने चान्द्रव्याकरणभाषाभागेऽपि, तानि यथाः—

(क) काम्यचि चकारो न श्रूयते तस्य च न किमप्यनुबन्धप्रयुक्तं लौकिकं फलं वर्तते । अतस्तस्य फलं 'सति शिष्टस्वरबाधन' मिति 'व्याप्यात् काम्यच्' (चा० १।१।१३) इति सूत्रवृत्तौ लिखितं चन्द्रेण । अतएवानुमीयते व्याकरणेऽत्र 'सतिशिष्टस्वरः तादबाधकं च सूत्रमासीदिति ।

(ख) लुडि० सिच् (चा० १।१।६०) इत्यत्र सिचि इकारः सिच्यतङ्यादैच् (चा० ६।१।३) इत्यत्र चिह्नार्थः चकार आगमानुदात्तस्वरबाधनार्थः । अनेनापि ग्रन्थेऽस्मिन् स्वरविधायकनिषेधकलक्षणानां सद्भावः सूच्यते ।

(ग) चन्द्राचार्येण तव्य एव स्वीकृतः, न तु तव्यत् इति,[3] तव्ये तव्यति वा कृते रूपेऽविशेषात् । पाणिनिना

---

१. सिद्धं प्रणम्य सर्वज्ञं सर्वीयं जगतो गुरुम् । लघुविस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम्-चान्द्र व्या० पृ० १ ।

२. इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् इति । उत्तरकृदन्तसमाप्तौ भट्टोजिदीक्षितः । (सि० कौ०)
(क) चकारः सति शिष्टस्वरबाधनार्थः चान्द्र सू० (१-१-२३) वृत्तौ ।
(ख) लुङि सिच् (चा० १।१।६० वृ०) ।

३. तव्यानीयरकेलिमरः (चा० १।१।१०५) ।

तव्यत्प्रत्ययं विधाय तित्स्वरितं यत् साधितम् तत् तव्यस्य विकल्पेन स्वरितविधानेनाऽपि सिद्धचति। एवंच यथा पाणिनिमतेन तव्यत्प्रत्यये कृते स्वरितस्य तव्यप्रत्यये च कृते स्वरिताभावस्य सिद्धिः तथा चन्द्रेणाऽपि तव्यस्य वा स्वरितत्वं ग्रन्थान्ते कथितमिति 'तव्यस्य वा स्वरितत्वं वक्ष्याम' इति ग्रन्थेनाभिव्यज्यते। अत्रत्यं वक्ष्याम' इति पदं लृटि उत्तमपुरुषप्रयुक्तं स्वरलक्षणनिर्माणस्य भविष्यत्कालिकत्वं वृत्तिकारसूत्रकारयोरैक्यं च सूचयति[1]। सूत्र मिदं मिलितं चान्द्रपञ्जिकायाम्, उद्धृतश्च मया चान्द्रपञ्जिकावैशिष्ट्यप्रकरणे।

(घ) वार्तिककारेण जन्धातोः यत् प्रत्ययो विहितः[2] तेन जन्यः सिद्धचति। किन्तु चन्द्रेण जनधातोर्यत्-[3]-परो न विधीयते किन्तु 'ऋहलोर्ण्यत्' चा० १।१।१३० इति ण्यति अदा[4]देशत्य जनिवध्योश्चेति निषेधे जन्य इति सिद्धे स्वरकृतविशेषस्य नूतनस्वरविधायकसूत्रनिर्माणद्वारा समाधानं चक्रे[5]।

(ङ) 'अमावास्या' इति अमावसो वा (चा० १।१।१३४) इति विकल्पेन ण्यत् प्रत्यये कृते सिद्धचति। पक्षे यति अमावस्या इति। तत्र वृत्तौ लिखति ण्यता मुक्ते यद् भवति अनो वस इति प्रतिषेधान्नाद्युदात्तत्वमिति। 'अनो वस' इति चन्द्रेण रचितस्य तस्य स्वरनिषेधकसूत्रस्याऽग्रिमो भागः यस्याकृतिः 'यतो द्वचचोऽनौवस इति भवेदिति सम्भाव्यते। इत्थं चन्द्रेण कृतस्य स्वरसूत्रस्यांशोपलब्धौ जातायाम् तेन स्वरप्रक्रिया न रचितेति कथनं दुःसाहसमात्रं प्रतीयते[6]।

(च) 'क्रतौ कुण्डपाय्यसंचाय्यौ (चा० सू० १।१।१३७) इति सूत्रस्य वृत्तौ कुण्डैः पीयते सोमोऽस्मिन् इति कुण्डपाय्यः क्रतुरित्युल्लिख्य निपातनादाद्युदात्तत्वमिति लिखित्वा तेन सर्वतो भावेन वैदिकशब्दसिद्धौ तत्स्वरे च निष्ठा दर्शिता। एतेन तस्य बौद्धमतानुयायित्वात् वैदिकस्वरलक्षणाऽनिर्माणमिति परास्तम्। शब्दशिल्पिनां वैयाकरणानां सर्वविधशब्दसाधनं धर्मः। सम्प्रदायधर्मः स्वस्थाने स्थास्यति, व्याकरणनिर्माणकाले सम्प्रदायद्वेषस्यौदयावसर एव नास्ति तादृशे महामनसि।

(छ) 'अग्नौ चित्योपचाय्यपरिचाय्याः' चा० १।१।१३८ इति सूत्रस्य वृत्तौ चयनं चित्या। चिनोतेः क्यप् अन्तोदात्तत्वं च (निपात्यते) इति ग्रन्थेन चन्द्राचार्यस्योदात्तादिस्वरे आस्थोपलभ्यते।

(ज) 'लिपो नेश्च' चा० १।१।१४५ इति सूत्रस्य वृत्तौ प्रसङ्गात् 'श' प्रत्यय (पर) विधायकस्य सूत्रस्या-निर्माणे दधः ददः इत्यादेः संभावितायाः प्रकृतेरसिद्धिमाशङ्क्योक्तम्' 'दध' इति दाधाप्रकृते र्न रूपम्। किन्तु दद् दध् धातुभ्यां कर्तरि ण्वुल्तृजचः १।१।१३९ इति अचि कृते निष्पन्नं रूपम्। नचैवं स्वरे भेद आपद्येत, 'श' प्रत्यये आद्यु-

---

१. तव्यानीयरकेलिमरः चा० १।१।१०५ सू० वृ०।

२. यतिजनेरुपसंख्यानम् (अचोयत् पा० ३।१।९७) अत्यलमिदमुच्यते तकिसहिचतियतिजनीनामुपसंख्या-नमिति वक्तव्यम् इति भाष्यम्।

३. परः अर्थात् प्रत्ययः—

४. अदादेशोऽर्थात् वृद्धचादेशः—

५. जनिवध्योरिगुपान्तानां च स्वरं वक्ष्यामः। (चा० १।१।१०८ वृत्तिः)। चान्द्रपञ्जिकास्थमिदमपि सूत्रं "वैशिष्ट्यवर्णनप्रकरणे समुद्धृतम्।

६. अनौ वस इति प्रतिषेधान्नाद्युदात्तत्वं भवति। (चा० १।१।१३४ सू० वृ०)।

दात्तत्वस्य[1] अचि चित्वादन्तोदात्त[2]त्वस्य प्राप्तेरिति वाच्यम् स्वरविशेषमष्टमे[3] वक्ष्याम इत्यादिना अचि प्रत्ययेऽपि आद्युदात्तत्वस्य विधानाय नूतनसूत्रनिर्माणस्य संकेतितत्वात् । अनेन ज्ञायते स्वरप्रकरणमष्टमाध्याय आसीच्चान्द्रे व्याकरणे । एतेन शक्यतेऽनुमातुं वैदिकशब्दनिर्माणस्य साधकानि सूत्राणि सप्तमाध्याये निर्मितानीति ।

(ऋ) इनि परे (प्रत्यये) नकारानुबन्धस्य फलमाद्युदात्तं वदति चन्द्राचार्यः—'स्तम्बशकृद्भ्यां व्रीहिवत्सयोरिन्' (चा० १।२।८) सूत्रवृत्तौ अतः ज्ञायते आद्युदात्तविधानार्थम्' ञ्नित्यादे र्नित्यम् (पा० ६।१।१९७) इत्येतादृशं वा किमपि सूत्रं चान्द्रव्याकरणेऽप्यवश्यमासीत् ।

(ऋ) 'दधृगुष्णिक् क्रुञ्चः' १।२।४९ इत्यनेन 'दधृग्' निपातनेधृषेर्द्वित्वमन्तोदात्तत्वं च निपात्यते इति वृत्तावुक्त्या चन्द्रस्य स्वरे निष्ठा सिद्धचति ।

(ट) पूङ्यजोः शानन् (पा० ३।२।१२८) इत्यत्र पाणिनिर्नकारानुबन्धमाद्युदात्तार्थं करोति । किन्तु चान्द्रव्याकरणे 'शानच्' १।२।८६ इति सामान्यसूत्रेण शानच्प्रत्ययं कृत्वैव पवमानः यजमान इत्यादयः साधिताः । शानचि यदाद्युदात्तत्वं तस्य शानच्यपि निर्मितेन नूतनेन सूत्रेण विधानाल्लाभस्य सम्भवात् । अतएवोच्यते—पूङ्यजोश्च शानच्याद्युदात्तत्वं वक्ष्याम इति ।[4]

(ठ) तुमुनो नकारानुबन्धस्यापि फलं स्वर एवेति वक्ष्यति चन्द्राचार्यः स्वयमेव वृत्तौ । अतोऽप्यनुमीयते स्वरप्रकरणस्य सत्ता[5] ।

(ड) पाणिनिना निगमशब्दः घान्तो निपात्यते ।[6] चन्द्रगोमिना तु व्रजव्यजावेव निपात्येते घप्रत्ययान्तौ । तन्मतेन निगमशब्दस्तु अप्प्रत्ययान्तः । घप्रत्ययान्तत्वे पाणिनि[7]मतेनान्तोदात्तत्वम्, अप्प्रत्ययान्तत्वे तु अनुदात्तान्तत्वमिति-फलभेदनिराकरणाय गोमिनो कृतम् "स्वरन्तु वक्ष्याम इति । एतेन ज्ञायतेऽन्तोदात्वत्वविधानाय किमपि सूत्रं चन्द्रो-गोमिना वश्यं रचितं स्यात् ।

(ढ) ङीपः[8] पकारस्य स्वरप्रयोजनमुक्तं चन्द्रगोमिना । स च स्वरः तद्विधायकस्य सूत्रस्य निर्माणं विनाऽ सम्भवः । अतएव सम्भाव्यते चान्द्रव्याकरणेऽपि अनुदात्तौ सुप्पितौ (पा० ३।१।४) इति सूत्रवत् किमपि सूत्रमवश्यं भवेत् ।

---

१. 'अभ्यस्तानामादिः' पा० ६।१।१८९ अनिड्यजादौ लसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः । ये ददति प्रिया वसु । परत्वाच्चित्स्वरमयं बाधते । दधाना इन्द्रे ।—सिद्धान्त कौमुदी पृ० ७०१ ।

२. 'चितः' पा० ६।१।१६३ । अन्त उदात्तः स्यात् । चितः सप्रकृतेर्बहुकजर्थम् चित्प्रत्यये सति प्रकृति-प्रत्ययसमुदायस्यान्त उदात्तो वाच्य इत्यर्थः ।

३. कथं ददो दध इति ? ददधोरचा सिद्धम् । स्वरविशेषमष्टमे वक्ष्यामः 'लि ो नेश्च' (चा० १।१।१४५ सू० वृ०) ।

४. चा० व्या० १।२।८६ वृत्तिः ।

५. तुमुन्भावे क्रियायां तदर्थायाम् - १।३।६ चा० सू० तुमुनो नकारः स्वरार्थः उकार उच्चारणार्थः । चा० सू० १।३।६ वृत्तिः ।

६. गोचरसंचरवहव्रजव्यजापणनिगमाश्च (पा० ३।३।११९) ।

७. आद्युदात्तश्च पा० ३।१।३ ।

८. अनुदात्तौ सुपपितौ पा० ३।१।४ ।

९. ऋन्नो ङीप् चा० २।३।२ ।

(ण) पाणिनीयानां, मतेन भ्रातृव्यशब्दः भ्रातुरपत्यमित्यर्थे व्यत् प्रत्ययान्तः स च तित्[1]वात् स्वरितान्तः। सपत्नार्थेऽपि भ्रातृव्यशब्दः सिद्धचति। स च व्यनूप्रत्ययान्तः, नित्वा[2]दाद्युदात्तः। चान्द्रास्तु केवलं 'व्यत्' प्रत्ययेनैव भ्रातृव्यशब्दं संसाध्य सपत्नार्थे आद्युदात्तत्वविधानस्य प्रतिज्ञा 'वक्ष्[3]यति' शब्देन कृता। अतः ज्ञायते चन्द्रेण कश्चित् स्वरविधायकभागोऽपि लिखितः।

(त) तदिहास्ति चेत्यत्र (चा० ३।१।६७) वृत्तौ चन्द्रगोमिनोच्यते कार्णच्छिद्रक इत्यणा सिद्धम्। स्वर-विशेषं वक्ष्याम इति। अत्रापि स्वरविशेषनिरुक्ते र्भविष्यत्कालिकी प्रतिज्ञा स्वरप्रकरणस्यसत्तामभिव्यनक्ति।

(थ) 'बह्वचोऽन्तोदात्ताद् ठञ्' ३।३।३९ इति सूत्रेण बह्वचो व्याख्येयनाम्नोऽन्तोदात्तात् भवव्याख्यानयो ष्ठञ् विधीयते। षात्वणत्विकम्, नातानतिकम् इत्युदाहरणयोर्लक्षणसंगमनाय केनान्तोदात्तत्वं जातमित्याकांक्षायाम् समासस्येत्यन्तोदात्तः इति लिखितं वृत्तौ। एवमेव सूत्रोक्तस्यान्तोदात्तादित्यस्य व्यावृत्ति प्रदर्शयता प्रत्युदाहरणं प्रस्तुतम् संहितायाः सांहितम्-संहिताशब्दः प्रादिस्वरेणाद्युदात्तः। अतोऽत्रान्तोदात्तत्वाभावान्न ठञ् प्रत्यय इति तदभिप्रायः।

अत्र संभाव्यते समासस्येत्यन्तोदात्त इत्युद्धरणघटक 'समासस्येति चान्द्रसूत्रस्यैवोल्लेखः। सूत्रमिदं पाणिनेः 'समासस्य' ६।१।२२३ इति सूत्राक्षरसदृक्षम्, कन्थायाष्ठक् पा० ४।२।१०२ इत्यादि सूत्रवत् (चा० सू० ३।२।११)।

एवमेव 'प्रादिस्वरेणाद्युदात्तः' इत्यत्रापि चान्द्रसूत्रस्याभिव्यक्तिः स्पष्टा। यतश्चन्द्रेण उपसर्ग इति गति-रित्यनयोः स्थाने प्रादिशब्दः प्रयुक्त इति चन्द्रस्य असंज्ञकव्याकरणरचनायाः प्रतिज्ञापरिचितैर्विदितमेव। इत्थं प्रती-यते यत् चन्द्रेण 'उपसर्गश्चाभिवर्जम्' (फिट् सूत्र ४ पाद सू० ८१) इत्यस्य स्थाने प्रादिश्चाभिवर्जम् एवम् गतिरनन्तरः पा० सू० ६।२।४९ इत्यस्य स्थाने प्रादिरनन्तर इत्याकारकं सूत्रं रचितं भवेत्। तयोरेव प्रधानभागमादाय वृत्तौ 'प्रादिस्वरेण' इति लिखितं स्यात्। पाणिनेष्टीकाग्रन्थकारैरपि यत्र तत्र गतिस्वरेण आद्युदात्तः, फिट्स्वरेणान्तोदात्त इति लिखित्वा एषा पद्धतिरङ्गीकृतैव।

(द) तदस्य पण्यम् (चा० ३।४।५३ पा० ४।४।५१ स० ४।४।१०८) लवणाट्ठञ् (चा० ३।४।५४ पा० ४।४।५२ स० ४।४।१०९) इति सूत्रद्वयं पाणिनीयचान्द्रव्याकरणे समानाक्षरम्। तत्र पूर्वसूत्रेणैव ठगा लवणः पण्यमस्यलावणिकइत्यादिसिद्धे द्वितीयं किमर्थमिति प्रश्नस्योत्तरम् 'स्वरे विशेषत्व' लाभार्थमित्युक्तं चन्द्रा-चार्येणापि। एवंच ज्ञायते तेनापि ञ्नित्यादिर्नित्यमितीदृशं किमपि सूत्रमवश्यमेव रचितं भवेत्।

(ध) 'ओदनं दीयते नियुक्तम् अस्मै' इति औदनिकः, अस्यै चेत् औदनिकी। अत्र पणिनिमतेन ठिठन् प्रत्ययः 'श्राणामांसौदनाट्ठिठन्' (पा० ४।४।६७) इति सूत्रेण। चान्द्रे तु ठट् प्रत्ययं कृत्वा टित्वाच्च स्त्रीलिंगेटिड्ढेति ङीपा औदनिकीति संसाध्य नकारानुबन्धः परित्यक्तः, नकारानुबन्धकार्यमाद्युदात्तं च विशेषसूत्रनिर्माणद्वारा संसा-धितम्। तथा चोक्तम्:—स्वरं तु वक्ष्यामः।[4]

(न) परशरीरे संक्रम्य चिकित्स्यं विषम् क्षेत्रियम्। परलोकशरीरे चिकित्स्यो व्याधिः क्षेत्रियः इत्यादि-सिद्धये पाणिनिना चन्द्राचार्येण च समान[5] सूत्रं निर्मितम्। तत्र चकारानुबन्धः चित्स्वरार्थः इत्युभयोर्मतम्।

---

१. तित्स्वरितम् पा० ६।१।१८५। २. ञ्नित्यादेर्नित्यम्।

३. सपत्ने तु भ्रातृव्यशब्दस्याद्युदात्तत्वं वक्ष्यति। भ्रातुर्व्यत् चा० २।४।६४ सू० वृत्तिः।

४. ओदनाट् ठट् ३।४।६८ (चा० व्या०)।

५. क्षेत्रियच् परक्षेत्रे चिकित्स्यः चा० ४।२।९६ पा० ५।२।९२।

पाणिनिना चितः (६।१।१६३) सूत्रं विधायान्तोदात्तरूपश्चित्स्वरो यथा दर्शितः स्तथा चन्द्रगोमिनाऽपि किमपि सूत्रमवश्यं चित्स्योदात्तस्वरो विहितः स्यात् ।

अत्र क्षेत्रिय इत्यस्य सिद्धिपद्धतिः भट्टोजिदीक्षितेन इत्थं दर्शिताः—परक्षेत्रशब्दात् सप्तम्यन्ताद् घच् परशब्दस्य लोपश्च निपात्यते इति मनोरमा[1] । परक्षेत्रे चिकित्स्य इत्यर्थे क्षेत्रियच् निपात्यते इति चन्द्राचार्यः[2] ।

(प) चूडाशब्दात् विकल्पेन लजविधीयते । प्राणिस्यादातो लज् वा (चा० ४।२।९९) इति सूत्रेण । अत्र चकारानुबन्धः चूडालोऽसीत्यत्र स्वरितबाधनार्थः इति चन्द्राचार्यस्वीकृतिः । पाणिनेरपि पाणिस्थादातोलजन्यतरस्याम् (पा० ५।२।९६) सूत्रेण विहितस्य लच् प्रत्ययस्य चानुबन्धस्य फलम् 'चूडालोऽसि' इत्यत्र स्वरितबाधनमेवास्ति । तथा-चोक्तम् काशिकायांम् प्रत्ययस्वरेणैवान्तोदात्तत्वे सिद्धे चकारश्चूडालोऽसीत्यत्र स्वरितो वानुदात्ते पदादौ (पा० ८।१।६) इति स्वरितबाधनार्थः । अयमभिप्रायः असीत्यस्य तिङन्तिङः इति निघातः, चूडालशब्दात् सोरुत्वे तस्योत्वे हलां संस्रनधर्मत्वात् तत्स्थानिकोकारोऽनुदात्तः । अथवा सुप्स्थानिकस्यापि सुप्त्वात् अनुदात्तौ सुप्पितावित्यनुदात्तः पूर्वेण सह आद्गुणे सति एकादेश उदात्तेन इत्योकार उदात्तः, ततः एङः पदादादति इति पूर्वरूपमेकादेशः तस्य स्वरितो वाऽनुदात्त इत्यादिना स्वरिते प्राप्ते तद्बाधनार्थश्चकारः (चितः इति अन्तोदात्तत्वविधानार्थः) ।

चूडालोऽसि इत्यत्र रुत्वोत्वपूर्वरूपविधायकानि तत्तत्सूत्राणि यथा चान्द्रव्याकरणे उपलभ्यन्ते तथा तिङादे-र्निघातादिविधायकैः सूत्रैरप्यवश्यं भवितव्यम् अन्यथा तथोक्तिश्चन्द्रस्यासंगता स्यात् । अतः सिद्धयति चान्द्रव्याकरणे स्वर प्रकरणम् ।

(फ) 'आयुधजीविसंघाञ्ज्यङ्बाहीकेष्वब्राह्मणराजन्यात्' इति पाणिनिसूत्रम् (५।३।११४) बाहीकेष्व-ब्राह्मणराजन्याच्छस्त्रजीविसंघाञ्ज्यट् इति चान्द्रसूत्रम् (४।३।९०) तत्र चन्द्राचार्येण ब्राह्मणराजन्यवर्जितात् ज्यट्-विधानस्य प्रयोजनमुक्तम् शालङ्कायना राजन्या इत्यादौ ञ्यङभावः । तत्र राजन्यशब्दात् ञ्यट् विहितेऽपि अकारयका-रयोर्लोपे कृते राजन्य इत्येव स्यात् तदा राजन्यशब्दप्रतिषेधे किम्प्रयोजनमिति जिज्ञायाम् वृत्तौ लिखति स्त्रियां स्वरे च विशेषात् प्रतिषेध इति । तत्र स्त्रियां टित्वात् ङीपि राजन्यीति प्राप्नोति इष्यते तु राजन्या इति एवं ञ्यट् कृते ञित्वादाद्युदात्तः प्राप्नोति, इष्यते तु अन्तोदात्तत्वम् इति वृत्तिकर्तुश्चन्द्रस्य हृदयम् । अत्र टित्वप्रयुक्तङीपो विधायकं सूत्रम् यथोपलभ्यते तथा स्वरसूत्रमप्यवश्यमुपलब्धं स्यात् यदि तदुपेक्षितं सत् कालकवलितं न स्यात् ।

(ब) यौधेयशब्दः पाणिनितन्त्रानुसारेण अञ्प्रत्ययान्तः अतएव 'यौधेयी' त्यत्र[3] स्त्रियाम् अञन्तलक्षणो ङीप् सिद्धयति । तथाच पा० सूत्रम् यौधेयादिभ्यामणञौ ५।३।११७ । चान्द्राचार्यस्तु पार्श्वादिभ्यो ऽणस्त्रियामित्येव सूत्रं कृत्वा यौधेयादिभ्यः शब्देभ्योऽञो विधानाय सूत्रं न करोति । यौधेयादिगणे पाणिनिना पठिता-नाम् 'यौधेय शौभ्रेयज्यावनेयधार्तेयवार्तेयशब्दानां ठक् प्रत्ययेन सिद्धिं दर्शयति । तत्र युधाया 'द्वयचः' (चा० २।४।५१) इति ठक्, शुभ्रघृतवृत्तज्याबाणेभ्यः शुभ्रादित्वात् (चा० २।४५३) ठक् । यौधेयीत्यादिषु ठगन्तादेव ङीप् । नच अञ् प्रत्ययविधाने ञित्वादाद्युदात्तत्वम् ढक् कृते तु किं[4]त्वादन्तोदात्तत्वमिति फलभेद उभयो व्याकरणयोरिति वाच्यम् ढकि कृतेऽपि विशेषसूत्रनिर्माणद्वाराद्युदात्तत्वस्य विधानसम्भवेन फलभेदपरिहारस्य 'स्वरविशेषन्तु स्वराध्याये वक्ष्यामः' इति वाक्येन प्रतिज्ञातत्वात् (स्वरविशेषं तु स्वराध्याये वक्ष्यामः) (चा० ४।३।९३ सू० वृत्तिः) । स्वरविशेषमष्टमे वक्ष्यामः

---

१. दृश्यताम् सिद्धान्तकौमुद्यास्तत्वबोधिनी टीका क्षेत्रियच् प्रतीके सूत्र सं० ५।२।९२ ।
२. चान्द्र व्या० सूत्र ४।२।९६ वृत्तिः ।
३. चा० चा० ४।३।९३ ।
४. कितः पा० ६।१।१६५ ।

स्वरविशेषं तु स्वराध्याये वक्ष्यामः स्वरविशेषं तु स्वराध्याये वक्ष्याम इत्यनयोरेकवाक्यतया ज्ञायते चान्द्रव्याकरणे स्वराध्यायः अष्टम आसीत् ।

(भ) अन्तादिवद्भावस्यानावश्यकतां प्रदर्शयता चन्द्राचार्येण 'द्वयोरेकः' चा० ५।१।८१ इति सूत्रवृत्तौ अन्तादिवद्भावं विना सन्ध्यभावादिविधि साधयता स्वरसम्बन्धीनि यानि कतिपयानि कार्याणि उल्लिखानि तैः अत्र व्याकरणे चन्द्रनिर्मितानां सूत्राणां कलेवराण्यपि लक्ष्यन्ते तत्रोक्तम् 'कार्या' इत्यत्रान्तवद्भावानर्थक्यम् स्वरितत्वस्य विप्रतिषेधेन एकादेशात् प्रागेव प्रवृत्तेः । एवम् गुडोदकम् इत्यत्रापि पूर्वम्, पूर्वपदान्तोदात्तत्वम्, पश्चाच्चैकादेशः अतो नास्त्यन्तादिवद्भावस्यावश्यकता । अत्र पूर्वपदान्तोदात्तत्वविधानाय चन्द्रगोमिना 'उदके मिश्र' इति सूत्रमपि निर्दिष्टम् । इदं सूत्रं पाणिनेः उदकेऽकेवले (६।२।८६) इति सूत्रस्थानापन्नं प्रतीयते । अष्टमाध्यायेऽस्य 'उदके मिश्रे' इतीदृशस्य सूत्रस्य सत्ता निश्चिता ।

अत्रैव प्रसङ्गे 'प्राटिता' इत्यत्रापि सन्धेः प्रागेव प्रादिकारकोपपदादुत्तरपदप्रकृतिस्वरत्वम् 'दर्शितम् ।' प्रादिकारकोपदादुत्तरपदप्रकृतिस्वरत्वमित्यपि चान्द्रसूत्रांशः । पाणिनीयव्याकरणे[1] गतिकारकोपपदात् कृत (६।२।१३९) इति सूत्रं गतिकारकोपपदेभ्यः कृदन्तस्य तत्पुरुषे प्रकृतिस्वरं विदधाति । प्रतिज्ञाताऽसंज्ञकव्याकरणरचनेन चन्द्राचार्येण सर्वज्ञ गति-स्थाने 'प्रादि' शब्दः प्रयुक्तः 'कृतः' स्थानेऽत्र उत्तरपदप्रयोगेण निर्वाहः कृतः । इत्थं मन्यते चन्द्रस्य सूत्रं 'प्रादिकारकोपपदादुत्तरपदम्' इतीदृशमासीत् ।

इत्थं तत्र तत्र स्वरसूत्राणां खण्डशः पूर्णतो वोपलब्धौ जातायामपि चान्द्रव्याकरणे स्वरप्रकरणम् स्वरप्रकरणस्वरसूत्राणि वा नासन्निति कथनं कस्मै रोचेत ?

(म) हे गार्गीमात इति श्लाघ्ये पुत्रव्यपदेशक्षमे अकारान्तं रूपं सम्बोधने सिद्धयति । गार्गीमाता यस्येति विग्रहे कप्प्रत्ययमपवादत्वात् प्रबाध्य सम्बोधने मातृशब्दस्य मातजादेशोविधीयते । तेन हे गार्ग्याः श्लाघ्य पुत्र इति तदर्थः । अत्रादेशे चकारः स्वरार्थ इति चन्द्रस्य वृत्तिः (चा० ६।२।४७ सू० वृत्तिः) अतः सिद्धचति यत् तेन 'चितः' इत्येतादृशं किमपि सूत्रमवश्यं रचितं भवेत् ।

(य) 'एरच्' इति सूत्रस्य वृत्तौ चकारानुबन्धस्य प्रयोजनं विवृण्वता चन्द्राचार्येणोक्तम्—'चकारस्थाथघञ्क्ताजबित्रस्यान्त इति चिह्नार्थः' इति । अनुबन्धप्रयोजनस्थलप्रतिपादनपराण्येतादृशानि सर्वाणि वाक्यानि चात्र सत्यानि दृष्टानि तथाहि 'लस्तिप्तस्—१।४।१ सूत्रे टकार 'इटोऽत्' (चा० १।४।३८) इति चिह्नार्थः लुङि सिच् चा० १।१।६० इत्यत्र (चा० ६।१।६) सिच्यतङ्यादैजिति चिह्नार्थ इत्यादीनि । एवंच थाथघञ् इत्यादि सूत्रेणाप्यत्र भवितव्यम् । तच्च भाषाभागे नास्ति, अतः छान्दसभागे भवेदित्यनुमीयते । सूत्रमिदं 'थाथघञ्क्ताजबित्राणाम्' (पा० ६।२।१४४) इति पाणिनीयसूत्रस्यानुरूपमस्ति । सूत्रमिदं स्वरविधायकम् । अतोऽस्य 'स्वरविशेषमष्टमे वक्ष्यामः' इति वाक्यार्थसमन्वयानुरोधेनाष्टमाध्याये सत्ता स्वीकर्तुं शक्यते ।

(र) 'यो वलि लोपः' (चा० ५।१।६३) इत्यत्र वृत्तौ 'जीरदानुरास्रेमाणमित्यत्र कथं वलोपः सूत्रे यमात्रग्रहणात्' लोपो व्यो वलि' (पा० ६।१।६६) इतिवत् वकारग्रहणाभावादित्याशङ्क्योक्तम् 'छान्दसो वर्णलोप' इति ।

अतः ज्ञायते वर्णलोपविधायकं किमपि छान्दसं सूत्रं चन्द्रेणावश्यं रचितं स्यादिति ।

(ल) ह्रस्वप्रकरणे 'अम्बार्थनद्यो र्ह्रस्वः' (पा० ७।३।१०७) इति सूत्रे महाभाष्ये 'तल्ह्रस्वत्वं वा ङिसम्बुद्धचोः' इति 'देवते, देवत, देवतायां देवते इत्यादौ ह्रस्वार्थं वक्तव्यम् इत्युक्तम् । तत्र चन्द्राचार्येण वृत्तौ प्रोक्तम्' तलो ह्रस्वत्वं वा ङिसम्बुद्धचयोरिति न वक्तव्यम् देवते देवतायां निधेहि हे देवत, हे देवते इति, छान्दसत्वात् प्रकरणात् अत्र सूत्रे यथा किल वार्तिककारेण प्रोक्तम् तथा न वक्तव्यम् इत्येव सिद्धचति न तु छन्दःप्रकरणेऽपि न वक्तव्यम् इति,

१. चा० १।३।४५ ।

तदैव भाष्यकारप्रत्याख्यानेन सह सामञ्जस्यमेकवाक्यता च स्यात् । प्रोक्तं हि भाष्यकारेण-अवश्यं छन्दसि ह्रस्वत्वं वक्तव्यम् उपगायन्तु मां पलयो गर्भिणयो युवतय इत्येवमर्थम् (भाष्यम्—७।३।१०७) । भाष्यकारेण लोके तादृशवचनस्यानावश्यकता छन्दसि चावश्यकता प्रकटीकृता । तस्य भाष्यस्याधारेण लिखितस्य चान्द्रवाक्यस्यापि तादृशेनैवार्थेन भाव्यम्; यादृशः किल भाष्येऽभिप्रेतः । इत्थं छन्दसि ह्रस्वविधानार्थं छन्दःप्रकरणे सप्तमाध्याये 'तल् ह्रस्वत्वं वा ङि सम्बोधनसौ' इतीदृशं वचनमिहावश्यं स्यात् ।

(व) प्रत्याहार सूत्रस्थेन—

केनाबन्धेन कियन्तः कीदृशाकाराश्च प्रत्याहाराः निष्पादिताः कस्मिन् कस्मिंश्च सूत्रे स स प्रत्याहार उपात्त इति प्रदर्शितं चन्द्राचार्येण प्रत्याहारसूत्राणां वृत्तिषु । तत्र 'अमङ्णनम्' (प्र० सू० ७) इति सूत्रघटकमकारानुबन्धेन अम्, यम्, अम् मम् ङम् इतीदृशानां पञ्चानां प्रत्याहाराणां सिद्धि प्रदर्श्य क्रमशः 'शश्छोमि' ६।४।१५७ 'अनुस्वारस्य ययि यम्' ६।४।१५१ 'यरोऽमि अम् वा' ६।४।१४० 'विन् मतो र्मम्', ङमो ह्रस्वाद् द्वे ६।४।१७ इति सूत्राणि तेषामुदाहरणानि प्रस्तुतानि । तेषु चतुर्थस्य 'मम्' प्रत्याहारस्योदाहरणीभूतं विन्मतोर्मम् इति सूत्रं नोपलभ्यते समुपलब्धे भाषाभागे । अतः ज्ञायते सूत्रमिदं सप्तमाध्याये (वैदिकप्रकरणे) प्राप्तस्थानं भवेदिति । इत्थं चान्द्रव्याकरणे सप्तमाध्यायो वैदिकशब्दसिद्धेः अष्टमाध्यायश्च स्वरविधानस्य प्रकरणमासीदिति निश्चप्रचम् । अस्यापि सूत्रस्य कलेवरमुपलब्धमस्पष्टरूपेण चान्द्रपञ्जिकायाम् ।[1]

(श) धातुपाठे चन्द्रेण वैदिका धातवोऽपि पठिताः यतोऽपि चान्द्रे वैदिकप्रकरणसत्ताऽनुमातुं शक्यते । तथाहि द्वितीये गणे

षस स्वप्ने—२ चाद्र धातुपाठसूत्रसंख्या—२
वश कान्तौ ,, ,, —३
दीधीङ्दीप्तौ ,, ,, ५३
वेवीङ्गतौ ,, ,, ५४ इमे चत्वारो वैदिकाः

धातवश्चन्द्रेण स्वधातुपाठे पाठिताः । वशधातुस्तु वष्टि भागुरिरित्यादौ प्रयोगाल्लौकिकस्तथाप्यन्येषां वैदिकत्वं निर्बाधमेव । एषां धातूनां छान्दसत्वं दीक्षितेन स्पष्टत उक्तम्[2] । हलन्तपुंल्लिङ्गप्रकरणे आदीध्यत् आवीव्यदिति साधयता दीक्षितेनोक्तम् 'अनयो ङित्वेऽपि छान्दसत्वाद् व्यत्ययेन परस्मैपदम्' । इत्थमेषां धातूनां वैदिकत्वे निश्चितेऽपि चान्द्रधातुपाठे पाठः चान्द्रव्याकरणे वैदिक-स्वरप्रकरणयोः सत्तामनुमापयति ।

	चा० धा० पा० सू० सं०
एवम् तृतीयगणे घृ क्षरणे—	६
ऋ सृ गतौ—	७
भस भत्सने	८
कि ज्ञाने	९
तुर त्वरणे	१०
धिष शब्दे	११

१. द्रष्टव्यमस्य शोधप्रबन्धस्योपान्त्यप्रकरणम् ।

२. दीधीङ् दीप्तिदेवनयोः एतदादयः पञ्च धातवश्छान्दसाः (सि० कौ० अदादिगणान्तिमभागः)

धन धान्ये	१२
जन जनने	१३
गा स्तुतौ	१४

इमे छान्दसा धातवः पठिताः। ऋ धातुस्तु बहुलं छन्दसीत्येव सिद्धे अतिपिपत्योश्चेति विधानात् भाषायामपि प्रयुज्यते तथापि अन्ये तु शुद्धाश्छान्दसाः।

पञ्चमे गणे ऋक्षचरिजरि हिंसायाम्-(२२) इति वैदिका धातवः। दीक्षितेनात्र रि क्षि चरि जरि हिंसायामिति पठित्वा ऋक्षीत्येक एवाजादिरित्यन्ये इति प्रोक्तम् अत्रान्ये पदेन चन्द्र एव तस्याभिप्रेतः।

इत्थं छान्दसानां पूर्वनिर्दिष्टानां धातूनां धातुपाठे पाठं कुर्वता चन्द्रेण वैदिकप्रक्रियाऽवश्यं रचिता भवेदिति निश्चितमेव।

(स) यद्यस्मिन् व्याकरणे षडेवाध्यायाः स्युस्तदाध्यायषट्कमस्य तथैवैकं स्मरणीयं वैशिष्ट्यं स्यात् यथा पाणिनेरष्टकं काशकृत्स्नस्य च त्रिकम् वैशिष्ट्यम्। यथा अष्टकं पाणिनीयं सूत्रम् तदधीयते विदन्ति वा अष्टकाः पाणिनीयाः, त्रिकं काशकृत्स्नं सूत्रं, तदधीयते विदन्ति वा त्रिकाः काशकृत्स्ना इति, यथा चान्द्रे[1] व्याकरणे काशिकायां[2] जैनशाकटायनस्यामोघायां[3] वृत्तौ पाणिनेः सूत्रस्य वैशिष्ट्यमष्टकं काशकृत्स्नस्य च त्रिकमुल्लिखितम् तथा चान्द्रसूत्रस्यापि वैशिष्ट्यं षट्कमिति क्वाप्यवश्यमुल्लिखितं स्यात्। चान्द्रमसंज्ञकं व्याकरणमितिवदेतदपि परमोल्लेखनीयं वैलक्षण्यं सम्भवति। अनुल्लेखाज्ज्ञायते आपिशलपाणिनीयवदस्याप्यष्टाध्यायपरिमाणवत्वमिति।

(ष) चान्द्रपरिभाषा सूत्रेषु ८६ तमाऽन्तिमा परिभाषा वर्तते—'स्वरविधौव्यञ्जनमविद्यमानवत्' इति। परिभाषेन्दुशेखरेऽसौ परिभाषाऽशीतितमा वर्तते। स्वरोद्देश्यकविधौ व्यञ्जनमविद्यमानवद् भवतीति परिभाषार्थः। इयं परिभाषा चान्द्रव्याकरणे स्वरविधायकेषु सूत्रेषु सत्स्वेव सफला स्यात्। यद्यस्मिन् व्याकरणे स्वरसूत्राणि न स्यु, स्तदातत्सम्बन्धि परिभाषासूत्रमपि न कृतं स्यात्। यथाऽत्र व्याकरणे संज्ञानामभावात् संज्ञासम्बद्धानि परिभाषासूत्राणीह न कृतानि चन्द्रेण, तथाहि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति (प०शे० २७) संज्ञापूर्वकविधेरनित्यत्वम् (प० शे० ६४) इत्यादिपरिभाषास्थानापन्नपरिभाषासूत्राणीह न दृश्यन्ते, तथा स्वरसम्बन्धिपरिभाषासूत्रमपि न कृतं स्यात्। न च तथा। पश्यति तु चन्द्राचार्यः स्वरप्रकरणमष्टमे करणीयं कृतम्वा अतः परिभाषासूत्रं करोति-स्वरविधौ व्यञ्जनमविद्यमानवत् इति (चा० प० सू० ८६)। इत्थं स्वरसूत्रसद्भावोऽत्र सिद्धः। परिभाषासूत्रमिदं सर्वेषु चान्द्रपरिभाषासूत्रेष्वन्तिमम्। अतस्तुल्यन्यान्यात् स्वरस्याध्यायोऽन्तिम इति सूच्यते।

अत्र केचित् स्वरस्य सद्भावोऽत्र तैस्तैः प्रमाणैः साध्यते चेदस्तु स भागः, वैदिकप्रकरणस्य सद्भावे न तथा प्रमाणानि सन्ति किंच वैदिकभागाऽसाधकं प्रमाणमत्रोपलभ्यते तथाहि—

(१) परिभाषासूत्रेषु सर्वे विधयश्छन्दसि विकल्प्यन्ते इत्यस्याभावः, वैदिकप्रक्रियाभावं साधयति, यदि हि वैदिकप्रक्रिया स्यात् वैदिकप्रयोगाणां स्वभावसिद्धैकरूपताऽभावस्य समाधानाय तादृशस्य परिभाषासूत्रस्यावश्यकता स्यात्। परिभाषेयं पाणिनीयतन्त्रे स्वीकृताऽस्ति। परिभाषेन्दुशेखरेऽस्याः संख्या ३५ तमा वर्तते।

(२) किंच पाणिनीयतन्त्रे वैदिककार्यविधायकानि सूत्राणि अष्टस्वध्यायेषु विकीर्णानि सन्ति- अतएवाष्टा-

---

१. ३।१।४२।
२. ५।१।४८।
३. ३।२।१६१।

ध्यायीक्रममवहेल्य प्रयोगमुखेन सूत्राणि विन्यस्यताऽपि भट्टोजिदीक्षितेन वैदिकप्रक्रियावर्णनप्रसंगेऽष्टाध्यायीक्रमानुसारेणाष्टाध्याया एव दर्शिताः। एकैकमुदाहरणं दत्वा वैदिककार्यविधायकसूत्राणां विकीर्णत्वं प्रस्तूयते—

छन्दसि पुनर्वस्वोरेकवचनम्	१।२।६१ पा० सू०
षष्ठीयुक्तश्छन्दसि वा	१।४।९
तृतीया च होश्छन्दसि	२।३।३
मन्त्रे घसह्वरणस—	२।४।८०
छन्दसि सहः	३।२।६३
लिङर्थे लेट्	३।४।७
व्यत्ययो बहुलम्	३।१।८५
रक्षो जातूनां हननी	४।४।१२१
छन्दसि धस्	५।१।१०६
आडोऽनुनासिकश्छन्दसि	६।१।१२६
बहुलं छन्दसि	७।३।९७
बहुलं छन्दसि	७।१।१०
समुपोहः पादपूरणे	८।१।६
ओमभ्यादाने	८।२।८७

इत्थं दृश्यते वैदिकलौकिककार्यविधायकानि सूत्राणि तत्र सह प्रोक्तानि सन्ति। अतः पूर्वत्रासिद्धमित्यस्य तत्रानिष्टप्रवृत्ति र्न भवति। चान्द्रे भवत्कल्पनानुसारेण छान्दसविधयः सप्तमाध्याये यदि स्युस्तदा चान्द्रव्याकरणस्य ६।३।२७ स्थाने पठितस्य पूर्वत्रासिद्धमित्यस्य बलात् सर्वेषां तेषां सप्तमाध्यायपठितानां सूत्राणामसिद्धत्वमापद्येत।

तद्यथा 'यवाग्वाग्निहोत्रं जुहोति' इत्यत्र सप्तमाध्यायगतेन तृतीया च होश्छन्दसि २।३।३ इति पाणिनिसूत्रस्थानापन्नेन विहिताया स्तृतीयायाः टादियणादिविधायकसूत्र दृष्ट्याऽसिद्धत्वेन रूपासिद्धिः।

किंच समासस्येतिविहितस्य स्वरस्य भवन्मतेऽष्टमाध्यायस्थस्य सप्ताध्यायीसूत्रदृष्ट्याऽसिद्धत्वेन तद्दृष्ट्या समासस्यैवाभावात् सूत्राप्राप्तिः।

अथ च नलोपादिः क्वासिद्धः क्व च सिद्धः इति जिज्ञासायाम् पाणिनिः यत् परिगणनं करोति 'न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' ८।२।२ तत्र स्वरविधौ न लोपोऽसिद्ध इति दृश्यते।

पञ्चार्मम् इति तदुदाहरणम् (अत्र दिक्संख्ये संज्ञायाम् पा० २।१।५०) इति समासे कृते नलोपे च जातेऽवर्णान्तं पूर्वपदं जातम् इति अर्मे चावर्ण द्वयच् त्र्यच् (पा० ६।२।९० इति पूर्वपदाद्युदात्तत्वं प्राप्तं नलोपस्यासिद्धत्वान्न भवति) न तथा चान्द्रे व्याकरणे। अत्र हि सुपि न लोप ६।३।२८ (सुप्येव नलोपोऽसिद्धो भवति) इत्येव नियमो दृश्यते। तत्र स्वरविधौ नलोपोऽसिद्ध इति नियमो नास्ति। अतः यथा संज्ञाविध्यभावात् संज्ञाविधावित्यंशः परित्यक्तस्तथा स्वरविध्यभावात् सोऽप्यंशः।

स्थानिवद्भावनिषेधायापि स्वरविधौ नेति नेहोक्तम्[1]।

---

१. यथा किल नपपदान्त पा० १।१।५८ इत्यत्रोच्यते।

बौद्धस्य चन्द्राचार्यस्य वैदिकशब्दान् प्रति मन्दादरत्वमपि स्वरवैदिकप्रयोगसाधनसूत्राभावमेव द्योतयति, भाषावृत्तिकारस्य पुरुषोत्तमदेवस्येवेति आहु स्तन्न ।

बहुलं छन्दसीत्याद्युक्त्वा सर्वेषां छान्दसविधीनां वैकल्पिकत्वं संसाध्य सा परिभाषा चन्द्रेण परित्यक्तेत्यपि सम्भवति ।

न नि मुः ६।३।२९ सिज्लोप एकादेशे ६।३।३० षठनि क्तादेशः ६।३।३१ प्लुतस्तुकि ६।३।३२ घुटि श्चुः ६।३।३३ द्वित्वे परसवर्णः ६।३।३४ इति भाषाभागेऽसिद्धनिषेधकसूत्रवत् छान्दसभागेऽपि कस्यापि सूत्रस्य निर्माणात् असिद्धत्वाभावसंभवः ।

किञ्च स्वरविधौ एव नलोपोऽसिद्धः इत्यस्य नियमस्य तु चान्द्रे सम्भव एव नास्ति । अत्राष्टमाध्याये प्रवर्तिताः स्वरविधयः स्वयं सुपः प्रकृते र्नोलोपः ६।३।४८ इत्यादिना षष्ठाध्याये पठितनलोपं प्रत्यसिद्धा दृश्यन्ते ।

स्थानिवद्भावस्य विधानं चान्द्रव्याकरणे परिभाषासूत्रेषु पठितेन स्थानिवदादेश (२०) इति परिभाषासूत्रेण क्रियते तत्राऽनल्विधावित्यपि न दृश्यते, नायक पावक इत्यादौ आयावादेशाभावे कर्तव्येऽनेन स्थानिवद्भावो न भवति, भावकार्ये कर्तव्य एव तेन स्थानिवद्भावविधानस्य सप्रदायसिद्धत्वात् इत्यपि ज्ञापनं नात्र क्रियते केनापि परिभाषासूत्र-विशेषनिर्माणेन । अल्विधावप्यप्रवृत्त्यर्थम् अचः परस्मिन् १।१५७ इत्यस्य स्थानापन्नं च किमपि परिभाषासूत्रान्तरमत्र कृतम् 'न पदान्तद्विर्वचन—१।१।५८ सूत्रमप्यत्र नास्ति ।

पूर्वत्रासिद्धीये न स्थानिवत् (परिभा० प० १३०) तस्य दोषः संयोगादिलोपलत्वणत्वेषु १३० (क) इत्यप्यत्र नास्ति ।

लक्ष्यानुसारि व्याख्यानं विवक्षा च चन्द्रस्य महाबलम् । अतः सर्वत्रानिष्टप्रसरो वार्यते ।

किंच चान्द्रव्याकरणे परिभाषा (६८) वर्तते 'विवक्षाव्याप्तेरिष्टावसायः इति । अनेन परिभाषासूत्रेण सर्वत्रानिष्ठापत्तिर्निवारयितुं शक्यते । अतएव यथा बहूनामनिष्टानां वारणम् तथा स्वरवैदिकसूत्राणां पूर्वत्रासिद्धम् (चा० ६।३।२७) इति सूत्रात् पश्चात् करणेऽपि समापततामनिष्टानां वारणं सम्भवति यद्यपि चान्द्रव्याकरणवृत्ति-पञ्जिकाऽपि आषष्ठाध्यायसमाप्ति मिलति । षष्ठाध्यायस्यान्तिमसूत्रस्य 'चयः शरि द्वितीयः' ६।४।१५८ इत्यस्य शरीति किम् (सत्यम्) इतिवृतिगतं प्रतीकं व्याख्याय बौद्धेन पूर्णचन्द्रेण लेखकेन लिखितम् 'पूर्णायां पूर्णचन्द्रविरचितायां पञ्जिकायां षष्ठोऽध्यायः समाप्तः' इति ।

तथाप्यत्र चान्द्रव्याकरणं समाप्तमिति लिखितं न दृश्यते । एतेन स्वरवैदिकाध्यायावधिकृत्य पञ्जिका न लिखितेत्यपि न शक्यते वक्तुम् किमुत तयोराध्याययोरभाव इति[1] ।

चान्द्रव्याकरणषष्ठाध्यायसमाप्तौ 'समाप्तं चेदं चान्द्रव्याकरणम्' इत्यत्रापीदमिति पदेन प्रतीयते- इदम् भाषाप्रयोगसाधकं चान्द्रव्याकरणं समाप्तम् नतु तदपि समाप्तं, यत्र स्वरवैदिकप्रयोगसिद्धिर्दर्शिताऽस्तीति ।

---

१. द्रष्टम् "चान्द्रपञ्जिका किं किं धत्ते" इति प्रकरणम् ।

चतुर्थोऽध्यायः

(ग) चान्द्रवर्णसूत्राणि

वेदाङ्गत्वेन सम्मतेषु षट्स्वङ्गेषु शिक्षा प्रथमाङ्गम् । एतच्च शिक्षाकल्पो व्याकरणं निरुक्तं ज्योतिः छन्दो-विचितिरिति प्रसिद्धपाठक्रमे शिक्षायाः पाठप्राथम्यादवगम्यते । शिक्षेति नामकरणं सूचयति यत् प्राक्काले बालकानां शिक्षायाः प्रारम्भोऽस्यैव शिक्षाशास्त्रस्याध्ययनाध्यापनाभ्यां क्रियते स्मेति । अद्यत्वेऽस्य पाठन-पाठनप्रणाली लुप्तप्राया । वर्णानां याथातथ्येन उच्चारणमवहेलितमिव दृश्यते । बाल्ये वर्णोच्चारणे कृतः प्रमादः महद्वैदुष्यं प्राप्तानामपि तद्दोषमपाकर्तुमिच्छतामपि पश्चादुच्चारणान्न निर्गच्छति । उच्चारणस्य महत्वं प्राचीनैराचार्यैरेवमङ्गीकृतम् :—

मन्त्रो (शब्दो) हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् एवं कश्चिदुच्चारणमहत्वं स्वपुत्रं प्रतिपादयन् वैयाकरणो वक्तिः—

यद्यपि बहुनाधीषे तथापि पठ पुत्र ! व्याकरणम्
स्वजनः श्वजनो माभूत् सकलं शकलं सकृत् शकृत्, इति

इदानीं जना उच्चारणवैपरीत्येन स्वराज्यं श्वराज्यं, भाषां भासां भाशां वा प्रसादं प्रासादं च प्रशादप्रशादौ चेत्युक्त्वा स्वोच्चारणभ्रष्टताया सडिड्डिमोद्घोषं कुर्वन्ति ।

अतः स्थानप्रयत्नकरणादीनां ज्ञानं प्रतिबालकमावश्यकम् । एतदर्थं कारुणिकैराचार्यैः शिक्षाशास्त्रं लिखितम् । शिक्षेति नाम करणाज् ज्ञायते तन्मतेन वस्तुतः शुद्धोच्चारणमेव शिक्षाऽऽसीत् । 'वागेका समलंकरोति पुरुषं या संस्कृता धार्यते क्षीयन्ते खलु भूषणानि सततं वाग् भूषणं भूषणम् इत्यत्र यस्याः संस्कृताया वाचोऽनश्वरभूषणत्वं प्रतिपादितं तस्या वस्तुतः संस्कारः शुद्धोच्चारणमेव । प्रकृतिप्रत्ययविभागस्तु तद्द्वारम् ।

आचार्यैः निर्मितानां शिक्षाणामिदानीं संख्याप्राचुर्यमुपलभ्यते । अस्याः परम्परा केन प्रारब्धेति यद्यपि निश्चयेन दृढतया च न शक्यते वक्तुम् तथापि आपिशलशिक्षाया उपलभ्यमानासु शिक्षासु प्राचीनतमत्वमनुमातुं शक्यते । आपिशलेः पाणिनिसूत्रे 'वा सुप्यापिशलेः' ३।१।९२ इत्यत्रोल्लेखात् प्राचीनत्वसिद्धेः । उक्तसूत्रेणापिशलेः व्याकरणकर्तृत्वमपि सिद्धमेव । आपिशलव्याकरणस्य यानि सूत्राणि उपलब्धानि तानि पाणिनीयाष्टाध्यायीसूत्रैः सह संवदन्ते । हरदत्तस्योद्धरणेऽपि पाणिनेरूपजीव्याचार्यत्वेनापिशलेरुल्लेखो वर्तते[1] ।

राजशेखरेण लिख्यते-तत्र वर्णानां स्थानकरणप्रयत्नादिभिर्निष्पत्तिनिर्णयिनी शिक्षा आपिशलीयादिका[2] । अत्रआपिशलीयादिका' इत्यत्र आपिशलीयस्य निर्देशः तत्र चादिपदप्रयोग आपिशलीयशिक्षायाः प्राचीनत्वं ध्वनयति ।

---

१. पाणिनिना कथमवगतमेते साधव इति आपिशलेन, पूर्ववैयाकरणेन—सं० व्या० का इति० भा० १ पृ० १४२ ।

२. काव्यमीमांसा-द्वितीयाध्यायः ।

व्याकरणं शुद्धोच्चारणं शिक्षयितुं स्थानकरणप्रयत्नानामपि ज्ञानं ददाति । किंच कस्य वर्णस्य स्थाने कः वर्ण आदिष्टो भवेदित्यस्य निर्णायकः स्थानप्रयत्नबोध एव । 'स्थानेऽन्तरतमः पा० १।१।५० इत्यादिपरिभाषासूत्रस्य सम्यगवबोधाय स्थानज्ञानमावश्यकम् । 'झयो होऽन्यतरस्याम्' (८।४।३२) (पा० सूत्रस्य) 'झयो हो झय्' (चा० ६।४।१५६) इति चान्द्रसूत्रस्य च वाग्वरिरित्यादौ बहूनां झयामन्यतमस्य विधाननिदानीभूतः बाह्यप्रयत्नविशेष एव । पाणिनिना व्याकरणसूत्राष्टाध्यायीतः पृथक् शिक्षासूत्राणि लिखितानि । तन्याधारीकृत्य श्लोकात्मकपाणिनीयशिक्षा केनाप्यन्येन पाणिनिशिष्येण रचिता । श्लोकात्मिकेयं शिक्षा न पाणिनिना स्वयं रचिता । यथा किल तन्नाम्ना भ्रान्ता बहवो वैयाकरणा मन्यन्ते, आदौ 'येनाक्षरसमाम्नायेत्यत्र पाणिनिं प्रति रतिभावदर्शनात् । नहि पाणिनिः पाणिनिं नमस्कुर्यात् । श्लोकात्मिका पाणिनिशिक्षा पाणिनेरनुजस्य पिङ्गलस्य कृतिरिति केचित् ।

चन्द्रगोमिना चान्द्रव्याकरणस्य मङ्गलश्लोके लघुविस्पष्टसम्पूर्णशब्दलक्षणनिर्माणस्य कृतसंकल्पेन स्वव्याकरणस्य सम्पूर्णत्वाय वर्णसूत्राण्यपि लिखितानि । अत एव चान्द्रवर्णसूत्राणि व्याकरणाङ्गभूतानि न तु पाणिनीयशिक्षासूत्राणि इव वेदाङ्गानि । पाणिनीयव्याकरणाध्यतॄणां यथा बहूनां प्रयोगाणां संसिद्धये अष्टाध्यायीतो बहिर्भूता वार्तिकभाष्यादयुक्ता नियमा अध्येतव्या भवन्ति तथैव तत्तत्सूत्रागतस्थानप्रयत्नज्ञानाय पाणिनिप्रोक्तस्यव्याकरणग्रन्थस्य अध्येतुः शास्त्रस्य शिक्षाख्यस्याध्ययनमावश्यकं भवति । किंच पाणिनेः सूत्रम् 'अ अ' इति विवृतस्य ह्रस्वाकारस्य संवृतत्वं विदधाति । अतोऽपि वर्ततेस्यावश्यकता तादृशस्य कस्यापि सूत्रस्य येन अकारः विवृतः इति ज्ञातो भवेत् तस्य संवृतत्वप्रत्यापत्तिवचनत्वे च कस्यापि तादृशस्य सूत्रस्यावश्यकत्वमस्त्येव येनाकारः ह्रस्वः संवृत इति ज्ञातो भवेत् । तुल्यास्यप्रयत्नं सवर्णम् पा० १।१।९ मुखनासिकावचनोऽनुनासिकः पा० १।१।८ इत्यादीनामवगतयेऽपि वर्णसूत्राणीहाऽवश्यं भवेयुः । इत्थमाप्ततोऽपूर्णतादोषात् स्वव्याकरणं परित्रातुं तेन चन्द्रेण व्याकरण एव वर्णसूत्राणि रचितानि तथैव, यथा वार्तिकभाष्यप्रोक्तनियमानां संग्रहः सूत्रेष्वेव कृत इति ।

चान्द्रवर्णसूत्रनिर्दिष्टाः स्थानकरणप्रयत्ना यद्यपि आपिशलपाणिनीयशिक्षासूत्रप्रतिपादिता एव सन्ति बहुशस्तथापि चन्द्राचार्येण किञ्चिन्नूतनत्वमपि दर्शितम् । तथाहि—

एदैतोः कण्ठतालुस्थानं सर्वैं वैयाकरणैरङ्गीकृतमेव किन्तु चान्द्रवर्णसूत्रेण 'कण्ठतालुकम् इदेदैताम् (सू०सं०४) इत्यनेन एदैद्भ्यां **सह इतोऽर्थात् ह्रस्येकारस्यापि** कण्ठतालुस्थानमभ्युपगतम् । एवमेव उतोऽपि (ह्रस्वोकारस्यापि) कण्ठोष्ठस्थानम् ओदौतोरिव तत्राङ्गीकृतं दृश्यते । भाषाविकासक्रमे एकारैकारयोः स्थाने इकारः इकारस्य स्थाने एकारः ऐकारो वा यत्र तत्र जातो दृश्यते । एवमोकारौकारौ उकारश्च मिथो व्यत्यासं गच्छन्ति । नैतावदेव किन्त्वन्यविधोऽपि व्यत्ययमेषां मिथो दृश्यते । तथाहि—

(क) इकारस्य एकाररूपता निधिशब्दस्य सम्बुद्धौ निधे इत्यत्र ।

(ख) इकारस्य ऐकारत्वं यथा वियाकरण इत्यस्य
वैयाकरण इत्यत्र अक्षैषीत् इत्यत्र च

(इकां यणचि व्यवधानं व्याडिगालवयोरिति वियाकरणमिति सिद्धचति ।

(ग) अकारस्य स्थानेऽपि एकारो भवति यथा एधि, देहि. धेहि

(घ) आकारस्य स्थानेऽप्येकारो भवति कन्ये इत्यत्र कन्याशब्दस्यसम्बुद्धौ उकारस्य स्थाने ओकारः औकारश्च यथा क्रमशः भानो, अह्नौषीत् इत्यादौ ।

(च) ऐकारस्य औकारस्य च प्राकृते अइ इति अउ इति रूपेण विकासो यथाः—दैत्यकैतववैशाखशब्दानां प्राकृतरूपे दइच्चो वइतवो वइसाहो इत्यत्र यथा, एवम् पौरपौरवगौडशब्दानां प्राकृतरूपे पउर रउरवो गउडो इत्यत्र दृश्यते ।

(छ) ऐकार औकारश्च कदापि कदापि प्राकृते क्रमशः ईकाररूपतामुकाररूपतामपि धत्तः ।
यथा—धैर्य्यम् (पा० धीरम्) सौन्दर्यम् (प्रा० सुन्देरं)

(ज) 'पच्छइ', 'पच्छणिज्ज', 'आट्ठ', 'अण्णाण्ण' इत्येतेषां प्राकृतशब्दानां प्रेक्षते, प्रेक्षणीय ओष्ठः, अन्योन्य इत्येतेभ्यः शब्देभ्यः विकासो जातः ।

(झ) अष्टौ इत्यत्र अकारस्य औकारः[1] गाम् इत्यत्र ओकारस्याऽऽकारः[2] जायत एव ।
वर्णयोः स्थानसाम्यं विना न परस्परं विनिमयो जनितुं शक्यते । अतः यथा इकारस्य स्थाने यकारः, यकारस्य च स्थाने इकारो जायमानः तयोः स्थानसाम्यं सूचयति तथा इकारस्य स्थाने जायमान एकार ऐकारस्तयोश्च स्थाने जायमानः स, तयोः स्थानसाम्यं स्वीकर्तुं बाधयति । चन्द्रेणेत्थं कथं स्वीकृतमित्यस्योत्तरं स स्वयं वृत्तौ ददाति ।

'रायमतिक्रान्तं कुलम् अतिरि कुलम् इत्यत्र सुपि ह्रस्वः' (चा० २।२।८४) इति सूत्रेण ह्रस्वः विधीयते । स च ह्रस्वः कण्ठतालव्यस्य एकारस्य स्थाने कण्ठतालव्य इकारो भवति । एवं नावमतिक्रान्तं कुलम् अतिनु कुलम् इत्यत्र कण्ठोष्ठस्य स्थाने कण्ठोष्ठ एव उकारः जायते । स्थानसाम्याभावे तु न तथा शक्यते भवितुम् ।

न च यथा पाणिनिना एच् इग्घ्रस्वादेशे १।१।४८ इति सूत्रेण आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात् इति नियमं निर्माय स्थानभिन्नत्वसत्वेऽपि इकार उकारश्च ह्रस्वादेशः साध्यते तथा चन्द्रेणापि नियमं निर्माय कथं नेकारोकारौ साधितौ इति वाच्यम् भाषाविज्ञानविदां मतेन भाषायां किमपि परिवर्तनं न राजाज्ञया भवति । सर्वं ध्वनिगतम् अर्थगतं च परिवर्तनं सकारणं भवति । अतएव तै र्लोपागमवर्णविकारा न निरङ्कुशाज्ञया जाता मन्यन्ते, किन्तु येन कारणेन तादृशं परिवर्तनं जातम् तस्योल्लेखं विधाय तत्परिवर्तननिदानीभूतेन रहस्येन परिचितं कर्तुं यत्यते यथासम्भवम् । यद्यपि परिवर्तनादिनिदानं न व्याकरणस्य कार्यं तथापि जिज्ञासाशान्त्यर्थं वैयाकरणैरपि दार्शनिकपक्षो विविच्यते। संग्रहपस्पशाह्निकवाक्यपदीयादिकमस्य निदर्शनम् ।

अतः एकारैकारयोरिकारस्य च मिथोदृष्टस्य परस्परध्वनिव्यत्यासस्य कारणीभूतं स्थानसाम्यमिति चन्द्राचार्येण वर्णसूत्रद्वयं निर्माय दर्शितम् नैतद् विचित्रम् ।

इत्थं चान्द्र व्याकरणे 'एच इग्घ्रस्वादेशे' इति सूत्रस्यावश्यकतैव न भवति ।

चन्द्रेण वर्णसूत्रेषु स्वव्याकरणोप्रयोगीन्येव तत्वानि व्याख्यातानि । आपिशलपाणिनीयशिक्षासूत्रेषु दर्शितानि मतान्तराणि चन्द्राचार्येणात्र निरस्तानि । यानि च तत्वानि अस्मिन् व्याकरणे नागतानि; तानि स्वोपजीव्यशिक्षाद्वयप्रोक्तान्यपि प्रकृतानुपयोगित्वात्तेन नाख्यातानि । वस्तुतश्चन्द्रेण न शिक्षासूत्राण्यपि तु वर्णसूत्राणि लिखितानि । तथापि—

(क) वर्णोच्चारणप्रक्रिया आपिशलपाणिनीयशिक्षायां दर्शिता, किन्तु चन्द्रेण परित्यक्ता[3] ।

(ख) सामान्यलक्षणम् उभयत्र लक्षितमप्यत्र न दृश्यते । इह 'यत्र स्थाने वर्णा उपलभ्यन्ते तत् स्थानम् । येन

---

१. अष्टाभ्य औश् पा० ७।१।२१ ।
२. औतोऽम्शसोः पा० ६।१।९३ ।
३. (शिक्षा सूत्राणि द्र०) आपिशलपाणिनीयशिक्षयोः ।

निवर्त्यन्ते तत् करणम्। प्रयतनं प्रयत्नः। इदं सूत्रत्रयं आपिशलं प्रक्रमप्रकरणस्थम्[१]। पाणिनीयशिक्षायामपि सूत्रयं समानम् किन्तु पा० शिक्षायामिह सूत्रद्वयमधिकं दृश्यते तदस्ति १—'उत्साहः प्रयत्नः' २—स्पृष्टतादिर्वर्णगुणः[२]।

एतानि सर्वाणि सूत्राणि चन्द्राचार्येण परित्यक्तानि।

(ग) 'कथमि'त्यस्योत्तरदायकानि सूत्राण्यपि तत्र शिक्षाद्वये दृश्यन्ते किन्तु चान्द्रवर्ण-सूत्रेषु तेषावभाव एव दृश्यते।

उदात्तादीनां लक्षणं तत्र शिक्षाग्रन्थद्वये यथा स्पष्टं न तथा चान्द्रवर्णसूत्रेषु।

आपिशलशिक्षायाम् प्रारम्भे त्रयः श्लोकाः ततो द्वे सूत्रे च सन्ति। अयं तस्या भूमिकाभागः सम्भाव्यते। ततः प्रतिपाद्या विषयाः प्रस्तुताः। तेऽष्टासु प्रकरणेषु वर्गीकृताः सन्ति। तथाहि—१—स्थानप्रकरणम् २—करणप्रकरणम् २—अन्तःप्रयत्नप्रकरणम् ४—बाह्यप्रयत्नप्रकरणम् ५—स्थानपीडनप्रकरणम् ६—वृत्तिकारप्रकरणम् ७—प्रक्रम-प्रकरणम् ८—नाभितलप्रकरणं चेति। नामान्येव तत्तत्प्रकरणानाम् वैशिष्ट्यं प्रकटीकुर्वन्ति। प्रथमे प्रकरणे द्वाविंशतिः सूत्राणि सन्ति। तत्रोनविंशं सूत्रं 'अमङ्णनाः स्वस्थाना नासिकास्थानाश्चेति आपिशलव्याकरणे प्रत्याहारसूत्रसत्तां साधयति, तत्र अमङ्णना इत्यत्र वर्गवर्णक्रमपरित्यागपूर्वकप्रत्याहारक्रमस्योपादानात्। पाणिनिनाऽत्र ञ्मङणनमाः स्व-स्थाननासिका स्थाना इत्यत्र वर्गवर्णक्रम एवायदाश्रितः।

स्थानप्रकरणे किमपि नूतनं तत्वमुपलभ्यते-तथाहि हकारविसर्जनीयावुरस्यावेकेषाम् (आ० शि० प्र० २ सू० ३) इत्यत्र। पा० शि० सू० वृ० पा० प्र० २ सू० तृतीयमप्येवमेव वर्तते। श्लोकात्मकपा० शिक्षायां वर्गपञ्चमैर्युक्त-स्यान्तस्थसंयुक्तस्य च हकारस्योरःस्थानमुपलभ्यते[३] परन्तु सर्वविधानां हकाराणामन्येन संयुक्तानामसंयुक्तानाम्वा उरः-स्थानमत्र विशिष्यते।

व्याकरणे रेफस्य स्थानं मूर्धा पठ्यते। भाषावैज्ञानिकैरध्वनिः द्रवितः (Liquid) इत्युच्यते तत्रापि रः लुण्ठितः (Rolled) कथ्यते रेफस्योच्चारणसमये जिह्वाग्रभागो वर्त्समतिशीघ्रमेकस्मिन्नेव क्षणे द्विवृत्तत्वः अवहन्ति। अतो रेफस्य दन्तमूलस्थानमनुभूतं भवति तदत्रोभयत्र प्रतिपादितम्[४] रो दन्तमूले (शु० य० प्रा० १।५८) रेफं वर्त्स्यमेके (ऋ० प्रा० १।२०) इत्यत्र च तादृशः संकेत उपलभ्यते।

वकारो दन्तोष्ठ्यः इति सर्वैर्मन्यते। परन्तु आपिशलशिक्षा-पाणिनीयशिक्षोभयत्र केषाचिन्मतेन वकारस्य सृक्किणीस्थानमपि प्रतिपादितम्[५] तवर्गः दन्त्य इत्युभयेषां मतम् तत्रापि पाणिनिः दन्तमूलस्तु तवर्ग इत्युक्त्वा तवर्ग-स्य दन्तमूलस्थानत्वं प्रतिपादितवान्। लृलसिता दन्ते (शु० य० प्रा० १।६९) इत्यत्रापि वैशिष्ट्यमिदमदृष्टमेव।

सरेफ ऋवर्णं इति सूत्रमपि द्वयोः समानम्[६]। इतोऽग्रे सलकारं लृवर्णमित्यपि सूत्रं तुल्यन्यायादपेक्ष्यते

---

१. यु० मी० शि० सू० आ० शि० प्र० प्रक० सं० ३-५ पा० शि० सू० ३-५।

२. यु० मी० शि० सूत्राणि-प्रक्रमप्रकरणम् सू० नं० ६, ७।

३. हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्
औरस्यं तं विजानीयात्कण्ठ्य माहुरसंयुतम् श्लोकात्मक पा० शि० श्लो० १६।

४. रो दन्तमूलस्थानमेकेषाम् (आ० शि० प्र० १ सू० ९) रेफोदन्तमूलीय एकेषाम् (पा० शि० वृ० पा० सू० १०)।

५. आ० शि० सू० प्र० १ सू० १२ पा० शि० सू० १४।

६. आ० शि० प्र० १।२१ पा० शि० सू० प्र० १ सू० २३।

तच्चोभयत्र नास्ति । आधुनिका भाषावैज्ञानिका ऋकारम् लृकारं च स्वतन्त्रं स्वरं न मन्यन्ते । ते तौ रेफलकारयोरक्षरसंघटितवर्णौ मन्यन्ते । एतस्य संकेतः सरेफ ऋवर्ण इति सूत्रे प्राप्यते । अधुनोच्चारणपरिवर्तनात् रिषिः ऋषिरित्यनयोरुच्चारणे वैशिष्ट्यानुभवाभावात् स्वतन्त्रस्वररूपेणास्यास्वीकृतिर्न मां बाधते परन्तु ऋलृध्वनिः प्राचीनकाले सरेफोऽपि सलकारोऽपि न केवलं रिलिवदुच्चार्य्येते स्म, किन्त्वनयोरुच्चारणमतिविलक्षणमासीदिति मन्यते अतएव प्रातर्+ऋतमित्यत्रातीव प्रत्यासत्योच्चारितेऽपि प्रातार्राजत इत्यत्रैव न कोऽपि विकारो जातः, तद् लृकार इत्यत्र तल्लय इतिवन्न कापि विकृतिर्दृष्टा ।

किंच ऋकारस्य रिसमानतामात्रस्वीकारे दाक्षिणात्यैर्यद् ऋषिस्थाने रुषिरित्युच्चार्यते तस्य किं समाधानं स्यात् ? ऋकारस्योच्चारणे काठिन्यात् वैलक्षण्याच्चास्य स्थाने विविधानि परिवर्तनानि जातानि दृश्यन्ते ।

पिता, पितरौ, दातारौ, दातुः, क्रियते, ममार स्रष्टा इत्यादौ आ, अर् आर् उर् रि, आर् र इत्यादिपरिवर्तनं तस्योच्चारणवैलक्ष्ण्यमेव द्योतयति । उच्चारणवैविध्यादेव विविधं परिवर्तनं भवितुमर्हतीति भाषावैज्ञानिकैर्नाविदितम् ।

प्राकृते ऋलृध्वनिः सर्वथा लुप्तः । लृकारस्य तु संस्कृतेऽप्यभाव इव विलोक्यते । तस्य प्रयोगस्तत्रापि क्लृप् धातौ तन्निष्पन्नेषु क्लृप्तक्लृप्तीत्यादिद्वित्रेषु स्थलेष्वेवोपलभ्यते । अस्तु । ऋकारस्य अइउरूपतया त्रिधा विकारः प्राकृते दृश्यते । तथाहि ऋषि भृङ्गार शृङ्गार शृगाल प्रभृतिशब्दानाम् इसी सिंगारो भिंगारो सियालो इत्यादिषु इकाररूपतया विपरिणामो जातः[1] । 'दृढ' 'मृग' 'गृध्र' सदृक्षेषु शब्देषु इकारस्य स्थाने अकार इकार इचोभयथा विकारो दृश्यते । अतएव दढो-दिढो, भग्गो-भिग्गो, गद्धो-गिद्धो इत्युपलभ्यते काव्येषु । ऋकारस्य उकारोऽपि विकासोऽत्र जायते स्म यथा ऋतुवृत्तान्तमृणालपृथिव्यादीनाम् उदु वुत्तन्तो, मुणालं, पुहवी इति[2] तृष्णा शब्दस्य प्राकृतरूपे तण्हा इत्यत्र अकारोविकारोऽभवत् ।

न केवलं दाक्षिणात्या एव ऋषिम् रुषिमुच्चारयन्ति अवधीभाषारचिते रामचरितमानसेऽपि ऋकारस्य इकारोकाररूपेण विकासाद्रूपद्वयमुपलभ्यते[3] ।

इत्थमृकारस्योच्चारणमदय यथास्ति तथा न प्रथममासीत् । अतः साम्प्रतिकमुच्चारणमधिकृत्य तद्विषये किमपि निर्धारणं नोचितम् । यदि ऋकारः रेफव्याञ्जनसंघटनाकारी वर्णः स्यात् तदा स रिः रु वा भवेत् तदा तत्स्थाने पूर्वोक्तानां बहूनां परिवर्तनानामवकाश एवासम्भवः । तथा सत्येकरूप एव विकासः सम्भाव्यते । किञ्च यदि स रिरूपो रुरूपो वा स्यात्तर्हि वर्णमालायाम् ऋकारकल्पना प्रत्याहारसूत्रे ऋकारोच्चारणं वृथा । अतः ऋकारः स्वतन्त्रः स्वरः ।

ऋक्प्रातिशाख्यस्य टीकाकारः उव्वटः—'ऋकारः पादचतुष्टये विभक्तुं शक्यते प्रथमोऽन्तिमश्च पादौ स्वरस्य मध्यस्य द्वौ पादौ रेफस्येत्याह,[4] तदपि वेदस्य शाखाविशेषगतवैशिष्ट्यप्रतिपादनपरम् न सामान्यतः ऋकारप्रकृतिविमर्शकम् । कात्यायनेनाऽपि ऋति सवर्णे ऋ वा इति वार्तिकं रचयता एतद् ऋकारस्य वैशिष्ट्यं प्रतिपन्नम् । तद्

---

१. इदृध्यादिषु १।३० प्राकृतप्रकाशः ।
२. उदृत्वादिषु (१।३१) प्रा० प्रकाशः ।
३. कृसी निराबहि चतुर किसानी रा० मा० किष्कि० १४ । कपि स्वभाव तैं तोरेउ रूखा । (रा० मा० सु० ४८१) ।
४. सं० का भाषाशस्त्रीय अध्ययन पृ० ९४ (डा० भोला शंकर व्यास) ।

व्याचक्षाणो दीक्षितः प्राह 'इह विधेयं वर्णद्वयं द्विमात्रम् **ऋ**कारस्य मध्ये द्वौ रेफौ तयोरेका मात्रा अभितोऽज्भक्ते रपरा'[1]। उब्बटव्याख्यात ऋकार एतद्वार्तिकविहित ऋकारः अस्ति चेदस्तु, होतृ ऋकार इतिस्थिते अनेन ऋकारे विहिते होतृकार इत्यादौ द्विवर्णद्विमात्रावत ऋकारस्य सम्भवेऽपि ऋषिः इत्यादौ तदभावात्। सर्वत्र ऋकारस्य नोब्बटवर्णिता प्रकृतिरनुभूयतेऽनुभूता वाचार्येण। ऋकारस्य स्थिति विचित्रा, नायम् एकारादिवत् सन्धिस्वरः द्वयोः स्वरयोरत्र सन्ध्यभावात्, नायं क्षत्रज्ञवत् संयुक्तव्यञ्जनद्वयी, व्यञ्जनयोः संयोगाभावात्। इदमेव वैचित्र्यं प्रतिपादयितुं **'द्विवर्णानि सन्ध्यक्षराणि'** इति सूत्रात्[2] **पृथक् 'सरेफ**[3] **ऋवर्ण इति** सूत्रं कृतम्। रेफस्यात्र सत्तायां सत्यामपि नुड्विधिलादेशविनामेषु ऋकारग्रहणात् रेफप्रयुक्तं तत्तत्कार्यं नात्रेति सिद्धान्तान्नायं रेफः किन्तु रेफाभास इति ज्ञायते। अतएव सूत्रमिदं केषांचिन्मतपरकम् न सर्वजनीनमतप्रकाशकमिति दर्शयता युधिष्ठिरमीमांसकेनोक्तम्-(सूत्रमिदं) येषां दर्शनमर्धमात्राकालो रेफोऽस्ति तन्मतेन—।

येषामपि दर्शनं मात्राचतुर्थभागो रेफ ऋकार इति—महाभाष्यप्रदीपे ८।४।१ कैयटः।

अयं सर्वो विवादः व्याकरणानुपयोगित्वाद् चान्द्रवर्णसूत्रग्रन्थे परित्यक्तः।

करणप्रकरणमापिशलपाणिनीयशिक्षयोरुभयोरपि द्वितीयं प्रकरणमस्ति, चान्द्रेऽपि करणविचारोद्वितीयाधिकारे कृतः। चन्द्रः 'जिह्वाग्रं दन्त्यानाम् १५, जिह्वोपाग्रं शिरस्यानाम् चा० १६ जिह्वामध्यं तालव्यानाम् (१७) शेषाः स्वस्थानकरणाः (१८) इति संक्षेपेणैव प्रतिपादितवान्। अज्ञ आपिशलपाणिनीयवत् 'जिह्वामूलं जिह्व्यानां[4] करणमिति न प्रतिपादितम्। करणं व्याकरणसूत्रानुपयोग्यपि कथं चन्द्रेण प्रतिपादितमिति न जाने। यदि प्रतिपादितम् जिह्वामूलं येषां येषां वर्णानां करणं तत्प्रतिपादनमप्यावश्यकमेवासीत्।

शिक्षाद्वयेऽन्तःप्रयत्नप्रकरणे आभ्यन्तरप्रयत्नाः बाह्यप्रयत्नप्रकरणे बाह्यप्रयत्ना निरूपिताः। चान्द्रे च तत्राभ्यन्तर (चा० २१) इति बाह्य (३१) इति चाधिकृत्य द्विविधः प्रयत्नः निरूपितः।

शिक्षाद्वये स्थानपीडननामपञ्चमप्रकरणे कस्य कस्य वर्णस्योच्चारणे वायुः कथमिव स्थानं पीडयतीति वर्णितम् तथाहि—

आपिशल शिक्षा प्र० ५	पाणिनीय शिक्षा प्र० ५
१—तत्र स्पर्शयमवर्णकारो वायुरयःपिण्डवत् स्थानमभिपीडयति।	१—तत्र स्पर्शवर्णकरो वायुरयःपिण्डवत् स्थानमभिपीडयति।
२—अन्तस्थवर्णकारो वायु र्दारूपिण्डवत्	२—अंतस्थवर्णकरो वायु र्दारूपिण्डवत्।
३—ऊष्मस्वरवर्णकारो वायुरुर्णापिण्डवत्।	३—ऊष्मस्वरवर्णकरो वायुरुर्णापिण्डवत्।

एतादृशं विवेचनं चान्द्रवर्णसूत्रेषु नोपलभ्यते।

वृत्तिकारप्रकरणमुभयत्र वर्णानां भेद-प्रभेदप्रकरणत्वेन निरूपितम्। ईदृशं वर्णनं चान्द्रे वर्णसूत्रग्रन्थेऽन्ते विहितमुपलभ्यते। इयांस्तु विशेषः—तत्र लृकारस्य यदृच्छाशब्देऽशक्तिजानुकरणे वा दीर्घस्यापि सम्भावनामुद्भाव्य अष्टादशभेदाः कल्पक इत्युदाहरणं यथोपस्थापितानि,[5] तथा न चान्द्रे, चन्द्रेण यदृच्छाशब्दस्य व्याकृत्ययोग्यत्वात् अध्ययनविश-

---

१. सि० कौ० अच् सन्धिप्र० अकः सवर्णे—सूत्रम् २. आ० शि० सू० २० पा० शि० सू० २२।
३. आ० शि० सू० २१ पा० शि० सू० २३।
४. अ:० शि० प्र० २ सू० ३ पा० शि० प्र० सू० ३-४।
५. आ० शि० प्र० ६ पा० शि० प्र० सू० ६ सू० ६।

लेषणयोग्यत्वाभावाच्च स्वीकारो न कृतः शब्दभेद-प्रभेदेष्वन्यतम[1]त्वेनेति । अशक्तिजानुकरणन्तु वैयाकरणै नैवाश्रणीयम् तेषामविवेच्यत्वात् ।

एवमेव 'छन्दोगानां सात्यमुग्रिराणायनीया अर्घमेकारमर्धमोकारं च पठन्ति' इति शिक्षाद्वयमतमपि नात्र गृहीतम् व्याकरणैरनवस्थाभयादीदृशस्य संगीतगतस्यारोहाविरोहमूर्च्छनादिजन्यस्य वर्णगतस्य वैलक्षण्यस्यास्वीकारात् । रेफोष्मणां सवर्णा न सन्ति इति तु स्थानप्रयत्नविवेचनफलितार्थपरतया परित्यक्तम् एवम् वर्ग्यो वर्ग्येण सवर्ण इत्यपि ।

सप्तमं प्रक्रमप्रकरणमप्युभयत्र दृष्टं चान्द्रे न दृश्यते । अत्र स्थानकरणप्रकरणानां सामान्यलक्षणं दत्तम् । वर्णोच्चारणक्रमे स्थानानां स्थानं प्रथममस्ति । ततः करणानामपेक्षा भवति । तदनन्तरं क्रमशः द्विविधानामाभ्यन्तर बाह्यप्रयत्नानां चेति संकेताय लिखितस्यास्य प्रकरणस्य प्रक्रमप्रकरणमिति नाम करणमन्वर्थं प्रतीयते । चन्द्रेणप्रसिद्धमिति कृत्वा सामान्यलक्षणं परित्यक्तम् । वर्णनक्रमेणैव स्थानकरणप्रयत्नानां प्रथमद्वितीयतृतीयत्वस्य प्रख्यापनं विधाय मुखतोऽन्वाख्यानस्य पुनरुक्तत्वं विचार्य प्रकरणमिदमुपेक्षितम् ।

नाभितलप्रकरणस्य वैशिष्ट्यमस्ति वर्णोच्चारणप्रक्रियाज्ञापनम् । कथं वर्णाः उच्चार्यन्ते इत्यस्योत्तरदानार्थमिदं प्रकरणम् । व्याकरणं कथमेवं भवति अभूद् वा इतीदृशमुत्तरं दातुं नास्ति । ततुतु स्थितस्य गतिं विचिन्तयति । लोपागमवर्णविकारप्रदर्शनपूर्वकम् उत्सर्गापवादनियमनिर्धारणपूर्वकं च लोके शास्त्रे च प्रयुक्तानां शब्दानां साधुत्वान्वाख्यानमात्रं व्याकरणकार्यम् । प्रयोगे समागतस्य रूपस्य विकासः कथं जातः इति कार्यन्तु भाषाविज्ञानस्य । तथैव एषां वर्णानामुच्चारितानामिदं स्थानमेतावत् कथनं व्याकरणे पर्याप्तम् कथं वर्णा उच्चरन्तीति पर्यालोचनं शिक्षा ग्रन्थस्य कार्यमिति कृत्वा वर्णसूत्रलेखकश्चन्द्रः नाभितलप्रतिपाद्यंतत्वमुपेक्षितवान् ।

चान्द्रवर्णसूत्राणि संख्यायां ५१ सन्ति । तानि च विभागत्रये विभक्तुं शक्यन्ते । तत्र प्रथमः विभागः स्थानमित्युच्यते स्थानाधिकारे तस्मिन् तत्तत्स्थानबोधकानां सूत्राणां संख्या एकादश सन्ति । द्वितीयो विभागः करणमित्याख्ययाऽऽख्यातुं शक्यते । अस्मिन्नधिकारे चत्वारि सूत्राणि सन्ति । ततः परं प्रयत्नाधिकारोऽस्ति । तस्यावान्तरविभागद्वयमस्ति । एक आभ्यन्तरप्रयत्नाधिकारः द्वितीयश्च बाह्यप्रयत्नाधिकारः ।

तत्राभ्यन्नरप्रयत्नाधिकारे बाह्याधिकारे चाष्टावष्टौ सूत्राणि सन्ति प्रत्येकम् । अन्त्योऽध्यायोऽवर्णाध्यायः शक्यते वक्तुम् । यद्यप्यत्रेवर्णादीनामपि भेदप्रभेदा निरूपितास्तथापि तन्निरूपणेऽवर्णा मुख्याः प्रथमतोऽवर्णानामेव सूत्रोल्लेखात् तदुपमानेनेवर्णादीनां निरूपणकरणाच्चेति । अत्रैव सन्दर्भे ह्रस्वदीर्घप्लुतोदात्तादीनां च लक्षणानि दृश्यन्ते । स्थानाधिकारे ११, करणाधिकारे ४, आभ्यन्तरप्रयत्नाधिकारे ८, बाह्यप्रयत्नाधिकारे ८, अवर्णाधिकारे १२, सूत्राणि सन्ति । १, २, १४, १६, २०, २१, ३०, ३६ इतीदृशसंख्यकानि ८ सूत्राणि अधिकारसूत्राणि सन्ति । अत्रेदमपि वैशिष्टं यदत्र ह्रस्वादीनामपि लक्षणान्युक्तानि । उच्चैरुदात्तः इत्यादीनि उदात्तानुदात्तस्वरितज्ञानकारकाणि च सूत्राण्यपि अत्रैव कृतानि ।

ह्रस्वादयो न संज्ञाः, अतएव पाणिनिना ह्रस्वादिकमुद्दिश्य लघ्वादिसंज्ञाः क्रियन्ते । ह्रस्वादीनामत्र लोकप्रसिद्धानि लक्षणान्येव कृतानि- एकमात्रिको ह्रस्वः, द्विमात्रिको दीर्घः त्रिमात्रिकः प्लुतः इति । यद्यपि लक्षणमिदं नातीव वैज्ञानिकं 'कमल' शब्दे कमगतयोरकारयोर्मात्रासमत्वस्याऽननुभवात् । तथापि संस्कृतच्छन्दआदिशास्त्रेषु एतादृशस्य लक्षणस्य प्रसिद्धे र्ह्रस्वादीनां यत् किञ्चित्स्वरूपपरिज्ञानार्थमस्य स्वीकृतौ न क्षतिः ।

उदात्तादयोऽपि न पाणिनिसंज्ञाशब्दाः प्रातिशाख्यांऽदौ प्रसिद्धत्वात् । अतएव वर्ण-सूत्रेषु उच्चैरुदात्त इत्यादीनि त्रीणि सूत्राणि दृश्यन्ते ।

एवञ्च ह्रस्वादीनामुदात्तादीनां चासंज्ञकव्याकरणे सूत्रनिर्देशो न विरुद्धः ।

---

१. यतो निर्धारणम् २।१।६२ चा० सू० वृत्तिः ।

चतुर्थोऽध्यायः

(घ) चान्द्र-परिभाषासूत्राणि

परिभाषापदमिदं योगरूढम् पङ्कजशब्दवत् । परितो भाष्यते या सा परिभाषा प्रकीर्तिता इति तद्व्युत्पत्तिः । अतएव परितो व्याप्तां भाषां परिभाषां प्रचक्षते इति शिष्टैरुच्यते । एवंच सर्वतोगामिव्यापारवत्वे सति विधिशास्त्र-प्रवृतिनिवृत्तिसंकोचादिफलवत्वे सति तथा विख्यातत्वम् परिभाषात्वमित्येव परिभाषालक्षणं फलति । योगरूढ-स्वीकारादेव संज्ञानियमाधिकारेषु नातिव्याप्तिः । तेषां परिभाषात्वेन विख्यातत्वाभावात् । परिभाषानेकशास्त्रोप-कारिका भवति, 'न समासे' पा० ६।१।१२७।१ इत्यादि निषेधशास्त्रन्तु न तथा, न वा तथा विख्यातम् । योगरूढस्वीकार-प्रसादादेव संज्ञानियमाधिकारसूत्रवारणम् । अतिदेशशास्त्रे तु लक्षणप्रवृत्तिरिष्टैव, अतएव चन्द्राचार्येण 'स्थानिवदादेश (चा० प० २०) इत्यादि परिभाषासूत्रेषु पठितम् । अतएव केचित्

"संज्ञा च परिभाषा च विधिर्नियम एव च ।

अति देशोऽधिकारश्च षड्विधं सूत्रलक्षणम् इत्यत्रातिदेशस्य पृथगुपादानं गोबलीवर्दन्यायेनेति मन्यन्ते[1] ।

'धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् आगमप्रत्ययादेशा

उपदेशाः प्रकीर्तिता' इत्यत्रापि सूत्रात् पृथगुणादिलिङ्गानुशासनयोरुपादानं तेनैव न्यायेनेति

(प्रौ० म० संज्ञा प्र० पृ० ४४) ।

येषां पाणिनीयानामतिदेशो न परिभाषेति मतं तन्मतेन तेषां तथा विख्यातत्वाभावादेव वारणम् योगरूढ-स्वीकाराद् यादृशं परिभाषात्वं फलितम्—तन्निर्दिशता परिष्कारकशिरोमणिना स्वर्गीयश्रीजयदेवमिश्रेण विजया टीकायामुक्तम्—अप्रामाण्यज्ञानानास्कन्दितसाधुत्वप्रकारकबोधजनकत्वं परिभाषात्वम् । तस्मिन्निति (पा० १।१।६६) परिभाषाव्यापारं विना इको यणचीत्यादेरजुपस्थिलष्टस्येको यण् साधुरिति बोधः, उपस्थिलष्टत्वस्य पूर्वापरव्यवहिता-व्यवहितसाधारणत्वेन सुध्युपास्य इत्यादावनिष्टापत्या अप्रामाण्यज्ञानास्कन्दितः । अप्रामाण्यज्ञानानास्कन्दितश्च बोधः अजव्यवहितपूर्वत्वविशिष्टस्येको यण् इत्येवविधस्तस्मिन्निति सूत्रव्यापाराधीन इति तस्मिन्निति सूत्रजन्यबोधः अप्रामाण्यज्ञानास्कन्दितसाधुत्वप्रकारकबोधोपयोगी, तज्जनकत्वेन तस्य सूत्रस्य परिभाषात्वं सूपपन्नम् ।

वृद्ध्यादिपदार्थज्ञानद्वारा वृद्धिरादैच् (पा० १।१।१) इत्यादि संज्ञाशास्त्राणामपि वृद्धिरेचि (पा० ६।१।८८) इत्यादिवाक्यार्थबोधोपयोगिबोधजनकत्वात् परिभाषालक्षणे आपन्नस्यातिव्याप्तिदोषस्य निराकरणाय लक्षणघटके चरमबोधे शक्त्यविषयकेति विशेषणं निवेश्य अप्रामाण्यज्ञानानास्कन्दितसाधुत्वप्रकारकबोधोपयोगिशक्त्यविषयक-बोधजनकत्वमिति रीत्या परिभाषात्वं परिष्करणीयम् । नच उत्सर्गशास्त्रस्य बोधः अपवादशास्त्रीयविषयसंकोचनात्मक-व्यापारं विनाऽप्रामाण्यज्ञानास्कन्दित एव तिष्ठति; श्रीश इत्यादौ अपि इको यणचि इत्यस्य यदृच्छाप्रवृत्तिदर्शनात् अपवादशास्त्रीयोद्देश्यतावच्छेदका वच्छिन्नातिरिक्तत्वेन तत्र संकोचाऽनन्तरमेव स बोधोऽप्रामाण्यज्ञानानास्कन्दितो जायते

---

१. परि० भा० शे० टीका० वृ० शा० कला पृ० २० ।

अतएवापवादशास्त्रेण स्वीयोद्देश्यतावच्छेदकावच्छिन्नाऽतिरिक्तत्वेनोत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने संकोचः करणीय इति वैयाकरणसिद्धान्तस्तथाच तादृशबोधोयोगिबोधजनकेऽकः सवर्णे दीर्घः पा० ६।१।१०१ इत्यादावतिव्याप्तिः तस्य बोधस्य च शक्त्यविषयकत्वादिति वाच्यम् चरम बोधे साधुत्वाप्रकारकेतिद्वितीयविशेषणस्यापि निवेशनीयत्वात्। अतएवाधिकारसूत्रेऽपि नातिव्याप्तिः, अधिकारशास्त्रस्य विधिनैकवाक्यतयैव बोधकत्वात्साधुत्वाप्रकारकबोधजनकत्वाभावात्। पूर्वत्रासिद्धमित्यधिकारस्य होढ (पा० ८।३।३१) इत्यादौ इदं शास्त्रं तत्तच्छास्त्रदृष्ट्याऽसिद्धमित्याकारकपृथग्बोधजनकत्वेन तद्बोधस्य साधुत्वाप्रकारकत्वेऽपि पूर्वोक्तबोधोपयोगित्वाभावेनादोषः। अतिदेशशास्त्रस्यापि प्राधान्यात् कार्यातिदेशकत्वेन तत्रापि नातिव्याप्तिः। निषेधशास्त्राणां वार्तिकानां च पृथक् साधुत्वाप्रकारकबोधाजनकत्वेन नातिव्याप्तिः।

नचैवम् असिद्धं बहिरङ्गमन्तरङ्ग (प० शे० प० ५०) इत्यादिपरिभाषाबोधस्य निरुक्तबोधोपयोगित्वाभावेन तत्राव्याप्तिरिति चेदिदमत्रावधेयम्-विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगिसाधुत्वाप्रकारकशक्त्यविषयकबोधजनकत्वे सति अधिकारशास्त्रभिन्नत्वमिति परिभाषात्वं परिष्करणीयम्। परिभाषया कस्यचिद् विधिसूत्रस्य प्रवृत्तिर्निवृत्तिर्वावश्यं भवतीति लक्षणसमन्वय इति मिश्रपादाः[1]।

अयं परिभाषापरिष्कारः पाणिनीयतन्त्रपरिभाषामधिकृत्य कृतः। अतएव पुरुषोत्तमसीरदेवनागेशसम्पादितपरिभाषासु अष्टाध्यायीप्रोक्तपरिभाषासूत्रेषु च निरुक्तलक्षणं संघटते। पाणिनीयचान्द्रव्याकरणोभयसाधारणपरिभाषालक्षणन्तु **सर्वतोऽभिव्यापारवत्वे सति विधिशास्त्रप्रवृत्तिनिवृत्तिसंकोचादिफलवत्वे सति तथा विख्यातत्वम्** इत्याकारकमेव संभवति।

परिभाषाया मुख्यतः पञ्च भेदाः

१—वाचनिकी

२—ज्ञापकसिद्धा—
किमपि सूत्रं सूत्रांशो वा यां ज्ञापयति सा परिभाषा ज्ञापकसिद्धा।

३—न्यायसिद्धा

४—ज्ञापकन्यायोभयसिद्धा।

५—ज्ञापितैकदेशा च।

(१) वाचनिकी परिभाषाः—

सूत्ररूपेण वार्तिकरूपेण महाभाष्यवचनरूपेण वा पठिता परिभाषा वाचनिकी परिभाषा, पाणिनिचन्द्रकात्यायनपतञ्जलिवचनरूपेण पठितत्वात्। इत्थं यस्याः परिभाषायाः सत्तायां ज्ञापकस्य न्यायस्य वाऽपेक्षा न वर्तते या चाचार्येण कण्ठत उक्ता सा वाचनिकी परिभाषेति सिद्धयति।

इयं च त्रिविधा (१) सूत्ररूपा (२) वार्तिकरूपा (३) महाभाष्यवचनरूपा च।

तस्मिन्नितिनिर्दिष्टे पूर्वस्य (पा० १।१।६६) इत्यादीनि पाणिनीयपरिभाषासूत्राणि चान्द्रव्याकरणस्य सर्वाणि परिभाषा-सूत्राणि सूत्ररूपाः परिभाषाः सन्ति।

परिभाषारूपेण स्वीकृतकात्यायनवचनरूपा परिभाषाऽपि वाचनिकी मन्यते। यथाः—

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति इति।

परिभाषावृत्तिकारेण पुरुषोत्तमदेवेनोक्तम्ः।

---

१. प० शे० विजयाटीका—(सं०—श्रीमदुमेश मिश्रः) पृ० ५

लक्ष्य-स्थित्या व्याप्तिन्यायाश्रयमूलकं कात्यायनवचनमेतत् परिभाषारूपेण पठ्यते ।

(पुरु० प० वृ० पृ० ३९ प० सं० ७०)

परिभाषावृतिकारः सीरदेवो लिखति-अनिनस्मन्...। इदं च कात्यायनवचनं परिभाषारूपेण पठ्यते (परि० वृ० सीरदेव पृ० १२१) ।

पूर्वत्रासिद्धीयमद्विर्वचने (पु० परि० वृ० सं ११०) इति परिभाषामधिकृत्य पुरुषोत्तमदेवः परिभाषावृत्तौ (पृ० ५१) लिखति सर्वस्य द्वे (८।१।१) इति सूत्रे कात्यायनवचनमेतत् परिभाषारूपेण पठ्यते इति ।

सीरदेवोऽपि स्वपरिभाषावृत्तौ (पृ० १६१) वदतिः—

पूर्वत्रासिद्धीयमद्विर्वचने...इति सर्वस्य द्वे (८।१।१) इत्यत्र सूत्रे कात्यायनवाक्यमिदं परिभाषारूपेण पठ्यते ।

नागेशस्तु 'अनिनस्मन्निति (पृ० १३८) अधिकृत्य लिखतिः—येनविधिरिति भाष्ये वचनरूपेण पठितैषेति । एतेन भाष्ये पठितैषेत्येव ज्ञायते, कस्य वचनमिदमिति न स्पष्टमत्र ।

(ख) भाष्यकारवचनरूपा

यथा अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवत् इति । पुरुषोत्तमदेवोऽस्याः सम्बन्धे लिखति परिभाषावृत्तौ (पृ० २१) विप्रतिषेधसूत्रे १।४।२ इयं परिभाषा भाष्यकारेण पठिता ।

यथा वा प्रत्ययाप्रत्ययोः प्रत्ययस्य ग्रहणम् (परि० शे० १११) इति । एतामधिकृत्य नागेशेन लिखितम्—' इयं चाङ्गस्येति सूत्रे भाष्ये पठितेति ।

(२) ज्ञापकसिद्धा च प्रथमतो द्विविधा निर्देशज्ञापिता सूत्राप्रामाण्यभयकल्पिता च ।

तत्र निर्देशज्ञापिता परिभाषा कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते (परि० शेख० १०) इति वर्तते 'स्थाण्डिलाच्छयितरि व्रते' पा० ४।२।१५ इति सूत्रगतगुणनिष्पन्ननिर्देशज्ञापितत्वात् । सूत्राप्रामाण्यभयकल्पिता परिभाषाऽपि मुख्यतो द्विविधा सूत्राक्षरान्यथासिद्धभयकल्पिता सूत्रार्थान्यथासिद्धभयकल्पिता च ।

'सुप्तिङन्तं पदम्' पा० १।४।१४ इति सूत्रे प्रोक्तान्तपदान्यथासिद्ध भयकल्पिता परिभांषा 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' (परि० शेख० २७) इति दृश्यते ।

सूत्रार्थान्यथासिद्धभयकल्पिता यथा 'उभयगतिरिह भवति (परि० शेख० ९) इति' संख्याया अतिशदन्तायाः कन् पा० ५।१।२२ इति सूत्रस्थ-ति-शदन्त-भिन्नाकारकसूत्रार्थान्यथासिद्धभयकल्पिताऽस्ति प्रकरणस्याभिधानियामकत्वेन प्रकृते बहुवादीनां 'संख्यासंज्ञा कृते' ति ज्ञानरूपस्य प्रकरणस्य सत्वात् पाणिनीयतन्त्रे स्वतः तिशदन्तानां विंशति-त्रिंशत्प्रभृतीनां ग्रहणाप्रसक्त्या ग्रहणवाराणाय सूत्रे निवेशितोऽतिशदन्तेत्यर्थो व्यर्थ एव । 'तादृशार्थोऽन्यथा सिद्धि मा गच्छतु' इति भयेनोक्तपरिभाषा कल्प्यते । फलन्तु 'कर्तरि कर्मव्यतिहारे (पा० १।३।१४) इत्यत्र कर्मपदेन न कर्तुरीप्सिततमं कर्मेत्यस्य ग्रहणं किन्तु लोकख्यातस्य क्रियारुपस्यैव । भयेन स्वीकृतस्यापि वचनस्य फलं तु भवत्येव यथा "स्वाध्यायान्मा प्रमद' इति गुरुवचनस्य ताडनभयेनाऽपि स्वीकृतस्य विद्याप्राप्तिः फलं भवत्येव ।

अस्मिन्नेव भेदे क्वचिद् विध्वंशो व्यर्थः सन् ज्ञापयति क्वचिच्चानुवाद्याशः । 'वाह ऊठ्' (पा० ६।४।१३२) इति सूत्रे ऊठंशो विध्यंशः अन्तरङ्गपरिभाषां (प० शे० ५०) ज्ञापयति । 'अतः कृ-कमि-कंस-पात्र (पा० ८।३।४६) इत्यत्र कमिग्रहणेनैव सिद्धे कंसग्रहणम् उणादयोऽव्युत्पन्नानि प्रातिपदिकानि (परि० शेख० २२) इति परिभाषां ज्ञापयति । अत्र कंसग्रहणमुद्देश्यांशप्रविष्टम् ।

(३) न्यायसिद्धा परिभाषा यदागमास्तद्गुणीभूतास्तद् ग्रहणेन गृह्यन्ते परि० शे० (११) इति । लोकेऽपि

देवदत्तस्याङ्गाधिक्ये तद्विशिष्टस्यैव देवदत्तग्रहणेन ग्रहणं दृश्यते । इत्थमियं लोकन्यायसिद्धा । न्यायोऽत्र लोकप्रसिद्धा युक्तिर्गृह्यते । यथा वा गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति ।

(४) उभयसिद्धा यथा एकदेशविकृतमनन्यवत् (परि० शेख० ३७) इति । छिन्नपुच्छे शुनि श्वत्वव्यवहारो लोके निर्बाधः । नामकरणादिसंस्कारकाले कमलविलोचनयुगलः पश्चात्काणत्वं गतोऽपि देवदत्तो देवदत्त एव भवति न तु देवदत्तातिरिक्तः कोऽप्यन्यः, तथैव निर्जरशब्दे जरात्वानपयात् 'जराया जरसन्यतरस्याम्' पा० ७।२।१०१ इति जरसादेशो भवत्येव । लोकव्यवहारसिद्धस्याप्यस्य वचनस्य ज्ञापकमन्वेषयन् भाष्यकार आह—'प्राग् दीव्यतोऽण्' इत्यत्र दीव्यति शब्दैकदेशदीव्यच्छब्दानुकरणमित्युक्त्वा किमर्थं विकृतनिर्देशः एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा' एकदेशविकृतमन्यवदिति[1] ।

'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषा न्यायसिद्धा वाह[2] ऊठ् इति सूत्रस्थोठ्ग्रहणेन ज्ञापितेति उभयसिद्धा ।

लोकेऽपि दृश्यतेऽन्तरङ्गे कार्ये समुपस्थिते बहिरङ्गकार्यस्योपेक्षा क्रियत इति । तथाचोक्तं परिभाषेन्दुशेखरे (व० २३६) । इदमन्तरङ्गत्वं लोकन्यायसिद्धमिति, मनुष्योऽयं प्रातरुत्थाय शरीरकार्याणि करोति, ततः सुहृदां ततः सम्बन्धिनाम् अर्थानामपि जातिव्यक्तिलिङ्गसंख्याकारकाणां बोधक्रमः शास्त्रकृतकल्पितस्तेनैव क्रमेण तद् बोधकशब्दाप्रादुर्भावः कल्पित इति तत्क्रमेणैव तत्कार्याणीति पट्व्येत्यादावन्तरङ्गत्वात् पूर्वं पूर्वयणादेशः, परयणादेशस्य बहिरङ्गतयाऽसिद्धत्वात् इत्यचः परस्मिन् पा० १।१।५७ सूत्रे भाष्ये स्पष्टम् ।

वाह ऊठ् पा० ६।४।१३२ इति सूत्रस्थम् ऊठ्ग्रहणमस्या ज्ञापकमपि । अन्यथा सम्प्रसारणपदमनुवर्त्य सम्प्रसारणमात्रविधानेन 'पुगन्तलघूपधस्य च पा० ७।३।८६ इति गुणे 'वृद्धि रेचि' पा० ६।१।८८ इति वृद्धौ प्रष्ठौह इत्यादि सिद्धे किन्तेनेति । व्यर्थेन तेन ज्ञाप्यते 'असिद्धं बहिरङ्गमन्तरङ्गे' इति पुरुषोत्तमदेवेनात्र परिभाषास्वरूपमित्थं दत्तम् अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवत् इति । चान्द्रं तु परिभाषासूत्रमस्ति 'असिद्धं बहिरङ्गमन्तरङ्गे' (चा० प० ४५) इति ।

काचिदीदृश्यपि दृश्यते परिभाषा, यस्याः शरीरैकदेशः सूत्रज्ञापितोऽन्यश्च भागो वचनरूपेण पठितः । यथा 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' (पु दे० परि० वृत्ति पृ० २३ परि० ४६) इति । एतस्याः कारकांशे न किमपि ज्ञापकम्; उपपदमतिङ् इत्यत्रातिङ् ग्रहणेन कुगतीत्यत्र तदपकर्षणेनातिङन्तश्चायं समास इत्यर्थात् तयोः सूत्रयोः सुप् सुपेत्यस्य निवृत्या गत्युपपदयोः कृद्भिः समासवचनं प्राक् सुबुत्पत्तेरिति लाभेन ज्ञापकत्वं लभ्यते कारकांशे च पूर्वाचार्यवचनस्य स्वीकारात् वाचनिकत्वम् इति परिभाषास्वरूपे उभयोर्मिश्रणात् मिश्रितकलेवरेयं परिभाषा ।

पुरुषोत्तमदेवसीरदेव-नागेशैः सूत्ररूपेतरपरिभाषाणामेव व्याख्यानं स्वस्वग्रन्थे कृतम् । पुरुषोत्तमदेवः स्वपरिभाषावृत्ति-पुष्पिकायां स्वग्रन्थमुपसंहरन् लिखति—'इति तावत् ज्ञापकसिद्धा वचनसिद्धा न्यायसिद्धाश्च काश्चन परिभाषावचनानि च कानिचिद् यथाबोधमस्माभिर्विवृतानि । एवमनया दिशा अन्यान्यपि शब्दक्रियोपयोगिन्यायवाक्यानि लिङ्गोदाहरणाभ्यां समनुगन्तव्यानि इति ।[3]

---

१. परिभाषेन्दु शेखर—परिभाषा ३७ ।
२. (पा० ६।४।१३२) ।
३. परिभाषा वृत्तिः (पुरुषोत्तमदेव) पृ० ५६ राजशाही प्रकाशन) ।

अनेन समाप्तिग्रन्थेनात्र वृत्तौ व्याख्यातानां परिभाषाणां ज्ञापकसिद्धवचन-सिद्धन्यायसिद्धेतिभेदत्रयम् सिद्ध्यति । पुरुषोत्तमदेवस्यायं प्रकारविभागः निर्दोषः । अतएव नागेशस्य प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरूपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते" इति प्रारम्भवाक्ये किमपि न्यूनत्वमुपलक्ष्य टीकाकाराः ज्ञापकन्यायसिद्धानि इत्यस्य ज्ञापकन्यायपदयोर्मत्वर्थीयाच्प्रत्ययं प्रकल्प्य ज्ञापकयुक्तानि न्याययुक्तानि स्वतःसिद्धानि (वाचनिकानि) इति व्याख्यानं विधाय ग्रन्थं संगमयन्ति । केचिट्टीकाकारा वाचनिकानीति पदमावर्त्य विनापि चकारम् 'अहरहर्नयमानो गामश्वं पुरुषं पशुमित्यादिवाक्यवत् समुच्चयार्थं स्वीकृत्य' अत्र पाणिनीयतन्त्रे ज्ञापक-सिद्धानि न्यायसिद्धानि वाचनिकानि च परिभाषारूपाणि इति योजनया ग्रन्थं योजयन्ति । पुरुषोत्तमदेवस्य ग्रन्थे नैताद्दश्याः कस्याश्चन कष्टकल्पनाया अपेक्षा भवति, सारल्येन स्वाभिप्रायं यावदर्थपदया वाचा प्रतिपादनात् ।

पुरुषोत्तम देवेनास्यां भाषावृत्तौ १२० परिभाषाः संकलितास्तदुपरिवृत्तिश्च लिखिता । पाणिनीयतन्त्रे स्वीकृताः परिभाषाः काः कति चेत्यस्य चित्रं सर्वप्रथमं परिभाषावृत्तावेवोपलभ्यते । यावत् किमपि परिपूर्णं प्रामाणिकं च परिभाषासंग्रहात्मकं प्राचीनं पुस्तकं नोपलभ्यते तावदस्य पारिभाषाप्रथमपुस्तकत्वेन स्वीकृतौ न कापि बाधा । अस्यां परिभाषावृत्तौ प्रथमा 'अर्थवद् ग्रहणे नानर्थकस्य ग्रहणमिति परिभाषाऽस्ति अन्तिमा च व्याख्यानतो विशेषप्रतिपत्ति र्नहि सन्देहादलक्षणम् इति ।

परिभाषाणां स्रोतोविषये निश्चप्रचतया वक्तुं नोपलभ्यते किमपि प्रमाणम् तथापि पुरुषोत्तमदेवस्य 'अगत्या खलु परिभाषाश्रीयते' (११९) इति परिभाषाया वृत्तौ 'परिभाषा हि न पाणिनीयानि वचनानि; किन्तर्हि नानाचार्याणाम्' इति वचनेन, सीरदेवस्य परिभाषावृत्तौ (पृ० १८६) परिभाषा हि नाम न साक्षात् पाणिनीयवचनानि । किन्तर्हि नानाचार्याणाम् इति वाक्येन च नागोजीभट्टस्य परिभाषेन्दुशेखरे (पृष्ठ १७) प्राचीनवैयाकरणतन्त्रे वाचनिकानि—व्याख्यायन्ते इति उपोद्घातग्रन्थेन च ज्ञायते यत् परिभाषाः प्राचीनवैयाकरणशब्दानुशासनेषु सूत्ररूपाणि तेषां व्याख्यानवचनरूपाणि वाऽऽसन् । अतएव प्रायो भोजराजेन परिभाषा अपि सरस्वतीकण्ठाभरणे तथैवान्तर्निविष्टा यथा गणपाठपठिताः शब्दास्तत्तत्सूत्रेषु कण्ठरवेणोक्ताः । सरस्वतीकण्ठाभरणे प्रथमाध्यायस्य द्वितीयपाद-मध्ये परिभाषाणां संग्रहो दृश्यते ।

इत्थं परिभाषावृत्तौ पुरुषोत्तमदेवेन संकलितानाम् परिभाषाणामपि मूल नानाचार्यवचनान्येव, तथापि तेषां वचनानां कोऽपि संग्रहोऽस्य मूलम् अथवाऽयमेव सर्वप्रथमः संग्रहकर्त्तेति प्रश्ने व्याडिपरिभाषापाठ एवास्यां परिभाषावृत्तौ संकलितानां परिभाषाणां संकलनस्रोत इति ज्ञायते । व्याडिपरिभाषा पाठस्य सत्वे कतिचित् प्रमाणानि दीयन्ते:—

(१) होशियारपुरस्थविश्वेश्वरानन्दसंस्थाने परिभाषापाठस्य विद्यमानहस्तलेखद्वयस्यान्ते लिखितं दृश्यते:—

केचित्तु व्याख्यानतो विशेषप्रतिपत्तिरित्यादयः सर्वा परिभाषा व्याडिमुनिना विरचिता इत्याहुः[1] ।

(२) इण्डियाआफिस (लन्दन) पुस्तकालये भास्करभट्टस्य केनाप्यन्तेवासिना विरचितायाः परिभाषावृत्याः सुरक्षितस्यैकस्य हस्तलेखस्य प्रारम्भे लिखितमस्ति—

केचित्तु व्याख्यानत इति परिभाषा व्याडिमुनिविरचिता इत्याहुरिति ।[2]

१-२. सं० व्या० शा० का इतिहास भाग १ पृ० २४५ ।

(३) जम्मूस्थरघुनाथमन्दिरस्य हस्तलेख संग्रहे व्याडीयपरिभाषावृत्तिनामा कोऽपि ग्रन्थो विद्मान उपलभ्यते ।[1]

व्याडिनाम्नाऽलंकृतपरिभाषाग्रन्थस्य नामद्वयमुपलभ्यते ।

(१) परिभाषा ससूचनम् (२) परिभाषापाठश्च तत्र प्रथमस्य प्रथमसूत्रम् 'अथ परिभाषासूचनां व्याख्यास्यामः' द्वितीयग्रन्थस्य पुष्पिकायाम् इति व्याडिविरचिता परिभाषाः समाप्ता इति लेखेन परिभाषासूचने (पृ० सं० ६५) अकृतव्यूहाः पाणिनीया इति परिभाषाया निर्देशेन च ज्ञायते एतासां परिभाषाणां सम्बन्धः पाणिनीयतन्त्रेणैवास्ति ।

व्याडिपरिभाषापाठस्य साम्प्रतं पाठद्वयमुपलभ्यते । प्रथमे ९३, द्वितीये १४० परिभाषाः विद्यन्ते । उभयत्र न केवलं संख्याभेदः किन्तु परिभाषाणां पाठभेदः पौर्वापर्यभेदोऽपि दृश्यते[2] ।

पुरुषोत्तमदेवेन परिभाषापाठे लघुवृत्ति र्ललिता वृत्ति र्वा लिखिता । वृतिरियं व्याडिपरिभाषापाठमाश्रित्य कृता विद्यते । व्याडिपुरुषोत्तमदेवयोर्मध्येऽन्यस्य परिभाषापाठस्यानुपलम्भात् । स्वयं वृत्तिकारो ज्ञापकसमुच्चयस्य प्रारम्भे 'यश्चक्रे परिभाषाणां वृत्तिं वृद्धसुसम्मताम् । पुरुषोत्तम आरेभे स ज्ञापकसमुच्चयम्' इति श्लोके स्ववृत्तिं वृद्धसुसम्मतामाहस्म । अत्र वृद्धपदेन व्याडिः शक्यते ग्रहीतुम् । एतेन व्याडिना लिखितायायाः कस्या वृत्तेरपि सद्भावसंभावना जायते ।

इदमपि ज्ञायते यत् व्याडेः परिभाषापाठस्य कालक्रमेण त्रिविधः पाठभेदो जातः । येष्वन्यतमाश्रित्य पुरुषोत्तमदेवेन स्वपरिभाषावृत्तिर्लिखिता । एकः सीरदेवेन स्वपरिभाषावृत्तिं लिखताऽऽश्रितः । तृतीयश्च परिभाषेन्दुशेखरे आधारीकृतः ।

सीरदेवस्य पुरुषोत्तमदेवस्य च परिभाषावृत्तौ प्रथमा परिभाषा अर्थवद्ग्रहणे नानार्थकस्य ग्रहणमित्यस्ति किन्तु अन्तिमा न समाना । सीरदेववृत्तौ ज्ञापक-सिद्धं न सर्वत्र इत्यन्तिमा (पृ० १८८) पु० देववृत्तौ 'भवति व्याख्यानतो विशेषप्रतिपत्ति र्न सन्देहादलक्षणमिति परिभाषा' वर्ततेऽन्तिमा (पृ० ५५) चान्द्रपरिभाषासूत्रस्यापि प्रथमा परिभाषा अर्थवद्ग्रहणमित्येवाऽस्ति ।

पुरुषोत्तमदेवस्य सीरदेवस्य च परिभाषासंकलने चान्द्रपरिभाषाणां प्रभावः परिलक्ष्यते । 'णौ कृतं च' (२१) इति चान्द्रपरिभाषावदिहापि 'णौ कृतं स्थानिवद् भवति (३३) इति । परिभाषादर्शनात् । **इयं परिभाषा परिभाषेन्दुशेखरे न दृश्यते ।** सीरदेवस्तु पु० देवं सर्वत्रानुचकारेति तत्रेयं परिभाषा दृश्यते । यथा चान्द्रे पूर्वत्रासिद्धीयमद्विर्वचने (२४) इति दृश्यते तथैवेहापि पूर्वत्रासिद्धीयमद्विर्वचने (११०) नतु परि० शेखर इव पूर्वत्रासिद्धीयमद्वित्व इति । यथा चान्द्रे असिद्धं बहिरङ्गमन्तरङ्गे (चा० प० सू० ४५) इत्यतः पृथक् अन्तरङ्गबहिरङ्गयारन्तरङ्गो विधि र्बलीयान् (चा० प० प० सू० ४७) इति परिभाषोपलभ्यते तथा पु० दे० परिभाषावृत्तावपि परिभाषाद्वयं पृथक् पृथग् दृश्यते (४१, ४३) आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते इत्यप्युभयत्र 'यत्' 'यदा' घटितः क्रमः समानो दृश्यते (चा० प० सू० ७ पु० प० १८) । परिभाषेन्दुशेखरेऽङ्गवृत्तौ पुनर्वृत्तावविधिरिति दृश्यते परिभाषास्वरूपम् (प० शे० ९३) चान्द्रे च प्रकृतिप्रवृत्तेः पुनर्वृत्तावविधिर्निष्ठितस्य (चा० प० ५९) इति दृश्यते । पु० प० वृत्तौ पुनर्वृत्तावविधिर्निष्ठितस्य (७१) इति दृश्यते चान्द्रपरिभाषासूत्रसाम्यम् ।

चान्द्रपरिभाषासूत्रेषु अल्लाक्षरत्वस्य परिपालनं जागरूकतया कृतं दृश्यते । सूत्रशैल्यां तदवधेयमपि । अतएव

---

१. सं० व्या० शा० का इतिहास भाग १ पृ० २४५ ।

२. सं० व्या० शा० का इतिहास भाग २ पृ० २४७ ।

तत्रापि शब्दानामनुवृत्त्याऽपेक्षितार्थनिर्वाहः कृतः । तेन क्रमेण परिभाषासूत्राणि पठितानि येन तत्रानुवृत्तिसौकर्यं स्यात्; यथा—

अर्थवद् ग्रहणे नानर्थकस्य ग्रहणम्	१
लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव	२
नामग्रहणे लिङ्गविशिष्टस्यापि	३
प्रकृतिग्रहणे यङ्लुगन्तस्यापि	४
एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य	५
निरनुबन्धग्रहणे न सानुबन्धस्य	६

इत्यादिषु पञ्चसूत्तरसूत्रेषु प्रथमसूत्रात् धाराप्रवाहन्यायेन सौकर्य्यर्थेण ग्रहणपदानुवृत्ति र्भवति । एवमेव च स्थानिवदादेशः (चा० सू० २०) इत्यतः 'णौ कृतं च' (चा० सू० २१) इत्यत्र स्थानिवत्पदमनुवर्त्य कार्यं साधितम् ।

सूत्रशैलीत्वादत्र भवतेरस्तेश्च प्रयोगः परित्यक्तः । १९, २०, २१ इत्यादौ यथा ।

चन्द्रेण स्वव्याकरणोपयोगीनि परिभाषासूत्राणि रचितानि । अतोऽत्रासंज्ञके व्याकरणे संज्ञासम्बन्धिकार्य-प्रवृत्तिनिवृत्तिसाधकानि परिभाषासूत्राणि स्वभावतो न दृश्यन्ते । तथाहि—

	पु० दे० प० वृ० प० सं	ना० प० भा० शे० प० सं०
यथोदिष्टं संज्ञापरिभाषम्	५०	२
यथोद्देशं ,, ,,		२
कार्यकालं ,, ,,	५० (ख)	३
संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति	४१	१७६
संज्ञापूर्वको विधिरनित्यः	४२	१४०
उभयगतिरिह भवति		९

चान्द्रपरिभाषासूत्रेषु सूत्रसिद्धमपि वचनं परित्यक्तम् यथा

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् इति । पञ्चमीनिर्देशस्य बलीयस्त्वं तु तस्य परत्वात् विप्रतिषेधे परं कार्यम् (पा० १।४।२) इति सूत्रेणैव सिद्धम् । किंच ङः सि धुट् पा० ८।३।२९ इत्यादौ यत्रास्य वचनस्य फलं, तत्र चन्द्रेण ङः सो धुट् इति कृतम् ।

प्रत्याख्यातकार्याश्रितमपि परिभाषावचनमिह नास्ति यथा—(प० शे० ७०) उभयत आश्रयणे नान्तादिवदत्र नास्ति, अन्तादिवद्भावसूत्रस्येह प्रत्याख्यानात् ।

असंज्ञकव्याकरणत्वात् संज्ञाशब्दस्य परिभाषाघटकीभूतस्यापि परित्यागोऽत्र दृश्यते यथा—

(१) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्,
(२) ग्रहणवता प्रातिपदिकेन तदन्तविधि र्नास्ति,
(३) बहुव्रीहौ तद्गुणसंविज्ञानमपि इत्यादेः स्थाने दृश्यन्ते 'नामग्रहणे लिङ्ग विशिष्टस्यापि' ग्रहणवतान्ते न तदन्तविधिः अन्यार्थे तद्गुणसंविज्ञानमपि (चा० प० सू० ३, ११, १२) इति ।

कानि चित्परिभाषासूत्राणि तादृशान्यपि सन्ति यान्यन्यत्र परिभाषापाठे नोपलभ्यन्ते । यथा—एकदेशेऽन्यत्र

न व्यपदेशोऽपि तत्कृतं तद्भावेऽपि तद्व्यपदेशात् (चा० प० सू० १६) सत्यपि सम्भवेऽबाधे बाधा (चा० प० सू० ३३) कार्यानुबन्धादधिकारानुवृत्तिः, भिन्नसम्बन्धे प्रतियोगे प्रतिघाते चाधिकाराणां निवृत्तिः, इष्टे तदधिकाराणां प्रवृत्ति-निवृत्ती (चा० प० सू० ४१-४३) (स्वरितेनाधिकार इति सूत्राकरणादिदं त्रयं करणीयमभवत्) ।

विशालकलेवरस्य परिभाषावचनस्य लघुशरीरत्वप्रदानमपि दृश्यते यथा नञिवयुक्तमन्यत्सदृशाधिकरणे तथाह्यर्थ इति यद्दृश्यते (पु० प० वृत्तौ तत्स्थाने चान्द्रपरिभाषासूत्रमस्ति 'नञिवयुक्ते सदृशसम्प्रत्ययः' (चा० ६५) यथा च सहचारितासहचरितयोः सहचरितस्यैव ग्रहणम् (परि० शे० ११२) इत्यस्य समकक्षं चान्द्रपरिभाषासूत्रमस्ति 'सहचरितप्रत्यासत्तेरितरेतरयोगः' (चा० सू० ५१) ।

चान्द्रपरिभाषा सूत्रेषु **द्वित्रा दोषा अपि उपलभ्यन्ते**—

(१) ग्रहणवतान्ते न तदन्तविधिः (११) इत्यत्र ग्रहणवता नाम्ना न तदन्तविधिरिति भाव्यम् चान्द्रेऽसंज्ञक व्याकरणे सर्वत्र प्रातिपदिकस्थाने नामशब्दप्रयोगात् । अथ वा सम्भाव्यते ग्रहणवताम् (शब्दानां) तेन (प्रातिपदिकेन) न तदन्तविधिरित्येको नकारो लेखकप्रमादात् परिभ्रष्ट इति ।

अथवा ग्रहणवता न तेन (प्रातिपदिकेन) तदन्तविधिरित्यत्र नकारो लेखकदोषाद्धलन्तचिह्नाङ्कितो जातः ।

(२) भाव्यमानोत्सवर्णं गृह्णाति (४४) इत्यत्र भाव्यमानोऽप्युत् इति भाव्यम् इति टिप्पणीकारस्तन्न चान्द्रे व्याकरणे प्रत्याहारे वर्णग्रहणे जातिग्रहणमङ्गीकृतम् । तादृशं च जातिग्रहणं भाव्यमाने न भवति, अनयैव परिभाषया तथा नियमनात् । अन्यथा भाव्यमाने उकारेऽपि जातिनिर्देशादेव सवर्णग्रहणे सिद्धे परिभाषेयं वृथा स्यात् । अतः व्यर्थेनानेन परिभाषासूत्रेण ज्ञाप्यते उदेव भाव्यमानः सवर्णं गृह्णाति । तेन भाव्यमानेन सवर्णानाम् ग्रहणं नेत्यस्य अणुदित्सवर्णस्य चाप्रत्यय इत्यस्य चावश्यकता न भवति । 'अपि' ग्रहणे कृते तु भाव्यमानोप्युत्सवर्णं गृह्णाति किमुत अभाव्यमान इत्येवार्थापत्या लभ्यते । इत्थम् उक्तपरिभाषासूत्रस्यावश्यकताऽवशिष्टैव स्यात् । अतः 'भाव्यमानोत्' इति परिभाषास्वरूपं युक्तमेव ।

व्याख्यानतो विशेषप्रतिपत्तिः (चा० प० ६६) नहि सन्देहादलक्षणम् (चा० प० ६७) लण्सूत्रभाष्येऽनयोः मिश्रितं स्वरूपं दृश्यते व्याख्यानतो विशेषप्रतिपत्ति र्नहि सन्देहादलक्षणम् इति । पुरुषोत्तमदेवेन स्वपरिभाषावृत्ता वियमन्तिमपरिभाषारूपेणेत्थमुक्ताः—भवति व्याख्यानतो विशेषप्रतिपत्ति र्न सन्देहादलणम् इति । परिभाषेन्दुशेखरेऽपि व्याख्यानतो—न हि—दलक्षणमित्येकमेव रूपमस्या विलोक्यते । चान्द्रे किमस्या विघटनं बुद्धया कृतमुत प्रमादा-ज्जातमिति विचारणायां बुद्ध्यैवेति सम्भाव्यते । एकस्यां परिभाषायां स्वीकृतायामस्या अर्थः यथा नागेशेन कृत स्तथेत्थं स्यात्—'विशेषस्यान्यतराद्यर्थरूपस्य व्याख्यानाच्छिष्टकृतात् प्रतिपत्ति निश्चयः हि यतः सन्देहाच्छास्त्रमलक्षण-मननुष्ठापकं, लक्षणं, तथा न, शास्त्रस्य निर्णयजनकत्वौचित्यादित्यर्थः । असंदिग्धानुष्ठानसिद्धयर्थेऽत्र शास्त्रे सन्दिग्धो-च्चारणरूपाचार्यव्यवहारेण सन्देहनिवृत्ते र्व्याख्यानाऽतिरिक्तनिमित्तानपेक्षत्वं बोध्यते इति यावत् इति ।

पुरुषोत्तमदेवेन (प० वृ० १२०) परिभाषायाः वृतौ परिभाषां व्याचक्षाणेनोक्तम् ।

व्याख्यानादाचार्यपरम्परोपदेशात् सन्देहेऽपि विशेषोऽवगतो भवति यतस्तस्मान्नेह सन्देहं प्राप्याऽलक्षणं लक्षणाप्रवृत्तिः । उपदेशात् सन्देहमपास्य लक्षणं प्रवर्तनीयम् इत्यर्थः ।

इत्यमुभयेन व्याख्यात्रोभयाशं संयोज्य व्याख्यातम् ।

चन्द्राचार्येण स्वावश्यकतानुसारेण व्यापकार्थत्वसम्पादनायोभावंशौ पृथक्कृतौ । एकत्र सत्वे, लक्षणगत-स देहनिवृत्तये व्याख्यानमाश्रयणीयम् सन्देहोदयमात्रात् किमपि लक्षणं सदोषमपलक्षणम्वा न स्वीकरणीयम् । लक्षण

मपलक्षणं तदा भवितुमर्हति यदा व्याख्यानादपि तद्गतः सन्देहो नापाकृतो भवेत् । इत्थं व्याख्यानेन लक्षणम्—सूत्रं शास्त्रम् वा व्याख्यानेन निराकृतसन्देहं जायते इत्येवार्थः सिद्धयति । तथाच व्याख्यानं (विवृतिः) लक्षणमात्रगत-सन्देस्य निवर्तकमिति फलति । इष्यते च व्याख्यानस्य विश्वतोमुखसन्देहनिवर्तकत्वम् । एवंचोक्तम् 'शक्तिग्रहं व्याकरणो-पमानकोशाप्तवाक्याद् व्यवहारतश्च । वाक्यस्य शेषाद् विवृत्ते र्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' इत्यत्र विवृतेः लौकिकवैदिकशास्त्रीयसर्वविधवाक्यजन्यशक्तिग्रहोपायत्वम् । अतश्चद्रेण परिभाषाद्वयं स्वीकृतम् ।

ज्ञापकेऽर्थमनित्यम् (७८) इत्यत्र ज्ञापकसिद्धम् न सर्वत्र (परि० शे० १२५) इतीदृशी परिभाषा दृश्यते ।

अर्थशब्दस्य पुंल्लिगत्वादत्र दूषणं दृश्यते यथा किल तत्रैव टिप्पणीं कुर्वता लिखितम् should be read ज्ञापकसिद्धम् or ज्ञापककृतम् for ज्ञापकेऽर्थम् as अर्थं is masc.

वस्तुतस्तु 'मन्यते' इति क्रियापदस्यात्राऽभिप्रेतत्वात् अर्थमिति द्वितीयैकवचने रूपमिदं सम्भवतीति नायं दोषः ।

"स्थानिवदादेश' इति पाणिनीयतन्त्रेऽतिदेशसूत्ररूपेण प्रसिद्धमप्यत्र परिभाषासूत्रेषु पठित्वा चन्द्रेण परि-भाषाऽतिदेशविध्यो र्नात्यन्तं पार्थक्यमनुभूतम् ।

कतिचिद् व्याकरणसिद्धान्ता अपि परिभाषासूत्रेष्वनुमोदिता दृश्यन्ते यथा—

१—सिद्धशब्दोद्देश्यान्नेतरेतराश्रयदोषः (८५) (अत्र शब्दनित्यत्वसिद्धान्तः) ।

२—प्रादीनां क्रियायोगित्वं विशेषद्योतित्वे स्वभावात् (८१) अत्र हि उपसर्गाणां द्योतकत्वसिद्धान्तः) ।

३—सापेक्षमसमर्थम् (२७) (अत्र समासशक्तिः) ।

अत्र चान्द्रपरिभाषा सूत्रेषु ८६ सूत्राणि सन्ति ।

अन्तिम सूत्रमस्ति—स्वरविधौ व्यञ्जनम विद्यमानवत् (चा० प० सू० ८६) इति । चान्द्रव्याकरणे स्वर-वैदिकप्रकरणसत्ताऽऽसीदित्यत्रैव निबन्धेऽन्यत्र प्रतिपादितम् ।

अनेन परिभाषासूत्रेण प्रतीयते चान्द्रपरिभाषासूत्ररूपेण प्रसिद्धोऽयं सन्दर्भश्चद्राचार्यरचित एव । यदीयं रचना कस्याप्यन्यस्याऽर्वाचीनस्य स्यात्तदात्र भाषाव्याकरणरूपेण प्रसिद्धेः सूत्रमिदं नैव रचितं स्यात् ।

चतुर्थोऽध्यायः

(ङ) चान्द्रोणादिसूत्रविचारः

"सर्वाणि नामानि आख्यातजानि" इति शाकटायनस्य गार्ग्यवर्जितानां निरुक्तकाराणां च सिद्धान्तः। गार्ग्यः कतिपये वैयाकरणाश्चैतन्न स्वीकुर्वन्ति। गार्ग्यस्य मतेन नाम त्रिधाऽस्ति (१) प्रत्यक्षक्रियम् (२) प्रकल्प्यक्रियम् (३) अविद्यमानक्रियं च। तत्र कारकः हारकः प्रत्यक्षक्रियस्य, गौः अश्वः इति, प्रकल्प्यक्रियस्य, सत्यडित्थडवित्थादिश्चाविद्यमानक्रियस्य नाम्नः उदाहरणानि। इत्थं यत्र स्वरसंस्कारौ सम्भवतः, प्रकृतिप्रत्ययविभागश्च स्पष्टः योगार्थश्च यत्रान्वितः स विज्ञातक्रियः शब्दः, तत्र कल्प्यताम् प्रकृतिप्रत्ययविभागः; भवतु च तादृशं नामाख्यातजं नाम। यत्र च प्रकृतिप्रत्ययकल्पनायां कृतायामपि न योगार्थः संघटते। 'गच्छतीति गौः अश्नाति पन्थानम् इत्यश्व इत्यादौ यथा। शयनकालेऽपि 'गौः शते' इति प्रयोगदर्शनात्, क्रमेलकोऽपि मरुमार्गं नितराम् अश्नाति इति तत्रापि अश्वशब्दस्य प्रयोगापत्तिप्रसंगात् तत्र तादृशविभागकल्पना निरर्थकत्वान्न करणीया। यत्र च डवित्थडित्थ इत्यादौ स्वप्नेऽपि विभागो न शक्यते कर्तुम् तादृशं नाम दृष्ट्वाऽपि 'नामानि आख्यातजानि' इति कथनं दुःसाहसपूर्णम्।

सर्वं नामाख्यातजं चेत् यः कोऽपि मार्गमश्नीयात् स सर्वः अश्वपदवाच्यः। सर्वे गन्तारः गावो भवेयुः। सुप्ताया गोः कृते च गोशब्दप्रयोगो न स्यात्। कोऽपि तत्कार्यकर्ता तन्नामभाग्भवेन्नान्य इत्यत्र न किमपि विनिगमकं वर्तते।

किंच सर्वं नामाख्यातजं चेत् एकस्यैव नाम्नः प्रतिक्रियान्तरं नामान्तरोपलब्धिरापद्येत। यथा एका एव गौ र्गच्छन्ती गौरुच्येत शयाना च किमप्यन्यद् चरन्ती चान्यथा। स्थूणा दरे निहितमूला दरशया स्यात्। इत्थं यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात्।

अपि च सर्वेषां नाम्नां क्रियाजन्यत्वे स्वीकृते, ते सर्वे विद्यमानप्रकृतिप्रत्यय-विभागाः स्युः। तथाच यथा पाचकादिशब्दानां स्थाने पक्तृपाककर्तृप्रभृतयः पाकविधायकादयश्च शब्दाः प्रयुज्यन्ते, तथा 'पुरुषः' 'तृणम्', 'अश्वः' 'गौ' रित्यादेः स्थाने 'पुरिशयः' 'तर्दनम्' 'अष्टा', 'गन्त्री' इत्यादयः शब्दाः प्रयुक्ताः स्युः। न तेषां शतशः प्रयोगे कृतेऽपि श्रोतारः पुरुषाद्यर्थान् अवगच्छेयुः।

अथ च यदि प्रथनात् पृथिवीत्युच्यते केनेयं प्रथिता कश्च तस्य प्रथयितुराधारः, पृथिव्या एव सर्वाधारत्वात्।

किञ्च सर्वं नामाख्यातजमिति अतत्थ्यं स्वीकृत्य तन्निर्वाहाय सत्यमित्यादौ अनेकधातूनां प्रकृतित्वकल्पनमयुक्तमेव। सत्+यम् इत्यत्र सदिति अस् प्रकृतेः, यकारः इण् धातो र्ण्यन्तान्निष्पन्नस्य 'आययति' इति शब्दस्येति वृथा कल्पनम् भवति। अतः न सर्वाणि नामानि आख्यातजानि।

एतादृशो विचारोऽत्र देशेऽतिप्राचीनः शाकटायनगार्ग्यादिनितरां प्राक्कालिकः। शाकटायनगार्ग्यकाले विचारस्य सम्प्रदायत्वरूपागते विचारस्य नितरामनर्वाचीनत्वबोधनात्।

एतादृशविचारस्य जन्मैव उणादेर्जन्मनः कारणम् । अतः उणादेर्जन्मकालः तादृशस्य विचारस्य जन्मकाल एवेति तर्क्यते । उणादयोऽव्युत्पन्नानि व्युत्पन्नानि वा प्रादिपदिकानि इत्यत्रापीदमेव मतद्वयं मूलम् ।

सर्वाणि नामानि आख्यातजानीति मते यानि दूषणानि दत्तानि तेषां समाधानं चन्द्राचार्येण एकेनैव वाक्येन स्पष्टमुक्तम्—'संज्ञाशब्देषु यथाकथंचिद् व्युत्पत्तिमात्रं कर्तव्यम्' (चा० ५।२।९५) । एतेन ज्ञायते यत् गौरश्व इत्यादि शब्देषु प्रकृतिप्रत्ययविभागस्तु कर्तव्य एव । व्युत्पत्तौ स्वीकृतायां तदनुसारियोगार्थः स्वीकर्तव्य एव इति न काद्रिजाज्ञाऽस्ति । अन्यद्धि शब्दानां प्रवृत्तिनिमित्तमन्यच्च व्युत्पत्तिनिमित्तम् । एवञ्च सर्वाणि नामानि आख्यातजानि इति स्वीकारे सर्वः गमनकर्ता गौः स्यात्, क्रमेलकोऽपि मार्गाशनकर्तृत्वात् अश्वः स्यात् पुरुषपुरिशयशब्दयोः पर्यायतापत्तिरित्यादि सर्वो दोषः परिहृतः ।

अध्ययनविश्लेषणायोग्यः अव्याकरणीयः न व्याकरणशास्त्रस्य विषय इति कृत्वा डित्थडवित्थादियदृच्छाशब्दास्तु **व्याकृत्यनर्हतया चन्द्रेण** न गृहीताः ।

पाणिनीयतन्त्रे उणादेर्व्युत्पन्नत्वाव्युत्पन्नत्वोभयथा स्वीकृतेः प्रमाणमुपलभ्यते । अतः कृकमिकंसकुम्भ... (पा० ८।२।४६) इति सूत्रे कमेः पृथक् कंसोपादानम्, तस्या व्युत्पन्नत्वं साधयति, अन्यथा कंसेऽपि 'कम्' धातुत्वेन अयस्कंस इत्यादौ सत्वे सिद्धे किन्तेन ? अतएव चार्थवदधातु...(पा० १।२।४५) इति सूत्रं सार्थकम् । अन्यथा वृक्षादिशब्दस्याऽपि उणादित्वेन कृदन्तत्वादेव प्रातिपदिकत्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव ।

नागेशेन 'उणादेरव्युत्पन्नपक्ष एव पाणिनिसम्मतः । तस्य व्युत्पन्नपक्षत्वन्तु शाकटायनसम्मतमित्युक्तम्[1] ।

वस्तुतस्तु उणादे र्व्युत्पत्तिपक्षेऽपि 'बहुपटवः' इत्यादौ प्रातिपदिकसंज्ञार्थम् 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (पा० १।२।४५) इति सूत्रं कर्तव्यमेव ।

किञ्च 'अशामन्ताल्वाय्येत्न्विष्णुषु (पा० ६।४।५५) इति पाणिनिसूत्रमपि उणादेर्व्युत्पन्नत्वं स्वीकृत्यैव सार्थकं जायते । 'अन्तः' 'आय्यः' 'इत्नुच्' इमे प्रत्ययाः औणादिका एव । न पाणिनेरष्टाध्याय्यां दृश्यन्ते । एषामुदाहरणेषु 'मण्डयन्तः' 'स्पृहयाय्यः' स्तनयित्नुरित्यादिषु णेरयादेशविधानाय कृतस्य सूत्रस्य सार्थक्यमुणादेः प्रत्ययत्वस्वीकारेणैव सम्भवति । उणादिप्रत्ययानां प्रत्ययत्वेनाङ्गीकृते तस्य व्युत्पन्नत्वं सिद्धत्येव ।

उणादयो व्युत्पन्नान्यपि' इति पक्षः भाष्यसम्मतोऽपि । अत एव अप्तृन्तृच् (पा० ६।४।११) इति सूत्रे नप्त्रादिग्रहणस्य नियमार्थत्वं मातरौ पितरावित्यत्र दीर्घाभावफलं च भाष्योक्तं संगच्छते । तत्र हि नप्त्रादीनां तृन्नन्ततृजन्तत्वादेव सिद्धे तद्ग्रहणम् उणादिनिष्पन्नानां तृन्तृजन्तानां चेद् भवति तर्हि नप्त्रादीनामेवेति नियमार्थं तदा स्याद् यदा उणादेर्व्युत्पन्नपक्षत्वं स्वीक्रियेत । अव्युत्पन्नपक्षे तु नप्त्रादीनां तृन्तृजन्तत्वेनास्वीकरणात् तज्ज्ञापकत्वकल्पनमसंगतमेव स्यात् ।

एवमेव मघवा बहुलम् (पा० ६।४।१२८) इति सूत्रस्य भाष्यकारकृतप्रत्याख्यानमपीदमेव सूचयति श्वन्नुक्षन् (३।२।६१) इति निपातनसिद्धात् मघवन्शब्दात् मघवेति धनार्थकमघशब्दात् मतुप् (पा० ५।२।९४) प्रत्ययनिष्पन्नात् मघवतः शब्दात् मघवानिति संसाध्य सूत्रमेतत् प्रत्याख्यातम् । एतेन ज्ञायते भाष्यकारस्य उणादेः प्रत्ययत्वं स्वीकार्यमासीत् ।

वस्तुतस्तु उणादिनिष्पन्नानां प्रातिपदिकानां लक्ष्यानुरोधाद् व्युत्पन्नत्वमव्युत्पन्नत्वं चोभयं स्वीकर्तव्यम् ।

---

१. ण्वुल् तृचा (पा० ३।१।३३) वित्यादौ भाष्ये व्युत्पन्नान्यपि । इदं शाकटायनरीत्या । पाणिनेस्त्वव्युत्पत्तिपक्ष एवेति । परिभाषेन्दु शेखर-प० सं० २२ ।

उणादिप्रत्ययान्तानामव्युत्पन्नत्वस्वीकारात् तेषु प्रकृतिप्रत्ययविभागप्रयोज्यपाणिनिसूत्रप्रवृत्तिर्न भवति। तेन जीर्यते क्रिन् रश्च व (उ० ५:४३) इति क्रिन् प्रत्यये रेफस्य वकारे धातुत्वाभावात् वोरूपधाया इति दीर्घाभावे जिविरिति सिद्धम्। अतएव शमेः खः (उ० १।१०३) शङ्ख इत्यादौ आयनेयी० (पा० ७।१।२) इति इनादयो न भवन्ति। अतः 'अतः कृकमिकंस (पा० ८।४।४६) इत्यत्र कमेः पृथक् कंसग्रहणं चरितार्थम्। अप्तृन्तृच् (पा० ६।४।११) इति सूत्रे नप्त्रादिग्रहणस्य नियमार्थत्वं पितरा इत्यादौ दीर्घाभावायावश्यस्वीकरणीयमपि, उणादिप्रत्ययनिष्पन्नप्रातिपदिकस्य व्युत्पन्नत्वपक्षस्वीकारेणैव संगतं संभवति, अतः उणादेर्व्युत्पन्नत्वमपि स्वीकरणीयमेव। तेन सर्पिषा यजुषा इत्यादौ आदेशप्रत्यययोः (पा० ८।३।५९) इति सकारस्य प्रत्ययत्वात् षकारः सिद्धः।

नच कथमव्युत्पन्नत्वव्युत्पन्नत्वधर्मौ परस्परविरुद्धावेकत्र स्वीकर्तुं शक्येते इति वाच्यम् उणादयो बहुलमिति बहुलग्रहणप्रतापात्तसिद्धेः। बहून् विरुद्धानविरुद्धान् वा धर्मान् लातीत्यर्थेन सर्वेष्टसिद्धेः।

उणादयो बहुलम् इमि सूत्ररचनाद्वाराऽपि पाणिनिना उणादयः प्रत्ययत्वेन स्वीकृताः, तत्रापि धातोर्विहितत्वात्तिङ्भिन्नत्वाच्च उणादयः कृत्प्रत्यया एव। सूत्रे बहुलग्रहणात् पाणिनीयतन्त्रे उणादिप्रत्ययानां यथाकार्यं प्रत्ययत्वमप्रत्ययत्वं व्युत्पन्नत्वमव्युत्पन्नत्वम्वा स्वीकार्यम्।

किञ्चोणादिनिष्पन्नानां शब्दानां यथावश्यकत्वं यौगिकत्वं रूढत्वं (योगरूढत्वम्) चेत्युभयमप्यभ्युगन्तव्यम् इत्यपि परिभाषातात्पर्यम्, उणादयो बहुलमित्यत्र बहुलग्रहणसंकेतश्च। तत्त्वबोधिनीकारः तत्सूचयन् लिखति—"कारुः शिल्पिनि कारके इति धरणिकोशः तदभिप्रेत्याह—कारुः शिल्पी कारकश्चेति (आद्ये योगरूढिः द्वितीये योगमात्रम् इति। (पृ० ५९२)

साम्प्रतमुपलब्धेषूणादिसूत्रपाठेषु पञ्चपादी दशपादीति द्विविधः पाठस्तेषामुपलभ्यते। उभयोऽपि पाठो मान्यै वैयाकरणैरुपात्तो व्याख्यातश्च। सिद्धान्तकौमुद्यामुणादिसूत्राणां पञ्चपादी दीक्षितेन गृहीता ज्ञानेन्द्रभिक्षुणा च तत्रापि तत्त्वबोधिनी व्याख्या लिखिता। किन्तु प्रक्रियाकौमुदीव्याख्याकारेण श्रीविट्ठलेन स्वव्याख्यायां दशपादुणादिसूत्राणां व्याख्याता।

यद्यपि व्याकरणग्रन्थस्य पूर्णतायै सूत्ररचनया सह धातुपाठगणपाठलिङ्गानुशासनोणादिसूत्राणां रचनाऽपि कर्तव्यकोटावेवाभवत्। अतः उणादिसूत्राणां रचना पाणिनिपूर्वकालिकैरपि वैयाकरणैरवश्यं कृता भवेदिति तर्क्यते; तथापि पाणिनिपूर्ववर्तिनां वैयाकरणानामुणादिसूत्राणां रचनाऽनुपलम्भात् न किमपि शक्यते वक्तुम् तत्सम्बन्धे।

आपिशलिना शिक्षाग्रन्थे 'अमङ्णनाः स्वस्थाना नासिकास्थानाश्च (१।२४) इति सूत्रमुक्तम्। तत्र वर्णक्रमानुज्झित्वा प्रत्याहारक्रमः आश्रितः। एतेन आपिशलिव्याकरणे 'अमङ्णनम्' इति प्रत्याहारसूत्रस्य सत्ता प्रतीयते। अनेन सूत्रेण निष्पन्नस्य अम् प्रत्याहारस्य प्रयोगः पाणिनीयाष्टाध्याय्यां नास्ति अस्ति च 'अमन्ताड्' इति (१।१०७) सूत्रम्, उणादौ। तत्र च अम् प्रत्याहारो दृश्यते। अम् पाणिनीयव्याकरणे नास्ति। अतो यदि तुल्यन्यायादिदं सूत्रमापिशलेरिति मन्येत तर्हि आपिशलेरुणादिसूत्रस्य रचनासंभावना शक्यते कर्तुम्।

उणादयो बहुलम् (पा० ३।३।१) इति सूत्रप्रणयनात् पाणिनेरुणादिरचना सम्भाव्यते। पञ्चपादुणादेः कर्तृविषये वैयाकरणेषु विवादो दृश्यते। कैयटादयो वैयाकरणा उणादिपञ्चपादीं शाकटायनस्य रचनां मन्यन्ते। ते उद्धरन्ति महाभाष्यकारस्य वचनमिदम्:—

'बाहुलकं प्रकृतेस्तनुदृष्टेः। प्रायः समुच्चयनादपि तेषाम्। कार्यं सशेष—

विधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु । नाम च धातुजमाह निरुक्ते
व्याकरणे शकटस्य च तोकम् । यन्न पदार्थविशेषसमुत्थं, प्रत्ययतः प्रकृते
श्च तदूह्यम् । कार्याद् विद्यादनूबन्धम्——' पा० ३।३।१)

अयं भावः—उणादिप्रत्ययाः उणादयो बहुलम् ३।१।१ सूत्रे बहुलमिति निर्देशेन सह विधीयन्ते, यतः कतिपयेभ्यः धातुभ्य एव ते विधीयन्ते । अतः न सर्वाः प्रकृतयोऽत्रोद्दिष्टा अथ च न सर्वे प्रत्ययाः समुच्चितास्तेष्वपि कतिपय एवात्र विहिताः । प्रकृतिप्रत्ययकार्याण्यपि न सर्वाणि प्रोक्तानि । इत्थं सूत्रकारेण लघुनाऽनेन निर्माणेनापूर्णेन च विधानेन शब्दानां दिग्दर्शनमेव कृतम् । तेन वेदेषु पठितानां रूढशब्दानां साधुत्वपरिज्ञानायोदाहरणस्वरूपमिदं रचितम् । निरुक्ते नामानि आख्यातजानीति प्रोक्तम् व्याकरणे शाकटायनोऽपीदमेव वक्ति । येषां प्रकृतिप्रत्ययविशेषा लक्षणेन न निर्दिष्टाः, तेषां प्रकृत्या प्रत्ययस्य, प्रत्ययेन वा प्रकृतेः ऊहा कर्तव्या । धातुप्रत्ययगतकार्यविशेषेण तत्प्रयोजकानुबन्धज्ञानं कर्तव्यम् इति भाष्याशयः ।

अत्र 'शकटस्य तोकम्' इति पदप्रयोगं दृष्ट्वा इमे वैयाकरणा उणादिपञ्चपादीम् शाकटायनस्य रचनामाहुः तथाहि—

१—उणादय इत्येव सूत्रमुणादीनां शास्त्रान्तरपठितानां साधुत्वज्ञापनार्थमस्त्विति' भावः (पा० ३।३।१) सूत्रप्रदीपे कैयटः[1] ।

२—'येयं शाकटायनादिभिः पञ्चपादीरचिता' इति पञ्चपादीवृत्तिकारः श्वेतवनवासी (पृ० १,२)[2] ।

३—'एवंच कृवापेतिउणादिसूत्राणि शाकटायनस्येति सूचितम् इति प्रदीपोद्योते नागेशः ३।३।१[3] ।

४—सिद्धान्तकौमुद्याः परिशिष्टे (पृ० ८३२, ८३५) 'अथ शाकटायनप्रणीतोणादिसूत्रपाठः' इति च लिखितं दृश्यते ।

५—'तानि चेमानि सूत्राणि शाकटायनमुनिप्रणीतानि न तु पाणिनिना प्रणीतानि' इति सिद्धन्तकौमुद्याः बालमनोरमाव्याख्यायां वासुदेवदीक्षितः (बा० भाग-४ पृ० १३८) प्राह ।

कतिपयैः प्रमाणैरुणादिपञ्चपाद्याः पाणिनिरचनात्वं सिद्धयति :—

१—'अकारं मुकुरस्यादौ उकारं दर्दुरस्य च बभाण पाणिनिस्तौ तु व्यत्ययेनाह भोजराट् ।।
(पाणिनिः मुकुरशब्दं मकारादिमर्थात् मकुरं, दर्दुरं च उकारादिम् अर्थाद्दुदुरं—स्वीकरोति । भोजराट् तु तद्विपरीतम् अर्थात् मुकुरं दर्दुरं च मन्यते इति पञ्चपाद्या मकुरदर्दुरौ (१।४०) इति सूत्रव्याख्यायाम् प्रक्रियासर्वस्वकारो नारायणभट्टः । अनेन ज्ञायते 'तेन पाणिनेरुणादिसूत्रकर्तृत्वं स्वीक्रियते' इति ।

२—माघकविना 'निपातितसुहृत्स्वामिपितृव्यभ्रातृमातुलम्
पाणिनीयमिवालोचि धीरैस्तत्समराजिरम्'
(१९।७५) इति श्लोके सुहृत्स्वामिपितृव्यमातुलशब्दानामिव भ्रातृशब्दस्य निपातनं पाणिनीयमिति स्वीकृतम् । भ्रातृशब्दश्चोणादिसूत्रनिपातित[1] इति तस्याप्युणादिपाठस्य पाणिनिकर्तृत्वं सिद्धमेव ।

३—स्वामिदयानन्दसरस्वतीमहोदयेनोणादिपाठः पाणिनिकर्तृक इतिस्वीकृतम्[2] ।

१, २, ३. सं० व्या० का इति० पृ० १७२ ।

१. नप्तृ नेष्टृ त्वष्टृ होतृ भ्रातृ० २।९६ ।

२. सं० व्या० शा० का इति० भाग २ पृ० १७३ ।

इत्थमुपलब्धस्योणादिसूत्रपाठस्य कर्ता क इति विषये मतभेदो दृश्यते। निश्चप्रचतया न किमपि शक्यते वक्तुम्।

यत्तु मीमांसकैरुक्तम् 'व्याकरणे शकटस्य च तोकम्' इति (पा० ३।३।१) सूत्रस्य भाष्येण केवलमेतदेव सिद्धयति नामाख्यातजमिति मतं व्याकरणे शाकटायनस्यापीति। एतेनैतत्तु कदापि न सिद्धयति यत् 'कृवापा' (उ० १।१) आदयुणादिसूत्रं शाकटायनप्रोक्तमिति।

तन्न, यस्य वैयाकरणत्वेन ख्यातस्य शाकटायनस्य सर्वं नामाख्यातजमिति मतम्, उणादिसूत्रस्य तद्रचनात्व मनङ्गीकृत्यान्यस्य तत्कर्तृत्वं प्रकरणस्याभिधानियामकत्ववादिभिः कथंकारं स्वप्नेऽपि स्वीकर्तुं शक्येत ? 'व्याकरणे शकटस्य च तोकम्' इत्यत्र 'व्याकरणे' इत्यत्र सप्तम्यन्तं पदं संकेतयति यत् 'शकटस्य तोकेन व्याकरणे सर्वं नामाख्यात-जमाख्यातमिति। एतेन निश्चप्रचम् यद् भाष्यकारस्तस्य व्याकरणस्य शाकटायनरचितस्यात्रोल्लेखं करोति, यत्र नाम्न आख्यातजत्वप्रतिपादनपरा व्याकृतिरासीत्। अन्यथा 'व्याकरणे' इति कथनं निरभिप्रायं सत् अपुष्टार्थदोष-दूषितमेव स्यात्।

व्याकरणपरिपूर्णतायै पाणिनिना यदि कोऽप्युणादिपाठः रचितः स एव पञ्चपादीत्वमापन्नः साम्प्रतमुपल-भ्यमान इति केन दृष्टम् ?

उणादयो बहुलम् (पा० ३।३।१) इत्यनेनान्यरचितोणादीनां स्वीकृतिरपि शक्यते दातुम्। आङिति ष्यदर्थ-प्रथमादिसंज्ञानामन्यदीयानां स्वीकृतिवत्।

किञ्च मघवा बहुलम् पा० ६।४।१२८ इति मघवा मघवान् इति रूपद्वयसाधनाय येन सूत्रं कृतम् स एव पाणिनिः यदि श्वन्नुक्षन् पा० उ० १।१६१ इति सूत्रं कृत्वा मघवेति साधयेत् तदा तस्य पिष्टपेषणकर्तुः प्रामाणिकत्वे सन्देह एवोदयेत। अत उणादि र्नपाणिनिरचितः इति पक्षस्य तुला एव प्रमाणभरगुर्वी दृश्यते।

पूर्वोक्तसूत्रस्य मकुरदुर्दुर (प० उ० सू० १।४०) इत्यस्य प्रामाण्येन यत्साधितं मीमांसकमहाभागेन नारायणभट्टश्लोकम् 'अकारं मुकुरस्यादौ' इत्यादिमुद्धरता मकुरदुर्दुरशब्दयोः पाणिन्यभिप्रेतत्वम् तन्मूलतया च उणादिपाठस्य पाणिनिकर्तृत्वमिति, तदपि न समीचीनम्। शब्ददर्दुरं करोति (पा० ४।४।३४) इत्यत्र सूत्रे पाणिनि-नादर्दुरशब्द एवोक्तः नतु दुर्दुर इति। अतः उणादेः पाणिनिकर्तृत्वमिति पूर्वमतस्य युक्तिविरुद्धत्वेनोपेक्षणीयत्वमेव प्रतीयते।

माघकविना भ्रातृशब्दस्य पाणिनिनिपाततत्वं यदुक्तं तन्नोणादिसूत्रमूलकमपि तु, भ्रातृपुत्रौ स्वसृदुहितृभ्याम् (पा० १।२।६८) इति सूत्रोक्तभ्रातृशब्दनिर्देशमूलकमित्यपि भवितुमर्हति। सूत्रोक्तशब्दनिर्देशात् बहवः शब्दा निपा-त्यन्ते पाणिनितन्त्रे; यथा पतित इति द्वितीयाश्रितेत्यत्र निपातनात् साध्यते, लवण इत्यत्र नन्द्यादिगणे निपातनाण्णत्वम्ः। प्रागेकादशभ्य इति निर्देशादेकादशेत्यत्रात्वम् इत्यादि।

क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घो संप्रसारणं च (प० पा० २।५९) इत्युणादिसूत्रं यदि पाणिनिकृतं स्यात् तदा क्विब्वचिप्रच्छ्यायतस्तु कटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं चेति वचनं वार्तिकरूपेण (पा० ३।२।१७८।१ वा०) कथं स्वीकृतं स्यात् ! अतः पञ्चपादी न पाणिनीयेति प्रतीयते किन्तु तत्रैव भट्टोजिदीक्षितस्य पङ्क्तिः क्विब् वची त्यादिना उणादिसूत्रेण केषांचित्सिद्धे ताच्छीलादौ तृना बाधा माभूदिति साधयति उणादिसूत्रं पाणिनिकृतम्। अन्यथा भिन्नकर्तृत्वे 'सिद्धे नियमार्थत्वकथनं कथंकारं संगच्छेत ?

इत्थमुणादिसूत्राणि शाकटायनप्रणीतानि पाणिनिप्रणीतानि वेत्यस्मिन् विषये निश्चयेन न किमपि शक्यते वक्तुम् ।

सिद्धान्तकौमुद्यामुपलभ्यमानोणादिपञ्चपादी शाकटायनप्रणीताऽस्तु पाणिनिप्रणीता वा; नानेन तस्य वस्तुतत्वे कोऽप्युत्कर्षोऽपकर्षो वा समागच्छति । चन्द्रोणादिसूत्राणामाधारः प्राचुर्येण उणादिपञ्चपादीति तयोस्तुलनया प्रतीयते । किञ्च चन्द्राचार्येण उणादिसूत्ररचनायां दशपादी पञ्चपादयोरुभयोरुणादिपाठानामाश्रयणं कृतम् एतच्च रञ्जेः (चा० ५।३।२९) इति सूत्रस्य वृत्तिग्रामाण्याद् गम्यते । तत्रोक्तम्—कथं रजनम्, रजतम्, रजः इति औणादिका एते । तथाहि रजः क्युन् (उ० द० ५।२४) पृषिरञ्जिभ्यां कित् उ० द० ६।१५ इत्यतच् उषिरञ्जिभ्यां कित् (उ० द० ९।७६) इत्यसुन् ।

इमानि सर्वाणि सूत्राणि उणादिदशपाद्यां वर्तन्ते । एषां स्थाने चान्द्रसूत्राणि इमानि दृश्यन्ते—रञ्जेः क्युन् (चा० उ० ३।६९) पृषिरञ्जेः कित् (चा० उ० २।४९) उषि रञ्जिः शुभ्यः कित् (चा० उ० ३।१०१) इति ।

अत्र चन्द्रेण स्वसूत्राणि नोद्धृतानि प्रायः, अन्यकृतशङ्कायाः अन्येन वचनेनैव समाधानसम्भवे स्ववचनौपन्यासस्यार्किंचित्करत्वं विभाव्य तेन तथाकृतमिति सम्भाव्यते ।

संक्षेपसारवत्प्रियेण लोकप्रचलितशब्दान्वाख्यानसमादरवता चन्द्रेण स्वीयोणादिपाठे पादत्रयमभ्युपगतम् नितरां प्रसिद्धाश्च शब्दा अन्वाख्याताः एवंच चन्द्रोणादिपाठः त्रिपादीति निगद्यते । तत्र च १०९० शब्दा अन्वाख्याताः ।

चन्द्रोणादिसूत्राणि (राजस्थानप्राच्यविद्याप्रतिष्ठानेन (जोधपुर) १९६७ वर्षे 'चान्द्रव्याकरणमिति ग्रन्थे प्रकाशितानि । तत्र चन्द्राचार्यस्य समस्ता व्याकरणकृतयः प्रकाशिताः सन्ति ।

अस्य मुख्यं सूत्रमस्ति उणादयः (चा० १।३।१) तस्य सूत्रस्यावयवीभूतान्यन्यानि सूत्राणि तदनन्तरं रचितानि सन्ति । तत्र प्रथमे पादे ९५ द्वितीये पादे ११९ तृतीये पादे ११४ इति संकलनया सर्वाणि ३२८ सूत्राणि दृश्यन्ते । अत्र प्रथमं सूत्रं लिखितमस्ति तस्याधस्तात्प्रत्येकमेकैकमुदाहरणमर्थनिर्देशेन सह दत्तमस्ति । सिद्धान्तकौमुद्या उणादिसूत्रे मूलेऽपि प्रत्येकं योगरूढार्थयोगार्थयोरुभयोरपि निर्देशोऽस्ति किन्त्वत्र प्रायः योगरूढार्थ एव निर्दिष्ट उपलभ्यते । उचितं चैतत् संज्ञाशब्दानां यथाकथंचिद् व्युत्पत्तिमात्रं कर्तव्यमिति चन्द्रसिद्धान्तात् ।

चान्द्रोणादिसूत्रे वर्णक्रमोऽनुसृतः शब्दान्वाख्याने । तत्र हि प्रथमम् उकारान्तास्तदनु ऊकारान्ता ततः ऋकारान्तास्ततइकारान्ता दीर्घेकारान्ता ऐकारान्ता औकारान्ता अकारान्ताः आकारान्ताः शब्दाः क्रमशः निष्पादिताः । अत्रैव प्रथमः पादः समाप्तिं गतः । प्रथमपादान्ते निर्दिष्टं 'जिनः भगवान् बुद्ध इत्यर्थनिर्देशपूर्वकं' जे नुक् च' (चा० उ० १।३५) इति सूत्रं किमपि वैशिष्ट्यमावहति । ततः पूर्वं तारेरन् (चा० उ० १।९४) तारा भगवतीत्यस्यापि सूत्रस्य महत्वमस्ति बौद्धसम्प्रदाये तारार्चिनयो नितरां श्रद्धास्पदत्वात् ।

द्वितीये च पादे प्रथमम् ककारान्तः (ककारान्तपदेन अकारस्वरविशिष्टः क एव गृहीतः नतु अकारस्वररहितः क् इति) ततः क्रमशः ख-ग-ध-च छ्-ट-ठ-ड-ढ-त-थ-ठ-थ-द-न-ण-प-फ व ब व भ-म-यान्ताः शब्दाः साधिताः । अत्रैव द्वितीयः पादः समाप्यते ।

तृतीये पादे र-ल-श-ष-स-क्ष-ष-स-हान्ताः शब्दा अन्वाख्याताः तत एको दीर्घेकारान्तस्तदनु चत्वारो दीर्घोकारान्ता स्ततश्च हलन्ता निष्पादिताः । हलन्तेषु प्रारम्भे प्राट् वाग् जगत् परिव्राट् इति चतुर्णां शब्दानां सिद्ध्युपाय-

प्रदर्शनानन्तरं हलन्तकान्तक्रमः प्रारब्धः। तदनु इत्-शतृ-कनिन्-मनिन् इमनिच् इर्वन् इस् उस् कनस् असुन् इति प्रत्ययान्ता शब्दा; निष्पादिताः।

अत्र क्रमे प्रक्रमभङ्गो दृश्यते द्वितीयपादे शमादिभ्यः अथः (चा० उ० सू० २।५३) इत्यनेन शमथ-शपथा-वसथ-वदथ-रवथ-गमथ-जीवथ-प्राणथाभरथ-वेदथ-शब्दान् संसाध्य ततः सूत्रं कृतम् रमिकुशि-काशिभ्यः क्थन् (चा० उ० सू० २।५४) तेन रथः—स्यन्दनम्, कुष्ठः व्याधिः, काष्ठम्-इन्धनम्, इति निष्पाद्य अवात् भृञः (चा० सू० २।५५) अवभृथः यज्ञावसानम् इति थान्तं संसाध्य ओष्ठकोष्ठौ उषिकुषिगार्तिभ्यः थन् (चा० उ० सू० २।५६) इति निष्पाद्य तेनैव गाथार्थशब्दौ निष्पाद्य जरूथवरूथशब्दप्रकरणे विष्ठाशब्दः संसाधितः परिनिष्ठितशब्दानधिकृत्य विचारे कृतेऽत्र क्रमभङ्गो वस्तुतः दृश्यत एव तथापि प्रत्ययदृष्ट्या क्रमः परिपालित एव, प्रत्ययस्तु सर्वत्र तादृश एव यत्र थकारोऽन्ते वर्तिष्ठते। ठकाररूपोविकारस्तु प्रकृतिजः कुषि काशि उषिकुषिगतशकारषकाराभ्यां सह संयोगाज्जातः, किन्तु थकारान्त-प्रकरणादनन्तरं दकारान्तप्रकरणमवश्यं प्रक्रमभङ्ग शब्दस्योदाहरणम्।

'नान्त' शब्दप्रकरणेऽपि नान्तणान्तयोः सम्मिश्रणमिव दृश्यते। किन्तु तत्रापि 'णकारः नकारज एव रेफ-षकारऋकारनिमित्तजः। अतो नात्र क्रमभङ्गः।

द्वितीये पादे एव बकारान्तशब्दप्रकरणम् अस्तव्यस्तप्रक्रमे विलोक्यते। 'गुरेः फक् (चा० उ० सू० २।८६) इति सूत्रेण गुल्फेतिफान्तशब्दसाधनानन्तरं बकारान्तशब्दक्रमे प्रारब्धव्ये गृभृभ्यां वः (चा० उ० सू० २।९०) इति गर्वशर्वादयः शब्दा वकारान्ता उक्ताः। २।९१-२।९२ इति संख्यकाभ्यां सूत्राभ्यां साधिताः अश्वलट्वाकण्वखट्वा-विश्वशिवसर्वशब्दा वान्ता एव सन्ति 'शिवादय (२।९२) इति सूत्रोदाहरणे शिवसर्वजिह्वाग्रीवेति वान्तान् शब्दान् विहायान्ये उल्बशुल्वनिम्बबिम्बशम्बस्तम्बशब्दा बान्ताः पठिता इत्थं चन्द्रस्य बवयोरभेदज्ञानं महद्दूषणम् अथवा उभयेषां तादृशानां साधनाय समाननियमताप्रयुक्तं सम्मिश्रणमिति न शक्यते स्पष्टतया निर्धारयितुम्।

बहूनां शब्दानां साधने प्रक्रियाभेदः तत्प्रतिपाद्यार्थभेदश्चात्र दृश्यते। यथा—

ययीपयीशब्दयोः साधनाय पञ्चपाद्या यापोः किद् द्वे चेति उ० ३।१५९ सूत्रं दृश्यते वातप्रमीसाधनाय पृथक्सूत्रमस्ति वातप्रमीः (उ० ४।१) किन्तु चान्द्रत्रिपाद्याम् 'अवी आदयः १।९० इति सूत्रेण तत्सिद्धिर्दर्शिता। चान्द्रोणादित्रिपाद्यां निर्दिष्टा अर्थभेदाः दृश्यन्ताम्।

पञ्चपाद्यां यथार्थां निर्दिष्टाः	त्रिपाद्यां निर्दिष्टार्थाः
चाटु प्रियं—	चाटुः
वाक्यम् उ० १।३	स्फुटवादी १।२
वयः बाल्यादयः ४।१८९	वयः शरीरम् (३।१००)
महत् महान् २।८४ मह्यते पूज्यते इति महान्	महत् महायानम् ३।७७
विधुः विशेषेण धयन्त्येनं सुरा इति विधुश्चन्द्रः उ० १।२२	विधुरग्निः १।१३
त्सरूः खड्गमुष्टिः स्यात् (अ० को० २।८।८९)	त्सरुः दण्डदण्डः १।२१
त्सर् छद्मगतौ (उ० १।७)	

आगोऽपराधो मन्तुश्च (अ० को० २।८।२६, मन्तुः (उ० १।७१) मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ (मेदि० ५७।४३)	मन्तुः प्रजापतिः १।२४
होता ऋत्विग्भेदः अध्वर्युः उ० २।९५	होता विष्णुः १।५०
वल्लिः वल्ली तु व्रतति र्लता अ० को० २।४।९ (उ० ४।११८)	वल्लिः शाखा १।५१
	शण्ठः[1] महिषचौरः २।३५
रण्डा मूषिकपण्यां च विधवायां च योषिति (मे० ४२।२३) उ० १।११४	रण्डा अप्रसवा २।३९
शण्डः वर्षवरः (अ० को० २।८९ उ० १।१९)	शण्डः अप्रसवः २।४१
रजतम् हेम्नि रूप्येऽपि । अ० को० ३।३।७९ उ० सू० ३।१११	रजतम् रूप्यम्
वशा वन्ध्या सुता योषा स्त्रीगवीकरिणीषु च (वि० को० १६७।७२) (पा० ३।१।१३५) वन्ध्या स्यादप्रजः)	वन्ध्या कुलटा २।११०
भीष्मो रुद्रे च गाङ्गेये । उ० १।१४५ हैम० को० २।३३५	भीष्मः कुरुपिता २।१०४
धीरो मनीषी प्राज्ञो ज्ञः संख्यावान् पण्डितः	धीरः मत्स्यघाती ३।११
कविः अ० को० २।७५ (पा० ३।२।१८० वा०)	मीरः[1] जलम् ३।१२
	चत्वरः[1] उपस्थः ३।१६
सूत्राणि नरि तन्तवः (अ० को० २।१०।२८ उ० १।६३	सूत्रम् कल्याणम् ३।३७
कृतान्तः कीनाशः उ० ५।५६ क्षुद्र कर्षकश्च । (अ० को० ३।३।२१५)	कीनाशः कृपणः ३।५६
भित्तं शकलखण्डे वा अ० को० १।३।१६	शकलम् अस्थि ३।४७

यजेः शश्च (चा० ३।१०३) इति सूत्रेण यज् धातोः असुन् प्रत्यये जः शादेशे यशः कीर्तिरिति साध्यते। पञ्चपाद्याम् 'अशेर्देवने युट् च (उ० ४।१९१) इत्यनेन अश्नुते व्याप्नोति इत्यर्थे अशूधातो र्युडागमेन असुन् प्रत्ययेन च यशः शब्दः साधितः।

हिरण्यं बौद्धस्य चन्द्रगोमिनः कृते त्याज्यमासीत्। अतस्तेन 'हः हिर् च' २।११६ इत्यनेन ओहाक् त्यागे इति ओहाङ् गतौ इत्यत्र च निर्दिष्टात् हाधातोः अण्यच्प्रत्ययेन हाप्रकृतेर्हिरादेशेन च साधितम्। तेन तस्याऽर्थो भवति गत्वरो (नश्वरो द्रव्यविशेषः) त्याज्यश्च सः। किन्तु पञ्चपाद्यां' हर्यतेः कन्यन् हिरच् (सि० को० उ० पृ० ६४४)

---

१. एषां सिद्धिरर्थश्च उणादित्रिपाद्यां नोल्लिखितौ। अत एषा नूतन-शब्दसिद्धिः।

इति हर्यगतिकान्त्योरिति हर्यधातोः कन्यन् प्रत्यये धातोर्हिरजादेशे हिरण्यमिति साधयति। तेन गतिशीलकान्तिमान् पदार्थविशेष इति तदर्थः। एतादृशप्रकृतिभेदकल्पनायां सम्प्रदायविशेषोऽपि कारणम्।

चान्द्रे उणादिपाठे केवलं नाम्नां सिद्धिप्रयत्नो दृश्यते पञ्चपाद्यां तु अव्ययसर्वनाम्नामपि साधनायास उपलभ्यते।

यथा	प्रातेरुरन् (सि० कौ० पृ० ६४५) प्रातः	अव्ययम्)
	अमेस्थुट् च (सि० कौ० पृ० ६४५) अन्तः (मध्यम्)	(अव्ययम्)
	इन्देः कमि र्नलोपश्च (सि० कौ० पृ० ६३७) इदम्	(सर्वनाम)
	कायते डिमिः (सि० कौ० पृ० ६३७) किम्	(सर्वनाम)
	त्यजितनियजिभ्यो डित् (सि० कौ० उ० पृ० ६०३)	
	त्यद्, तद्, यद	(सर्वनाम) इति

चान्द्रे केवलम् सर्वमिति शिवादयः (चा० उ० २।९२) इति सूत्रेण साधितम्।

यथा पञ्चपाद्या उणादेः कर्तृत्वेऽनिश्चयस्तथा न त्रिपाद्या श्चन्द्ररचनात्वे। चान्द्रव्याकरणेऽन्तः साक्ष्योपलब्धेः। तथाहिः—

(तत्रान्तःसाक्ष्याणि)

(१) उणादयः १।३।१ इति सूत्रेण 'के उणादयः' इतीदृशोत्थितजिज्ञासाशान्तये उणादिरचनाया आवश्यकत्वम्। तज्जिज्ञासाशान्तये कृवापा (चान्द्र-१।१) इत्यादीनि सूत्राणि लिखितानि।

(२) नेमिरित्यौणादिकः १।६४।

अतएव चक्रिसस्निजज्ञयः १।२।११५ इति सूत्रे नेमिरिति न निपातितः। अन्यथा भाषायां घाञ्कृसृजनिनमिभ्यः (पा० ३।२।१७१-३) इति वचनस्थानापन्नतया नेमिरितिसाधनायावश्यं यत्न आस्थेयः। एतेन ज्ञायते यस्य चन्द्रस्य १।२।११५ इत्यङ्काङ्कितं सूत्रं तस्यैव १।६४ इत्यपि सूत्रम्। एकस्यैवोभयं सूत्रं यदा स्यात् तदैव तेन तत्रैतत्संसाधितमतोऽत्र साधनाय यत्नः न कार्य इति तस्य ज्ञातं स्यात्।

(२) प्रश्नाख्यानयोरिञ् च (चा० १।३।९२) इति सूत्रस्य वृत्तौ कथं वापिः वासिरित्यौणादिक इः (१।५६) कथमाजिः आतिरिति औणादिक इः (१।५७)। एतदपि सूत्रकारस्य चन्द्रस्यैव उणादिरपि कृतिरिति साधयति। रेफशब्दस्यौणादिकत्वं स्वीकृत्य 'रादिफ' इति पाणिनीयतन्त्रवार्तिकप्रत्याख्यानमपि उणादेः चन्द्ररचनात्वं साधयति। कथमन्यथा तत्प्रत्याख्यानं कुर्यात्। न कोऽपि सचेता अन्यस्य धनेन स्वं धनवन्तं समाजे ख्यापयति।

अम् प्रत्याहारो यथा चान्द्रव्याकरणे यरो अमि अम् वा (६।४।१४०) इत्यत्र प्रयुक्तस्तथा उणादिसूत्रेऽपि अमन्ताड्ड (चा० उ० २।३९) इत्यत्रापि।

शीलसाधु धर्मेषु तृन् चा० १।१।८९ इति सूत्रवृत्तौ कथं होता पोता नेष्टा त्वष्टा क्षत्तेति औणादिका एवेतै (उ० १।५०) इत्युक्तम्।

यो यङः (चा० १।३।१२३) इति सूत्रे वृत्तौ भ्राज भास.....(पा० ३।२।१७७-१८८) इत्यादीनि सूत्राणि वचिप्रच्छ्यायत...(पा० ३।२।१७८ सू० वा० २-४) इत्यादीनि वार्तिकानि प्रत्याख्यातुं चन्द्राचार्येण स्वरचितोणादि-

---

१. रातेः इफः चा० उ० २।८८।

सूत्राणि शरणीकृतानि । तत्रोक्तम्:-वाक् प्राट्.....जूरित्यौणादिकाः (उ० ३।६९) विभु.....मितद्रुरित्यौणादिकाः १।२१ इति ।

उणादावपिकृतः प्रत्ययेषु चकारानुबन्धो नकारानुबन्धश्च स्वरप्रकरणस्य चान्द्रव्याकरणे सत्तां संकेतयतः यथाः—इमनिच् (चा० उ० ३।८३) सूत्रे चानुबन्धः । ऋ-पृ-वपि-यजि-धनि-त्रयेनित् (चा० उ० ३।९२) इत्यनेन डसि प्रत्ययो विधीयते तस्य निद्वद्भावो विधीयते । पूर्वत्र चानुबन्धस्य उत्तरस्य निद्वद्भावविधानस्य च फलं चित्त्वा दन्तोदात्तात् नित्त्वादाद्युदात्तान्नान्यत् किमपि दृश्यते । एवमेव 'चक्षेः डसिन्' (चा० उ० ३।९४) 'असुन्' (चा० उ० ३।१००) इत्यनयोरपि नकारानुबन्धस्य फलम् आद्युदात्तमेव भवितुमर्हति । अतः उणादिरचनयाऽपि साध्यते यत् 'चितः' (पा० ६।१।१६३) ञ्नित्यादि नित्यम् (पा० ६।१।१९७) इतिसूत्रवत् किमपि सूत्रं चान्द्रेऽपि भवेत् ।

चतुर्थोऽध्यायः

(च) चान्द्र धातुसूत्राणि

धातुः शब्दस्य हृदयम्। 'सर्वाणि नामानि आख्यातजानि' इति प्रस्तावो वैयाकरणस्य महासाहसं प्रकटीकरोति। धारणाद्धातुरुच्यते अथवा दधाति विविधं शब्दरूपं यः स धातुः इति चन्द्राचार्येण धाञ्धातोस्तुन् प्रत्ययेन धातुशब्दः साधितः अर्थं च प्रदर्शयतोक्तं तेन धातुर्लौहादिः तत्रादिपदेन ताम्रादीनां ग्रहणम्। लौहादिवत्सारवत्त्वाद् भूगमादयोऽपि धातव उच्यन्ते। विधातृधातृधात्रीशब्देष्वपि धाञ् एव प्रकृतिः। विधाता धाता वा सृष्टिं रचयति धात्री (मातोपमाता च) जनयति पालयति चापत्यम् तथैव धातुरपि शब्दान् जनयति। सांख्यमतेन मूलभूता प्रकृतिरेव यथा सर्वं करोति अतएव प्रधानमुच्यते। 'प्रधानं प्रकृतिः स्त्रियाम्' तथैव व्याकरणतन्त्रे मूलभूता प्रकृति र्धातुरेव सृष्टिकर्ता प्रधानं चेति निगद्यते। यः खलु 'सर्वाणि नामान्याख्यातजानीति न मन्यते 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति वा यस्य मतं, तेनाऽपि धातुः शब्दानुशासने प्रधानं स्वीक्रियत एव। व्यापारमुख्यविशेष्यकशाब्दबोधं, व्यापारं च धात्वर्थं स्वीकुर्वद्भि र्वैयाकरणैर्भाषायां धातोः प्राधान्यमङ्गीकृतमेव। वाक्ये तिङः सद्भावस्यानिवार्यता बोधकम् एकतिङ्वाक्यमितिव्यापारप्रधानशाब्दबोधप्रत्यायकम्, भावप्रधानमाख्यातमिति च धातोरेव प्रकारान्तरेण प्राधान्यसूचकम्। 'धातुसूत्रगणोणादिवाक्यलिङ्गे' त्यत्रापि सर्वप्राथम्येन पठितो धातुशब्दस्तत्प्राधान्यमेव गमयति।

इत्थं व्याकरणे धातुपाठो यावन्न निर्मीयेत, तावद् व्याकरणरचनाऽपूर्णैव भवेदिति कृत्वाऽत्र देशे धातुपाठपरम्पराऽतिप्राचीनतमेति गम्यते।

शब्दे धातोः सत्तागवेषक इन्द्राचार्यः इति 'वाग् वै पराच्यव्याकृता वदत्'.....तामिन्द्रो मध्यतो विच्छिद्य व्याकरोत् इति तैत्तिरीयवाक्यादव[1]गम्यते। व्याकरोदिति शब्दसूचित व्याकरणं (प्रकृतिप्रत्ययविभागः) धातुं विनाऽसम्भवम्। अतो धातुपाठस्य प्रथमोद्भावकत्वेनेन्द्रस्य स्वीकृतौ न कापि बाधा।

भागुरेरपि कोऽपि धातुपाठ आसीदिति जगदीशतर्कालंकारकृतशब्दशक्तिप्रकाशिकायाम् (पृ० ४४७ चौख० सं०)

गुपू धूप-विच्छि-पणिपने रायः कमेस्तु णिङ्।
ऋतेरियङ् चतुर्लेषु नित्यं स्वार्थे परस्य वा॥ इति भागुरिस्मृतेः।
गुपो वधेश्च निन्दायां क्षमायां च तथा तिजः
प्रतीकाराद्यर्थकाच्च कितः स्वार्थे सनो विधिः॥ इति भागुरिस्मृतेः।

इति श्लोकद्वयेन सह प्रोक्तेन भागुरिस्मृतेः इति पदेन ज्ञायते।

किन्तु भागुरे र्धातुपाठस्य किं स्वरूपं कश्चाकार इति तदनुपलम्भान्न ज्ञायते। अतः उपलभ्यमानेषु धातुपाठेषु काशकृत्स्नः धातुपाठ एवादिम इति स्वीक्रियते तावत् यावन्नोपलभ्यते कोऽप्यन्यः धातुपाठः।

---

१. सं० ६।४।७।

पूनादक्खनकालेजप्रकाशनप्रयासेन दुर्लभोऽयं धातुपाठः चन्नवीरकृतकन्नडटीकासहितः प्रकाशितः। अत्र धातुपाठे कन्नडटीकायां च काशकृत्स्नव्याकरणस्य १३० सूत्राणामुपलब्ध्या व्याकरणशास्त्रस्य पाणिनिपूर्वेतिहासे नूतनः प्रकाशो लब्धः। तस्य च प्रकाशनं श्रीमीमांसकमहाभागेन देवनागरीलिप्यां कन्नडटीकायाः संस्कृतरूपान्तरेण सह विहितम्।

अत्र युधिष्ठिरमीमांसकाः—

चन्द्रगोमिना स्वधातुपाठः काशकृत्स्नधातुपाठं प्राधान्येनानुसृत्य रचितः[1] चन्द्राचार्येण प्रतिगणं प्रथमम् अतङाना (परस्मैपदिनः) धातवः पठितास्ततस्तङानिनः (आत्मनेपदिनः) ततश्चान्ते विभाषिताः उभयपदिनः) इति अयमेव क्रमः काशकृत्स्नधातुपाठे उपलभ्यते। अतश्चान्द्रधातुपाठः काशकृत्स्नधातुपाठानुकरणम् इत्याहुः।

काशकृत्स्नो हि पाणिनेः पूर्ववर्तिनआपिशलेरपि पूर्वपर्त्तीति प्रमाणितमेव। अतश्चन्द्रेण स्वधातुपाठरचनायां यदि काशकृत्स्नोऽनुकृतः नात्र किमपि कालपौर्वापर्यप्रयुक्तं दूषणम् इति।

परन्त्विदं मतं न युक्तियुक्तं प्रतिभाति। निम्नलिखितानां विरुद्धयुक्तीनामुपलब्धेः। तथाहि—

१—काशकृत्स्नधातुपाठे नवैव गणाः सन्ति। जुहोत्यादेरदादिगणान्तर्गणत्वेन पठनात्। चान्द्रे धातुपाठे दश गणाः दृश्यन्ते। जुहोत्यादिगणस्तृतीयो गणो द्वितीयाद् गणाददादेः पृथक् पठितः। पाणिनीये च दश गणाः अदादि-जुहोत्यादी द्वितीयतृतीयगणौ तथैव दृश्येते यथा चान्द्रे। अतो यथा चान्द्रव्याकरणस्य सूत्र-वर्णसूत्रपरिभाषासूत्रादीनि पाणिनीयकात्यायनपतञ्जलिवचनाश्रितानि तथैव धातुपाठोऽपि पाणिनीयतन्त्राश्रित इति मन्तव्यम्।

२—काशकृत्स्नधातुपाठे ईड् ईल् स्तुतौ (का० धा० २।४१) इति डान्तो लान्तश्चोभयथा पठ्यते। पाणिनीये चान्द्रे च (पा० धा० २।६ चा० धा० २।३६) ईडस्तुतावित्येकविधो डान्त एव। एवमेव काशकृत्स्ने यजइज (का० धा० १।६६६,४२५) इत्युभयरूपो धातुरूपलभ्यते। पाणिनीये यजि १।१०२७) रेवपठितो न इजिः, चान्द्रेऽपि यजि (१।से३० रस्ति इजि नं। बहुरूपता अविकासस्य लक्षणम्, अद्वैतो विकासस्य। अविकसितावस्था च प्रथमावस्था विकासिता च द्वितीया इति विकासवादसिद्धान्तानुसारेण काशकृत्स्नस्य प्राचीनत्वे सिद्धेऽपि चान्द्रधातुपाठस्य न तदनुकरणपरत्वं सिद्धचति, निरुक्तयुक्तिवैषम्यात्। पाणिनीयेन च धातुपाठेन सहोक्तसाम्यादत्र पाणिनीयधातुपाठ एवाधार इति कल्पयितुं मनः किमपि साक्ष्यं प्राप्नोति।

३—सिंहसिंहिकादिशब्दानां साधनाय काशकृत्स्ने धातुपाठे षिहि हिंसायाम् (का० धा० १।३१६) इति षिहि धातुः पठितोऽस्ति। पाणिनीये हिंसि हिंसायाम् इत्यस्य कृतनुमः वर्णव्यत्ययेन सिंहादिरूपं साध्यते। (हिंसेः सिंहः (महा० भा०) हयवरट् सू०) चान्द्रं चेदं रूपं 'सिचेः कन् डम् हौ च (चा० उ० सू० ३।६७) इति सूत्रेण सिच् धातोः (चा० धा० ६।१२) निष्पादितम्।

अतो नात्र काशकृत्स्नस्य नवा पाणिनेरनुकरणं दृश्यते।

४—पाणिनीयधातुपाठेऽनुपलब्धा बहवो लोके वेदे च प्रयोगमागता धातवः काशकृत्स्ने दृश्यन्ते पठिताः तद् यथाः—

(क) अथर्वशब्दस्य मूलभूतो धातुः 'थर्व (का० धा० १।२०४) इत्यत्र हिंसार्थे पठ्यते।

(ख) हिन्दी भाषायामन्वेषणार्थे प्रयुज्यमानाया 'ढूढ़ना' क्रियाया मूलो ढुढिधातुः (का० धा० १।१६१) अत्र पठ्यते। 'ढुण्ढिराजस्य गणेशस्य नामान्वर्थतां प्रदर्शयता व्यासेन स्कन्दपुराणस्य काशीखण्डे लिखितम्।

---

२. सं० व्या० शा० का इति भाग २ पृ० २६।

अन्वेषणे ढुण्ढिरयं प्रथितोऽस्तिधातुः सर्वार्थढुण्ढितया तव ढुण्ढि नाम[1] ।

अयं ढुण्ढिधातुर्न पाणिनीये न वा चान्द्रे धातुपाठे उपलभ्यते ।

५—मृधातुः काशकृत्स्ने धातुपाठे परस्मैपदप्रकरणे पठितः । न चान्द्रे न वा पाणिनीये तथा दृश्यते । अतो नानयोर्धातुपाठयोराधारः काशकृत्स्नो धातुपाठो भवितुमर्हति । यत्तु मीमांसकमहाभागेनोक्तम्:—हिन्दीभाषायां प्रयुज्यमाना 'मरता है' क्रियापि काशकृत्स्नधातुपाठस्थपरस्मैपदिमृधातोः 'मरति' इति रूपस्यैव; न तु म्रियते इत्यस्य' इति तदपि भाषावैज्ञानिकपरिवर्तनेतिहासाननुकूलमेव, प्राकृते सौकर्य्यात् सर्वेषां धातूनां प्रायः परस्मैपदित्वेन भूवादित्वेन चैव प्रयोगः समजायत । ततः अपभ्रंशे 'मरति' इति प्राकृतप्रयोगस्यैव परिवर्तनं दृश्यते, हिन्द्यां च तत्परिवर्तनस्यैव समापतनसंभावनेति । तथाच साक्षात् संस्कृतशब्दस्य 'मरति' इत्यस्य कल्पनां विना 'मरता है' इति क्रिया हिन्द्यामसम्भवेति स्वीकृतिर्युक्तिविरुद्धा । यदा 'वर्धते' श्रूयते इत्यादेः परिवर्तनपरम्परायां 'बढता है' सुना जाता है इत्यादि-सम्भवति तदा 'मरता है' इत्यस्य तथाकथितेन प्राकृतेन पथाऽऽगमने का रेका ? अस्तु ।

६—पाणिनिश्चन्द्रश्च वद्धातुं केवलं परस्मैपदं मन्येते । अतो भासनाद्यर्थविशेषेषु आत्मनेपद (तङान) विधानार्थं भासनोपसंभाषा (पा० १।३।४७) ज्ञानयत्नो (चा० १।४।९३) इत्यादिकं सूत्रविशेषो विरच्यते । काशकृत्स्नस्तु वदिमुभयपदिनं पठति ।

एवमेव पाणिनिचन्द्रधातुपाठपठितं वसनिवासे टुओश्वि गतिवृद्धयोः (पा० धा० १।१०३०,१।१०३५) चा० धा० १।६२६, १।६३८) इति परस्मैपदिधातुद्वयं काशकृत्स्ने उभयपदित्वेन पठितम् ।

काशकृत्स्नधातुपाठे बहवः धातव एतादृशा उपलभ्यन्ते, येभ्यः बहूनि प्रचलितानि नामानि विनालोपागमवर्णविकारविधायकं सूत्रं सिद्धचन्ति यथा 'नौ' शब्दसाधनाय 'णौ प्लवने' (का० धा० १।४२७) धातुर्वर्तते यतः केवलेन क्विप्प्रत्ययकरणेन नौरिति सिद्धचति । पाणिनिस्तथाविधं धातुं न पठति । अतः तत्साधनाय ग्लानुदिभ्यां डौः (पं० पा० उ० सू० २।६५) इति सूत्रेण डौप्रत्ययविधानपूर्वकडित्वसामर्थ्यमूलकटिलोपयत्नो विधीयते । चान्द्रेऽपि दृश्यते ग्लानुरिभ्यां डौः चा० उ० सू० १।९३ इति ।

एतादृशवैषम्यं काशकृत्स्ने, चान्द्रे च धातुपाठे दृष्ट्वाऽपि कश्चान्द्रं धातुपाठं काशकृत्स्नधातुपाठाऽनुकरणं वक्तुमिच्छेत् ? ।

नच चान्द्रे काशकृत्स्न इव प्रतिगणं क्रमशः परस्मैपदात्मनेपदोभयपरधातुव्यवस्थापनम् उपमेयस्योपमानानुकरणं साधयतीति वाच्यम् एतादृशव्यवस्थायां लाघवप्रियस्य चन्द्रस्य बुद्धिविलास एव कारणमिति सम्भाव्यते । यश्चन्द्रः पाणिनिकात्यायनपतञ्जलिप्रोक्तानि सुविचिन्त्य नीरक्षीरविवेकिन्या प्रतिभया ततः विहितपरिष्कारसंस्कारं सारं गृहीत्वा स्तुत्यं शब्दलक्षणं प्रोक्तुं प्रभवति, स किं पाणिनीयधातुपाठं स्वधिया व्यवस्थया वर्गीकृत्य प्रस्तोतुं नार्हति ?

पाणिनिधातुपाठे परस्मैपद्यात्मनेपद्युभयपदिनां त्रिविधानामपि धातूनां प्रतिगणं प्रतिवर्गं च संमिश्रितपाठे प्रतिपदक्रमम् "अथात्मनेभाषाः" अथ परस्मैभाषा 'अथोभयभाषाः' इत्यधिकारवचनस्य क्रियासमभिहारेणानिवार्यतया करणं गौरवावहं श्रोतुरध्येतुश्च पुनरुक्तयोद्वेजकं दूषणं परिहर्तुं तथा वैज्ञानिकं लघुविस्पष्टं च वर्गीकरणं विहितं चन्द्राचार्येणेति मन्ये । इत्थं चान्द्रधातुपाठस्य आधारः पाणिनीयधातुपाठ एव संस्कारश्च चान्द्रः । पाणिनीयधातुपाठं स्वधिया संस्कृत्य वर्गीकृत्य च चन्द्राचार्येण स्वधातुसूत्राणि रचितानीति सिद्धम् ।

१, युधि० मी० व्या० शा० इ० २१ ।

यदप्युक्तं 'चन्द्रेण प्रतिगणं काशकृत्स्नमनुकृत्य क्रमशः 'अतङानाः' 'तङानिनः' 'विभाषिता'श्च धातवः पठिता इति तदप्ययुक्तमेव, व्यभिचारदर्शनात् चान्द्रधातुपाठे प्रथमगणस्यान्ते 'वस वद टुओश्वि' धातूनाम् (१।६३६६३८) अतङानिनां पाठदर्शनात् । ततः पूर्वं च विभाषितानां पाठोपलब्धेः । तृतीयगणान्ते माङ्ओहाङ् इति (३।२०-२१) तङानिनौ पठितौ । पञ्चमे पूर्वं ६ विभाषिताः ततः चतुर्दश (१०-२३) अतङानाः ततौ द्वौ (२४-२५) तङानिनौ-पठितौ । षष्ठेऽपि गणे प्रथमं १२ विभाषिताः, ततः ८१ अतङानाः, (१३-९३) ततः सप्ततङानिनः (९४-१००) ततः षट् (१०१-१०६) अतङानाः ततश्च द्वौ (१०७-१०८) तङानिनौ ततश्च गणान्तपर्यन्तम् २३ धातवः (१०९-१२१) अतङानाः पठिताः दृश्यन्ते ।

सप्तमेऽपि गणे प्रथमं नव विभाषिताः (१-९) ततः २१ अतङानाः (१०-२०) तत स्त्रयः (२१-२३) तङानिनः प्रोक्ताः ।

अष्टमेऽपि गणे प्रथमं सप्त विभाषिता एव दृश्यन्ते ततः द्वौ (८-९) तङानिनौ । नवमेऽपि चतुर्दश विभाषिताः १-१४) ततः ५३ अतङानाः (१५।४७) ततश्च एकः तङानी पठिताः,

इत्थं काशकृत्स्नक्रमस्य सर्वतो मुखव्यभिचारदर्शनात् कोहि चान्द्रं धातुपाठं तदनुकरणं वक्तुमुत्सहेत ?

अथ च चन्द्रेण भूवादयोधातवः (पा०१।३।२) इति सूत्रमनुकृत्य प्रथमस्य गणस्य नाम भूवादिरिति दत्तम् । इकां यण्भि व्यवधानं व्याडिगालवयोरिति नियमानुसारेण यणादेशेन सह यण्व्यवहितरूपमपि व्यम्बकम् इतिवद् भ्वादिरिति भूवादिरिति सिद्धे रूपद्वये चन्द्राचार्येण भूवादिरित्येव गृहीतं प्रथमगणस्य नामकरणे[1] काशकृत्स्ने च प्रथमगणस्य नामकरणं भ्वादिरिति यण्घटितमेव दृश्यते ।

चन्द्रेण यथा परिभाषापाठस्य स्थाने परिभाषासूत्राणि 'शिक्षा' स्थाने वर्णसूत्राणि च लिखितानि तथैव धातुसूत्राणि लिखितानि । अतः धातुसूत्रगतानामर्थनिर्देशपरकाणामपि शब्दानां प्रामाण्येन बहवः शब्दा निपातिताः ।

'याच्ञा', 'स्वप्न', 'यम', 'रम', 'चिन्ता' प्रभृतीनां शब्दानां निष्पत्तये 'टुयाच् याच्ञायाम् (चा० धा० १। ५९१) शीङ् स्वप्ने (चा० धा० सू०२।५१) अड उद्यमे (चा० धा० १।१३१) यम उपरमे (चा० धा० १।२९६) स्मृ चिन्तायाम् (चा० धा० सू० १।२६५) इत्यादिषु पठितानां याच्ञादिशब्दानां निपातनबलं सदुपयुक्तम् ।

धातुपाठोऽपि चन्द्रस्यैव रचनेत्यत्र प्रमाणानि प्रस्तूयन्तेऽधस्तात् (क) यजयाजयतविच्छप्रच्छरक्षो नङ् (पा० ३।३।९०-९१) स्वपो नन् इति सूत्रद्वयस्य स्थाने विच्छरक्षो नङ्० १।३।७०, इति सूत्रं कृत्वा याच्ञा, स्वप्नः प्रश्नः यज्ञः यत्नः इत्येते कथं सिद्धयन्तीत्याशङ्क्या टुयाचृ याच्ञायाम् (चा० धा० सू० १।५९१) शीङ् स्वप्ने (धातु सू० २।५१) प्रश्नाख्यानयोरिञ् च (चा० सू० १।३।९२) यज्ञे संस्तावः (१।३।२३)···यत्नकथोपयोगेयु १।४।७८ इत्येतेषु निपातनात् सिद्धयन्तीत्युक्तम् । एतेन धातुपाठे अर्थनिर्देशाय प्रयुक्तस्य शब्दस्य प्रामाण्याभ्युपगमात् सूत्रकर्तुरेव सोऽपि ग्रन्थ इति ध्वन्यते ।

(ख) पाठे विभाषितात् १।४।१२५ इति सूत्रं धातुपाठे विभाषिततङानेभ्यः फलवति कर्तरि तङानौ करोति । एतेन धातुपाठस्य सूत्रस्य च समानकर्तृत्वं सिद्धयति अथ च धातुपाठस्य निर्माणं सूत्रपाठस्य निर्माणात् प्राक्कालिकमिति सिद्धयति । 'विभाषिताः' इति वर्गविशेषे प्रथमंधातून् पठित्वा तदनन्तरं पाठे 'विभाषितात्' (१।४।१२५) इति सूत्रं कृतं भवेत् ।

---

१. इति भूवादयः समाप्ताः चा० व्या० धा० पाठ पृ० ११३ भूवादित्वान्न दीर्घत्वम् । चा० व्या० १।१।८८ सूत्रस्य वृत्तौ ।

(ग) यमरमेत्यनयोः सिद्धिः धातुपाठपठितार्थनिर्देशकोद्यमोपरमशब्दगतयमरमेतिनिपातनात् कृता। 'कथम् उद्यम उपरम इति, 'अड उद्यमे' 'यमउपरमे' (धातु सू० १।२३१,२९६) इति निपातनात् सिद्धम् इत्युक्तं वृत्तौ[1]।

(घ) चन्द्रेण स्मृ चिन्तायाम् (चा० धा० सू० १।२६५) इति निपातनात् चिन्ताशब्दं संसाध्य 'कुम्बिच-चिभ्याम्' (चा० १।३।८८) इत्येव सूत्रं कृतम्। 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (प्रा० ३।३।१०५) इति सूत्रे पूजिकथि-भ्यां सह चिन्तिग्रहण च प्रत्याख्यातम्। तत्र पूजा शब्दः 'पूजायां स्वतेः' (चा० सू० ४।४।५४) इति सूत्रे पूजायामित्यत्र निपातनात्, 'कथा' शब्दश्च सूचनाक्षेपणसेवासाहसयत्नकथोपयोगेषु (चा० सू० १।४।७८) इत्यत्र कथेति निपातनात् यथा साधितौ तथैव चिन्ताशब्दः 'स्मृ चिन्तायाम्' (चा० धा० पा० १।२६५) इति धातुपाठगत धात्वर्थनिर्देशक चिन्तेति निपातनात् साधितः। एतेन सूत्रपाठवत् धातुपाठस्य प्रामाण्यम् सूत्रकारस्य धातुपाठकर्तुश्च तादात्म्यं प्रतीयते।

(ङ) (चा० सू० १।१।७५) सूत्रस्य वृत्तौ यदुपलभ्यते 'अनेकार्था हि धातवः' इति तत् धातुपाठस्यान्ते लिखितस्य—

'क्रियावाचित्वमाख्यातुमैकैकोऽर्थः प्रदर्शितः।
प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातवः॥

इत्यस्य श्लोकस्यान्तिमचरणरूपत्वेनोपलभ्यते धातुपाठे (द्र० चा० धा० पा० पृ० १२६)। एतेन तत्सूत्रम् वृत्तिः धातुपाठश्च चन्द्रकृतमिति सिद्धमेव।

भूवादयो धातवः (पा० सू० १।३१) पुषादिद्युतादि०० (पा० ३।१।५५) किरश्च पञ्चभ्यः (पा० ७।२।७५) शमामष्टानां दीर्घः श्यनि (पा० ७।३।७४) इत्यादि-सूत्राणि, ङ्वितः क्त्रिः (पा० ३।३।८८) ट्वितोऽथुच् पा० ३।३।८९ इरितो वा (पा० ३।१।५७) ०००० लृदितः परस्मैपदेषु (पा० ३।१।५५) इत्यादीन्यनुबन्धप्रयुक्तकार्यविधायकानि सूत्राणि धातुपाठस्य, धात्वनुबद्धानां च तत्तदनुबन्धानां पाणिनिकर्तृत्वं (प्रोक्तत्वं) प्रामाणयन्ति तथैव अदादिभ्यो लुक् (चा० १।१।८३) तनादिभ्य उः (चा१।१।९४) लृदिद्दुयुतादिपुष्यत्यादिभ्यः (चा०१।१।७३) जक्षित्यादिभ्यः पञ्चभ्यः (चा० सू० १।४।५) फणादीनां सप्तानाम (चा० ५।३।१२१) इत्यादिधातुपाठाश्रितानि सूत्राणि, 'ञितः' (चा० १।४।१२६) ट्वितोऽथुच् (चा० १।३।६९) ङ्वितः क्त्रिः (चा० १।३।६८) 'इरितो वा' (चा० १।१।७४) ओदितः (चा० ६।३।८०) इत्यादीन्यनुबन्धप्रयुक्तकार्यबोधकानि सूत्राणि च उपलभ्यमानधातुपाठस्य धात्वनुबद्धानुबन्-धानां च चन्द्रकर्तृत्वं साधयन्ति।

न च चन्द्रेणासंज्ञकव्याकरणं रचयता धातुपाठस्य नाम 'क्रियार्थपाठ' इतीदृशं किमपि कर्तव्यमुचितम्, धातो-रेकाचः (पा० ३।१।२२) इति पाणिनिसूत्रस्थधातुपदस्थाने' 'एकाचो हलादेः क्रियार्थाद् (चा० १।१।४०) इत्यादौ यथेति वाच्यम्, यौगिकार्थमादाय विभक्ति-सवर्ण-पद-धातु-प्रभृतिपदानां चन्द्रेण निःसंकोचं प्रयोगः कृतः इति प्रतिपादितमेव। धातोः प्रयोगः दादे र्धातो र्घः (चा०६।३।६२) अचिश्नुधातुभ्रुवां य्वोरियुवौ (चा० ५।३।८३) प्रादीना-मृति धातौ (चा० ५।१।९३) इत्यादौ दृश्यत एव। एवंच धातुपाठेति नामकरणेऽपि न कापि बाधा। उक्तं च वृत्तौ विभागो विभक्तिरिति कृत्वेति। योगरुढार्थमादाय विभक्तिपदप्रयोगः असंज्ञकेऽत्र व्याकरणेऽपि न दुष्यति इति वृत्ति-कारस्य चन्द्रस्य हृदयम्।

---

१. दृश्यताम् ६।१।४२ सूत्रवृत्तिः।

चान्द्रे धातुपाठे पठितानां धातूनां धातुसूत्राणां च संख्याविवरणम् प्रतिगणमधोदीयते ।

गणनाम	चान्द्रधातवः	चान्द्रधातुसूत्रसंख्याः
प्रथमो गणः—भूवादिः	१०४२	६३८
द्वितीयो गणः—अदादिः	६८	६२
तृतीयो गणः—जुहोत्यादिः	२३	२१
चतुर्थो गणः—दिवादिः	१३६	१२२
पञ्चमो गणः—स्वादिः	३०	२५
षष्ठो गणः—तुदादिः	१४१	१२१
सप्तमो गणः—रुधादिः	२४	२३
अष्टमो गणः—तनादिः	९	९
नवमो गणः—क्रचादिः	५३	४८
दशमो गणः-चुरादिः	१११	१०५
योग :	१६३७	११७४

पाणिनीयधातुपाठे पठितानां धातूनां संख्याः १९६७ सन्ति ।

चान्द्रधातुपाठे धातूनां पाठः प्रतिगणमनुसृतवर्णक्रमान्तक्रमो दृश्यते । धात्वन्तवर्णान् दृष्ट्वा तेषां वर्णक्रमेण वर्गीकरणं विधायात्र धातवो निर्दिष्टाः । अक्षरक्रमविन्यासे कतिचित् स्थलानि भग्नप्रक्रमाणि सन्ति ।

भूवादिगणे केबृ-पेबृ-मेबृ-रेबृ-गतौ (चा० १।३९९) बान्ता इमे धातवो नात्र पठनीयाः पान्तधातूनां प्रकरणे । पान्तधातुक्रमः तिपृ तेपृ ष्टेपृ क्षरणार्थाः (चा० धा० सू० ३९५) इत्यतः प्रारब्धः कपि चलने (चा० धा० सू० ४०१) इति सूत्रं गत्वा समाप्यते । मध्ये च पूर्वोक्तानां बान्तानां धातूनां पाठः प्रक्रमभङ्गतां बिभर्ति ।

भग्नप्रक्रमताया अन्यान्युदाहरणानि यथा—

गणसंख्या धातुसंख्या च	यत्र भग्नप्रक्रमः ते धातवः,	कथं च क्रमभङ्ग आयातः
१।८	षिधू गत्याम्	मन्थ विलोडने १।७ इति थान्तानन्तरं
१।९	षिधू शिष्टौ	खाद भक्षणे १।१० इत्यादिषु पठितव्येषु धान्तौ धातू पठितौ ।
१।३८	—इसि—गत्यर्थाः	उखेप्यादिखान्तमध्ये सान्तपाठात् ।
१।७५	क्षि क्षये	१।६४ तः प्रारब्धे १।८१ पर्यन्तविततेजान्त-प्रकरणे पाठात् ।
१।१०९	मुडि खण्डने	रान्तधातुसन्दर्भे पाठात् ।
१।१९२	जि जिये	जान्तेषु पाठात् ।
१।४४५	क्लेश बाधने	क्षान्तेषु पाठात् ।

अत्र धातुपाठे पाणिनीयधातुपाठ इव छान्दसा अपि धातवः पठिताः दृश्यन्ते किन्तु यथा तत्रेमे 'छान्दसा' इत्युल्लेखोऽस्ति तथेह न दृश्यते । इह विना छान्दसेत्युल्लेखं छान्दसा अपि धातवः पठिताः ।

तथा हि—

अदादिगणे-षस स्वप्ने (२।२) वश कान्तौ (२।३) दीधीङ्दीप्तौ (२।५३) वेवीङ् गतौ (२।५४) इमे पाणिनीयधातुपाठे २।६९,७०,६७, ६८ इत्यङ्कैरङ्किताः सन्ति। भट्टोजिदीक्षितेनादादिप्रकरणे सिद्धान्तकौमुद्या इमे धातवः छान्दसा निगदिताः। वश धातोः 'वष्टि भागुरिरल्लोपमित्यत्र प्रयोगो लोकेऽपि दृश्यते। जुहोत्यादिगणे-घृक्षरणे, ऋ सृ गतौ, भस भर्त्सने, कि ज्ञाने, तुर त्वरणे, धिष् शब्दे, धन धान्ये, जन जनने, गा स्तुतौ (चा० २।६।१४ धा० सू०) इति दश धातवः छान्दसाः सन्ति पठिताः। पाणिनीयधातुपाठे एषां धातूनां संख्या : १४, १६, २५ इति सन्ति। ऋ धातु र्भाषायामपि प्रयुज्यते बहुलं छन्दसि (पा० ७।४।७८) इत्येव सिद्धे अर्तिपिपर्त्योश्च (पा० ७।४।७७) इति लिङ्गात्। स्वादौ क्षि क्षये (चा० ५।१२) धातुश्छान्दसः। अत्र दीक्षितः 'भाषायामपीत्येके' इत्याह। प्रायश्चन्द्रो भाषाव्याकरणकार इति ख्यातिभ्रान्त्या भ्रान्तः स इत्थमाह। 'न तद्यशः शस्त्रभृतां क्षिणोति' इति रघुप्रयोगादस्य प्रयोगः प्रमाणितः। ऋक्षि चिरि जिरि (चा० ०५।२२) इमेऽपि छान्दसाश्चान्द्रे दृश्यन्ते।

पा० धातुपाठे एषां संख्या : ३०,२९,३१,३२ इति सन्ति।

रुधादौ इन्धी दीप्तौ (चा० ७।२१), पा० ७।११ धातु र्वैदिकः।

एषा छान्दसधातुसत्ताऽपि चान्द्रे व्याकरणं स्वरवैदिकं प्रकरणसद्भावं गमयति।

चतुर्थोऽध्यायः

(छ) चान्द्रव्याकरणे गणपाठः

चान्द्रव्याकरणस्य गणपाठः चन्द्राचार्यकृतवृत्तिग्रन्थान्तर्गत एवोपलभ्यते। यथा कात्यायनोद्दिशतस्य पतञ्जलिप्रस्तुतस्य च नूतनशब्दसिद्धिनियमस्य समावेशश्चन्द्रगोमिना सूत्रपाठे एव विहितस्तथैव पाणिनीयगणपाठस्य न्यूनतापूर्त्यर्थं कात्यायनेन येऽनेके गणाः स्ववार्तिकपाठे निर्दिष्टास्ते सर्वेऽपि चन्द्राचार्येण स्वगणपाठेऽन्तःसन्निविष्टाः।

दिङ्मात्रमुदाह्रियते:—

१—कम्बोजादिगणः	कम्बोजाल्लुक् ४।१।१७५ इति पा० सूत्रे कम्बोजादिभ्य इति वक्तव्यम् इति वार्तिके वार्तिककारेणोद्भावितः चान्द्रव्या० कम्बोजादिभ्यो लुक् इति सूत्रे (२।४।१०४) अन्तः सन्निविष्टः।
२—देवासुरादिगणः	वैरे देवासुरादिभ्यः प्रतिषेधः वा० द्वन्द्वाद् वुन् वैरमैथुनिकयोः पा० सू० ४।३।१२५ इत्यत्र। शिशुक्रन्देति ४।३।८७ सूत्रेऽपि द्वन्द्वे देवासुरादिभ्यः इति वर्तते देवासुरादिगणः। पा० ५।१।१११।१।
३—स्वर्गादिगणः	चा० ४।१।१३३ स्वर्गादिभ्यो यत्।
४—पुण्याहवाचनादिगणः	चा० ४।१।१३४ पुण्याहवाचनादिभ्यो लुक् पा० ५।१।१११।२।
५—ज्योत्स्नादिगणः	चा० ४।२।१०७ पा० ५।२।१०३।२।
६—नवयज्ञादिगणः	चा० ४।२।१२४ पा० ४।२।३५।१।

पाणिनीयसूत्रे तत्सम्बद्धवार्तिके च विद्यमानानां शब्दानामेकत्र समाहारेण गणकल्पनाऽपि कृता चन्द्रेण तद् यथा-चान्द्रव्याकरणे—

१—उषादिगणः २—कृष्यादिगणः ३—केशादिगणः ४—कलाप्यादिगणः ५—व्यासादिगणः

(१) अत्र प्रथमः पाणिनीये ऊषसुषिमुष्कमधो रः ५।२।१०७ इति सूत्रे पठितानां शब्दानां रप्रकरणे खमुख कुञ्जेभ्य उपसंख्यानम् इति कात्यायनवार्तिके निर्दिष्टानां शब्दानामेकत्र समाहारेण निर्मितो वर्तते ।४।२।१११ इति सूत्रस्य वृत्तौ विलोक्यताम्।

(२) कृष्यादि[1] गणः, रजः कृष्यासुतिपरिषदो वलच् (पा० ५।२।११२) दन्तशिखात् संज्ञायाम् ५।२।११३ इति सूत्रद्वयस्य पाणिनीयस्य वलच्प्रकरणेऽन्येभ्योऽपि दृश्यते इत्यस्य कात्यायनीयवार्तिकस्योदाहरणभूतान् शब्दान् आश्रित्य कल्पितः। कात्यायनस्य वार्तिकमस्ति गोपवनादिभ्यः (महाभाष्य २।९।६७।१) प्रतिषेधः प्राग्हरितादिभ्यः। चान्द्रव्याकरणे प्राग्हरितादिभ्य इत्यस्य स्थाने लाघवमुद्दिश्य 'अष्टभ्यः[2]' इति निवेशो दृश्यते।

---

१. चा० वृ० ४।२।११६।

२. न गोपवनादिभ्योऽष्टभ्यः चा० सू० २।४।११६।

(३) [1]केशादिगणः पाणिनीयसूत्रं केशाद् वोऽन्यतरस्याम् ५।२।१०९ इति वप्रकरणे मणिहिरण्याभ्यामुपसंख्यानम् इति कात्यायनवार्तिकं चाधारीकृत्य निर्मितः चान्द्रव्याकरणस्य केशादिभ्यो व इति सूत्रे ४।२।११३।

(४) [2]कलाप्यादिगणः चान्द्राचार्येण नस्तद्धिते ६।४।१४४ इति सूत्रस्थवार्तिके नान्तस्य टिलोपेऽब्रह्मचारि-पीठ-सर्पि-कलापि-कौथुमि-तैतिलि-जाजलिलाङ्गलि-शिलालि-शिखण्डि-सूकर-सद्म-सुपर्वणामुपसंख्यानम् इत्यत्रोपसंख्यातान् शब्दान् आश्रित्य निर्मितः।

(५) [3]व्यासादिगणस्य चन्द्रव्याकरणकल्पितस्याधारः सुधातुरकङ् च ४।१।९७ इति सूत्रे कात्यायनेतरवैयाकरणविरचितं सुधातृव्यासवरुडनिषादचाण्डालबिम्बानामिति वक्तव्यमिति वार्तिकमास्ते।

चन्द्रगोमिना कतिपये नवीना अपि गणा उद्भाविताः इमे गणाः पाणिनीयगणपाठे न सन्ति। तथाहि ऋत्वादि (चान्द्र वृ० ३।१।१२४) वेणुकादि (चा० वृ० ३।२।६१) हिमादि (चा० वृ० ४।२।१३६) प्रभृतयो गणा चान्द्राचार्यप्रतिभा—प्रसूताः सन्ति। गेहादि (४।२।१३८) गणे काशिकाकारेण वेणुकादिभ्यश्छण् इति यत्सन्निवेशितम् तत् चन्द्राचार्यमनुकृत्यैव।

चन्द्राचार्येण लघ्वर्थम् पाणिनीयगणपाठे पृथक्पृथक्स्थितानां गणानां गणयोर्वा 'स्वव्याकरणे एकस्मिन् गणे जरासन्धवदेकत्र सन्धानम् कृतं दृश्यतेः—यथा—सिन्ध्वादौ तक्षशिला[4]दिः, कथादौ[5] च गुडादिरन्तःकुक्षिप्रवृष्टौ विलोक्यते।

पाणिनिप्रोक्ता बहवो गणा अत्र व्याकरणे परिवर्तितनामानः सन्तः समुपलभ्यन्ते। निम्नलिखितेन विवरणेन विव्रियते तत्।

पाणिनिगणाः	चान्द्र व्या० गणाः
१—अनुप्रवचनादिः (अनुप्रवचनादिभ्यश्छः) ५।१।१११	उत्थापनादिः ४।१।१३२ (उत्थापनादिभ्यश्छः)
२—अपूपादिः (विभाषाहविरपूपादिभ्यः) ५।१।४	यूपादिः वा हविर्यूपा (चा० वृ० ४।१।३) दिभ्यः
३—इन्द्रजननादिः (शिशुक्रन्दयमसमद्वन्द्वेन्द्रजननादिभ्य इछ : ४।३।८८	शिशुक्रन्दादिः ३।३।५६ (शुशिक्रन्दादीनधिकृत्य कृते ग्रन्थे पा० ३।३।५६।
४—किंशुलकादिः वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् ६।३।११७	अञ्जनादिः ५।२।१३२ (वनगिर्योः कोटराञ्जनादीनाम्)
५—सन्धिवेलादिः सन्धिवेलाद्यतुनक्षत्रेभ्योऽण् ४।३।१६	सन्ध्यादि; ३।२।७९ (सन्ध्यादृतुरक्षत्रादण्)
६—सपत्न्यादिः नित्यंसपत्न्यादिषु ४।१।३५	समानादिः २।३।३३ (समानादिभ्यः)
७—बह्वादिः बह्वादिभ्यश्च ४।१।४५	शोणादिः २।३।४१ (शोणादिभ्यः)

पाणिनीये व्याकरणे व्रीह्यादिभ्यश्च ५।२।११६ इतिसूत्रनिर्दिष्टः व्रीह्यादिगणो वर्तते। तत्र 'शिखादिभ्य इनि वाच्यः' इकन्यवखदादिषु' इति श्लोकवार्तिकानुसारेण गणत्रयं जातम् व्रीह्यादिः शिखादिः यवखदादिश्च। एतत्सर्वमनुसंधाय चान्द्रव्याकरणे त्रयोऽपि गणाः

---

१. चा० वृ० ४।२।११३। २. चा० वृ० ५।३।१४०।
३. चा० वृ० २।४।२१।
४. चा० सू० वृ० सिन्ध्वादिभ्योऽण् ३।३।३१ पा० सू० सिन्धु तक्ष शिलादिभ्योऽणञौ ४।३।९३।
५. चा० सू० वृ० कथादिभ्यष्ठक् ३।४।१०४ पा० सू० कथादिभ्यष्ठक् ४।४।१०२। गुटादिभ्यष्ठञ् ४।४।१०३।

व्रीह्याद्यत इनिश्च	४।२।११९
शिखादिभ्यो वा	४।२।१३४
नवादिभ्यष्ठन्	४।२।११८ इति सूत्रत्रये क्रमशः सन्निविष्टाः।

काशिकाकारेण चन्द्राचार्यमनुकृत्योक्तम् यवखदकुमारीनावित्येतेभ्य इकन्नेवेष्यते इति। नावादिगणे चान्द्रव्याकरणवृत्तौ करणशब्दोऽपि दृश्यते परन्तु स शब्दः काशिकाकारेण परित्यक्तः।

पाणिनीयाः कात्यायनीयाश्च कतिपये गणाश्चन्द्रचार्येण परित्यक्ताः, ते सन्ति—

शौण्डादिः,	सप्तमी शौण्डैः पा० २।१।४०
पात्रेसमितादिः	(पात्रे समितादयश्च पा० २।१।४८)
व्याघ्रादिः	(उपमितं व्याघ्रादिभिः सामान्याप्रयोगे पा० २।१।५६)
श्रेण्यादिः कृतादिश्च	(श्रेण्यादयः कृतादिभिः पा० २।१।५९)
शाकपार्थिवादिः	(शाकपार्थिवादीनामुपसंख्यानम् (पा० २।१।६० वार्ति०)
श्रमणादिः	(कुमारः श्रमणादिभिः पा० २।१।७०)
मयूरव्यंसकादिः	(मयूरव्यंसकादयश्च पा० २।१।७२)
याजकादिः	(याजकादिभिश्च पा० २।२।९)
राजदन्तादिः	(राजदन्तादिषु परम् पा० ३।२।३१)
पलाशादिः	(पलाशादिभ्यो वा० पा० ४।३।१३६)
प्लक्षादिः	(प्लक्षादिभ्योऽण् पा० ४।३।१६४)
रसादिः	(रसादिभ्यश्च पा० ५।२।९५)
देवपथादिः	(देवपथादिभ्यश्च पा० ५।३।१००

अन्य वैशिष्ट्यमपि दृश्यते चान्द्रे गणपाठे।

(क) चान्द्रे कस्कादिगणे सर्पिष्कुण्डिकाधनुष्कपालबहिष्पलयजुष्पात्र शब्दाः पठिताः दृश्यन्ते[1] एषां शब्दानामत्र गणे पाठः प्रायः पाणिनेर्निश्चय रूपेण च पतञ्जले[1] रभीष्टो नासीत्। भाष्ये वृत्तौ च नित्यं समासेऽनुत्तरपदस्थस्ये त्येतदपि प्रत्युदाहृतम् इति काशिकाग्रन्थमधिकृत्य न्यासकारेण जिनेन्द्रबुद्धिना प्रोक्तम् अनुत्तरपदस्थस्येति किम् ? परमसर्पिःकुण्डिका इति भाष्ये वृत्तौ च प्रत्युदाहृतम् अतस्तयोरिह पाठो नाभिमतोऽमीषामिति दर्शयति। अत्रत्येन सन्दर्भेण सिद्धयति यत् सपिष्कुण्डिका, धनुष्कपालम्; बहिष्पूलम्, यजुष्पात्रम् इत्येषां पाठः उत्तरपदस्थस्यापि षत्वं यथा स्यादिति काशिकाकारस्य कल्पनायाः आधारः चान्द्रव्याकृरणस्य[2] कस्कादिगणेऽमीषां पाठः।

(ख) पाणिनीयार्धर्चादिगणः चन्द्रोगोमिनापि स्वीकृतः किन्तु तत्र पाणिनिसम्मतगोमयादिशब्दानां पाठोऽनावश्यकतत्वात्प्रत्याख्यातः। उक्तं च तेन नपुंसके चार्धचार्दयः (२।२।८३) सूत्रस्य वृत्तौ अर्धर्चम्, अर्धर्चः, शतमानम्, शतमानः, बारबाणम् बारबाणः, अष्टापदम्, अष्टापदः। समासलिङ्गाख्याने यदि वक्तव्या स्तदा (गोमयादयो न वक्तव्याः) तद्वदेव स्त्रीपुंल्लिङ्गा अपि गौरिषुरशनिर्योनिरित्येवमादयः, स्त्रीनपुंसकलिङ्गाश्च अर्चिरादयः, सर्वलिङ्गाश्च तट

---

१. द्रष्टव्यौ काशिका ८।३।४८ न्यासश्च।

२. चा० वृ० ६।४।४५।

शृङ्खलादयः एकैकलिङ्गाश्च वृक्षखट्वाकुण्डादयः, अलिङ्गा युष्मदादयः सर्व एव वाच्याः स्युः। अथ तेषां लोकतो लिङ्गानुशासतो वा सिद्धिरिष्टा, इत्युच्यते चेत् तथैव गोमयादीनामपि भविष्यति। कानि पुनस्तानि स्त्री पुं० नपुंसकानि।

इयमयमिदमिति येषु प्रसिद्धिरर्थेषु भवति लोकस्य
स्त्रीपुंनपुंसकानि प्रोच्यन्ते तानि लोकेन इति।

(ग) अरीहणादिः कृशाश्वादिः ऋश्यादिः कुमुदादिः काशादिः तृणादिः प्रेक्षादिः अश्मादिः, सख्यादिः, बलादिः पक्षादिः कर्णादिः, सुतंगमादिः, प्रगद्यादिः वराहादिः कुमुदादिः इमे सप्तदश गणाः चान्द्रगणपाठे न गृहीताः। यत्र किल पाणिनिना बुञ् छण् ००० (४।२।८०) इमान् गणानुद्दिश्य यथासंख्येन सप्तदश प्रत्यया वुञ् छणादयो विहितास्तत्र चन्द्रेण वुञ् छण् ०००२।१।६८ सूत्रे केवलं प्रत्ययान् निर्दिश्य 'तदिहास्ति च' ३।१।६७ इति पूर्वसूत्रमनुवर्त्य वुञादयः षष्ठ्याद्यन्तेभ्यश्चतुष्वर्थेषु देशे तन्नाम्नि यथा योगं भवन्ति इत्यर्थं विधाय विनैव तत्तद्गणस्वीकारं सर्वेष्टयः संसाधिताः अनिष्टयश्च निवारिताः देशनाम्नो यथादर्शनमवस्थानात् अनर्थकोऽत्र गणपाठः इत्युक्त्वा।

(घ] नित्यं वृद्धशरादिभ्यः (४।३।१४४) पा० सूत्रे निर्दिष्टः शरादिगणः परिगणितशब्दगणात्मकः किन्तु चान्द्रे व्याकरणे आकृतिगणरूपेणाङ्गीकृतः।

परवर्तिभिः वैयाकरणैश्चन्द्राचार्यो यथाऽन्यत्रानुकृतस्तथागणपाठविषयेऽपि। परवर्तिनां वैयाकरणानां गणपाठपद्धतिः चन्द्राचार्यस्य पद्धतिमनुसृत्य जीवति।

पाल्यकीर्तिकृतजैनशाकटायनव्याकरणस्वोपज्ञामोघवृत्तौ उपलभ्यमानः गणपाठः चान्द्रव्याकरणीयगणपाठ पद्धतिमतीवानुकृत्य जीवति। यथा चन्द्राचार्यः लाघवमुद्दिश्य गणानां नामसु परिवर्तनं चकार तथा पाल्यकीर्तिरपि। चन्द्राचार्येण तद्गणे पठितेषु ह्रस्वकलेवरं लोकप्रसिद्धं वा कमपि शब्दमादौ पठित्वा गणनामसु परिवर्तनमानीतम् तथा पाल्यकीर्तिनाऽपि; यथा पाणिनेः विशालनामानम् आहिताग्न्यादिब्राह्मणादिलोहितादिसन्धिवेलादिगणं पाल्यकीर्तिः (शा० २।१।११५) भार्योढादि (३।३।१०) राजादि (४।१।२७) निद्रादिसन्ध्यादीतीत्थं (३।१।१७६) ह्रस्वनामानं चकार तत्तच्छब्दमभीष्टमादितो निवेश्य, तथैव प्रसिद्धशब्दमादौ निवेश्य ऋगयनादिम् अनुप्रवचनादिं च गणं शिक्षादि[1] [1]मुत्थापनादिं कृतवान्।

चान्द्रव्याकरणवदिहापि शाकटायनव्याकरणे कात्यायनोक्तवार्तिकनिर्दिष्टगणाः सूत्रेषु समाविष्टा दृश्यन्ते-सुस्नातादिगणः (३।२।४४) माशब्दादिगणः (२।२।४६) अस्योदाहरणं वर्तते।

देवनन्दिरचितजैनेन्द्रव्याकरणस्यान्यनिरूपणीयविषय इवास्य गणपाठोऽपि चान्द्रगणपाठं प्रामाणिकं मत्वा प्राणिति। उदाहरणार्थमस्य व्याकरणस्य कुर्वादिगणो विलोक्यताम्। अस्मिन् गणेऽत्र व्याकरणे अभ्रशब्दस्य शुभ्रशब्दस्य चोभयोः पाठो विलोक्यते। तत्र प्रथमस्य पाठः काशिकासम्मतः द्वितीयस्य च चान्द्रव्याकरणानुरूपः।

चन्द्रगोमिना पाणिनेः व्रीह्यादिभ्यश्चेति सूत्रसम्बद्धं कात्यायनीयं वार्तिकं शिखादिभ्य इनिर्वाच्य इकन् यवखदादिषु इत्याधारीकृत्य पाणिनीयो व्रीह्यादिगणः व्रीह्यादिशिखादिनावादिरूपेण त्रिधा विभक्तः। इदं च विभागत्रयम् पाल्यकीर्तिना हेमचन्द्रेण चात्मसात् कृतम्।

चन्द्राचार्योद्भाविता पाणिनीयानाकनेकेषां गणानामेकत्रीकरणपद्धतिराभ्यां वैयाकरणाभ्यामाधिक्येनात्मसात् कृता। भिक्षादिखण्डिकादि[2] गणयोः[3] ब्राह्मणादिपुरोहिताद्योः[4] संकाशादि[5]प्रगदिन्नादिगणयोरेकत्रीकरणमत्रोदाहरणीभूतम्।

---

१. ३।१।१३६, ३।२।४४।
२. शा० अ० २।४।१२८ है० वृ० ६।२।१०।
३. शा० अ० ३।३।१० है० वृ० ७।१।६०।
४. २।४।२०२ है० वृ० ६।२।८४।

चन्द्रगोमिनः ऋत्वादि[1] वेणुकादि[2] गणयोः पाल्यकीर्तिहेमचन्द्राभ्यां यथाप्रकृति अनुकृतिश्चक्रे।

चान्द्रव्याकरणस्य हिमादिगणः गुणादिनाम्ना, कलाप्यादिश्च मौदादिनाम्ना ख्यातः। नामपरिवर्तनप्रणालोयं चन्द्राचार्योद्भाविततेति पूर्वमेव स्पष्टम्।

भोजराजेन चान्द्रव्याकरणस्यानुकरणं सर्वतश्चक्रे, तेन कात्यायनपतञ्जलिप्रदर्शितनूतननियमानां समावेशो यथासूत्रेषु चन्द्राचार्यमनुकुर्वता विहितस्तथैव चान्द्रव्याकरणोक्तगणाः सूत्रेष्वेव समावेश्योक्ताः। प्रायः गणपाठानां सूत्रेभ्यः पृथक्पठितानामध्ययनाध्यापनगतामुपेक्षां विलोक्य तेन गणपाठः सूत्रेषु समावेशितः। पाणिनिचन्द्रादयो येषु गणेषु आकृतिगणत्वमङ्गीकृतवन्तस्तत्र भोजः सूत्रेषु आदिपदं निवेशितवान्।

चन्द्रगोमिनमनुकुर्वता भोजेन पाणिनेर्गणपाठान् पर्याप्तं परिवर्तितान् परिवर्धितांश्च कृत्वा सरस्वतीकण्ठाभरणसूत्रे निवेशितः।

यथा चन्द्रगोमिना बह्वादेः शोणादिः, अपूपादे र्यूपादिरिति नाम कृत्वा तत्तद्गणे शोणशब्दः यूपशब्दश्चादौ पठित स्तथैव भोजेनापि तत्तद् गणसम्बद्धसूत्रयोः शोणशब्दः यूपशब्दश्चादितोऽवस्थापितः।

वर्धमानरचितः गणरत्नमहोदधिरपि चन्द्रगोमिप्रभावितो दृश्यते। तेनात्र ग्रन्थे गणपाठकारकाः स्वपूर्वभाविनः ये त्रयोदश वैयाकारणा नामग्राहं गृहीतास्तेषु पाणिन्यनन्तरं चन्द्रगोमिनः नामग्रहणं दृष्ट्वा ज्ञायते यत् पाणिन्यनन्तरं चन्द्रगोमिनः वैयाकरणत्वेन ख्यातिः सर्वत्रासीत्।

वर्धमानेन चान्द्रगणपाठोक्ता इमे गणा आनुपूर्व्या अनुकृताः—

१—नभ्राडादिगणः	२—रूपादिगणः	३—ऊषादिगणः;
४—ज्योत्स्नादिगणः	५—ऋत्वादिगणः	६—कृष्यादिगणः
७—चूडादिगणः[3]		

आचार्यनरेन्द्रकृतसारस्वतव्याकरणमपि चान्द्रव्याकरणप्रभावितं दृश्यते। दीर्घकायेषु सूत्रेषु वार्तिकेषु च प्रयुक्तान् शब्दान् गणे पठित्वा लघ्वक्षरैः सूत्ररचनायाः या परम्परा चन्द्रगोमिनोद्भाविता सा सारस्वतव्याकरणेऽपि दृश्यते। 'ज्योत्स्नातमिस्रा' सूत्रं विषयीकृत्य यथा चान्द्रव्याकरणे ज्योत्स्नादिगणस्य कल्पना दृश्यते तथैव सारस्वतव्याकरणेऽपि। ऊषशुषिमुष्कमधो रः इति सूत्रं रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् इति वार्तिकं चाधारीकृत्योभयत्रोक्तानां शब्दानामेकत्र समावेशेच्छया चान्द्रव्याकरणे ऊषादिगणः नव उद्भावितः तं च गणमधिकृत्याचार्यनरेन्द्रेण सूत्रं रचितम्:—ऊषशुषिमुष्कमधुखमुखकुञ्जनगपांशुपाण्डुभ्य इति। 'पूतकृतो रै च, वृषाकप्यग्नि मनोरौ वेति सूत्रत्रयमेकत्रीकृत्य मन्वादिगणोऽपि सारस्वतव्याकरणकारेण तथाकृतचान्द्रव्याकरणपरम्परामधिकृत्यैव कल्पितः।

बोपदेवरचिते मुग्धबोधव्याकरणेऽपि दृश्यते चान्द्रव्याकरणप्रभावः। पाणिनिसूत्रं सुधातुरकङ् च तत्सम्बद्धं वार्तिकं सुधातृव्यासवरुडनिषादचाण्डालबिम्बानाम् चेत्येतद्द्वयमेकत्रीकृत्य चन्द्राचार्यकल्पितः व्यासादिगणः मुग्धबोधव्याकरणेऽपि दृश्यते।

---

१. शा० ३।२।१४४ है० वृ० ६।४।१२५।
२. शा० ३।१।५६ है० वृ० ६।३।६६।
३. पृ० १०५, १०७, २३८. २३२, २०८, २३८, २०९।

पञ्चमोऽध्यायः

पाणिनीयसूत्रेषु दोषाः

(१) विधेयस्याप्राधान्येन निर्देशो विधेयाविमर्शः। विधेयस्य प्राधान्यमेवोचितम्; तस्यैव मुख्यत्वेन विवक्षितत्वात्। मुख्यत्वेन विवक्षितः किन्तु मुख्यत्वमनवगाहमानोऽर्थः वक्तुरशक्तिमेव प्रकटीकरोति। किंच स वाक्यविन्यासोऽप्यनन्वितः प्रतीयते, यत्र विधेयमुद्देश्यवत् प्रतिभाति। राधाकृष्णावुद्दिश्य स्थूलत्वं प्रतिपादयितुं यदि कश्चित् 'राधाकृष्णौ स्थूलौ स्तः' इत्यस्य वाक्यस्य स्थाने स्थूलौ राधाकृष्णौ स्त इति वदेत् तदा स्थूलगुणवतोः राधाकृष्णविधानप्रतीत्याऽनर्थः स्यात्। 'वृद्धिरादैच्' (पा० १।१।१) अपृक्त एकाच् प्रत्ययः (पा० १।२।४१) आद्यन्तौ टकितौ (पा० १।१।४६) इत्यादौ उद्देश्यविधेययोः पूर्वापरक्रमनिर्देशत्यागात् तथा प्रतीयते यथा चात्र वृद्धिमुद्दिश्य आदैचः, अपृक्तमुद्दिश्य एकाल् प्रत्ययत्वस्य, आदिमुद्दिश्य टितः, अन्तमुद्दिश्य कितश्च विधानं क्रियते। एतेन सूत्रकारस्याशक्तिः प्रतीयते, श्रोता च प्रतिपादनेच्छाविषयीभूतार्थावगमनाय व्याख्यानविशेषाश्रयणाय विवशो भवति। वचनकारं प्रति प्रादुर्भूताऽशक्तिभावना पाठकं तन्निर्मितवचनं प्रति मन्दादरं विदधाति। मन्दादरे मनसि प्रतिपाद्यं वस्तु कथकारमवकाशाभावात् प्रविशतु। **आदररहिते गृहे न कोऽपि मनस्वी प्रवेष्टुमिच्छति !**

अतः विधेयाविमर्शो महादोषः भाषायाः सावधानेन दूरीकरणीयः भाषामर्मज्ञैः। चन्द्राचार्येण यथासाध्यं यथासम्भवं च दूषणमिदं पाणिनिसूत्रेभ्यः दूरीकृत्य तत् स्थाने निर्दुष्टं सूत्रस्वरूपमुपस्थापयितुं प्रायतत। **यद्यपि तद्व्याकरणेऽपि दूषणमिदमवशिष्टम् निरूपितं चैतदस्यैव शोधप्रबन्धस्य 'चान्द्रदोषनिरूपणाध्याये'** तथाप्यनेकत्र पाणिनीयसूत्रेषु समागतस्य दोषस्यास्य निराकरणाय दर्शितसफलप्रयत्नः स स्तुत्यः।

दृश्यतामधस्तादुदाहरणाय :—

विधेयाविमर्शग्रस्तानि पाणिनीयसूत्राणि	विधेयाविमर्शदोषमोचितानि चान्द्र सूत्राणि
अदभ्यस्तात् ७।१।४	द्विरुक्तादत् १।४।४

(अत्राभ्यस्तादित्युद्देश्यपूरकं ततः परस्य भेरदविधानात्। तेन अदित्यस्य ततः पश्चान्निर्देशोयुक्तः, विधेयत्वात्।)

आत औ णलः ७।१।३४	आतो णल औः १।४।१४

(विधेयाविमर्शपरिहाराय स्थान्यादेशयोः स्थानव्यत्यासः कृतः)

आद्यन्तौ टकितौ १।१।४६	टकितावाद्यन्तौ १।१।१३
विभाषा धेट्श्व्योः ३।१।४६	धेश्वेर्वा १।१।६६

अत्र हि चङ् विकल्पेन विधीयते। अतः विधेयपूरकस्य विभाषेत्यस्य प्रथमप्रयोगाद् संभाव्यं विधेयाविमर्शदोषं चन्द्रो 'वा' शब्दमन्ते प्रयुज्य निवारयामास।

वा भ्राशम्भ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ३।१।७०	भ्राशम्भ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषो वा १।१।८

हलः श्नः शानज्झौ ३।१।८३ हलो हौ शानच् १।१।१०२

('हौ' इत्यस्मादुद्देश्यपूरकात् पूर्वं विधेयस्य शानचो निर्देशे दोषः)।

बह्वल्पार्थाक्छस् कारकादन्यतरस्याम् ५।४।४२ बह्वल्पार्था कारकान्मङ्गले शस् वा ४।४।१

(कारकात् पूर्वं शसो विधेयस्य प्रयोगे दोषः)

इद्दरिद्रस्य ६।४।११४ इद्दरिद्रः ५।३।१०७ (न परिहृतः विधेयाविमर्शः-चन्द्रेणापि)

(प्रायः स्यादेशस्यासाधुत्वदोषं परिहरतश्चन्द्रस्यात्र विधेयविमर्शपरिहारो विस्मृतः, यथा कस्यापि सन्निपातं रोगं प्रतिकुर्वतो वैद्यस्य मस्तकपीडापरिहरणं विस्मृतं जायते।)

लोपो यि ६।४।११८ यि लोपः ५।३।१११

(२) **अवाचकत्वम्—**

क्वापि क्वापि पा० सूत्रे अभीष्टस्य तात्पर्यस्यावगतयेऽभिनिदिष्टं पदं नितरां बाधकं जायते। यथा जक्षित्यादयः षट् पा० ६।१।६ सूत्रे षडिति पदम्। अनेन सूत्रेण जक्षित्यादीनां सप्तानां धातूनामभ्यस्तसंज्ञाभीष्टा। षट् पदं च तादृशार्थसंप्रत्ययबाधकम्। अतः पाणिनीयैरिह जक्षितिपृथक्पदं लुप्तविभक्तिकम् मन्यते। इति शब्देन च जक्षतिः परामृश्यते इति आदि र्येषामित्यतद्गुणसंविज्ञानो बहुव्रीहिः। तस्य च षट्शब्देन सम्बन्धः। तेन जक्षित्यादयः षड् धातवः जागृ, दरिद्रा, शासु, चकासृ, दीधी, वेवीति धातवो जक्ष् इति सप्तमश्च धातुरभ्यस्तसंज्ञका भवन्ति। एतेभ्यश्चादादेशादिकं कार्यं जायते। पाणिनिसूत्रे षट्पदं षट्संज्ञाबोधकं 'ष्णान्ता षट्' १।१।२४ 'षड्भ्योलुक्' ७।१।२२ षट् चतुर्भ्यश्च १।१।५५ इत्यादौ यथा। अतोऽत्र षट्पदं संख्यारूपार्थबोधे मन्थरम्। किंचोच्यते षट् इति, गृह्यन्ते च सप्त धातवः। सप्तानां यदि ग्रहणं धातूनामिहाभीष्टं तदा षडिति संख्यानियमोऽनुपयुक्त एव। जक्षित्यादयः सप्त इत्येव वक्तव्यम्।

चन्द्राचार्येण संज्ञा तु परित्यक्तैव। अतः द्विरुक्तादत् (चा० १।४।४ इति विधिसूत्रादनन्तरं 'जक्षादिभ्यः' पञ्चम्यः १।४।५ इति सूत्रं विमलादर्शवत् विस्पष्टं क्रियते। अत्र क्रमे च 'दीधीवेवी' धातू न पठ्येते। जक्षजागृदरिद्रा चकासशास्धातूनां प्रथमपुरुषबहुवचने जक्षति जाग्रति दरिद्रति, चकासति शासति इति सिद्धयन्ति। सारस्वतीकण्ठाभरणे जक्षादयश्चाशासः १।१।७१ सूत्रं चन्द्रमनुकृत्यैव कृतं प्रतीयते।

(३) **वचनदोषो यथा**

लुट : **प्रथमस्य डारौरस** २।४।८५ इति पाणिनिसूत्रे प्रथमस्येत्यत्रैकवचनं स्थानिनि, आदेशे च डारौरस इत्यत्र बहुवचनं मिथः सामञ्जस्यविहीनं दृश्यते। यदि च प्रथमस्येत्यस्य प्रथमपुरुषस्येत्यर्थः क्रियते त्रयाणांचेत्यध्याहृत्य सामञ्जस्यं साध्यते तदापि तादृशाध्याहारे गौरवदोषः मस्तके कलङ्कतिलकायितः स्यादेव।

चन्द्राचार्येण सर्वमिदं निराकर्तुम् 'लुट आद्यानां डारौरसः' १।४।१८ इति सूत्रं क्रियते। तेन मात्रालाघवेन सहाध्याहाराकरणजन्यं लाघवं यथासंख्यसम्पादनसौकर्येण सह विस्पष्टताऽपि आगच्छति वचनदोषोऽपि परिहृतो भवति स्वयम्। 'डारौरसः' इत्यादेशास्त्रयोऽत आद्या अपि त्रय एव ग्रहीष्यन्ते।

(४) 'उदोऽनूर्ध्वकर्मणि' (पा० १।३।२४) इति पाणिनीयसूत्रस्य यथाक्षरमर्थस्वीकारेऽनूर्ध्वक्रियायां वर्तमानात् उत्पूर्वात् तिष्ठतेरात्मनेपदविधाने ग्रामात् शतमुत्तिष्ठति इत्यत्रात्मनेपदं प्राप्नोति। अतः कात्यायनेन वार्तिकं विरचितम्-ईहायामेव—ईहा नामात्र इच्छापूर्विका चेष्टा सा च ग्रामाच्छतमित्यत्र नास्ति। अतो नात्र दोषः। पाणिनीयसूत्रश्रद्धालवस्तु 'उदोऽनूर्ध्वे' इत्युक्तेऽपि अनूर्ध्वक्रियायां वर्तमानदुत्पूर्वात् तिष्ठते र्लस्याऽऽत्मनेपदमित्यर्थलाभे सिद्धे कर्मपदं परिस्पन्दार्थलाभाय। परिस्पन्दश्च ईहैव, इच्छापूर्वकचेष्टात्वात् इत्याहुः।

चान्द्राचार्यस्तु उदोऽनूर्ध्वेहायाम् (चा० १।४।६६) इति सूत्रं कृत्वा भावमधिकं स्पष्टीचकार।

'गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्न प्रकथनोपयोगेषु कृञः' (पा० १।३।३२)

'सूचनावक्षेपणसेवासाहसयत्नकथोपयोगेषु कृञः '(चा० १।४।७८)

गन्धनशब्दः अपकारप्रयुक्तपरदोषाविष्करणरूपार्थस्यामिधाने व्याख्यासापेक्षः। साहसिक्यशब्दः क्लेशेन साहसार्थं वक्ति। अतएव चान्द्रे तौ शब्दौ परिवर्तितौ।

'अधेः प्रहसने' (पा० १।३।२३)

'अधेः शक्तौ' (चा० १।४।७९)

प्रसहनशब्दः नाधिकारवाचकः, अतः शक्तिशब्दः प्रयुक्तः। शक्तिमानेवाधिकर्तुं शक्नोति। शक्तिमति शक्तिरस्तीत्यस्य स्थाने शक्तिमति अधिकार इति शक्यते वक्तुम्। आङ्ग्लभाषायामत एवोच्यते Might is right, अत्र शक्त्यधिकारयोरभेदो दर्शितः।

(५) न्यूनविधेयता (अव्याप्तिः) :—

क—'इकिश्तिपः स्वरूपे' (१।३।९६) चान्द्रसूत्रमिदं पाणिनीयव्याकरणस्य त्रुटिं दर्शयति। पाणिनीयतन्त्रे इक्शितपौ धातुनिर्देशे', 'वर्णात् कारः', 'रादिफः', 'मत्वर्थाच्छः' इति वार्तिकचतुष्टयं दृश्यते (पा० ३।१।१०८) इति सूत्रे। तत्र धातु निर्देशे इक्-श्तिप्प्रत्ययद्वयविधाने'[1] **त्रसिगृधि**'क्षिपीत्यादीनां भवति-हन्ति[2]यातीत्यादीनां निर्देशानां च सिद्धावपि[3]इन्धिश्रन्धि[4]ग्रन्थीत्यादिनिर्देशानुपपत्तिरापद्यते। अत्रापि इक्प्रत्ययस्वीकारे नकारलोपः स्यात्। तस्माच्चन्द्रेणात्र प्रत्ययत्रयं विहितम् इः, इक्, श्तिप् चेति। इत्थं पाणिनितन्त्रस्य महतीत्रुटिः या **कात्यायनेन पतञ्जलिना** च न दृष्टा, समाहिता चन्द्रगोमिना। पाणिनिना सूत्राणि रचयता यत्र तत्र इका श्तिपा च प्रत्ययेनाथ च इप्रत्ययेन धातवः निर्दिष्टाः, किन्तु ते प्रत्यया न विहिताः। अस्याः त्रुटेः परिहाराय प्रत्ययद्वयं कल्पयता कात्यनेन यद् वार्तिकं लिखितं तत्रापि इः परित्यक्त एवास्थात्। चान्द्रेऽस्याः समाधानं विलोक्य को न तं स्तवीति ?

अस्मिन् प्रकरणे अन्यद् वार्तिकत्रयं यदुक्तम्—वर्णात् कारः, रादिफः मत्वर्थाच्छ इति तच्चन्द्रेणान्यथा सिद्धमिति कृत्वा न स्वीकृतम्। 'घञन्त' कारशब्देन समासे कृते अकारककार इत्यादिसिद्धेः, वार्तिकं स्वीकृत्यापि एवकारः ओङ्कारः चीत्कारः हुँकारः वषट्कारः स्वाहाकार इत्यादीनां सिद्धये तादृशसमासाश्रयणस्यावश्यकत्वात्।

रेफस्तुरातेरिफः २।८८ इत्युणादिसूत्रेण राधातोः इफे कृते सिद्धयति। मतुबर्थीय इत्यादि तु गहादेराकृतिगणत्वाच्छ (परे) प्रत्यये कृते सिद्धयेत्।

इत्थं पाणिनीयतन्त्रोक्तानामनावश्यकानां परिहारेण तदनुक्तानामावश्यकानामुद्भावनेन चान्द्रव्याकरणं शब्दशास्त्रस्य नवनीतमिव वर्तते।

ख—प्रशंसायां रूपप् ५।३।६६ इत्यस्मिन् पाणिनीयसूत्रे **प्रशंसापदम्** प्रयुक्तम्; इष्यते च गुणप्रकर्ष इव दुर्गुणप्रकर्षेऽपि सूत्रप्रवृत्तिः। प्रशस्तो वैयाकरणः यथा वैयाकरणरूप इत्युच्यते तथा **चौररूप** इत्यपि प्रकृष्टाय चौराय प्रयुज्यते। प्रथमे प्रशंसा गम्यते द्वितीये च निन्दा। तथा च प्रशंसायाम् इति कथनमनुपपन्नम् अतएव प्रशंसापदं विहाय चन्द्राचार्येणात्र 'तिङश्च रूपप्' चा० ४।३।५३ इत्यत्र द्विबहुषु प्रकर्षे तरप्तमपौ (चा० ४।३।४५) सूत्रात् प्रकर्षपद मनुवर्तितम्।

---

१. ३।२।१४०।
२. ८।४।१७।
३. १।२।६।
४. श्रन्थिग्रन्थि—वा० १।२।५।

यद्यपि संस्कृतावाङ्मये प्रशंसापदं कथनार्थे प्रयुक्तम्; यथाकिल अप्रस्तुतप्रशंसा इत्यादौ दृश्यते कथापीह प्रकृष्ट-कथनपर्यन्तानुधावनमपि नाभिप्रेतम् तथासति प्रकृष्टकथने वर्तमानात् सुबन्तात् प्रातिपदिकाद्वा रूपबित्यर्थापेक्षया प्रकर्षे वर्तमानादित्येवार्थः लघुः स्पष्टश्च ।

किंच 'सुधायाः प्रशंसाऽमरत्वसम्पादनेन भवति मृत्युना च शीघ्रसम्पादितेन गरलं स्तूयते 'इत्यर्थकेन तुलसी [1]पद्येनोभयत्र प्रशंसाशब्दः प्रयुज्यते तथापि काव्यजगति तथा सम्भवेऽपि लोके प्रशंसापदं गुणप्रकर्षे एव ख्यातप्रयोगं न झटिति दुर्गुणप्रकर्षं बोधयितुं क्षमम् । इत्थं चन्द्राचार्येण प्रशंसापदं परित्यज्य तत्स्थाने यत् प्रकर्षपदं प्रयुक्तं तद्युक्तमेव ।

(६) विभक्ति-दोषो यथा

रुधादिभ्यः श्नम् पा० ३।१।७८ इत्यत्र । अत्र पञ्चम्याः स्थाने षष्ठ्या भाव्यम्।तुदादिभ्यः श्नुः पा०३।१।७७ पा० ३।१।७३ स्वादिभ्यः श्नुः इत्यादौ तु शः श्नुश्च तुदादेः स्वादेश्च परो भूत्वा भवति । अतः पञ्चम्यर्थः संघटते । किन्तु श्नम् प्रत्ययस्तु अचामन्त्यादचः पर स्तस्य ससुदायस्यावयवत्वेन भवन्निष्टः । स हि रुध्इत्यादेः परो भूत्वा न भवति, किन्तु भवति रुध उकारात्परावयवीभूतः । अतस्तत्रषष्ठ्या भाव्यम् । अतश्चन्द्राचार्येण तुदादिभ्यः शः (चा० १।१।९२) स्वादिभ्यः श्नुः (चा० १।१।९५) इत्यादौ पञ्चमीनिर्देशं स्वीकृत्याऽपि रुधादीनांश्नम् १।१।९३ इत्यत्र क्रमभङ्गो विहितः अपेक्षितार्थप्रतिपादनाय । अर्थभेदमनादृत्याक्षिणी निमील्य पालिता समता दोषत्वेन परिगण्यते साहित्यालंकारशास्त्रनिर्मातृभिरिति नाविदितं विदुषाम्[2] ।

तुग् विधौ छे च ६।११।७३ इत्यत्र ह्रस्वस्येत्यनुवर्तते[3] तेन ह्रस्वस्य तुग् भवति । किन्तु दीर्घात् पदान्ताद्वा इत्यनयो र्दीर्घादिति पञ्चमीनिर्देशात् उभयनिर्देशे पञ्चमीनिर्देशस्य परत्वेन बलवत्वात्, तत्सामर्थ्येन छे इत्यस्य षष्ठी प्रकल्पने दीर्घात् परस्य छस्य तुक् प्राप्नोति इष्यते तु दीर्घस्य । तदर्थं सेनासुराच्छाया इति ज्ञापकाश्रयणं न केवल गौरवास्पदम् अपितु स्वयं गृहं बह्विना संयोज्य इतस्ततो जलान्वेषणानुधावनमिव कष्टकरमपि ।

चन्द्रेण तु सूत्रद्वयं षष्ठ्या परिवत्य रचितम् । दीर्घस्य पदान्तस्य वा (चा० ५।१।७२-७३) । न छव्यप्रशान् (पा० ८।३।७) इति पाणिगीयसूत्रस्यार्थस्तु नान्तस्य पदस्य रुः स्यान्नतु प्रशान्शब्दस्य । इत्थं प्रशान्वर्जितस्य नान्त-स्य पदस्य सः इतीदृशार्थकरणाय सूत्रे अप्रशान इति षष्ठ्यन्तेन भाव्यम् तत्र 'अप्रशान्' इति करणं दोषः : चान्द्रेषु अतएव क्रियते सूत्रम्:—

नश्छव्यप्रशानः ६।३।४। प्रक्रियालाघवाय सकारः विधीयते । एवमेव कानाम्रेडिते इति पा० ८।३।१२ सूत्रस्य स्थाने चान्द्रे 'कानः कानि' ६।४।४ इति सूत्रं कृत्वा विभक्तिदोषः परिहृतः ।

नॄन् पे ८।३।१० सूत्रस्थाने नॄनः पे रो वा चा० ६।४।५ । अधः शिरसी पदे (८।३।४७) अत्र षष्ठी स्थाने प्रथमान्तप्रयोगः दोषः । चान्द्रे तु दृश्यते अधः शिरसोः पदे ६।४।४१ ।

(७) अधिकपदता यथा—

ताच्छील्यवयोवचनशक्तिषु चानश् (पा० ३।२।१२९) शक्तिवयःशीलेषु (चा० १।२।८७)

अत्र वचनपदमधिकम् । शक्त्यादिषु गम्यमानेषु इत्यर्थस्यैवेष्टत्वात् । अतश्चन्द्रेण स्वसूत्रे वचनपदं परित्यक्तम् ।

---

१. "सुधा सराहिय अमरता गरल सराहिय मीचु—रा० च० मा० बाल का० दो० ५

२. क्वचिद्दोषस्तु समता मार्गभेदस्वरूपिणी सा० दर्पणः ८।१५

३. ह्रस्वस्य पिति कृति तुक् ६।१।७१ इतिसूत्रात् ।

(८) **न्यूनपदता**—

अन्तर्वत्पतिवतो नुँक् (पा० ४।१।३१) इति सूत्रे यत्र किल निपातनमिष्यते तस्यार्थस्य निर्देशो नास्ति। अतोऽत्राभिप्रेतार्थप्रतिपादकशब्दन्यूनतया न्यूनपदत्वं दोषः।

चन्द्रेण दोषोऽयं योगविभागं कृत्वा सूत्रद्वयेऽर्थनिर्देशं विधाय परिहृतः। यथा अन्तर्वत्नी गर्भिण्याम् २।३·२८ पतिवत्नी भार्यायाम्। सरस्वतीकण्ठाभरणकारेणापि चन्द्रमर्थनिर्देशेऽनुकुर्वता उक्तम् नुक् चान्तर्वतो गर्भिण्याम् स० ३।४।४४ पतिवतो भार्यायाम् स० ३।४।४मु। फणादीनां सप्तानामिति वक्तव्ये फणां च सप्तानाम् पा० ६।४।१२५ इत्यादिपदरहितप्रयोगः न्यूनपदता। चन्द्रेण तु फणादीनां सप्तानामिति कृतम् ५।१।१२१ चा० सू०।

(९) **अपाचकत्वम्**

विवाहितायाः सर्वस्याः कृते पत्नीशब्दस्य प्रयोगो दृश्यते। वसिष्ठस्य पत्नी, वृषलस्य पत्नी इत्यादौ यथा। किन्तु पाणिनीयसूत्रे पत्युर्नो यज्ञसंयोगे ४।१।३३ इत्यत्र यज्ञसंयोग इत्युपादानात् धर्मशास्त्रेण दत्तयज्ञाधिकारस्य वसिष्ठस्य भार्या तु दम्पत्योः सहाधिकारात् यज्ञफलभोक्तृत्वात् पत्नी स्यात् न तु वृषलस्य। पत्नीव पत्नीत्युपचारात् वृषलस्य पत्नीति स्यादिति वाच्यम् न तथा प्रयोक्तृभिरनुभूयते। सर्वैरपि उभयत्र पत्नीशब्दस्य मुख्यार्थ एवानुभूयते। लक्ष्यार्थस्वीकारो न युक्तः मुख्यार्थबाधस्य प्रयोजनस्य चाभावात् गौण्या लक्षणाया असंभवात्।

एतां सर्वामनुपपत्तिं परिचिन्त्य चन्द्रगोमिना 'यज्ञसंयोग' इत्यस्य स्थाने **ऊढायामित्युक्तम्** (पत्युर्न ऊढायाम् २।३।३०) इत्थमत्र लक्षणेऽव्याप्तिर्नाम दोषश्चन्द्रेण परिहृतः। ऊढायाम् पत्नीति भवति संगृहीतायान्तु न। अर्थेन ऊढायामपि न भवति, भार्यायामिति पूर्वसूत्रादनुवर्तनात्। ऊढाशब्दः पाणिगृहीतीपर्यायः इत्यपि चान्द्रसूत्रात् (२।३।५८) गम्यते (पाणिगृहीत्यूढा २।३।५८)।

(१०) विशेषपरिवृत्तिर्दोषो यथा—

विशेषस्य स्थाने सामान्यस्य प्रयोगेऽयं दोषो जायते। वर्णादनुदात्तात्तोपधातो नः ४।१।३९ इति सूत्रे श्येतैत हरितरोहितानां वर्णविशेषाणां ग्रहणे कर्तव्ये सामान्यतो वर्णस्योपादानं पाणिनीयतन्त्रे दोषः। तं निवारयतोक्तं चन्द्रेण श्येतैतहरितरोहितात्तो नः (चा० २।३।३४) इति। लोहितशब्दोऽत्र न पठितः रोहितशब्दस्य तो ने कृते लत्व[1]-विधानेन तत्सिद्धेः।

(११) अश्लीलो यथा—

जानपद०० पा०४।१।४२ सूत्रे मैथुनेच्छा शब्दोऽश्लीलः। तत् स्थाने चान्द्रव्याकरणे रिरंसुशब्दः तद्दोषरहितः यथा भाजगोण०० २।३।३८ इत्यत्र चान्द्रसूत्रे, द्वन्द्वाद् वुन् वैरमैथुनिकयोः पा०४।३।१२५ इत्यत्र मैथुनिकशब्दः। चान्द्रेणास्य स्थानापन्ने विवाहे (चा० ३।३।९०) इति सूत्रे विवाहशब्दः प्रयुक्तः। भोजेनापि चन्द्रोऽनुकृतः (स० क० (४।३।२६०)।

गणपाठ दोषोऽपि दृश्यते पाणिनीयतन्त्रे। तद्यथा सर्वत्र लोहितादिकतन्तेभ्यः ४।१।१८ इति सूत्रेण लोहितादिकतन्तशब्देभ्यः ष्फो विधीयते। इमे शब्दा गर्गादिगणे पठिताः। इत्थं लोहितादिकतन्तगणो गर्गाद्यन्तर्गणः। गर्गादौ कतकण्वशकलेति पाठक्रमः। तथाच शाकल्यायनीति न सिद्धयति अतः कत शब्दात् प्राक् शकलशब्दः पठितव्यः। तथासति शाकल्यस्य छात्राः शाकला इत्यत्र कण्वादिभ्यो गोत्रे (पा० ४।२।१११) इति कण्वादिकार्यमण् न सिद्धयति इत्युभयतस्पाशा रज्जुः पाणिनीयानाम्।

---

१. कपिरिकादीनाम् ६।३।४६।

चन्द्राचार्येणायं दोषः गणपाठक्रमपरिवर्तनविशेषेण परिहृतः। तेन पूर्वनिदिष्टपा० सूत्रस्थाने लोहितादिभ्यः शकलान्तेभ्य २।३।।२० इति सूत्रं कृतम्। गर्गादिगणे कतशकलकण्वेतिति पाठक्रमो निर्धारितः। कण्वादिभ्यो गोत्रे ४।२।१११ इत्यस्य स्थाने शकलादिभ्यो गोत्रात् ३।२।२१ इति सूत्रं कृत्वा शाकल्यस्य कण्वस्य छात्राः शाकलाः काण्वा इति साधितम्।

किंचात्रैव लोहितादिगणे पाणिनिना कुरुकतानहुहौ अपि वृथा पठितौ, ताभ्यां लोहितादिकण्वादिकार्यस्यादर्शनात्। अतश्चन्द्राचार्येण लोहितादिगणस्य गडुभूताविमौ शब्दौ लोहितशब्दात् प्राक् पठितौ; ताभ्यां लोहितादिशाकलादिप्रयुक्तस्य कार्यस्याऽनभिप्रेतत्वात्।

किंचसूत्रे 'कतन्त' शब्दोऽपि अशुद्धः दीर्घेण 'कतान्त' इत्यस्यैव साधुत्वात्। न च शकन्ध्वादित्वात् पररूपं वाच्यम् वार्तिकस्य कात्यायनरचितत्वेन पाणिनिपरवर्तित्वात्। इयमपि पाणिनिप्रोक्त शब्दानां महती विडम्बना **यत् य इमे पाणिनिना प्रोक्ता तेषामपि सिद्धये नियमा न निर्मिताः।** 'कुलटा' शब्दः पाणिनिप्रोक्तः कुलटाया वा ५।१।१२७ इत्यत्र, किन्तु न तत्कृते कश्चिन्नियमो दृश्यते पाणिनीयः। न च छान्दसत्वात् छन्दोवत् सूत्राणि भवन्तीति नियमात्तत्सिद्धिः शकन्ध्वादिशब्दानां सिद्धये पररूपनियमनिर्माणस्यावश्यकत्वेन छान्दस्यकल्पनाया निःसारत्वात्। कश्चिन्नियम निर्माता यदा नियमं निर्माय स्वयं तस्य पालनं न करोति, तदा स सर्वतन्त्र स्वतन्त्रोऽपि अनुशासनीयस्याऽश्रद्धाया एव पात्रं जायते। अतएव लोक एतादृशं स्वनिर्मितनियमापालकं पण्डितमुपहसन् वदति 'पण्डितः' यत्करोति तन्न कर्त्तव्यम् किन्तु स यदुपदिशति तत्कर्त्तव्यम् इति।

चान्द्रे तु 'शकलान्तेभ्य' इति कृत्वा स दोषोऽपि परिहृतः।

न च कतकण्वशकलेतिगणपाठे कण्वशब्दात् पूर्वशकलशब्दः पठितव्यः। कतन्तेभ्य इत्यत्र कतस्यान्तः कतन्तः कतोऽन्तो येषां ते कतन्ताः कतन्तश्च कतन्ताश्चेति बहुव्रीहितत्पुरुषयोरेकशेषः, तथा कण्वादिभ्यो गोत्रे इत्यत्रापि कण्वस्यादिः कण्वादिः कण्व आदि र्येषामिति कण्वादिरिति बहुव्रीहितत्पुरुषयोरेकशेष स्तथा च सकलेष्टसिद्धौ सूत्रभङ्गे अन्तर्गणनामपरिवर्तने च न किमपि प्रयोजनमिति वाच्यम्, तादृशसमासस्य केवलं स्वदोषाच्छादनमात्रफलकस्य पाणिनीयैरङ्गीकार्यत्वेऽपि अन्यैरस्वीकारात्। यस्य 'शकल' शब्दस्य संग्रहाय तादृशक्लिष्टसमासः आश्रीयते तस्य साक्षादुपादानस्यैवौचित्यायात्। तादृशः समासः न लोके आश्रितः। यद्याश्रितः स्यात् तदा मासान्ते गमनं नेष्टं मासादौ च तथैव च इत्यादौ मासस्यान्तः मासः अन्ते यस्येत्युभयसमासाश्रयणेन मासान्त पदेनैव अथवा मासस्यादिः मासादिः मासआदि र्यस्य इति मासादिरिति पदेनैव सिद्धावुभयोरुपादानं वृथा स्यात्।

(१२) **च्युतसंस्कृतिः**

पाणिनीयसूत्राणि च्युतसंस्कृतिदोषाणान्तु निधय एव। वैयाकरणवाक्येषु च्युतसंस्कारता अतीव परिहासाय भवति। महाभाष्यकारेणापि व्याकरणस्य प्रयोजनं साधुशब्दप्रयोगमुपवर्णयता व्याकरणाचार्यस्याथचाशुद्धान् शब्दान् प्रयोक्तुः परिहासः कृतः। प्रोक्तंच तेन 'दृश्यते कृतप्रयत्नाश्चाप्रवीणाः अकृतप्रयत्ना श्च प्रवीणा[1] *इति।*

नलोपः प्रातिपदिकान्तस्य (पा० ८।२।७) इत्यत्र नस्य प्रातिपदिकस्येति अभिमतः षष्ठ्या लोपः अशास्त्रीयः। लिङ : सलोपोऽनन्त्यस्य पा० ७।२।७९ इत्यत्र सस्येत्यत्रापि तथैव। द्यावापृथिवी०००० (पा० ४।२।३) इत्यत्र छ च इत्यत्र छ इति निर्विभक्तिकं पदम्।

---

१. *महाभाष्यम्—पस्पशाह्निकम्।*

प्रथमोदाहरणे नस्येति षष्ठ्यन्तपदेन भाव्यम्। तदैव प्रातिपादिकान्तस्येत्यनेन तस्य सम्बन्धो विशेष्यतया संघटते। किंच प्रातिपदिकान्तघटकप्रातिपदिकपदेनाऽपि स्वतन्त्रेण सतैव पदेन सह सम्बद्धुं शक्यते।

द्वितीयोदाहरणे सलोप इत्यत्र सस्य लोपेन सह समासोऽनुचितः 'अनन्त्यस्य' इत्यनेन तस्य सम्बन्धविवक्षणात्। 'सविशेषणानां वृत्ति र्न' 'सापेक्षमसमर्थवद् भवतीत्यादि भाषानिसर्गसिद्धवैयाकरणसिद्धान्तानुसारेणात्र सस्य लोपशब्देन सह समासासंभवः। 'अनन्त्यस्य लिङः' इत्युभयोः सामानाधिकरण्यादभेदान्वयेऽपिदोषः प्रसज्यते तथाच अनन्त्यस्य लिङः सलोप इत्यर्थे विधिलिङाशीर्लिङुभयोरनन्त्यस्य विधिलिङ : **सलोप स्वीकारे** सिपोऽपि सकारस्य लोपापत्तिरित्थमत्र सार्वधातुकस्य लिङोऽनन्त्यस्य सस्य लोप इत्येवार्थोऽभिमतः पाणिनेः (स च नावगतो भवति। अतोऽत्र च्युतसंस्कृतिरसमर्थताऽभवन्मतयोगश्चेति।

तृतीयोदाहरणे निर्विभक्तिकपदप्रयोगाच्च्युतसंस्कृतिः स्पष्टैव।

चन्द्राचार्येण सर्वाणि दूषणानीत्थं परिहृतानि—

१. सुपः प्रकृते र्नो लोपः (चा० ६।३।४८) सुबन्ताया नकारान्तायाः प्रकृते र्नो लोपो भवति इति तदर्थः।

२. सो लोपोऽनन्त्यस्य (चः० १।४।३६) लिङोऽनन्त्यस्य सकारस्य लोपो भवति। ङिदनाशिषि (चा० १।४।३४) सूत्रात् अनाशिषीत्यनुवृत्या विधि-लिङ्येव प्रवर्तते। तेन भूयास्तामित्यादौ न सलोपः।

३. द्यावापृथिवी·····छश्च चा० ३।१।३० इति सूत्रं कृत्वा चन्द्राचार्येण दोषो निरस्तः।

बन्धुनि बहुव्रीहौ ६।१।१४ इत्यत्र बन्धुनि इतिनपुंसकलिङ्गस्य सप्तम्येकवचने रूपम् व्याकरणविरुद्धम्। अत एव चान्द्रे' 'बन्धावन्यार्थे (चा० ५।१।१२) इत्युक्तम्।

काशिकाकारस्तु नपुंपकनिर्देशस्तु शब्दस्वरूपापेक्षया पुल्लिगाभिधेयस्त्वयं बन्धुशब्द इत्याह।

(१३) **अपाणिनीयाः शब्दाः**

१. माणवशब्दः पाणिनिना चन्द्राचार्येण च स्वस्वव्याकरणे प्रकृतीकृतः[1] किन्तूभयोरन्यतरेणाप्याचार्येण तस्य साधनाय न कोऽप्युद्योगो विहितः। माणवशब्दसाधनप्रयत्नाभावरूपो दोष उभयसाधरणः। माणवकशब्दः चूडाकरणोपनयनादिसंस्काररहिताय बालकाय कृते बहुशः तत्तत्संस्कारपद्धतौ प्रयुक्तः। गौणीलक्षणाया उदाहरणम् अग्निर्माणवक इति तु प्रसिद्धमेव।

मनोर्जात्यपत्यम् इत्यर्थे अञ्यतौ तयोः संयोगशिष्टः षुक् च विधीयन्त उभयत्र व्याकरणे[2]। तत्र जातिः समुदायार्थः। मनोरपत्यसमूहः मनुष्यः मानुषश्च जातिशब्दावेतौ इति पाणिनीयाः। चान्द्रमते तु मनुष्य एव जात्यपत्यवाचकः शब्दः। मानुषस्तु मन्वपत्यवाचकः मानवशब्दोऽपि तस्यापत्यमित्यणि सिद्धोऽपत्यवाचक एव। अतएव २।४।९४ सूत्रवृत्तौ जाताविति किम् ! मानव इत्युक्तम्।

माणवशब्दस्य साधनाय सरस्वतीकण्ठाभरणे सूत्रं दृश्यते मनोरण् नश्च णः कुत्सायाम् (स० क० ४।१।१६६-१६७) इति। ननु सूत्रनिपातनेनापि बहवाः शब्दाः सिद्धयन्तीति नायं दोष इति चेत्, सत्यम्। 'अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः, नकारस्य च मूर्धन्यस्तेन सिद्ध्यति माणवः' इति वचनोक्तकार्यसिद्धि निपातनादित्युच्यते तर्हि चान्द्रेऽपि निपादनादेव तत् सिद्धयतु।

---

१. ब्राह्मणमाणववाडवाद्यन् (पा० ४।२।४२) गणिकाब्राह्मणमाणववाडवाद् यञ् (चा० ३।१।५०)।

२. मनोर्जातावञ्यतौ षुक् च पा० ४।१।१६१ मनो र्जातौ यत् षुक् च २।४।९४ (चा०) अञ् च २।४।९५ (चा०)।

२: निकटमिति पदमप्यपाणिनीयम् । संप्रोदश्च कटच् (पा० सू० ५।२।२९) इत्यत्र चकारेण वेः शालच्-शंकटचौ इति (५।२।२८) पूर्वसूत्रात् वेः संग्रहेण संकटम्, प्रकटम्, उत्कटम् विकटमिति सिद्धावपि नेः कुतोऽपि-संग्रहासंभवात् ।

चान्द्रे तु सम्प्रोन्नेश्च कटच् ४।२।३० इत्यत्र नेरुक्तत्वात् तदपि सिद्धयति । इत्थमशंत इदमपि सूत्रं नवम् पाणिनीयलक्षणस्याव्याप्तिनिवारकम् ।

३. दन्तीकरीत्यमू जातिशब्दौ अपाणिनीयौ । हस्ताज्जातौ ५।२।१३३ इति पाणिनीयसूत्रे हस्तशब्दमात्र-स्योपादानात् ।

चान्द्रे दन्तीति जातौ निष्पादयितुं दृश्यते प्रयत्नः, हस्तदन्ताज्जातौ ४।२।१३० इति सूत्रे दन्तस्याप्युपादा-नात् । गजजातेरन्यत्र दन्तवान् हस्तवानित्येवेति वृत्तावुक्तेः ।

किन्तु चान्द्रव्याकरणेनाऽपि करीति न सिद्धयति करीति साधनप्रयत्नः जैनेन्द्रस्य हस्तदन्तकराज्जातौ ४।१।-९७ इति सूत्रे दृश्यते ।

४. तरप्तमपोः संस्कृतवाङ्मये बहुरूपः प्रयोग उपलभ्यते । द्विवचनविभज्योपपदे तरबीयसुनौ (पा० ५।३।-५७) अतिशायने तमबिष्ठनौ (पा० ५।३।५५) इति सूत्रद्वयेन ते सर्वे विषया न व्याप्ताः भवन्ति, सूत्राक्षरार्थाननु-गुण्यात् । प्रथमे सूत्रे क्लिष्टत्वानिहितार्थत्वादयः दोषाः सन्ति । तथाहि क्लिष्टत्वं तावद् विलोक्यताम् सर्वप्रथमम् । अत्र द्विवचनशब्दो न 'द्वयेकयो' रिति सूत्रबोधितमध्यमविभक्तीनाम् औतसादीनां बोधकः किन्तु येन पदेन द्वयर्था-वुच्येते तस्य बोधकः, द्वयोरर्थयोर्वचनं द्विवचनम् करणे ल्युट् कर्मणि षष्ठ्या च समासः ।

विभक्तव्यं विभज्यम् ऋहलोरिति ण्यति प्राप्ते तदपवादो यत् इहैव निपातनात् । ण्यति तु चजोरिति कुत्वेन विभाग्यमिति स्यात् । विभाज्यशब्दस्तुण्यन्ता दचोयदिति सिद्धयति । द्विवचनं च विभज्यंचेति द्वन्द्वः तस्योपपदपदेन कर्मधारयः । तथाच द्वयर्थवाचके विभजनीये चोपपदे सति तरबीयसुनौ भवत इति सूत्रार्थः । अत्रोपपदमपि यौगिकमेव उपोच्चारितं पदमिति गृह्यते न तु पारिभाषिकं[1], तस्य तद्धितविधावसंभवात् । तच्च विग्रहवाक्य एव प्रयुज्यते । वृत्तौ तु गतार्थत्वान्नावश्यकम् । एवं स्थिते उपपदग्रहणं निरर्थकत्वदोषग्रस्तम् । इह द्वे उपपदे द्वे च सुबन्ततिङन्तरूपे प्रकृती, द्वौ च प्रत्ययौ तथापि न यथासंख्यमिति हठधर्मिता । द्विवचनोपपदशब्दयोः पाणिनीयतन्त्रे तत्तत्परिभाषितार्थे प्रसिद्धयोरप्रसिद्धेऽर्थे प्रयोगात् निहतार्थत्वम् । विभाग्यमित्यस्य स्थाने विभज्यप्रयोगे च्युतसंस्कृतिरपि ।

एतानि दूषणानि परिहर्तुमिच्छता चन्द्रेणात्र सूत्रं कृतम्—द्विबहुषु प्रकर्षे तरप्तमपौ (चा० ४।२।४५) । द्वयो र्बहुषु चैकानेकप्रकर्षे वर्तमानात् तरप्तमपौ भवत इति तदर्थः । तेनाऽयमनयोराढ्यतरः । अयमनयोः पाचकतरः । अयमेषामाढ्यतमः । इमावेषां पाचकतमौ । इमे त्रय एषां पाचकानां पाचकतमा इत्यादि प्रयोगाः सिद्धयन्ति । माथुराः पाटलिपुत्रकेभ्यः सुकुमारतरा इत्यादौ द्वयोर्द्वयोरर्थयोरेकस्य प्रकर्षविवक्षितत्वात् तरब् भवति । अवयवापेक्षन्तु बहुवचनम् । यथाऽस्मिन् ग्रामे आढ्यतरा वणिजस्तथा अस्माकं देवदत्तस्य च देवदत्तोऽभिरूपतर इति भवति । दन्तौष्ठस्य दन्ताः स्निग्धतरा इत्यत्र समुदायापेक्षमेकवचनम् तेन दन्तानामेकप्रकर्षे वर्तमानत्वमक्षतमेव । सांकाश्येभ्यः पाटलिपुत्रकेभ्यश्च माथुराः सुकुमारतरा इत्यत्र द्वयोर्द्वयोरेकस्यैव प्रकर्षे इति तरप् । सांकाश्यानां पाटलिपुत्रकाणां च पाटलिपुत्रकाः सुकुमारातमा इति बह्वपेक्षः प्रकर्षस्तेन तमप् । द्वयापेक्षे तरपैव भवितव्यम् । एकस्याप्यवस्थाभेदेनान्यत्वात् तरपा

---

१. तत्रोपपदं सप्तमीस्थम् पा० ३।१।९२ ।

भवितव्यमेव; यथा परुद् भवान् पटुरासीत् पटुतरश्चैषमः । प्रकृष्टानामपि पुनः प्रकर्षविवक्षायां तरप्तमपौ भवत एव । यथा युधिष्ठिरः श्रेष्ठतमः कुरूणाम् इति ।

विवक्षाबलेन व्यापकविषयस्य सूत्रस्य रचनया च चान्द्रेण व्याकरणेन सर्वमिष्टं साधितम् ।

किंच पाणिनिसूत्रे ५।३।५७, ५।३।५५ तरबीयसुनौ सामान्येन विहितौ । अत उभावपि प्रत्ययौ सर्वाभ्यः प्रकृतिभ्यः द्वयोरेकस्यातिशयविवक्षायां प्राप्नुतः । एवं तमबिष्ठनोरपि प्रकृतिविशेषमनुद्दिश्य विधानात् ता अपि सर्वत्र स्याताम् । तथाचायमनयोः पाचकतर इतिवत् पाचकीयानित्यपि प्राप्नोति अयमेषां पाचकतम इतिवत् पाचकिष्ठ इत्यपि च प्राप्यते । इश्यते इष्यते च **'गुणावाचकादेव द्विबहुषु प्रकर्षे वर्तमानात् ईयसुनिष्ठनौ तरप्तमपौ च भवेता'** मिति गुणवचनादन्येभ्यस्तु तरप्तमपावेवेति इतीदृशः विषयविभागः पणिनीयतन्त्रे न इश्यते । इश्यते च चान्द्रतन्त्रे ।

इत्थं तरप्तमबीयसुन्निष्ठन्विषयकाः संशयाश्चन्द्रेण परिहृताः द्विबहुषु प्रकर्षे तरप्तमपौ (चा० ४।३।४५) **गुणादीयसुनिष्ठनौ च (चा० ४।३।४७)** इति सूत्रद्वयं स्पष्टार्थकं रचयता । गुणवृत्तिभ्यस्तु प्रकर्षाभावान् न भवत ईयसुन्निष्ठनौ इति च वृत्तौ वर्णयतोदाहरणप्रत्युदाहरणे दर्शिते[1] ।

द्वितीयतृतीयशब्दयोः स्थाने द्वैतीयीकः तार्तीयीक इति प्रयोगः काव्यग्रन्थेषूपलभ्यते । तन्निष्पादकं सूत्रं पाणिनिना न कृतम् । महाभाष्ये श्लोकवार्तिकरूपेणैकवचनं इश्यते—'तीयादीकक् न विद्यायाः'[2] । अत्र भाष्ये 'स्वार्थे' इति शब्दो न इश्यते । पूर्वोत्तरखण्डयोः सम्बन्धोऽपि काठिन्येन शक्यते स्थापयितुम् । अतएव भट्टोजिदीक्षितेन वचन-द्वयमङ्गीकृतम्[3] पूर्ववचनं विधिस्वरूपम् उत्तरं च निषेधकम् ।

चन्द्राचार्येण एकमेव सूत्रं कृतं किन्तु तथा परिवर्त्य कृतं यथा तत्र संशयस्य निराकरणायाध्याहारस्य आवश्यकता न भवेत् अथवा इत्थं वक्तव्यं यत् सन्देह एव नोदेति तद् यथा :—

तीयादीकग् न विद्या चेत् (४।४।११) प्रकरणात् स्वार्थे इति लभ्यते तीयान्तात् स्वार्थ ईकग् वा भवति विद्या चेत्सा न भवति इत्यर्थः । द्वैतीयीकम् द्वितीयम् । तार्तीयीकम्, तृतीयम् इत्युदाहरणम् द्वितीया विद्या तृतीया विद्या इति च प्रत्युदाहरणम् ।

इत्थं पाणिनेस्तन्त्रस्य दोषोऽत्र निराकृतो विलोक्यते ।

(५) एत्येधत्यूठ्स् (पा० ६।१।८९) इति सूत्रे अनुवृत्त एचीति एत्येधत्योः विशेषणं न तूठः असम्भवादित्यु-च्यते इदं पाणिनीयतन्त्रस्य महद्दूषणम् द्वन्द्वसमासापन्नेषु शब्देषु एकदेशीभूतेन केनापि शब्देन किमपि विशेषणमन्वयेत इतरेण नेति । यदि चासम्भवात्तथेत्युच्यते तदा तादृशानां विसदृशस्वभावनामेकत्र सूत्रे संग्रन्थनं न कामपि बुद्धिमत्तां साधयति ।

चन्द्रेण एतद्दूषणपरिहारायेह योगविभागोदर्शितः इणेधोः ५।१।८५ ततः 'ऊठि ५।१।८६ भोजराजेनाऽपि चान्द्रमनुकृतम्[4] ।

(६) दृढः स्थूलबलयोः (पा० ७।२'२०) इति पाणिनिसूत्रे बलशब्दः बलवति वर्तते । अर्शआद्यचा यद्यपि तथार्थः कर्तुं शक्यते तथापि स्पष्टत्वप्रतिपत्तये चन्द्रेण दृढः (चा० ५।४।१४८) स्थूलबलिनोरिति क्रियते ।

---

१. द्र० ४।३।४५,४७ चा० सूत्रवृत्तिः ।
२. दृष्टं साम पा० ४।२।७ इति सूत्रभाष्यम् ।
३. ५।३।४८ तद्धितेषु प्रागिवीयप्रकरणम् सि० कौ० ।
४. स० क० ६।१।९९ तथा ६।१।१०० ।

(७) विश्रामः लोककाव्यप्रसिद्धः शब्दः पाणिनिना अदृष्टसाधनोपायः। शब्दोऽयं चन्द्रेण निष्पादितः। मल्लिनाथेनाऽपि मेघदूतस्य पूर्वमेघस्थं (२५) पञ्चविंशं श्लोकं टीकयता प्रोक्तम्-विश्रामेत्यत्र नोदात्तोपदेशस्य मान्तस्यानाचमेः (७।२।३४) इति पाणिनीये वृद्धिनिषेधेऽपि विश्रमो वा इति चान्द्रव्याकरणे विकल्पेन वृद्धिविधानाद्रूपसिद्धिः। इत्थं मल्लिनाथस्योद्धरणानुसारेण विश्रमः विश्राम इत्युभयं रूपं चन्द्रसम्मतमिति प्रतीयते। चन्द्रस्यानुयायिनो भोजराजस्याऽपि 'विश्रमे वा (स० क० ७।१।५६) सूत्रे विकल्पार्थकवा शब्दो दृश्यते। साम्प्रतमुपलब्धे मुद्रिते चान्द्रव्याकरण पुस्तके 'मः सेटो नावम्यमिकमाचामविश्रमः (चा० ३।१।४२) इत्येव सूत्रं दृश्यते। तत्र 'वा' शब्दो नास्ति प्रयुक्तः। अवम्यमिकमाचमविश्रम इत्युक्त्या च वम् अम् कम् आचम् विश्रम् एभ्यः नित्यं दीर्घः प्रदर्शितः। तथैव च वृत्तावुदाहरणान्यपि दत्तानि 'वामः वामकः अवामि आमः आमकः आमि, आचामः आचामकः आचामि विश्रामः विश्रामकः व्यश्रामि इति। इष्यते च विश्रमवर्जितेभ्यः सर्वेभ्यः नित्यं दीर्घः। अतः ज्ञायते मल्लिनाथादिसाक्ष्येण यत् चन्द्रेण' मः सेटानावम्यमिकमाचामः इति सूत्रात्पृथक् विश्रमे वा इति सूत्रं रचितं भवेत् केनापि चान्येनाऽखिलमेकत्रीकृत्य दर्शितं भवेत्।

यत्तु गोयीचन्द्रेण वेः श्रम् वा १।६ इति सूत्रस्य संक्षिप्तसारटीकायाम् चन्द्रोऽत्र नित्यांवृद्धिमाह भागवृत्तिस्तु नित्यं वृद्ध्यभावम् 'वेः श्रमेर्वेति वर्धमानः तत्तु मुद्रितपुस्तकस्य सदृशं कमपि हस्तलेखं दृष्ट्वेति सम्भाव्यते।

(८) द्विरुक्तप्रकरणे वीप्साद्यर्थे शब्दानां द्विःप्रयोगः पाणिनीयतन्त्रेऽपि दृश्यते। किन्तु मन्दं मन्दं नुदति पवनः 'सानुकूलो यथा त्वाम्' इत्यत्र वीप्साद्यर्थाभावात् द्वित्वं दुर्लभम् किंच 'आगच्छ आगच्छ आगच्छ मित्र, चिराद्दृष्टोऽस्यागच्छ, इत्यादौ अनेकधा प्रयोगो दृश्यते अतः **'सर्वस्यद्वे'** इत्यधिकारोक्तं द्विरुक्तप्रकरणमिति नाम तत्कार्यं च नोचितम् कात्यायनेन ८।१।१ इत्यत्र 'चापले' इति वार्तिकं कृतं तेनाऽपि द्विरुक्तत्वं साध्या अतः मन्दं मन्दमिति मेघदूतप्रयोगस्य सुसमाधानेऽपि त्रिश्चतुष्प्रयोगाणां समाधानं तेन न भवति। अथ च न केवलं चापले एव अनेकप्रयोगो भवति 'विषादविस्मयहर्षक्रोधदैन्यानुकम्पाप्रसादनादिमनोभावानामाधिक्येऽपि। विषादविस्मययो र्जडित्वसम्पादकयोश्चापल्यं न कथमपि सम्भवति। अतश्चन्द्रेणात्र **'संभ्रमे यावद् बोधम्'** (चा० ६।३।१४) इति सूत्रं कृतम्। तेन प्रयोक्तुः सभ्रमे सति यावद्भिः शब्दैः सोऽर्थोऽवगम्यते तावन्तः शब्दाः प्रयोक्तव्या इत्यर्थं आयाति तेन अहिरहिरहिः। बुध्यस्व बुध्यस्व बुध्यस्वेत्यादि सिद्धम्।

काशिकाकारेणापि एषोऽर्थोऽङ्गीकृतः। सरस्वतीकण्ठाभरणे तु वाक्यस्यापि सम्भ्रमे यावद्बोधम् प्रयोगोऽनुशासितः भट्टोदीक्षितेनापि परामर्शोऽयं स्वीचक्रे। अतो दृश्यते सिद्धान्त कौमुद्याम्:—

वाक्यस्यापि संभ्रमे यावद्बोधम् ७।३।२५ संभ्रमेण प्रवृत्तौ यथेष्टमनेकधाप्रयोगो न्यायसिद्धः।

---

१. ५।३।४८ तद्धितेषु प्रागिवीयप्रकरणम्-सि० कौ०।

षष्ठोऽध्यायः

चान्द्रव्याकरणे दोषाः

दोषापाकरणाय कृतस्तुत्यप्रयत्नस्यापि चन्द्राचार्यस्य रचनायां केचिद्दोषास्तथैवागता यथा संक्रामक-रोगान् चिकित्सतो वैद्यस्य कस्यापि शरीरे ते कदापि कदापि संक्रान्ता जायन्ते। त इमे दोषा मुख्यतया द्विधा दृश्यन्ते—

(१) पाणिनीयेऽविद्यमानाः किन्तु चान्द्रे विद्यमानाः।

(१) उभयत्र विद्यमानाः।

तथाहि :—

(१) समासत्तौ (पा० ३।४।५०) इति सूत्रे उपदंशस्तृतीयायाम् ३।४।४७ इति सप्तम्यां चोपपीडरुधकर्षः ३।४।४९ इति सूत्राभ्यां तृतीया सप्तमी चानुवर्तते। समासत्तौ इत्यस्य सन्निकर्षे इत्यर्थः। तेन तृतीयासप्तम्यो र्धातोर्णमुल् स्यात् सन्निकर्षे गम्यमाने इति तात्पर्यमायाति केशग्राहं युद्धयन्ते। केशेषु गृहीत्वा। हस्तग्राहं हस्तेन गृहीत्वा इत्यर्थ इति पाणिनीयाः।

अत्र चन्द्राचार्यः आसत्तौ (चा० १।३।१४२) इत्येव सूत्रं करोति। शाब्दबोधहेतुत्वेन स्वीकृतेषु आकांक्षा-योग्यतातत्सन्निधिषु सन्निधेरासत्तिरित्येव नामान्तरमुपलभ्यते नतु समासत्तिरिति। पदानामविलम्बेनोच्चारणं सन्निधिरथ च प्रकृतान्वयबोधाननुकूलपदाव्यवधानमासत्तिः यथा गिरिरग्निमानित्यत्र वर्तते आसत्तिः, उभयोः पदयोरासन्नत्वात्। पर्वतो भुक्तं बह्निमान् देवदत्तेन इत्यादावासत्तिर्नास्ति। इत्थं शब्दानां वाक्यगतानां मिथः सान्निध्यद्योतक मासक्तिपदमेवात्र सूत्रे प्रयोज्यम् नतु समुपसर्गकमासत्तिपदमिति। सम् इत्यस्याऽधिक्यं स्पष्टमेव।

वस्तुतस्तु समासत्तिपदेन नात्र केवलमासत्तिर्विवक्षिता, किन्तु समासोऽपि। तथाचात्र पाणिनिसूत्रे चन्द्राचार्य-मतेन दर्शितोऽधिकपदतादोषो नास्त्येव। प्रत्युत चान्द्रव्याकरण एवावाचकत्वदोषः, आसत्तिपदस्य समासविशिष्टसन्निकर्ष-त्वप्रतिपादनसामर्थ्याभावात्।

किंचात्र चन्द्रेण सप्तम्यां चोपपदात् पीडरुधकर्षः (चा० १।३।१४१) इति सूत्रात् केवलं सप्तम्यनुवर्तिता आसत्ताविति सूत्रस्य वृत्तौ न तु ससासत्तौ इति सूत्रवत् तृतीयापि। यद्यपि इतः पूर्वम् 'उपदंशस्तृतीयायाम् (चा० १।-३।१३९) इति सूत्रं वर्तते तथापि चानुकृष्टमुत्तरत्र [1]नानुवर्तते इत्यनुसारेण सप्तम्यां चोपात् पीडरुधकर्ष इति सूत्रे चानुकृष्टायास्तृतीयाया उत्तरसूत्रेऽनुवृत्तिः न कृता, तथैवोदाहरणमपि दत्तम् केशेषु ग्राहं युध्यन्ते केशग्राहं युध्यन्ते इति। हस्तग्राहमित्युदारणमिह न दृश्यते। किन्तु जयादित्यदुर्गदण्डनाथादयः सूत्रमिदं तृतीयान्तोपपदेऽपि प्रवर्त्तयन्ति[2]।

'तत्र तेनेदमिति सरूपे' (पा० २।२।२७) 'तत्र गृहीत्वा तेन प्रहृत्य युद्धे सरूपम्' (चा० सू० २।२।४७) इत्यनयोः सूत्रयोः 'केशाकेशि' 'दण्डादण्डि' इति यथा सप्तम्यन्ततृतीयान्तप्रहरणविषयकमुभयविधमुदाहरणं युज्यते तथाऽस्य सूत्रस्याप्युभयविषयकस्योदाहरणं युक्तम् इत्थमत्र तृतीयाऽन्तस्याप्यनुवृत्तिः कर्तव्यैव। तदकरणं दोषः।

---

१. चा० परिभाषा सू० ४०।

२. ३।४।५० का० वृ०। चा० व्या० भाग १ पृ० १२७ टिप्पणी।

(२) पाणिनीयसूत्रेष्वागतानां विधेयाविमर्शानां निराकरणाय बद्धपरिकरेणापि चन्द्राचार्यण क्वावि क्वापि स दोषो न दृष्टः। अतः कानिचित् पाणिनीयानि सूत्राणि तद्दोषविनिर्मुक्तानि न बभूवुः। बौद्धादपि येषामुद्धारो न जातः अहो तेषां दौर्भाग्यम्।

तानि सूत्राणीमानि सन्ति—

आमेतः (पा० ३।४।९० चा० १।४।२४) उभयत्र सूत्रमिदं समानमतिष्ठत्। अत्रैतमुद्दिश्य तस्याम् विधीयते। अत उद्देश्यस्यैतः पश्चादुल्लेखात् विधेयाविमर्शः स्पष्टः। यदा चन्द्रेण दोषो नोद्धृतस्तदा सरस्वतीकण्ठाभरणकारेण महाराज-भोजेनाऽप्यस्योद्धाराय प्रयत्नो न दर्शितः। पतितपावनेनास्पृष्टः कथं राज्ञा उद्धृतः स्यात्। तत्रापि सूत्रमिद यथावस्थमेवास्थात् आमेतः (स० क० ३।१।२१) इति।

लिङः सलोपोऽनन्त्यस्य (पा० ७।२।७९) इदमपि सूत्रं पाणिनीयतन्त्रे विधेयाविमर्शदोषदुष्टम्। च्युत-संस्कृतिदोषदुष्टमपि। सार्वधातुकलिङः अनन्त्यस्य सस्य लोपो भवतीत्यर्थोऽत्राभीष्टः। तत्रानन्त्यस्येति पदम् उद्देश्य-स्य सस्य पूरकपदं, विशेषणत्वात्। अतो विधेयाल्लोपादनन्तरं तस्य प्रयोगादत्र विधेयाविमर्शः स्पष्टः।

द्वितीयो महादोषोऽत्र वर्तते च्युतसंस्कृतिः। महावैयाकरणस्य पाणिनिसदृक्षस्य मुखान्निसृता त्रुटिः कं नोद्वि-जति ? अत्र हि अनन्त्यस्येति पदं सस्य विशेषणत्वाभिप्रायकम्। लिङोऽनन्त्यस्य सस्य लोप इत्येवार्थोऽत्राभिप्रेतः। तादृशस्याभीष्टस्यार्थस्य सिद्धये सस्येति पदस्य प्राधान्यं स्वातन्त्र्यं वाऽपेक्षितम्। तथात्वायात्र तस्य लोपशब्देन सह समासाविधानमेवोचितम्। समासं च विधाय पाणिनिना सूत्रमिदं न केवलम् अभवन्मतसम्बन्धदोषकलङ्केनाङ्कितमपि तु 'सविशेषणानां वृत्ति र्न वृत्तस्य च विशेषणयोगो नेति' वैयाकरणसिद्धान्तविरोधात् एकार्थीभावाभावाच्च च्युतसंस्कृति-गर्तेऽपि पातितम्। चन्द्राचार्येणात्र 'सो लोपोऽनन्त्यस्ये १।४।३६ इति न्यासं विधाय हलन्तसकारस्य षष्ठ्यां 'सः' इति रूपं निर्माय च्युतसंस्कृतिस्तु परिहृता किन्तु विधेयाविमर्शनिर्मोकाय न कोऽप्युपायो दर्शितः। मन्ये महादोषनिवारण-प्रयत्नव्यस्तेन चन्द्राचार्येण विधेयाविमर्श प्रति तथैवानास्था दर्शिता यथा कश्चिद्राजवैद्यः ज्वरितस्य विषूचिकाग्रस्त-स्य च मानवस्य चिकित्सायां प्रवृत्तः द्वितीयं चिकित्सन् प्रथमरोगं प्रति मन्दादरो भवति।

इत्थमत्र 'सो लोपोऽनन्त्यस्य' (१।४।३६) इति चान्द्रे सूत्रेऽपि विधेयाविमर्शः तदवस्थ एव।

(३) योग-विभाग-दोषो योगकमविन्यासदोषश्च चान्द्रे दृश्यते :—यथा १-४-४६-४७-४८ इति सूत्रत्रये। यत्र हि पाणिनीयतन्त्रे 'अनुदात्तङित आत्मनेपदम् १।३।१२ भावकर्मणोः १।३।१३ इति सूत्रद्वयं दृश्यते। चान्द्र-तन्त्रेऽत्र सूत्रत्रयम् स्पष्टप्रतिपत्तये कृतम् तङाना यथापाठम् (चा० १।४।४।४६), भावाप्ययोः १।४।४७ इति, ङितः १।४।४८ इति च। व्याकरणे संज्ञैव न कर्त्तव्या इति प्रतिज्ञावता चन्द्रेण 'आत्मनेपद' संज्ञास्थाने 'तङाना' पदं प्रयुक्तम्। अनुदात्तस्य वेदे प्राप्तमहत्वस्य लोकेऽवहेलनात् लोकानां तस्य परिचयाभावात् धातूनामुच्चारणकाले-ऽनुदात्तविशिष्टोच्चारणस्य लोकेऽश्रवणाच्च तदाधारेण सूत्रप्रणयनस्यानौचित्यमवगत्य धातुपाठमेव तङानयो-र्दृढाधारत्वेन स्वीकृत्य 'तङाना यथापाठम् इति सूत्रम् निर्मितम्। कर्मसंज्ञास्थाने चान्द्र-व्याकरणे 'व्याप्येति' आप्येति वा शब्दः प्रयुक्तः। इत्थं भावकर्मणो रिति सूत्रस्थाने भावाप्ययो रिति सूत्रमजनि। ततो 'ङित' इति सूत्रं पापच्यते पापच्यमान इत्यादौ तङानविधानार्थं कृतम्। कुङ् डीङ् आदिधातुषु ङकारानुबन्धोऽपि कृतः ते च धातवः 'तङानिनां धातूनां प्रकरणे पठिताः अतः ङित्करणेन ज्ञाप्यते धातुपाठनिमित्तौ तङानावनित्यौ। तेन स्फायन्निर्मोकसन्धिः, उद-यति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्" नीचं समृद्धमपि सेवति नीच एव दूरेण तं परिहरन्ति पुन र्महान्तः, अनुक्तमप्यूहति पण्डितो जनः, रात्रौ निद्रां न चालभत्, त्राहि मां पुण्डीकाक्ष इत्यादि सर्वं व्याख्यातम्।

एतत्सर्वं सुस्थं किन्तु पूर्वमुत्तरं च सूत्रं कर्तरि विधानार्थम् मध्यमं च भाववाच्ये आप्य (कर्म) वाच्ये च

तङानविधायकम् इतीदृशोऽर्थः कष्टलभ्यः। यदि भावाप्योरिति सूत्रात् पूर्वमेव 'ङितः' इति सूत्रं कुर्यात् तदोभयोः कर्तरि प्रवृत्तिरिति स्वीकारे क्रमः सहायकः स्यात्। भावाप्ययोरिति सूत्रात् ङित इत्यत्र भावाप्ययोरननुवृत्तिसाधनायापि यत्नः करणीयो भवेत्। एष दोषः चान्द्रव्याकरणसूत्रपाठे दृश्यते।

पाणिनिस्तु भावकर्मणोः १।३।१३ इति सूत्रादनन्तरपठितानामात्मनेपदविधायकानां सूत्राणां 'कर्तरि' प्रवृत्तिमिच्छन् कर्तरि कर्मव्यतिहारे' १।३।१४ इति सूत्रे 'कर्तरि' पदं प्रयुङ्क्ते। चान्द्रे न तथा दृश्यते। इष्यते च भावात्ययोरिति सूत्रोत्तरपठितस्य 'ङित' इत्यस्य कर्तरि प्रवृत्तिः सा कथं विना विशेषेण यत्नेन लभ्येत्यत्र चन्द्र एव प्रमाणम्।

(४) बहुच् प्रत्ययश्चान्द्रव्याकरणे न स्वीकृतः[1] प्रत्ययोऽयं पाणिनिना भोजराजेन चाङ्गीकृतः। अन्यप्रत्ययापेक्षयाऽस्य प्रत्ययस्य वैशिष्ट्यमस्ति। सर्वे प्रत्ययाः प्रकृतितः परा भूत्वा भवन्ति; किन्त्वयं प्रत्ययः प्रकृतेः पूर्वं भवति। अतएवास्य प्रत्ययस्य विधायके सूत्रे 'पुरस्तात्तु' ग्रहणं कृतम्। चन्द्राचार्येण प्रत्ययस्थाने 'पर' शब्दः प्रयुक्तः असंज्ञकं व्याकरणं रचयता। अयं च बहुच्, पाणिनीयमतेन प्रत्ययः सन्नपि न परोऽस्ति अतश्चन्द्राचार्यस्य प्रत्ययपरयोः पर्यायत्वस्वीकारो व्यभिचरति इदमपि काठिन्यमासीत् बहुचः स्वीकारे एकम्।

अस्य प्रत्ययस्य प्रयोगः काव्यादौ बहुशः दृश्यते यथा माघस्य द्वितीयसर्गे[2]। गोमिना एतादृशस्थले बहुशब्द एव स्वीकृतः। तस्य कृतम् तृणमित्यादिना समासे बहुकृतम्, बहुतृणम् इत्यादि सिद्धम्। बहुकृतमित्यादौ किंचिन्न कृतमित्यर्थो गम्यत एव। यथा उपकृतं बहु तत्र किमुच्यत इत्यादौ किञ्चिन्नोपकृतमित्यर्थो नीयते तथैव समासेऽपि बहुकृतमित्यादौ प्रतीयेत। यदापि बहुकृतं देवदत्तस्य यज्ञदत्तेन, बहुकरोऽस्माकं यज्ञदत्तस्तदापि बह्वर्थतैव स्फुटं गम्यते। बहुतैलं प्रसन्ना बहुगुडो द्राक्षेत्यपि बहुः। तथा किंचिदन्यथेत्ययमर्थो गम्यते। तिङन्तेष्वपि बहु करोतीत्ययमर्थो गम्यते। नच ततः पूर्वस्य बहोर्विधिरस्ति इत्याहुश्चन्द्राचार्याः[3]।

अत्र विचार्यते 'बहुकृतमित्यादौ किंचिन्न कृतम् इत्यर्थः अकर्मण्यं प्रति कथनादेव लभ्यते तत्र मुख्यार्थस्य तात्पर्यानुपपत्या बाधात् तादृशोऽर्थः लक्ष्यार्थः। कर्मठं प्रति कथने तु क्रियाप्रकर्ष एव लभ्यते। एवंच विपरीतलक्षणया यत्र तादृशं लक्षणाहेतुत्रयमस्ति; तत्र विलोमार्थबोधेऽपि बहुतृणमित्यादौ तृणादूनमित्यर्थस्यालाभेन तल्लाभाय बहुच् प्रत्ययः स्वीकार्य एव। तिङन्तेषु तु बहुकरोति इत्यादौ क्रियाविशेषणत्वेन निर्वाहः अतो नास्ति विधेरावश्यकता किन्तु 'बहुतृणं नरः' इत्यादौ विधिं विना रूपनिष्पत्ति र्न स्यात्।

नच बहु ददाति बहु करोतीत्यादौ किंचिदूनार्थो बहु शब्दो विद्यत एव तेन च समासेन बहुतृणमिति सिद्धे किं लक्षणेनेति वाच्यम्, समासस्वीकारे गर्तोत्तरपदाद्देशादितीयप्रत्ययेन बहुगर्तीय इत्येव स्यात् न तु अणा बाहुगर्त इति। एवं बहुपत्या इत्यादौ समासे भूपतिनेत्यादिवत् नाद्यादेशः प्रसज्येत। बहुराजा बहुगौः बहुपन्था इत्यादौ समासान्तष्टः स्यात् बहुसर्पिष्पात्रमित्यादौ विसर्गस्योत्तर पदस्थत्वात् सत्वं न स्यात् इत्थं चास्य प्रत्ययत्य विधानमत्यावश्यकम्। चन्द्रस्यैतत्सूत्रप्रत्याख्यानं न बुद्धिविलसितम्। यद्यपि बाहुगर्त इत्यत्र गर्तान्ताच्छः ३।२।५२ इत्यस्यातिप्रसक्तिवारणं चन्द्राचार्येण दर्शितं वृत्तौ' देशाधिकाराद् बहुच्पूर्वान्त भवति—बाहुगर्तः। न च संभवत्यां गतौ यथा कथंचिद्देशे वर्तमानस्य ग्रहणं युक्तमिति ग्रन्थेन', तथापि बहुपत्या इत्यादौ दोषस्तदवस्थ एवेति सूत्रास्वीकरणं चन्द्राचार्यस्य त्रुटिरेव।

(५) निस्दुसोः प्रादौ (उपसर्गे) अपाठो दूषणम्।

---

१. विभाषा सुपो बहुच् पुरस्तात्तु (पा० ६।३।६७ वा०) सुपो बहुच् पुरस्तात् स० क० भ० ५।३।९२।

२. स्वयं प्रणमतेऽल्पेऽपि परवायावुपेयुषि निर्दशनमसाराणां लघुर्बहुतृणं नरः माघ स०२ श्लोक ५०।

३. ४।३।५४ सूत्रवृत्तिः।

४. गर्तोत्तरपदाच्छः ४।२।१३७ उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थमिति काशिका।

उपसर्गस्य संज्ञात्वादसंज्ञके चान्द्रव्याकरणे उपसर्गस्य स्थाने प्रादिरिति अनुपसर्गस्य च स्थानेऽप्रादिरिति पदं प्रयुक्तम्। इत्थमत्र मात्रालाघवं प्रक्रियालाघवं उपसर्गत्वविधायकसूत्राकरणजन्यं च लाघवमाप्तम्। किन्त्वत्र प्रादौ[1] निस्दुसोः पाठाभावश्चिन्त्यः। यद्यपि निर्गतः दुर्गतः नीरक्तं दूरक्तमित्यादौ निरदुरोः स्वीकारेणापि इष्टम् सिद्धयति; निस्दुसोरपि रुत्वे कृते निर्दूरूपत्वात्तयोरपाठेऽपि पाठेऽपि च न कश्चन विशेषस्तथापि निरयः (नरकं) निलयः (भवनम्) इत्युभयविधरूपसिद्ध्यर्थं निस्निरोरुभयोरपि तत्र पाठस्यावश्यकत्वम्। निर्पूर्वकाय्धातोः-उपसर्गस्यायतौ ८।२।१९ इति पाणिनीयसूत्रस्थानिकेन प्रादीनामयतौ (चा० ६।३।४२) इति चान्द्रसूत्रेण प्रादेरेफस्य लत्वे निलय इति सिद्धावपि चान्द्रे निरय इति न सिद्धयति।

यदि प्रादौ निस् इति पठितः स्यात्तदा तु ससजुषो रुः (चा० ६।३।९८) इति रुत्वस्य परस्य प्रादीनामयतौ ६;३।४३ इति लत्वे कर्त्तव्येऽसिद्धत्वाल्लत्वाप्राप्त्या निरय इति सिद्धयेत्। चान्द्रे पूर्वत्रासिद्धमिति ६।३।२७ इत्यत्र पठितमस्ति।

पाणिनीयतन्त्रे तु निरः लत्वे निलयः निसः लत्वे कर्त्तव्ये रुत्वस्यासिद्धत्वाद्रेफाभावान्निरय इति भवति। एवं दुलयते दुरयते इत्युभयविधरूपस्य सिद्धये सकारान्तरेफान्तयोरुभयोरपि प्रादौ पाठः स्वीकार्यः। यदि हि निरो दुरश्च केनापि सूत्रविशेषेण लत्वं विकल्पेन विधीयेत तदा तु दोषो न स्यात्; परन्तु तथाविधमपि किमपि सूत्रं न दृश्यते। अतश्चान्द्रे प्रादौ निस्दुसोः पाठाभावस्त्रुटिरेव।

(६) अजर्यं संगतम् चा० १।१।११६ अत्र पा० सूत्रमपि ईदृशमेव ३।१।१०५। भोजराजस्तु कर्तर्यजर्यं संगतम् (स० क० १।३।१४७) सूत्रयामास। चान्द्रवृत्तौ 'अजर्यमिति कर्तरि निपात्यते संगतं चेत् इत्यर्थमुल्लिख्य अजर्यमार्यसंगतमित्युदाजहार। इत्थं वृत्तौ कर्तरीति पदं दृश्यते चान्द्रे व्याकरणे, सूत्रे च तन्नोपलभ्यते सूत्रे कुतोऽप्यनुवृत्तेरपि नास्ति सौविध्यम्। सूत्रे कृत्वैव सन्निवेशं वृत्तौ किमपि पदं प्रवेशनीयम्। तथाऽकरणमिह दूषणम्। किंच कात्यायनपतञ्जलिभ्यां प्रस्तुतस्य समावेशस्य सूत्रे एव समावेशाभिनिवेशश्चन्द्राचार्यस्य सर्वत्र दृश्यते। ३।१।१०५ सूत्रे कात्यायनेन लिखितम् 'अजर्यं कर्तरि' इति। पतञ्जलिना भाष्यं कुर्वतोक्तम् कर्तृविशेषणं संगतग्रहणम् संगतं चेत् कर्तृ भवतीति। इत्थमत्र सूत्रे भोजराजस्य सूत्र इव 'कर्तरीति' निवेशः प्रमादात्परिभ्रष्ट इति ज्ञायते।

(७) घुरच् (चा० १।२।१०७) कुरच् (चा० १।२।१०८) विधायकयोः सूत्रयो र्यद्यपि विशेषोपादनं नास्ति तथापि तत्तच्छूत्रवृत्त्या ज्ञायते यत् भञ्जेः घुरच्प्रत्ययः कर्मकर्तर्येव चन्द्राचार्यस्येष्टः। अतएव सरस्वतीकण्ठाभरणे भञ्जेः कर्मकर्तरि १।४।२३८ इति सूत्रं कृतं चन्द्रस्यानुकरणपटुना भोजराजेन घुरच् प्रकरणे।

कुरज्विधायकसूत्रवृत्त्यापि ज्ञायते यत् विदिभिदिच्छिदेः कुरच् कर्म कर्तर्येव चन्द्रस्येष्टः। तथाच यत् काष्ठं स्वयमेव भज्यते भनक्ति वात्मानं तदेव भिदुरं भवितुमर्हति। एवमेव यः स्वयमेव भिद्यते ना भिनत्ति छिनत्ति वा स्वयमेवात्मानम् स एव भिदुरः छिदुरो वा भवेच्चन्द्राचार्यदृष्ट्या।

भासिमिदो घुरचि विदेश्च कुरचि नायं प्रतिबन्धः। अत एव भासते मेद्यति वेत्तीति भासुरः मेदुरः विदुर इति कर्तरि प्रत्ययः। ननु विशेषनियमो न क्रियते तथा च कथमेकयोगनिर्दिष्टेषु भञ्जिभासिमिदिषु भञ्जेः कर्मकर्तरि, इतराभ्यां कर्तरि, विदिमिदिच्छिदेषु विदेः कर्तरि तद्व्यतिरिक्ताभ्यां च कर्मकर्तरीति शक्यते वक्तुमिति चेच्छ्रूयताम् बहुलाधिकारस्येयं माया यया क्वचित्प्रचण्ड आतपः क्वचिच्च च्छाया समकालमपि स्यात्। सरस्वतीकण्ठाभरणकारेण च मायामिमां स्पष्टयितुं योगविभागो दर्शितः—'भासिमिदिभ्यां घुरच् भञ्जेः कर्मकर्तरि स० क० १।४।२३१-२३२ छिदिभिदिभ्यां कुरच् विदेश्च (स० क० १।४।२३३-२३४)।

१. प्रादिः १।१।१३७।

वस्तुतस्तु कुलिशं भिदुरं पविरित्यादौ कोशे, दोषान्धकारभिदुरो हृत्तारिपक्षच्छिदुर इत्यादिकाव्येषु च कत्रर्थे प्रयोगदर्शनात्कर्तर्यपि प्रत्यय इष्ट इव। व्याकरणं नाम शब्दानुशासनम्। अतः प्रयुक्ताः शब्दास्तेनावश्यमनुशासनीयाः। अन्यथा तत्राव्याप्तिर्नामलक्षणदोष आपद्यते। शब्दकौस्तुभेऽपि कुरज्घुरचोः शुद्धे कर्तरि कर्मकर्तरि चेऽष्टिः स्वोक्ता[1]। न च कर्तरि लक्षणा, लक्षणायां स्वीकृतस्य हेतुत्रयस्याभावात्। कर्तरि प्रत्यये कृते सौकर्यातिशयरूपप्रयोजनप्रत्यायनाय कर्मकर्तरि लक्षणायाः स्वीकारयोग्यतायाः सत्वेऽपि कर्मकर्तरि अर्थे प्रत्ययं कृत्वा कर्तरि लक्षणास्वीकारे फलाभावात्।

(८) यायजूकः जंजपूकः दंदशूक इति तु पाणिनीय[2]सूत्रेण सिद्धयति किन्तु वावदूक इत्यस्य साधनाय न कोऽपि यत्नः पाणिनीयतन्त्रे दृश्यते न कात्यायनेन न वा पतञ्जलिना यङन्ताद् यङ्लुगन्ताद्वा वद्धातोः उक्प्रत्ययविधानाय किमपि वाक्यं रचितम्। आश्चर्यं त्विदं यत् चन्द्राचार्यस्य सूत्रेऽपि वदोनिर्देशोनोपलभ्यते। [3] तत्र हि 'दहः' निर्देशो वर्तते। वृत्तौ चोदाहरणमुपलभ्यते दन्दहूक इति। दन्दहूक इति प्रयोगो न दृष्टः साहित्ये लोके च। तर्हि लेखकप्रवादेन वकारः परिभ्रष्टः क्वापि पूर्वलेखे। तदनन्तरवर्तिना केनापि लेखकेन'यज जपददशो यङिति दृष्ट्वार्थसंगत्यै दकारोत्तरवर्त्तिहकारः कल्पितः। इत्थं वदः स्थाने दहधातुः प्रयुक्तः प्रमादात् प्रायः। वृत्तिप्रतिलेखनकाले सूत्रे दहं दृष्ट्वा तत्कृते कल्पितमुदाहरणं दन्दहूक इति। चन्द्रस्यानुयायिभिः सकलैरपि वररुचिहेमचन्द्रभोजप्रभृतिभिः स्वस्वसूत्रे वदिः प्रयुक्तो न तु दहिः। गोयीचन्द्रविष्णुमिश्रादिभिष्टीकाकारैरपि एतस्मिन् सम्बन्धे न किमपि लिखितम् चन्द्रस्य दूषणम्। एतेन वृत्तिश्चन्द्राचार्येतरकृतिरित्यपास्तम्। एकस्य प्रतिलिपिकारस्य प्रमादसमाधानायान्यप्रतिलिपिकारेण तथा पाठप्रक्षेपसंभवात्। केचित्तु [4]कातन्त्रकृद्वृत्तौ जैनेन्द्र[5]व्याकरणे च वदिः पठ्यते न दहिः। अतः सूत्रकारस्य वृत्तिकारस्य वा सतोऽयं प्रमादोऽमन्यत एवेत्याहुः।

(९) घृष्णक् इत्यस्य साधनप्रयत्नाभावः पाणिनीयचान्द्रोभयसाधारणदोषः। स्वपितृषोर्नजिङ् ३।१।१७२ इति पाणिनीयसूत्रे स्वप्नक् तृष्णक् (१।२।११९) इति चान्द्रनिपातनसूत्रे च तस्य निर्देशाभावात्। काशिकाया ममरकोशे च घृष्णगिति दृश्यते सर्वप्रथमम्। स्वपितृषोर्नजिङ् घृषेश्चेति वक्तव्यम् ३।२।१७२ काशिका। धृषे धृष्णग् वियातश्च अ० को० ३।१।२५।

(१०) मात्रालाघवमनुसरता चन्द्राचार्येण पर्यायप्रयोगेण यः सूत्रभेदो दर्शितः स क्वापि सदोषो जातः 'यथा शरीरावयवाच्च (पा० ४।३।१५५) इत्यस्य स्थाने देहांशादिति (चा० ३।३।१८) कृतं दृश्यते। शरीरस्य स्थाने देहशब्दप्रयोगस्तु न दुष्यति किन्तु अवयवशब्दस्य स्थानेंऽशशब्दः नोचितमर्थं ददाति। सचेतनस्य तत्तत्संस्थानमवयव उच्यते अचेतनस्य भागोंऽशोभवति। पैतृके धने सर्वेषां पुत्राणां दायांशः, दायभागो वा भवति। गोरंशः पुच्छः विषाणो वा इति न केनाप्युच्यते। एवमेव यत्रांशशब्दः प्रयुज्यते; तत्रवयवशब्दस्य प्रयोगे न यथावदर्थावगमनं भवति यथा 'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च—

शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः"।

(सा० द० परि० १) अथ च 'ममैवांशो जीवलोके जीवभूतः सनातनः' गीता १५।७ इत्यादौ 'काव्यालापा विष्णोर-

---

१. न हि वयं कर्मकर्तरि नेति ब्रूमः। तस्यापि कर्तृतया तत्र प्रत्ययस्याप्रत्यूहत्वात्; किन्तु शुद्धेऽपि यथासम्भवं भवत्येव। शब्दकौस्तुभः ३।२।१६२।

२. यजजपदशां यङः ३।२।१६६।

३. यजजपदहदशो यङः १।२।११२।

४. चेक्रीयितान्तानां यजिजपिदंशिवदाम् कातन्त्रकृद्वृत्तिः पृ० २८९।

५. यजजपवददशादूकः २।२।१४८।

वयवा इति न युज्यते जीवो ब्रह्मणोऽवयव इति न शक्यते वक्तुम्। लेखस्य कथायाः कवितायाः महाकाव्यादेश्च सारांशः पृच्छ्यते परीक्षायां न तु सारावयवः। अतः चन्द्राचार्येणावयवशब्दस्थाने प्रयुक्तोंऽशशब्दः दन्ततालव्याद्यवयवानां मानवशरीराङ्गानां हठधर्मितयैव बोधको भवति। स्वयमपि तेन वृत्तौ शरीरावयवादित्येवोक्तम्। पर्यायशब्देष्वपि न सर्वः सर्वत्र प्रयोग योग्यः, तेषां सर्वेषां किमपि वैशिष्ट्यं भवतीति नाविदितं शब्दानुगुण्यज्ञानानां शब्दप्रयोगशिल्पिनाम्।

(११) एवमेव शरीरावयवाद्यत् पा० ५।१।६ इति पा० सूत्र स्थाने देहांशाद् यत् ४।१।६ इति सूत्रेऽपि अंशशब्दपरिवर्तनं चिन्त्यम्। अतएव भोजराजेन चन्द्रस्य निर्दुष्टपरमर्शाङ्गीकारकेणाऽत्र चन्द्रो नानुकृतः शरीरावयवाद्यत् इति पाणिनिसूत्रमेवाविकलं स्वीयसरस्वतीकण्ठाभरणे संकलितम्[1]। किन्त्विदं महच्चित्रं यत् पूर्वत्र तेनापि चन्द्रमनुकृत्य 'देहांशात्' (४।३।१५१ स० क०) इत्येव सूत्रं कृतम्।

(१२) कर्मवेशाद् यत् (चा० ४।१।११९) इत्यत्र कर्मण्यं शौर्यम्, वेश्यो नटः इत्युदाहरणद्वयम्। तत्र वेशशब्दे तालव्यशकारप्रयोगः दूषणम्। अत्र नेपथ्यवाचिनो वेशशब्दस्य मूर्धन्यषकारवर्तित्वेन भाव्यम्। "दोषोऽयं प्रायः बङ्गवासित्वादुच्चारणदोषेण जातः। वकारबकारयोः यकारजकारयोः शकरषकारयोश्चोच्चारणे बङ्गवासिनः प्रमाद्यन्तीति" केचित्।

(१३) विधेयाविमर्शः

पाणिनीयसूत्रेषु समागतस्य विधेयाविमर्शस्य निरासाय प्रयतमानश्चन्द्राचार्यः स्वयमप्यस्य दोषस्य विषयो जातः। यथा

चान्द्र सूत्राणि	पा० सूत्राणि
धा संख्याया : ४।३।२०	संख्याया विधार्थे धा ५।३।४२
आहि च दूरे ४।३।३९	आहि च दूरे ५।३।३७
डश्चोपात् ४।३।६५	प्राचामुपादेरडज्बुचौ च ५।३।८०
जातौ डतमज् बहुभ्यः ४।४।७६	वा बहूनां जातिपरिप्रश्ने डतमच् ५।४।९३
इद्दरिद्रः ५।३।१०७	इद्दरिद्रस्य ६।१।११४

(विधेयादिविमर्श उभयसाधारणः पाणिनीये स्यादेशोऽशास्त्रीयोऽत्रातिरिच्यते)

[2]लोपोऽतः ५।३।६३ अतो लोपः ६।४।४८ इत्यादि

बहुव्रीहिसमासे संज्ञायां विकल्पेन [3]अनडादेशं विधाय शतधन्वा शतधनुरिति रूपद्वयं दृश्यते। चन्द्राचार्येणाऽत्र धनुर्नाम्नीत्येकमेव सूत्रं नियमार्थं स्वीकृतम्। धनुर्नाम्नि (चा० ४।४।१२१) इति संज्ञायामेवान्यपदार्थे धनुःशब्दः प्रयुज्यते तेन शतधनुः इति सिद्धम्। नाम्नीत्युक्तत्वात् गाण्डीवधन्वा इत्यत्र धन्वन्निति शब्दस्य प्रयोगे न कापि बाधा, गाण्डीवधन्वा शब्दस्य यौगिकत्वेन संज्ञाशब्दत्वाभावात्। धन्वन्नितिप्रकृत्यन्तरस्य धनुःपर्यायस्य अविशेषेणान्यपदार्थे संज्ञायामसंज्ञायां वा प्रयोगस्तेन शतधन्वा इति सिद्धयति। नचैवं धनुःस्थाने वाक्ये धन्वशब्दः प्रयुज्येतेति वाच्यम्, प्रयुज्यताम्। अमरकोशे धन्वशब्दस्य चापपर्यायत्वेन प्रतिपादनात् धन्वीत्यस्य धनुष्मानित्यस्य च धनुर्धर-

---

१. स० क० ४।४।१९२ शरीरावयवाद् यत्।

२. स० क० लोपोऽतः ६।३।६२।

३. धनुषश्च, वा संज्ञायाम् ५।४।१३२-१३३ प० सू०।

पर्यायत्येन निर्देशात्[1] । नचान्यपदार्थे नाम्न्येव धनुःशब्दः प्रयुज्यत इति नियमस्य 'स्वलावण्याशंसाधृतधनुषमह्नाया तृणवत् इति पुष्पदन्ताचार्यस्य महिम्नः स्तोत्रप्रयोगेऽन्वयव्यभिचार इति वाच्यम् धनुषश्चेति सूत्रयतः पाणिनेरप्युक्त-व्यभिचारदर्शनात् । समासान्तविधिरनित्य इति परिभाषाबलेन यथा तत्र समाधानम् इह **न तथा इति चान्द्रस्य दूषणम् ।**

अयं च चन्द्रस्वीकृतो नियममुखमार्गः द्राविडप्राणायामात् (शिरोवेष्टनपूर्वकनासिकास्पर्शनात्) नातिरिच्यते ।

(१४) डतमविधाने जातिपरिप्रश्नस्य पाणिनेः सूत्रे[2] समुल्लेखात् चन्द्र[3]स्यापि 'जातौ' इत्युक्त्वात् तत्र च जाता विति किम्-यो भवतां देवदत्तः स आगच्छतु इति प्रत्युदाहरणरूपेणोक्तत्वात् 'कतमो भवतां देवदत्तः' इति प्रयोग-स्य साधनाय का गतिः ? डतरप्रत्ययस्तु व्यक्त्यो र्द्वयोरेकनिधारणे भवति । डतमस्तु जातिपरिप्रश्ने विहितः । तथा च व्यक्तिपरिप्रश्ने किम् पूर्वोक्तप्रयोगे प्रमादः प्रयोक्तु रथवा तत्कृते लक्षणानिर्माणात् सूत्रकृतोरुभयोराचार्ययोः प्रमादः ? इति चेत् श्रूयताम्, कतरकतमौ जातिपरिप्रश्ने (पा० २।१।६३) इत्यत्र जातिग्रहणात् जातेरन्यत्रापि भवतीति ज्ञाप-नात् । पाणिनितन्त्रेऽस्ति रूपसिद्धेः उपमार्गः किन्तु चन्द्राचार्येण तु 'विशेषणमेकार्थेन' २।२।१८ इति सूत्रं पाणिनेः विशेषणं विशेष्येण वहुलम् २।१।५७ इति सूत्रस्थानापन्नं कृत्वा पूर्वकालैक इत्यादीनि—(४९-५६, ५८-७२) सूत्राणि परित्यक्तानि । तथा च तत्र कतरकतमौ जातिपरिप्रश्ने इतीदृशस्य सूत्रस्याभावात् क्वचिदन्यत्रापि भवतीति ज्ञापना-संभवात् व्यक्तिपरिप्रश्ने डतमविधानाय न कोऽपि मार्ग **इत्यस्ति दोषः ।**

(१५) उभयव्याकरणसाधारणो दोषः ।

पाणिनीये चान्द्रे च व्याकरणे 'कुशाग्राच्छः[4]' इति समानं सूत्रमुपलभ्यते । तेन कुशाग्रीया बुद्धिः इति तु सिद्ध्यति किन्त्वर्धजरतीयम् घुणाक्षरीयम् बन्ध्यासुतीयम् गगनकुसुमीयमित्यादिप्रयोगाणां लोकप्रचलितानां सिद्धयुपाय उभयतन्त्रे न दृश्यते इत्युभयसाधारणो दोषः ।

भोजेनेदृशप्रयोगसाधनाय साधीयानुपायो दर्शितः कुशाग्रार्धजरतीघुणाक्षरादिभ्यश्छः (स० क० ५।३।१४०) सूत्रं रचयता ।

(१६) तपसाकृतम् इत्यत्र चन्द्रेण तृतीयाया अलुग् विहितः । ओजः सहोऽम्भस्तपोऽञ्जसस्तृतीयायाः (५।२।५) इति चान्द्रं सूत्रम् तेन ओजसाकृतम् सहसा कृतम्, अम्भसा कृतम्, तपसा कृतम्, अञ्जसाकृतमिति सिद्धयति ।

अत्र पाणिनि :—ओजःसहोम्भस्तमसस्तृतीयायाः (६।३।३) इति सूत्रं प्रोक्तवान् कात्यायनश्चाञ्जसः शब्द-स्य समावेशायोपसंख्यानं कृतवान् अञ्जस उपसंख्यानम् (६।३।३ वा० १) ।

चान्द्रसूत्रे पाणिनिसूत्रनिर्दिष्टानां वार्तिकवर्धितस्य च शब्दानां समावेशो दृश्यते परन्तु यत्र पाणिनिः "तमः" प्रयुक्तवान् तत्र चन्द्रः 'तपः' पठति ।

---

१. धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् (अ० को० २।८।८३) धन्वी धनुष्मान् धानुष्को निषङ्गयस्त्री धनुर्धरः (अ० को० २।८।६८) ।

२. वा बहूनां जातिपरिप्रश्ने डतमच् पा० ५।३।९३ ।

३. जातौ डतमज् बहुभ्यः चा० ४।३। ७६ ।

४. पा० ५।३।१०५ च० ४।३।८१ ।

चन्द्रस्य प्रमाद एवेति तर्क्यते,

(क) [1]भाष्ये तससावृतत्वादिति प्रयोगोपलब्धेः ।

(ख) [2]कुमार सम्भवे[3] किरातार्जुनीये च महाकाव्ये तपःशब्दात् परीभूतायास्तृतीयायाऽलुकोऽदृष्टत्वात् ।

(१७) युवोरनाकावसः ५।४१ इति चान्द्रे सूत्रे युवोरिति पदं व्याकरणविरुद्धं दृश्यते । तत्र द्विवचनेन भाव्यम् । यदि च बहुवचनद्विवचनयोः स्थाने एकवचनप्रयोगात्मकस्वशैल्यनुसारेणात्र समाहारद्वन्द्वेनैकवचनमित्युच्यते तदा नपुंसकत्वं दुर्वारम् समाहारेपुंसकम् इति (चा० २।२।४६) सूत्रात् । न च युवोरनाकौ ७।१।१ इति पाणिनीयसूत्रे समाहारद्वन्द्वे सौत्रं पुस्त्वं पाणिनीयैः कल्प्यते तथेहापि कल्प्यताम् का क्षतिरिति वाच्यम् एवमपि एतत्सूत्रोक्तचान्द्र व्याकरणवृत्या विरोधः स्पष्टः तत्रोक्तम् 'युवोरिति समाहारस्यैकत्वादेकवचनम् विकल्पानुवृत्तेरनपुंसकत्वम् इति । चान्द्रवृत्या न तत्र सौत्रमनपुंसकत्वं कल्प्यते किन्तु नपुंसकविधायके सूत्रे विकल्पानुवृत्या नपुंसकत्वं साधितम् । न हि 'समाहारे नपुंसकमिति सूत्रे तस्य वृत्तौ वा 'वा' शब्दउपलभ्यते येन तत्सूत्रं विकल्पमिति ज्ञायेत ।

(१८) बहुकोष्टृणि इति क्रुशस्तुनस्तृच् ५।४।४८ इति चा० सूत्रस्योदाहरणे पूर्वं क्रोष्टुशब्दगतस्य तोस्त्रादेशे नुम् विधीयते तन्न युक्तम्, तृज्वद्भावात् पूर्वविप्रतिषेधेन नुमनुटौ भवत इत्येव वैयाकरण[4]सम्प्रदायात् भाष्यकारानुमोदितत्वाच्च । एतस्य नियमस्य वृत्तिकारेण चन्द्रेणापि स्वीकृतत्वात् । अतएव युवोरनकावस ५।४।१ इतिसूत्रे नपुंसकत्वसाधनयत्नः चन्द्रवृत्तिकारोक्तः संगच्छते । अन्यथा युवोरित्यत्र समाहारत्वान्नपुंसकत्वेऽपि परत्वान्नुमं बाधित्वा गुणे सिद्धे सर्वः क्लेशकरो यत्नः निरर्थक एव ।

(१९) पाणिनिना नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् पा० ५।४।१२१ इति सूत्रं विधाय असक्थः असक्थिः अहलः अहलिरित्यादि साधितम् । किन्तु चन्द्राचार्येण नञ्सुदुभ्यः सक्थो वा ४।४।१०९ इति सूत्रेण सक्थिशब्दादेव समासान्ताज्विहितस्तेन अहलः अहलिरिति रूपद्वयं न सिद्धयति । हलहलिशब्दयोरर्थभेदोऽप्यस्ति । महद्धलं हलिरित्युच्यते । एवंच अविद्यमानोहलिर्यस्येति विग्रहे अहलिरित्येव रूपं स्यात् नतु अहल इत्यपि । इष्यते तूभयम् एवंच चन्द्राचार्य मतेन महाहलरहितस्य जनस्य कृते अहलिः अहल इतिरूपद्वयं न सिद्धयति । किंच शेषाद्वा (चा० ४।४।१४२) इति अकृतसमासान्तात् प्राप्तस्य कपो बाधनार्थमपि हलिग्रहणं सूत्रे कृत्वा समासान्ताज् विधानीयः । अत इयं चन्द्रस्य महती त्रुटिः ।

नच हलशब्देन समासे अहलः इति हलिना समासे अहलिरित्युभयरूपसिद्धे सूत्रे तदकरणमुचितमेवेति वाच्यम् अविद्यमानमहाहलिपुरुषबोधाय प्रयुक्तस्य अहल इत्यस्य साधुत्वाय तत्करणस्यैवोचित्यात् । गोयीचन्द्रायापि प्रत्याख्यानमिदं न रोचते (७।३१३) ।

(२०) केवलमामकभागधेयेत्यादि (पा० ४।१।३०) सूत्रे पञ्चमः शब्दः पाणिनिना अपर इति पठितः । चन्द्राचार्येण अवर इति पठितः (चा० २।३।२७) सूत्रे । तत्र भट्टोजिदीक्षितः 'अपर' इति पठति सिद्धान्तकौमुद्यां लिखति च अवरपाठप्रतिपादकं हरदत्तम् 'अत्र द्वितीयोवर्णो दन्तोष्ठ्यो न पवर्ग इति लिखन्तं तर्जयन् शब्दकौस्तुभे

---

१. षड्भिः प्रकारैः सतां भावनामनुपलब्धिर्भवति अतिसन्निकर्षादतिविप्रकर्षादिन्द्रियदौर्बल्यात्तमसावृतत्वान्मूर्त्यंतरव्यवधानात् सदृशत्वाच्चेति । ४।१।३

२. तपःक्रुशामभ्युपपत्स्यते सखीम् (कु० ५।६१) ।

३. तपःक्रुशतरैः (कि० ११।५) ।

४. नुमचिरतृज्वद्भावगुणभ्यो नुम् पूर्वविप्रतिषेधेन सि० कौमुदी अजन्तपुंलिङ्गक्रोष्टुशब्दः ।

"इदं सकलं वैदिकसम्प्रदायविरुद्धम् बह्वृचानां द्वितीयाध्यायान्त्यवर्गे पवर्गपाठस्य सर्वसम्मतत्वात्[1]" इति । सरस्वती कण्ठाभरणेऽपि (३।४।४३) अवर एव पठ्यते ।

(२१) चान्द्रव्याकरणे तत्र तत्र सूत्रेषु अव्ययनिपातस्थानेऽसंख्यपदप्रयोगेण निर्वाहस्तु कृतः; किन्तु केऽसंख्य-शब्दाः (अव्ययशब्दा निपाताश्च) इत्यस्य ज्ञानं न भवति तत इति महती त्रुटिः ।

(२२) फणां च सप्तानाम् (पा० ३।४।१२५) इत्यत्रादि पदप्रयोगाभावं दोष मङ्गीकृत्य तत्स्थाने 'फणादीनां सप्तानाम् (चा० ५।३।१२१) इति सूत्रं कृत्वा दोषपरिहारं कुर्वता चन्द्राचार्येण 'रुदादिभ्यः सार्वधातुके (पा०-७।२।७६) इत्यत्र 'रुद्भ्यस्तिङः' (चा० ५।४।१७३) इति सूत्रं कुर्वता स्वयं तद्दूषणं कृतम् ।

(२३) 'प्रौहः' इति न सिद्ध्यति चान्द्रे । कात्यायनस्य 'प्रादूहोढोढ्येषैष्येषु इति वार्तिकं सूत्रीकुर्वता चन्द्रेण निर्मिते 'प्रादूढोढ्येषैष्येषु (चा० ५।१।८९) इति सूत्रे 'ऊह' शब्दस्य पाठाभावात् ।

काशिका 'प्यूह' शब्दं न पठति । [2]जैनेन्द्रभोजहेमचन्द्रैरूहशब्दः पठ्यते । तथाच 'प्रौहशब्दासिद्धिः चान्द्रस्य व्याकरणस्याव्याप्तिदूषणमेव ।

यि परेऽवावौ (चा० ५।१।७६) इत्यत्र 'इको ह्रस्वः' (चा० ५।२।७१) इत्यत्र च न दोषः—तथाहि—

(क) वान्तो यि प्रत्यये पा० ६।१।७९ इत्यस्य स्थाने चान्द्रे व्याकरणे 'यि परेऽवावौ' चा० ५।१।७६ इति सूत्रं कृतम् । वान्तादेश इति न रोचते चन्द्राय स्पष्टतापक्षपातित्वात् । [3]पूर्वसूत्रे वान्तादेशत्वेन अवावोर्निर्णीतत्वेऽपि वान्तादेशविधाने विवादस्य च पर्याप्तावसरत्वात् । अतः स आदेशं स्पष्टमुल्लिखन् सूत्रं रचयति 'यि परेऽवावौ ५।१।७६ । आदेशयोः उद्दैश्यपूरकादनन्तरं निर्देशात् चान्द्रे न तथा विधेयाविमर्शः, यथा पाणिनीये । इत्थमत्र पाणिनीयसूत्रापेक्षया स्पष्टताऽऽधिक्येन वर्तते । तत्र च यद्दूषणं तन्नास्ति किन्तु अत्र 'परे' इति प्रत्ययार्थे प्रयुक्तम् । चन्द्रेण 'मिदचोऽन्त्यात्पर' इत्यत्रत्यः परः अधिकारः स्वीकृतः । स च आकपः (४।४।१४१) सूत्रविहितकबवधिकः अतएव 'व्याप्यात् काम्यच्' च० १।१।२३ इत्यादौ काम्यच् परो भवतीत्यर्थः क्रियते । तथा च यि परेऽवावौ इत्यादौ 'यस्मिन्-विधिस्तदादावल्ग्रहणे इति परिभाषा सूत्र (९) बलेन आदेरूपस्थितौ यादौ परे (पराधिकारविहिते अर्थात् प्रकृतीतरे) परे अवावौ भवतः इत्यर्थेन सकलेष्टसिद्धिः । गो+यानम् यौयानम् इत्यादौ प्रत्यय-ग्रहणे कृते यथा वान्तादेशवारणम् तथाऽसंज्ञके व्याकरणे 'पर' पदप्रयोगेणावाव्-निवारणम् । न च 'पर' पदस्य परत्वार्थबोधकत्वं कथं नेति वाच्यम् यीति सप्तमी निर्देशादेव इकोयणाचीत्यादाविव परत्वे सिद्धे 'पर' वचनं प्रकृतिनिवृत्यर्थमिति गृहाण । एवंच संज्ञात्यागः 'यि परेऽवावौ ५।१।७६ इत्यत्रातीव कष्टकरः इति क्षितीशचन्द्रचटर्जी महाभागस्य[4] कथनं निःसारमेव, एतादृश-सामर्थ्यमूलकव्याख्यानस्य प्रतिपदं व्याकरणे दृष्टत्वात् वैयाकरणैश्चानुमोदितत्वात् व्याख्यानतो विशेषप्रतिपत्ति, नंहि सन्देहादलक्षणमिति वचनस्य परिभाषासूत्रद्वयस्य चान्द्रैः, एकपरिभाषात्मकस्य पाणिनीयैश्चाङ्गीकृतत्वाद् ।

(क) इको ह्रस्वोऽङ्यो गालवस्य ६।३।६१ इति पा० सूत्रस्य स्थाने इको ह्रस्वः ५।२।७१ इति सूत्रं कृतं चान्द्रे । तस्य सूत्रस्य प्रवृत्तिवारक[2]तत्वार्नां सूत्रपर्युदस्तस्य अङीत्यस्य च समावेशं कृत्वा पृथक् सूत्रं न च्विङीयणि-

---

१-१. चा० २।३।२७ सूत्रटिप्पणी ।

२. चान्द्र व्या० भाग२ पृ० १४४ टिप्पणी ।

३. एचोऽयवायावः ६।१।७८ ।

१. परे-प्रत्यये (५-१-७६ टिप्पणी) ।

२. इयङुवङ्व्ययप्रतिषेधः ६।३।६१ वा० ३ अभ्रूकुंसादीनामिति वक्तव्यम् वा० इयङुवङ्भाविना-मव्ययानां च नेति वाच्यम् ।

युवामभ्रूकुंसादीनामिति (५।२।७२) रचितम्। अत्राव्ययस्थाने च्विग्रहणं कुर्वाणश्चन्द्रो भ्रान्तः इति गोयीचन्द्रः १।२३६[1]।

वस्तुतस्तु 'उत्तरपदे परेऽम्ययस्येक्' च्विभावे कृते एव मिलति। अतएव शुक्लीभावः, पटीभूतास्तन्तवः, पट्टभूतोऽपटुरित्यादयेव स्थलं निवार्यं ह्यस्वप्राप्ति वर्तते तच्च निवारणं 'मच्वि' इति कथनेनापि भवत्येव। तथा चाऽव्ययस्थाने च्विग्रहणं युक्तमेव।

गोयीचन्द्रो ह्यत्रोदाहरणानां वस्तुस्थितेरथ्ययनमकृत्वा केवलं संभावनामात्रेण चन्द्रं भ्रान्तमाह। अव्ययस्य विशालविषयस्य स्थाने स्वल्पतमविषयस्य च्वेः प्रयोगे दोषसंभावनात्वस्त्येव; परन्तु वस्तुस्थितिस्त्वियमस्ति यत् अव्ययेति समान्यबोधकपदेनेह विशेषस्यैकमात्रस्य च्विप्रत्ययस्यैव ग्रहणं भवति। तथाचात्र विशेषपरिवृत्तिदोषोऽप्यासीत्। सच्च चन्द्रेण निराकृतः।

---

१. चान्द्रव्याकरणम् ५।२।७२ सूत्रटिप्पणी।

सप्तमोऽध्यायः

वैमत्यम्

वैमत्यं नाम मिथोमतभेदः । 'मुण्डे मुण्डे मतिर्भिन्ना' इति लोकोक्ति र्मतभेदं मानवस्वभावं साधयति । अनेनैव स्वभाववलैक्षण्येन मानवानां रुचयोऽपि विभिन्ना जाताः । अतएवोच्यते 'भिन्नरुचि हि लोकः' । काव्यस्य लक्षणानां वैविध्ये भिन्नरुचिकमानवस्वभाव एव हेतुः । दार्शनिकद्वैताद्वैतादिविभिन्नमान्यतानामपि कारणं मुण्डे मुण्डे भिन्ना मति रेव । सम्प्रदायवैविध्यस्य बीजमपि सैव ।

सर्वेषां वैमत्यानां स्वकीयं मूल्यमस्ति । देशकालादिवैलक्षण्यम् हि वैमत्योन्नायकं भवति । भाषागतप्रयोग-साधुत्वविषयेऽप्यनादिकालादाचार्याणां मतभेदो दृश्यते । पाणिन्यष्टाध्याय्याम् लोपः शाकल्यस्य गिरेश्च सेनकस्य, अवङ् स्फोटायनस्य, ओतो गार्ग्यस्य, अड् गार्ग्यगालवयोः, तृषिमृषिकृषेः काश्यपस्य, ऋतो भारद्वाजस्य, त्रिप्रभृतिषु शाकटायनस्य । इत्यादौ दशाचार्याणां प्राप्तानि नामानि वैमत्यपराण्येव । अन्यतरस्याम्, वा, विभाषाऽऽदिशब्दैर्वैमत्य-मेव द्योत्यते ।

कात्यायनस्योक्तानुक्तद्विरुक्तचिन्ताफलस्वरूपाणां वार्तिकानां वैमत्यसूचनार्थमेव निर्माणं जातम् ।

पतञ्जलेः प्रत्याख्यानेन योगविभागविशेषेण च तत्र तत्र वैमत्यमेव सूचितम् भवति ।

चान्द्रव्याकरणेऽपि यथास्थानं वैमत्यं दृश्यते । तथाहि—

१. चन्द्रः "मीमांसति मीमांसते" इत्याह पाणिनीयास्तु मीमांसते इत्येकमेव रूपमित्यस्त्यत्र वैमत्यम् । स्वार्थसन्विषये पाणिनीयानुयायिनां चान्द्रवैयाकरणानां च मतभेदो दृश्यते । तत्र गुप्तिज्किद्भ्यः सन् ३।१।५ मानवधदानशानृभ्यो दीर्घश्चाभ्यासस्य ३।१।६ इति पाणिनीयसूत्रद्वयम् । तत्र गुपे निन्दायाम्, तिजेः क्षमायाम्, किते-र्व्याधि प्रतीकारे निग्रहे अपनयने नाशने संशये च, माने जिज्ञासायाम्, बधेश्चितविकारे, दाने राजवे शानेर्निशाने, इति वार्तिकानि सूत्रद्वयोक्तेभ्यः विहितस्य सनोऽर्थप्रकाशकानि । सनाद्यन्ता इति धातुसंज्ञा । किदतिरिक्ता गुपिप्रभृतयो निन्द्याद्यर्थका एवानुदात्तेतोऽत आत्मनेपदिनः, दानशानौ तु स्वरितेतौ उभयपदिनौ । अर्थान्तरे त्वननुबन्धकाश्चुरादयः । अनुबन्धस्य केवलेऽचारितार्थ्यात् सन्नन्तात्तङ् । धातोरविहितत्वात्सनोऽत्र नार्धधातुकत्वम्, तेनेड्गुणौ न । तथा च जुगुप्सते, तितिक्षते, चिकित्सति, मीमांसते, बीभत्सते, दीदांसति, दीदांसते, शीशांसति, शीशांसते इत्यादि रूपाणि सिद्धयन्ति । इति दीक्षितः ।

(क) न्यासे पदमञ्जर्यां च मानवधी अनुदात्तेतौ शेषौ दानशानौ स्वरितेतावुक्तौ । (३।१।६)

चान्द्रे व्याकरणे सूत्राण्युदाहरणानि चेत्थं सन्ति तिजः क्षान्तौ सन् १।१।१७ कितः संशयचिकित्सयोः १।१।-१८ गुपो निन्दायाम् १।१।१९ बध एरी च १।१।२० शानदानमानः १।१।२१, तितिक्षते विचिकित्सति, चिकित्सति, जुगुप्सते, बीभत्सते, शीशांसति, शीशांसते, दीदांसति, दीदांसते, मीमांसति, मीमांसते ।

(क) सिद्धान्तकौमुदी भ्वादौ गुप्तिज् ३।१।५ प्रभृतिसूत्राणि ।

महाभाष्ये एभ्यः सनविधानेऽर्थविशेषप्रतिबन्धो न दृश्यते । अतः निश्चप्रचम् यत् सिद्धान्तकौमुद्यां दृश्यमानस्वार्थविशेषनिर्देशस्य मूलं चान्द्रव्याकरणमेव । यत्तु काशिकाकारेण गुपूतिज्किद्भ्यः सन् ३।१।५ सूत्रमुपक्रम्योक्तम् निन्दाक्षमाव्याधिप्रतीकारेषु सन्निष्यते, अन्यत्र यथाप्राप्तं प्रत्यया भवन्तीति तच्चान्द्रव्याकरणानुकरणम् । यच्च न्यासकारेण जिनेन्द्रबुद्धिनाऽधिनिवेश्यते-संशयेऽपि दृश्यते-विचिकित्सति मे मन इति । तदपि चान्द्रानुकृतिपरकमेव । जैनेन्द्रेणोच्यते स्म किद्गुपूतिजः सन् भिषज्यादिनिन्दाक्षमे इति (२।१।३) तत्रैव लघुवृत्तावुदाहरणे दत्तेः—ज्वरं चिकित्सति शत्रुं चिकित्सति इति । सिद्धान्तकौमुद्यामेतेषां सर्वेषां संकलनमात्रमुपलभ्यते ।

चन्द्राचार्यः कितेः संशयचिकित्सयोः सनं विदधाति वस्तुतस्तु निग्रहापनयननाशनानि चिकित्सायामेव अन्तर्भूतानि भवन्ति चिकित्सा नाम निवारणम् तत् शत्रुरोगादिप्रतीकारोपायः अतश्चन्द्राचार्योऽत्र लाघवप्रियः प्रशस्य एव ।

यथा बधेश्चित्तविकारे इति सि० कौमुदीवार्तिके चित्तविकार इति अर्थविशेषनिर्देशः कृतो न तथा चान्द्रे व्याकरणे । अत्र तु गुपेर्निन्दायामित्यतः पूर्वसूत्रात् निन्दायामित्यनुवर्त्य बध ए री चेति बधे निन्दायां वर्तमानात् सन् परो भवति, इकारस्य ईकारः इत्यर्थकेन निन्दायामेव सन् विधीयते । बीभत्सरसस्य स्थायिभावो जुगुप्सा । गुपेर्निन्दायां सनि 'अ' प्रत्यये कृते जुगुप्साशब्दः सिद्धयति । इत्थं च बीभत्सा जुगुप्सा निन्दा इत्यमी समानार्थकाः शब्दाः । अतः बध ए री चेत्यनेन चकारेण निन्दायामित्यनुवर्त्य तत्र सन्प्रत्ययविधानमुचितमेव । किंच जुगुप्साशब्दस्य प्रचलितोऽर्थः घृणा वर्तते । बुद्धधर्मे सर्वे मानवा घृणायाः (कृपायाः) पात्रम् सन्ति मानवो न घृणायाः जुगुप्साया वा पात्रम् तत्र हि पतितो न निन्द्यः किन्तु पातकदोषाः निन्द्याः जुगुप्सनीयाः । इत्थं जुगुप्सा च तत्र निन्द्यैव अतः निन्दायामित्यनुवर्त्य बधेः सन् विधानं समुचितमेव ।

किंच दाने रार्जवे, शानेनिशाने माने जिज्ञासायामिति अर्थनिर्देशकवार्तिकत्रयमप्यत्र चान्द्रे न दृश्यते, किन्तु शानदानमानः १।१।२१ इति अर्थविशेषप्रत्ययविधानसूचनां विना केवलं शानो दानो मानश्च सन् परो विधीयते, शानदानयोः परस्परसाहचर्यात् भौवादिकयोस्तयोश्च साहचर्यदर्शनात् मानस्य च भौवादिकस्य ग्रहणेन तदर्थलाभसंभवात् ।

अत्रेदं विचार्यते मानूधातुः सर्वेषां मतेनात्मनेपदी । स्वयं चन्द्राचार्योऽपि धातुमिमं स्वधातुपाठे तङानिनां धातूनां मध्ये पठितवान् ।[1]

विभाषितानाम् (उभयपदिनां स्वरितेतां वा) धातूनां प्रक्रमे पाठात् मीमांसति मीमांसते इत्युभयरूपप्रदर्शनमिहासंगतम्, गोमिनः' धातुपाठविरोधात् ।

अत्रत्यं महाभाष्यमपि सदोषमिति कृत्वा चन्द्रगोमिना यदि तन्नानुसृतं तत्तु भूषणं न दूषणम् किन्तु स्वग्रन्थव्याघातस्तु चिन्त्य एव । पतञ्जलिनोक्तम् 'गुरतिजकितमानाः अनुदात्तेतः' इत्थं कितेरपि चिकित्सते इति रूपमापद्यते । बधेश्चोभयपदित्वं सिद्धयति । यत इमेऽनुदात्तेत इत्युक्त्या तद् भिन्नाः स्वरितेत इति परिशेषाल्लभ्यत एव । इत्थं दानशानौ स्वरितेतौ बधश्च स्वरितेत् इति सिद्धयति । महाभाष्यग्रन्थे एवं संशयापन्ने चन्द्राचार्य एव वैयाकरणानां शरणम् । स तु दान (१।६२३, १।६२४) शानौ विभाषितानां, कितम् (१।३०५) अतङानानाम्, बधम् (१।४६१) गुपं तिजंच तङानिनां मध्ये पठित्वा सर्वं यथा निर्दिष्टं स्पष्टं चकार । केवलं मानधातोस्तङानिनां मध्ये पठनम् तस्योभयरूपदानं च चन्द्रस्य त्रुटिः ।

पाणिनीयव्याकरणे स्वार्थसन इडभावसाधनाय यः यत्न आश्रीयते सोऽतीव विचित्रः । अस्य सनः धातो-

---

१. मान पूजायाम् गणः—१ धातु सं० ४६० (चान्द्रधातुपाठः) ।

रित्यधिकारापठितत्वादार्धधातुकत्वाभावः, 'आर्धधातुकं शेषः' इत्यनेन तथैव विधानात् । गुपप्रभृतयः धातुपाठे पठिताः तेभ्यो विहितस्य सनः धातुविहितत्वं सिद्धचत्येव । इत्थं धातुविहितस्यापि अस्य सनः पाणिनिना कृते धात्वधिकारेऽविहितत्वमिति विरोधाभासः व्याकरणे काठिन्येनावबोधयोग्यो भवति । चन्द्रस्तु अत्रापि प्राप्तस्येटो निषेधकं सूत्रमेकं करोति नवीनम् स्वार्थे ५।४।१३८ इति । सरस्वतीकण्ठाभरणकारायापि इयमेव सरणीरोचते।अतएवोक्तम् तेनापि 'स्वार्थे ६।४।१५३ इति ।

गुप्प्रभृतयो धातुपाठे पठिता अतस्ते धातवः सन्त्येव ।

२. इच्छार्थे कसन् विषये प्रक्रियागतं वैमत्यं दृश्यते पाणिनीयतन्त्रे 'धातोः कर्मणः समानकर्तृकादिच्छायाम्वा ३।१।७ इति सूत्रेण कर्तुमिच्छतीत्यर्थे कृधातोः सन् विधीयते । धातोरित्यधिकारे विहितत्वात् सन आर्धधातुकत्वं सिद्धयति ।

चान्द्रे व्याकरणे तु 'तुमो लुक् चेच्छायाम्' (१।१।२२) इति सूत्रं क्रियते तेन कर्तुम् इति प्रकृतेः सन् परो (प्रत्ययः) भवति तुमश्च लुक् क्रियते । इत्थं 'इच्छार्थे सन् विधीयते, अतः कर्तुमिच्छतीत्यत्र 'इच्छती' त्यर्थद्योतकः सनित्यागतः तुम् क्व गत इति प्रश्नस्य प्रज्ञावता छात्रेण पृष्टस्य समाधानं चान्द्रे स्वतो जायते । पाणिनीये तु स प्रश्नोऽसमाहित एव तिष्ठति । यदि चोच्यते पाणिनीयभक्तैः, तुमर्थविशिष्टेच्छार्थे सन् विधीयते इति तदा सूत्रविरोधः सूत्रे केवलमिच्छायामित्युक्तेरिच्छार्थे एव तल्लभात् ।

यथा कूलं पतितुमिच्छतीति वाक्यं भवत्येवं कूलं पिपतिषतीति भविष्यति एवं श्वा मर्तुमिच्छतीति वाक्यवत् श्वा मुमूर्षति इति स्यात् । तथाच सामान्यसूत्रेणैव सिद्धे आशङ्कायां सन् वक्तव्य इति वार्तिकं चन्द्रेण न पृथक् स्वीक्रियते । नचाचेतनस्य इच्छाभावात् कूलस्य चाचेतनत्वात् कूलं पतितुमिच्छतीति वाक्यमेव कथं भवति, कस्यापि मरणेच्छाऽभावात् श्वा मर्तुमिच्छतीति कथमुच्यते इति वाच्यम् लोकस्य तथा विवक्षातः । अर्थात् वाक्यस्य योग्यतावत्वे यत्प्रमाणं तदेवात्र वृत्तेः साधकमिति चन्द्राचार्यस्य हृदयम् । विवक्षा चेत्थंभूता भवितुमर्हतिः—

चेतनावति देवपते कूले चाचेतने इच्छा न प्रत्यक्षतो ज्ञातुं शक्यते, अपितु अनुमानेनैव सा ज्ञायते । अनुमानेन चोभयत्रेच्छा प्रतीयते । योऽप्यसौ कटं चिकीर्षुं भवति नासावाघोषयति कटं करिष्यामीति, किन्तु सन्नद्धं रज्जुकीलकपूलपाणिं दृष्ट्वा तत इच्छा गम्यते, तथैव कूलस्यापि पिपतिषतो लोष्टाः शीर्यन्ते, भिदा जायते, तत स्तस्येच्छा गम्यते । श्वानः खल्वपि मुमूर्षव एकान्तशीलाः शुनाक्षाश्च भवन्ति । एवंचोभयत्रेच्छाविवक्षा दृश्यते ।

अथवा पिपतिषतीव पिपतिषति तिङन्तेनापि उपमानं दृश्यते 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्' इत्यादौ यथा । न च तिङन्तेनोपमानमस्ति तत्रेत्युच्यते चेत्तर्हि इच्छेवेच्छेति विवक्ष्यताम् ।

अथवा सर्वं चेतनावत् कृत्वा प्रयुज्यतेऽतः सर्वं चेतनावत् कंसकाः सर्पन्ति, शिरीषोऽधः स्वपिति । अयस्कान्तमयः संक्रामति ऋषिः पठति-शृणोत ग्रावाणः अतः आलंकारिकप्रयोगे सर्वत्र दृश्यते इच्छा । तथा च आशङ्कायां सन् वक्तव्य इति न कर्तव्यम् ।

२. नमस्तपो वरिवसः क्यच् (चा १।१।३७) इति नम आदिभ्यो द्वितीयान्तेभ्यः करोत्यस्मिन्नर्थे क्यच् परो विधीयते । नमस्करोति, नमस्यति देवान् । तपस्यति शत्रुन् । वरिवस्यति गुरून् इत्युदाहरणानि ।

अत्र नमोवरिवश्चित्रङः क्यच् पा० ३।१।१९ नमसः पूजायाम्, वरिवसः परिचर्यायाम्, चित्रङः आश्चर्ये इति पा० सूत्रभाष्यं तपसः परस्मैपदं चेति वार्तिकं चानुसृत्य 'तपस्यति' इत्यस्य तपस्यां करोतीत्यर्थं स्वीकुर्वन्ति पाणिनीयाः, अतएव भाष्ये तपश्चरतीति तपस्यतीत्युक्तम् ।

चान्द्रव्याकरणे १।१।३७ सूत्रेऽर्थविशेषनिर्देशो नास्ति।१।१।३८ सूत्रे चित्रङ आश्चर्ये इत्यत्रार्थनिर्देशो दृश्यते। तत्र प्रथमसूत्रस्य द्वितीयस्य च सर्वाणि उदाहरणानि पा० व्या० तुल्यान्येव सन्ति। केवलं तपस्यतीत्यस्य सन्तापयतीत्यर्थो निर्दिष्टस्तत्र। चन्द्रमनुकृत्य भोजराजः हेमचन्द्रश्च सन्तापार्थे एव क्यचमाहतुः स्म।

अत्र केचित् "चन्द्राचार्यस्तदनुकर्तारश्चात्र भ्रान्ता दृश्यन्ते, यतो हि तपश्शब्दः सन्तापार्थे न प्रसिद्धः" इत्याचख्युः। भोजः कात्यायनमनुकुर्वन् सूत्राणि रचयामास तपसः क्यच्, नमसः पूजायाम्, वरिवसः परिचर्यायाम्, चित्रङ आश्चर्ये १।३।२४-२७ तत्रैव स वदति 'तपः शब्दो यदा व्रतवचनस्तदान्तर्भूतकर्मकत्वात् क्यजन्तोऽकर्मकः, यदा सन्तापवचनस्तदा तत्सम्बन्धिनार्थेन सकर्मकः शत्रूणां तपः करोति तपस्यति शत्रूनिति।

हेमचन्द्रोऽपीत्थमेव विचारं तपः क्यन् ३।४।३७ इति सूत्रस्य वृहद्वृत्तौ प्रस्तौतिः—अत्र यदा व्रतपर्यायस्तपश्शब्दः तदा क्यन्, कर्मणो वृत्तावन्त र्भूतत्वादकर्मकत्वम्; यदा तु सन्तापक्रियावचनस्तदा क्यन् कर्मणो वृत्तावन्तर्भविऽपि स्वकर्मणा सकर्मक एव। शत्रूणां तपः करोति तपस्यति शत्रून्, यथा व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयति।

अत्रेदं वक्तव्यम् भोजहेमचन्द्रयोः पूर्वग्रन्थावलोकेन स्पष्टं प्रतीयते यत् तपश्शब्दस्यार्थद्वयं ज्ञात्वैव ताभ्यां सर्वमुल्लिखितम्। अतः तपःशब्दः सन्तापार्थेऽप्रयुक्त इति कथनं साहसमात्रमेव। अतश्चन्द्राचार्यप्रभृतयोऽवश्यं तपसः सन्तापार्थे दृष्टप्रयोगा भवेयुरिति।

शत्रवः पराजिता एव विपिने गत्वा तपश्चरन्ति अतस्तादृशतपस्यायां सन्तापो वर्तत एव। अतः "कश्चित् पराक्रमी राजा शत्रून् तपस्यती"ति वाक्ये शत्रून् सन्तापयुक्तान् करोतीत्यर्थः युक्त एव।

४—कण्ड्वादिभ्यो यक् १।१।३९ इत्यत्रापि कण्ड्वादिगणपठितधातूनां केषांचिदनुबन्धभेदो दृश्यते 'मन्तु असु इत्यनयो रन्ते अकारानुबन्धं पठति यद्यपि वृत्तौ 'बल्गु' इत्यनुबन्धरहित एव पाठ उपलभ्यते तथापि गोयीचन्द्रस्य साक्ष्येण कण्ड्वादयश्चत्वारोऽपि अकारान्ता आसन्निति प्रतीयते। दीक्षितस्तु मन्तु अपराधे इति पठित्वा चन्द्रस्तु अितमाहेत्युदाजहार। इत्थम् अन्येषां पाणिनीयानां मतेन यत्र मन्तूयति असूयति इत्येकैकमेव रूपम् तत्र चान्द्रव्याकरणमतेन मन्तूयति मन्तूयते असूयति असूयते इत्युभयमपि रूपं जायते।

६—पाणिनीये च्लीति लुङि मूलभूतः प्रत्ययः तस्य सिच्क्सचङङादयः बहव आदेशाः[1], किन्तु चान्द्रे च्लिप्रत्ययो न स्वीकृतःसिजादयः सर्वे स्वतन्त्राः प्रत्यया उत्सर्गापवादभूताः यथा 'लुङि सिच्' (चा० १।१।६०) 'शल इगुपधान्तादृशोऽनिटः क्सः' (चा० १।१।६५) णिश्रिद्रुस्रुकमः कर्तरि चङ् (चा० १।१।६८) ऋसृशाससुख्यावचोऽङ् १।१।७० इत्यादौ। य च्लिः क्वापि न दृश्यते केवलं प्रेत इव भवतीति मन्यते तस्य कल्पना मस्तके भारमात्रम्। नचैवं दशलकाराणां क्वाप्यश्रूयमाणानां कल्पना कथं क्रियते इति वाच्यम् तिबादीनां पृथक्त्वेनानुभूतेषु वर्तमानभूतभविष्यत्सु विधानाय पृथगाधारस्यावश्यकत्वेन तेषामश्रव्याणामपि कल्पनाया आवश्यकत्वात्।

मन्त्रे घसह्वरणस-इति सूत्रे लेर्लुक् प्रोक्तं तत्तु लेरित्यनुक्त्वा लुङि एभ्यो विहितस्य लुग्विधानादेव सिद्धयति।

६—चान्द्रव्याकरणे भ्रमधातोः भ्रम्यति भ्रमतीति रूपद्वयं प्रतिपादितम्। काशिकार्यास्तु भ्रमु अनवस्थाने भ्रमु चलने द्वयोरपि ग्रहणं स्वीकृत्य शमादित्वाद् दीर्घं कृत्वा भ्राम्यति भ्रम्यति भ्रमतीति रूपत्रयं स्वीकृतम्। तदनुयायिनो दीक्षितादयस्तथैव मन्यन्ते। भ्रमु चलने भ्वादिः, भ्रमु अनवस्थाने दिवादिः, पुषादिः शमादिश्चेति उभयोर्ग्रहणात् भ्वादेः भ्रम्यति भ्रमतीति शमादेस्तु श्यनि दीर्घे भ्राम्यती ति त्रैरूप्यम् इति।

---

१. च्लि लुङि ३।१।४३ च्लेः सिच् ३।१।४४ शल इगुपधादनिटः क्सः ३।१।४५ णिश्रि०० चङ् ३।१।४८ अस्यति०० ३।१।५२।

२. ३।१।७० का०।

वस्तुतस्तु अत्र भूवादेः (भ्वादेः) भ्रम् धातोरशमादित्वाद् यद्रूपं भवति तदेवोक्तं चन्द्रेण दिवादेस्तु भ्रमधातोः शमादित्वात् चान्द्रधातुपाठेऽपि पठिताद्दीर्घत्वं स्यादेव इति तेन नोक्तम् अनवसरत्वात् । तथापि यथालिखितं, तावन्मात्रस्यैव स्वीकृतौ वैमत्यमस्त्येव ।

७—यज्यम् इति रूपमपाणिनीयम् । पाणिनितन्त्रे पोरदुपधात् ३।१।९७ शकिसहोश्च ३।१।९८ इति यद् विधायकसूत्रद्वये पतञ्जलिः 'यतिजनेरूपसंख्यानम् (वा० ३।१।९७।१) इत्युपक्रम्योवाच-अत्यल्पमिदमुच्यते तकिसहिचति-यतिजनीनामिति वक्तव्यम् इति । इत्थं यज्धातोर्यद्विधायकं सूत्रं मुनित्रयप्रोक्तं नोपलभ्यते । किन्तु चन्द्रेण पुशकित-किचनियतिशसिसहियजः (चा० १।१।१०८) इति सूत्रेऽन्यैः साकं यजिरपि यत्प्रकृतित्वेन पठितः ।

८—आस्रव इत्यपि सिद्धयति अचा[1], बहुलाधिकारात् । तथा च आसमः स्नोः (चा० १।१।१४८) इत्यनेन विहितेन स्नेन अचो नित्यबाधो न भवति । पाणिनीयास्तु आस्रव इति ण[2]प्रत्ययान्तमात्रं साधयन्ति ।

९—गस्नु प्रत्यये गकारानुबन्धवैमत्यम्:—

जिष्णुः ग्लास्नुः भूष्णुरित्यादौ गुणनिषेधसिद्धयर्थं ङ्किति चेतिसूत्रे गकारश्चर्त्वेन प्रश्लिष्यते स्थाष्णुरित्यत्र कित्वाभावान्नेत्वमित्याहुः पाणिनीयाः ।

चान्द्रैस्तु ककारानुबन्धसहितक्स्नुपर (प्रत्यय) एव क्रियते जिग्लश्च क्स्नुः १।२।९४ । स्थास्नुरिति तु १।२।९५ इति सूत्रेण निपात्यते ईत्वाभावपूर्वकम् । गुणवृद्धिनिषेधसूत्रे गकारप्रश्लेषगौरवमपि न ।

१०—दयालुः निद्रालुः तन्द्रालुः श्रद्धालुरित्यादयः न कृदन्तशब्दाः, किन्तु तद्धितान्ता इति चान्द्राः अथवा चान्द्रव्याकरणे कृदन्ततद्धितेति विभागाभावेन नेमे शब्दाः क्रियार्थप्रकृतिसिद्धाः किन्तु नामप्रकृतिमूलका इति वक्तव्यम् । निद्रातन्द्राश्रद्धादयाहृदयाद् वालुच् (चा० ४।२।१५७) सूत्रेणालुच् विधीयते, एभ्यः नामभ्यः । हृदयशब्दात् मत्वर्थीय आलुच्प्रत्ययः पाणिनिनाऽपि विधीयते । गोमिना[3] स्पृहिगृहिपतिशीङ्भ्यो धातुभ्यो विधीयते आलुच् (१।२।१०४) तन्मतेन स्पृह्यालुरित्यादयः क्रियार्थ (धातु) प्रकृतिकः । किन्तु निद्रालुरित्यादयः शब्दा नामप्रकृतिकाः निद्राशीलः दयाशीलः निद्रावान् तन्द्रावान् हृदयवान् इत्याद्यर्थस्यैव तत्र तत्र भानात् इमे शब्दा नामप्रकृतिका एव मन्तव्याः । अतोऽत्र चन्द्रस्वीकृतिः प्रशस्या ।

११—अः सनाद्यन्ताच्च (चा० १।३।८४ सूत्रेण कण्डूया इति सिद्धयति बहुलाधिकारात् कण्डूतिरपि साधुः । किन्तु अमरकोषे कण्डूतिरिति न दृश्यते[3] ।

भाष्यवैपरीत्यमिह द्रष्टव्यम्:—

१२—उपाद्यमः स्वकरणे १।३।५६ इति पाणिनिसूत्रं भाष्यालंकृतं कुर्वता पतञ्जलिना प्रोक्तम्—स्वं शाटकान्तमुपयच्छतीत्यत्र सूत्रं न प्रवर्तते, अस्वं यदा स्व करोति तदैव सूत्रप्रवृतेः । न चैवं स्वीकरण इति प्राप्नोति, विचित्रा स्तद्धितवृत्तयो नातस्तद्धित उत्पद्यते इति । एवचात्र भाष्यमतेनान्यदीयस्य कस्यापि स्वस्यात्मसात्करणे सूत्रप्रवृत्ति-र्लक्ष्यते।चान्द्रव्याकरणे च विवाहरूपमेवात्र स्वीकरणं गृहीतमिति गोमिनः साहसः प्रशस्यः । यत् भाष्यं वैयाकरणा अक्षिणी निमील्यानुगच्छन्ति 'तद् विरुद्धं युक्तियुक्तं लिखतश्चन्द्रस्य प्रतिभा साहसश्च स्तुत्यौ । अत एव काशिकारेणात्र चन्द्रं प्रमाणीकृत्य लिखितम्-पाणिग्रहणविशिष्टमिह स्वीकरणं गृह्यते न स्वकरणमात्रम् इति ।

---

१. चा० १।१।१३९

२. पा० ३।१।१४१ ।

३. कण्डूः खर्जूश्च कण्डूया इति अमरः २।६।५३ ।

एवं च भाष्यमतेन स्वं शाटकान्तमुपयच्छतीत्यत्रात्मनेपदेन (तङा) भाव्यम् । चान्द्रमतेन तु परस्मैपदम् ।

१३. अनुबन्धवैमत्यम्—

पाणिनिना अजाद्यत[1]ष्टाप् क्रियते । स्त्रीलिङ्गे डाबपि प्रत्ययस्तेन स्वीकृतः । अन्नन्तान्मन्नन्ताच्च डाप्[2] क्रियते । चन्द्राचार्यस्तु डापमेवोभयत्र स्वीकरोति । अजा देवदत्ता इत्यादौ डापि अन्त्याद्यचः (टेः) लोपेन रूपसिद्धेः । न च क्रुञ्चा उष्णिहा इत्यादौ टिलोपे रूपासिद्धिः, अजादिगणे निपातनादेव लोपाभावसिद्धेः । अनकारान्तेभ्यः डाप् क्वापि क्वापि विकल्पेन विधीयते निपातनात् । तेन उष्णिक् वाक् दिक् सरित् गीरित्यादयोऽपि उष्णिहा वाचा दिशा सरिता इत्यादिभिः सह सिद्ध्यन्ति । तथाचात्र चान्द्रे [3]अजाद्यतः इत्येव सूत्रं क्रियते, डापः पूर्वसूत्रा[4]दनुवृत्ति-सिद्धः । इत्थमनेन वैमत्येन शब्दलाघवम् पर (प्रत्यय) विशेषाकरणजन्यं लाघवं च साधितम् ।

१४—अश्व (४।१।८४) पत्यादिगणे अधिपतिशब्दः पाणिनीयगणपाठे न पठितः । अतस्तत्राधिपत्यमिति सिद्ध्यति विना कष्टम् । चान्द्रे तु अधिपति शब्दः अश्वपत्यादि (२।४३) गणे पठितः । तेनाधिपतमित्येव भवति । आधिपत्यमिति तु देवतार्थाणान्ताच्चातुर्वर्ण्यादिराकृतिगणत्वात् ष्यञि सिद्ध्यति ।

१५—दूतस्य भावः दूत्यम्, दूतत्वम्, दूतता, दौत्यम् इति रूपचतुष्टयं चन्द्रस्येष्टम् । किन्तु काशिकायां दौत्यम् न दृश्यते नवाऽमरकोशे ।

१६—स्तैन्यमिति शब्दोऽपि चान्द्रात् साधुजार्यते । स्तेयम्, स्तैन्यम्, स्तेनत्वम् स्तेनता इति चत्वार्यपि रूपाणि चान्द्रे साधूनि । स्तेनाद्यन्न (पा० ५।१।१२५) लोपश्चे इति वदतः पाणिनेरपि स्तैन्यमित्यनभिप्रेतमेव । स्तैन्य-मिति पुराणादौ दृष्टस्य रूपस्य साधुत्वाय केचित् स्तेनादिति योगविभागं कुर्वन्ति । स्तेनात् ष्यञ् भवतीति तदर्थः । तेन स्तैन्यमिति सिद्ध्यति । ततः यलोपश्चेति द्वितीयो योगः तेन स्तेयमिति सिद्ध्यतीति काशिका (५।१।१२५) । पक्षे स्तेनत्वं स्तेनतेत्यपि भवतीति हृदय हारिणी । सर्वमिदं कल्पनं चान्द्रानुकरणम् । भोजराजोऽपि चन्द्रमनुकृत्य सूत्रं कृतवान्-दूतादिभ्यः ष्यञ् च सं० क० ५।१।१६४ तेन दौत्यम्, वाणिज्यम् स्तैन्यमित्यादि साधितम् ।

१७—स्फीतमिति स्फायीधातोः क्ते रूपम् स्फायः (पा० ६।१।२२) स्फी निष्ठायामिति नित्यं स्फी भावः इति पाणिनीयाः । चान्द्रास्तु 'स्फायः स्फी' ५।१।३२ इति विकल्पेन स्फीभावमिच्छन्ति । तेन व्यवस्थित-विभाषया नियतविषये प्रयोग इत्याहुः । जैनेन्द्रोऽपि नित्यमेव स्फीभावं मन्यते । भौजराजस्तु विकल्पेनादेशं स्वीकरोति । नित्यमादेशं स्वीकुर्वतो मतेन स्फातास्तण्डुला इति प्रयोगः स्फातिरित्यस्मात्[5] मत्वर्थीयाच्प्रत्ययेन सिद्ध्यति ।

१८. वत्सतरार्णम् इति कात्यायनसम्मतम् वत्सरार्णम् इति चन्द्रः । प्रवत्सतरकम्बलवसनानां चर्णे ऋण-दशाभ्यां च (पा० ६।१।८९ वा० ७,८) इति कात्यायनवार्तिकद्वयं प्रदर्शर्णवसनकम्बलवत्सरादृणे (५।१।९१) इति सूत्रे गुम्फयता वत्सतरस्त्यक्तः वत्सरश्च गृहीतः । कातन्त्र (१।८) परिशिष्टानुसारेण काशिकायामपि वत्सरशब्द एव पठितो वर्तते, परन्तु पतञ्जलिशाकटायनादीनां वत्सतरपठनमेवेष्टम् अतः वत्सतरशब्द एवात्र पाठ्यः ।

वस्तुतस्तु बलाघातप्रयुक्तवृद्ध्या वत्सतरार्णमिव वत्सरार्णमित्येव सम्भाव्यते नतु वत्सरर्णमिति । अतः उभयोः समावेश इष्टः ।

---

१. अजाद्यतष्टाप् ४।१।४

२. डाबुभाभ्यामन्यतरस्याम् ४।१।१३ ।

३. २।३।१५ ।

४. २।३।१४ ताभ्यां डाप् ।

५. अर्श आदिभ्योऽच् ४।२।१४७ ।

१९—ख्यत्यात्परस्य ६।१।११२ इति पाणिनिसूत्रस्य स्थाने चन्द्रेण सख्युः पत्युः ५।१।११८ इति ङसिङसो रूपनिपातनसूत्रं स्वीकृतम्। तेन सख्युरागच्छति पत्युरागच्छति सख्युः स्वम् पत्युः स्वम् इति सिद्धम्। सखायमिच्छति ततः क्विपि अल्लोपयलोपौ तस्य सख्युः एवापतीयतेः क्विबन्तस्यापि पत्युरिति निपातनमिष्यते। केवलस्य निपातनात् अतिसखेरतिपतेरित्यादौ तदन्तस्य न भविष्यति।

ख्यत्यात् परस्य इति सूत्रं तु न युज्यते ख्यश्चत्यश्चेति समाहारद्वन्द्वेऽकारस्य विवक्षणे सख्युर्भाव सख्यम् तस्मात् सख्यात् अपत्यात् गार्हपत्यादित्यत्रातिव्याप्तिः सख्युः पत्युः इत्यादौ चाव्याप्तिः तद्वारणाय सख्यु र्यः ५।१।-१२६ पत्यु र्नो यज्ञसंयोगे ४।१।३३ आपत्यस्य च ६।४।१५१ इति निर्देशाश्रयणे कष्टम्। यदि सख्युः पत्युरित्यादि-पूर्वोक्तनिर्देशाद् ख्यत्येत्यनयोरकारस्योच्चारणार्थत्वमङ्गीक्रियते तदापि निर्देशाश्रयणे गौरवमस्यैव।

न च ख्यत्यादिति सूत्रे कृते लूनीयतेः क्विपि नत्वस्यासिद्धत्वात् त्यशब्दत्वान्डसिङसोः लून्युरित्यादि सिद्धयतीति फलं सिद्धान्तकौमुद्यादौ प्रतिपादितम्, चान्द्ररीत्या निपातने तन्न सिद्धयतीति वाच्यम् बहिरङ्गत्वान्नत्वस्या सिद्धत्वे तत्वादेवेत्वयणोरप्यसिद्धत्वापत्या 'त्य' शब्दाभावात् लून्युरित्यस्य यत्नशतेनापिसाधुत्वासंभवात् लून्य इत्थेव भवितव्यम्।

इत्थं पतञ्जलि[1] दीक्षितादि मतेन स्वीकृतस्य लून्युरित्यादिरूपस्य साधुत्वं चन्द्रेण नाङ्गीक्रियते। "युक्ति-युक्तं वदँश्चन्द्रो भाष्यादपि बिभेति नो"।

२०—चन्द्रः नामगोत्रादिशब्दोत्तरपदे समानस्य सभावं वैकल्पिकं, पक्षज्योतिरादिषूत्तरपदेषु तु नित्यमाह। पाणिनीयास्तु सर्वत्र नित्यमेव सभावं कुर्वन्ति। ज्योति-र्जनपद-रात्रि-नाभि-नाम-गोत्र-रूप-स्थान-वर्ण-वयोवचन-बन्धुषु, चरणे ब्रह्मचारिणि (पा० सू० ६।३।८५-८६) इति सूत्रद्वये पक्षधर्मजातीयादिशब्दपाठाभावः सपक्षः साधर्म्यम्, सजातीय इत्यादिप्रयोगेषु विद्यमानसभावश्च पाणिनीयानुद्वेजयतः। अतएव तैः सामानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु इत्यत्र समानस्येति योगविभाग इष्टसिद्ध्यर्थः क्रियते।

चन्द्रेण सर्वं मिदं कष्टं ज्योतिर्जनपद—चरणे ब्रह्मचारिणीति सूत्रद्वयोक्तानां येषूत्तरपदेषु सत्सु नित्यं सादेश इष्टस्तेषां[2] पक्षादिगणं नूतनं प्रकल्प्य तत्र पाठः कल्पितः इत्थमत्र गणे 'पक्षज्योतिष्जनपदरात्रिनाभिबन्धु पत्नी ब्रह्मचारिन् शब्दाः पठिताः। येषां नामगोत्ररूपस्थानवर्णवयोवचनजातीयानां परे वैकल्पिकसभाव इष्ट स्तदर्थमुत्तर[3] सूत्रं कृतम्। एवंच सनामा-समननामा, सगोत्रः, समानगोत्रः, सरूपः-समानरूपः सस्थानः—समानस्थानः, सवर्णः-समानवर्णः, सवयाः समानवयाः, सवचनः, समानवचनः, सधर्मा समानधर्मा, सजातीयः समानजातीयः इति सर्वत्रोभय विधं रूपं चान्द्रव्याकरणकृपया सिद्धयति। अतएव भवभूतेः 'समान[4]धर्मा इति प्रयोगे न कोऽपि वज्रपातः।

२१—प्रक्रियावैमत्यस्य बहून्युदाहरणानि सन्ति तत्रोदाहरणार्थमेकं सूत्रं प्रस्तूयतेः—

एधि देहि धेहीत्यादौ ध्वसोरेद्धावभ्यासलोपश्चेति सूत्रेण लोटि अस् हि ददा हि दधा हि इति स्थितौ एत्वे अ एहि जायते एकत्र, द्वितीये तृतीये च द देहि दधेहि इति स्थितौ जातायाम् अभ्यासस्य लोपः क्रियते इति विभिन्ना प्रक्रिया साप्येकेनैव सूत्रेण विधीयमानां कस्मै विचारकाय रोचेत। अतश्चन्द्रेण तादृशो विधिः परित्यक्तः। तेन सूत्रितम्

१. ६।१।११२ सूत्र भाष्यम् सिद्धान्तकौमुदी अजन्तपुलिङ्गप्रकरणे न भूसुधियोः ६।४।८५ इति सूत्रस्था।

२. समानस्य पक्षादिषु ५।२।१०३।

३. नामगोत्ररूपस्थानवर्णवयोवचनधर्मजातीये वा (चा० सू० ५।२।१०४)।

४. ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैष यत्नः। उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी (मालतीमाधव) प्रस्तावना।

अस्दाधां हावेद् द्विश्च ५।३।११५ इति अनेन अस्ते र्दाधोश्च हौ परे एद् विधीयते अथ च दाधो द्विः प्रयोगो निषिध्यते, तेन नातिप्रक्रियाभेदः ।

२२—'नाना' शब्दयोगे पृथक् शब्दयोगे च द्वितीयातृतीयापञ्चम्यः विभक्तयः साधव इति पाणिनीयाः, पृथग्विनानानाभिस्तृतीयान्यतरस्याम् इति सूत्रात् (२।३।३२ पा० सू०), दीक्षितमतेना त्रान्यतरस्याम् इति ग्रहणस्य समुच्चयार्थत्वात् । नानाशब्दः वर्जनार्थकः हिरुङ् नाना च वर्जने इत्यमरकोशात् । नाना नारीं निष्फला लोकयात्रा इति प्रयोगे नानाशब्दस्य वर्जनार्थत्वस्य तद्योगे द्वितीयाविभक्तेश्च दर्शनात् । विनञ्भ्यां नानाञौ न सह (पा० सू० ५।२।२७) इत्यनेन नञ्शब्दात् स्वार्थे नाञ्प्रत्यये वृद्धौ निष्पन्नस्य नानाशब्दस्य 'न सहे' त्यर्थस्य ख्यापनात् । पृथक् शब्दोऽपि भिन्नार्थकः ।

चान्द्रे तु विना तृतीया चेत्येकं सूत्रम् (२।१।८५) । अनेन विनाशब्दयोगे तृतीया पञ्चमी द्वितीया च विधीयते । ततो द्वितीयं सूत्रमस्ति पृथग्नानाभ्याम् २।१।८६ । अत्र सूत्रे ऋते द्वितीया च (२।१।८४) इति सूत्रात् विना तृतीया च (२।१।८५) इत्यत्रानुकृष्टा द्वितीया नानुवर्तते चानुकृष्टमुत्तरत्र नानुवर्तते इति परिभाषासूत्रात् (चा० प० सू० ४०) । तेन पृथङ्नानाशब्दाभ्यां योगे तृतीया द्वितीया च साधुश्चन्द्राचार्यमतेन, न तु द्वितीया ।

चन्द्राचार्येण विना नानेति निपातनात् साधितौ । कस्मिन्नर्थे निपातनमिति न दर्शितम् । प्रायः 'नाना' शब्दः विनार्थात् शनैः शनैः प्रच्युतो भवन् 'विविधारूपार्थं प्रति क्रमशोऽग्रेसरो जातः । अर्थपरिवर्तनप्रकृतिं विचार्य चन्द्राचार्यः' 'विना नाना' ४।२।२८ इति निपातनसूत्रेऽर्थविशेषनिर्देश न कृतवान् । अधुना न कोऽपि वक्ता विनाशब्दं नानाशब्दं च समानार्थकं मन्यते । चन्द्राचार्यकाले एव नानाशब्दः प्रायोऽनेकशब्दपर्यायतां गतः । अतोऽनेकशब्दपर्यायस्य नानाशब्दस्य योगे द्वितीया न विहिता । एवंच चन्द्राचार्यस्य मतेन धर्मात् पृथक्, धर्मेण पृथक्, धर्मेण नाना, धर्मान्नाना इति प्रयोगे पञ्चमी तृतीया च भवतः, न द्वितीया ।

२३—मुष्टामुष्टि (युद्धम्)

दण्डैर्दण्डैं र्मुष्टिभ्यां मुष्टिभ्यां वा प्रहृत्येदं युद्धम् वृत्तम् इति विग्रहे चान्द्रव्याकरणे 'दण्डादण्डि मुष्टामुष्टि' च इति जायते एवं केशेषु केशेषु च गृहीत्वा वृत्तं युद्धम् केशाकेशि उच्यते । 'तत्र गृहीत्वा तेन प्रहृत्य युद्धे सरूपम्" (२।२।४७) इत्यन्यार्थे एकार्थीभावानन्तरम् 'इज् व्यतिहारे' (४।४।११६) इतीचि 'इचि' (५।२।४८) इति पूर्वपदस्यात्वे दण्डादण्डि केशाकेशीतिवत् मुष्टामुष्टि इत्यादावपि पूर्वपदस्यात्वसंभवात् । तिष्ठत्वग्वादिषु इच् प्रत्ययस्य पाठाद् अव्ययत्वम् । पाणिनिमतेन तु' तत्र तनेदमिति सरूपे (पा० २।२।२७) इति बहुव्रीहिसमासे 'इच् कर्मव्यतिहारे' ५।४।१२७ इति इच् प्रत्यये 'अन्येषामपि दृश्यते' ६।३।१३७ इति पूर्वपदस्य दीर्घे अव्ययत्वे **मुष्टीमुष्टि** इति सिद्धयति ।

मुष्टीमुष्टीतिप्रयोगमधिकृत्य मनोरमा[1]कारेण प्राचा साधितस्य मुष्टामुष्टीत्यस्यापाणिनीयत्वादप्रामाणिकत्वमुक्तमू तन्न युक्तम् प्रयोगाणां शिष्टप्रयुक्तत्वमेव प्रामाणिकत्वम् जनयति । पाणिनीयव्याकरणेन अप्रदर्शितसाधुत्वोपायाः शब्दा यद्यप्रामाणिकाः, विश्रामः ष्ठीवनं, कारणम् देभतुरित्यादयो लौकिकाः शास्त्रकारैश्च प्रयुक्ताः शब्दा अप्रामाणिकाः स्युः । **अस्तु नाम विश्रामादिशब्दवत् मुष्टामुष्टिशब्दस्यापाणिनीयत्यम् प्रामाणिकत्वं तु तत्र शिष्टप्रयुक्तत्वादायात्येव ।** पाणिनीयत्वमात्रम् न शब्दस्य साधुत्वव्यवस्थापकम् न वा प्रामाणिकत्वाधायकम् । अन्यथा कात्यायननिष्पादितानां 'गव्यूतिः' 'जीमूतस्येव' 'अपचसि त्वं जाल्मेत्यादीनां पतञ्जलिप्रोक्तानामार्यत

१. अत्र प्राचा दृशिग्रहणात् कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दीर्घत्वम्, आत्वं वाऽनचि इत्युक्तम् । तत्र 'आत्वं वा' इत्यपाणिनीयम् । अतमूव मुष्टामुष्टीत्युदाहरणमप्रामाणिकमेव । एतच्च मनोरमायां स्पष्टम् । (तत्वबोधिनीबहुव्रीहि-समासे ६।३।१३७ सूत्रस्य) ।

मर्तुकामा इत्यादीनामप्राणिकत्वमापद्येत रोरुच्यते शोशुभ्यते इत्यादीनां च साधुत्वापत्तिः। पाणिनीयादर्शितनिष्पत्युपायानां प्रयोगाणां त्रियम्बकम्[1] द्वयेषाम्[2] इत्यादीनामसाधुत्वं च स्यात्। इकां यणभिर्व्यवधानं व्याडिगालवयोरिति वचनं लिखितं पुरुषोत्तमदेवेन। द्वयशब्दस्य च सर्वनामसंज्ञा 'चाक्रवर्मणस्य' मतेन भवति।

पतञ्जलिना न केवलं कात्यायनेन आत्मना वा दर्शितसिद्धीनां प्रयोगाणामाश्रयणमावश्यकं दर्शितं किन्तु व्याकरणान्तराणां नियमानप्याश्रयितुं प्रेरितम्।[3]

एतेन 'यत्तु कश्चिदाह चाक्रवर्मणव्याकरणे द्वययशब्दस्यापि सर्वनामताभ्युपगमात् तद्वीत्या द्वयेषामित्ययं प्रयोगः तदपि न, मुनित्रयमतेनेदानीं साध्वसाधुविभागः। तस्यैवेदानीन्तनशिष्टैर्वेदाङ्गतया परिगृहीतत्वात् दृश्यन्ते हि नियतकालाः स्मृतयः। कलौ पाराशरी स्मृतिरिति १।३।२७ सूत्रोक्तशब्दकौस्तुभोऽप्यपास्तः। प्रयोगे समागतानां प्राचीनैः सर्वैर्महर्षिभिर्व्युत्पादितानां तैरव्युत्पादितानामपि परवर्तिभिः पदवाक्यप्रमाणज्ञैर्दर्शितव्याकृत्युपायानां सर्वेषां च शब्दानां प्रामाणिकत्वमङ्गीकार्यमेव। यदि कश्चित् शब्दो लोके शास्त्रे च सुप्रयुक्तः, शब्दानुशासनं रचयद्भिर्वैयाकरणैस्तत्सिद्धयुपायोऽवश्यदर्शनीयः। तथाऽकुर्वन्तो व्याकरणनिर्मातारः स्वकर्तव्यात् प्रच्यवन्त्येव। वैयाकरणानां शब्दानुशासनकर्तॄणामयं दोषः यत्ते सुप्रयुक्तं शब्दं न पश्यन्ति। न ह्ययं स्थाणोरपराधो यदन्धो नैनं पश्यति पुरुषापराधः स भवति। एतादृश एव वैयाकरणः वैयाकरणपाश उच्यते। किञ्च भाषायां मुक्कामुक्कीति लाठालाठीति प्रयुक्तोऽपभ्रंशोऽपि पूर्वपदस्यात्वं संस्कृतशब्दे आसीदिति संकेतयति।

२४—'करिष्ये' इत्यादौ आत्मनेपदप्रयोगविषयेऽपि वैमत्यं दृश्यते। 'पुत्रकर्तव्ये पितुर्वृषोत्सर्गादावपि 'करिष्ये' इत्यभिलाषं चान्द्राः कुर्वन्ति-न्याय पञ्चाननः[4] अयं भावः स्वरितञितः कत्रभिप्राये क्रियाफले पां० १।३।७२ णिचश्च पा० १।३।७४ इति सूत्रद्वय स्वरितञिद्भ्यां ण्यन्ताच्च धातुभ्यः कर्तृगामिनि क्रियाफले आत्मनेपदं विदधाति। कर्तारमभिप्रैति गच्छतीति कर्त्रभिप्रायम् इति व्युत्पत्तौ कर्मण्यणा कर्त्रभिप्रायपदसिद्धेः। फलपदेन मुख्यं फलं गृह्यते यथा 'यज्' धातोः स्वर्गप्राप्त्यादिकम्। तेन दक्षिणाप्राप्तिरूपस्य फलस्य ऋत्विग्गामित्वेऽपि तत्कर्तृकसंकल्पे करिष्यामीत्येव प्रयोगः पाणिनीयव्याकरणसम्मतः, मुख्यस्य स्वर्गप्राप्तिरूपस्य फलस्य यजमानगामित्वात्।

चान्द्रास्तु 'फलवति' चा० १।४।१२४ 'पाठे विभाषितात्' चा० १।४।१२५ ञितः' १।४।१३६ इति सूत्रत्रयं फलवति कर्तरि तङानविधायकं स्वीकुर्वन्ति। तथाच श्राद्धे 'श्राद्धमहं करिष्ये' इति पुत्रकर्तृके संकल्पे कर्तुः श्राद्धकरणजन्यफलवत्वात् तङ् भवत्येव।

कर्त्रभिप्राय पदस्य कर्तृगामित्वं नार्थः, किन्तु यत् फलं कर्त्रभिप्रेतं तदेव कर्त्रभिप्रायं फलम्। तथाच पाणिनीयसम्प्रदायानुसारेण तत्रैवात्मने पदं स्यात् यत्र फलं कर्त्रभिप्रेतं स्यात्, श्राद्धस्य कर्ता पितुः स्वर्गप्राप्तिकामः सन् श्राद्धं करोति तत् फलस्य स्वर्गस्य कर्तृगामित्वाभावान्नात्मनेपदम्। चान्द्रे तु क्रियाफले कर्त्रभिप्रायविशेषणाभावात् कर्तुर्यथाकथंचित् फलवत्वविवक्षणात्तङानौ भवतः इति न्यायपञ्चाननस्य हृदयम्।

---

१. त्रियम्बकं संयमिनं ददर्श कु० सं ३।४४ व्यकीर्यत त्र्यम्बकपारमूले ३।६१ (कु० सं०) शान्तिपर्व-येन देवस्त्रियम्बकः। समापर्व-त्रियम्बको विश्वरूपः।

२. व्यथां द्वयेत्रेषामपि मेदिनीभृताम् माघः १२।१३।

३. इतान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषावृद्धिमारभन्ते, तदिहापि साध्यम् १।१।३।

४. पाठे विभाषितात् (चा० १।४।१२५) इति सूत्रस्य टिप्पणी)।

वस्तुतस्तु 'फलवति' चा० १।४।१२४ इति सूत्रघटकफलपदेन मुख्यस्यैव फलस्य ग्रहणात् पुत्रकर्तृकवृषोत्सर्गादौ कर्तुः अर्थात् पुत्रस्य मुख्यफलवत्ताऽभावात् तङ् नात्र सम्भाव्यते । अतोऽत्र वैमत्यं न दृश्यते **न्यायपञ्चाननस्तु चिन्त्यः ।**

२५. गोमिन् शब्दार्थः विचार्यते । अत्रापि वैमत्यं दृश्यते ।

चन्द्राचार्येण गोमिन् शब्दाः 'गोमिन् पूज्ये' (चा० ४।२।१४४) इति सूत्रेण पूज्यार्थे निपातितः । निपातितानां शब्दानां योगरूढत्वं रूढत्वं वा प्रायेण विलोक्यते । शब्दोऽयं पाणिनिनाऽपि निपातितः[1] किन्तु मत्वर्थे निपातितः । अतः पाणिनितन्त्रेऽस्यार्थः गोमान् गोस्वामीतीदृश एवासीदिति तर्क्यते । चान्द्रव्याकरणकालेऽत्र पूज्यार्थत्वमागतम्, मत्वर्थताऽस्य प्रायः विलयं गता । चन्द्रानुकरणशीलेन भोजराजेनाऽपि 'गोमिन् पूज्ये' (स० ५।२।२०७) इत्येव सूत्रं कृतम् । जैनेन्द्रव्याकरणेऽपि अर्च्यर्थे शब्दोऽयं निपातितः गोम्यर्च्ये (जै० ४।१।६७) इति सूत्रं विधाय । एवं शब्दस्यास्य निपातनेन सिद्धिरिति समानेऽपि पाणिनीयचान्द्रव्याकरणदर्शितार्थविषये वैमत्यं स्पष्टम् ।

गोमिन् शब्दस्येतिहासः प्राचीनः, पाणिनिनाऽपि मत्वर्थे निपातनात् । पाणिनिकाले यस्य गावः (बहवः) भवन्ति स्म अथवा यस्यैकाऽपि प्रशस्ता गौ र्भवतिस्म स गोमिन्नित्युच्यते स्म तत्काले । यद्यपि तस्यार्थः गोमानित्येवासीत् तथापि तत्र रूढित्वप्रवेशोऽनुमीयते, निपातनद्वारा सिद्धदर्शनप्रयासात् । अन्यथा 'वाचो ग्मिनिः' (पा० ५।२।१२४) इति सूत्रवत् 'गोमिन्नितीदृशं किमपि स्वतन्त्रं विधिसूत्रं विधाय गोमिन्निति पदं साधयेत् । निपातनद्वारा साधनमिदं सूचयति यत् पाणिनिकाले एव अस्य शब्दस्य यौगिकत्वे अर्थाद् गोमद्रूपार्थे कोऽपि संकोचः संकोचलक्षणम्वाऽलक्ष्यत । अतः पाणिनिना वाग्मीतिवदस्य साधनं स्वतन्त्रेण विधिसूत्रेणाकृत्वा निपातनात्मकं विधित्वमङ्गीचक्रे । गोमत्सामान्यस्य कृते गोमिन्शब्दः पाणिनिकालेपि न प्रयुज्यते स्म, किन्तु गोमद्विशेषस्यकृते एवेति तन्निपातनेन गम्यते । इत्थं तर्क्यते यदयं शब्दः पाणिनिकाले योगरूढोऽभवदिति अथवाऽर्थसंकोचनधर्माऽभवदिति । अस्य प्रयोगः कस्मिन्नपि गोमद्वंशे व्यक्तिवाचकसंज्ञायाम्वा सीमित इति पाणिनिनिपातनप्रयाससंकेताल्लक्ष्यते ।

काव्यालंकारस्य रचयितुर्भामहस्य पितूरक्रिलगोमीति नामाऽस्य शब्दस्य गोत्रवाचकत्वं साधयति । महात्मनो वृद्धस्य कोऽपि शिष्योऽपि[2] गोमिन्नासीदिति व्यक्तिवाचकनामैव वात्रजातिवाचकत्वमगच्छदिति साम्प्रतं को निर्धारयितुं शक्नोति । चन्द्रगोमिनाऽयं शब्दः पूज्यार्थे निपातितः । तदनुयायिभिः भोजराजजैनेन्द्रशाकटायनैरपि अस्य पूज्यार्थत्वमनुमोदितम् । अतः ज्ञायते यत् 'गोमिन्' शब्दः प्रथमं गोस्वाम्यर्थे, तदनन्तरं गोस्वामित्वविशिष्टगोत्रविशेषार्थे, ततश्च पूज्यार्थे रूढो जातः । इत्थं शक्यते वक्तुम् यदस्य शब्दस्य गोस्वामीतिशब्दवत् गोमत्तार्थो विलुप्तश्चान्द्रव्याकरणकाले, पूज्यार्थश्चात्र बलादधिरूढः ।

अर्थपरिवर्तनस्य बहुषु कारणेषु मुख्यतमं कारणमस्ति बलापसरणम् (Shift of emphasis) । इदं कारणं ध्वनिपरिवर्तनस्याप्यस्ति । कस्यापि शब्दस्योच्चारणसमये यदा कस्मिंश्चप्येकस्मिन् ध्वनौ बलाघातो भवति तदा तदन्ये ध्वनयो दुर्बला भूत्वा शनैः शनैर्विलुप्ताः भवन्ति । उणाद्यायस्य 'ऋा' रूपपरिणतेः कारणमिदमेव बलापसरणमस्ति । इदं बलापसरणमर्थपरिवर्तनस्यापि बलवत्कारणं दृश्यते । यदि बलं शब्दस्याभिधेयस्य प्रधानात्पक्षादपसृत्यान्यत्र गच्छति, तदा स गौणोऽर्थ एव प्रधानतां गच्छति । प्रधानोऽर्थश्च विलुप्तिमार्गमधिरूढः शनैः-शनैः र्लुप्यति । सम्पर्कवर्तिभावद्वये कोऽप्येको भावः प्रभावातिशयादन्यं विजयते । 'शुश्रूषा' शब्दस्य प्रारम्भे श्रोतुमिच्छेत्येवार्थ आसीत् । सेवापरायणे सेवके स्वामिनो वाक्यस्यादेशस्य च श्रवणेच्छया सर्वदा भवितव्यम् । अत एतादृशो

---

१. ज्योत्स्ना-तमिस्रा-शृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः पा० ५।२।११४ ।

२. 'गोमिन' बुद्ध के एक शिष्य का नाम था—बलदेव उपाध्याय—भारतीय साहित्य शास्त्र पृ० १४३ ।

द्वितीयार्थोऽपि प्रथमार्थेन सह प्रचलितः। शनैः शनै द्वितीयोऽर्थः सहचरित एव प्रयोगमहिम्ना प्रभावान्वितो भूत्वा प्रथममर्थं तथा जिगाय यथा स कथाशेषतामेव गतः। अधुना तु मूककर्तृकामूकसम्बन्धिन्युभयविधापि सेवा शुश्रूषेत्युच्यते। 'स्वामिन्नेश्वर्ये इति पाणिनिसूत्रेणैश्वर्यार्थे निपातितेन स्वामिशब्देन गोशब्दस्य समासे कृतेऽर्थ आसीत् गोर्गवां वा स्वामी। ततः परमस्यार्थो जातः माननीयः गोपालनस्यात्र देशे तत्काले सम्मान्यकार्यत्वात्। अतएव गोपालः कृष्णः प्रशस्यते। यस्तथा कथितो गोस्वामी स्यात् स गोसेवकसमाजेऽस्मिन् कृषिप्रधाने चात्र देशे सम्मान्यो भवेदिति नैसर्गिकमेव।

ततः पश्चात्तत्रैकाऽन्यापि भावना सहचरितभावरूपेण प्रादुरभूत्। य एतावतीनां गवां स्वामी स्यात् सोऽवश्यं धार्मिकः स्यादिति। इत्थं पूर्वपूर्वार्थात् बलापसरणेन उत्तरोत्तरार्थे बलाधिरोहणेन चास्यार्थः धार्मिकः पुरुष इति जातः। मध्ययुगसम्भूतानां तुलसीप्रभृति 'सन्त' कवीनां कृतेऽयं शब्दोऽस्मिन्नेवार्थे प्रयुक्तः। गवामिन्द्रियाणां स्वामीति व्याख्या तु नितरामर्वाचीना। एतादृशार्थोऽस्य मूले नासीत्। साम्प्रतन्तु 'गोस्वामीति शब्दः वंशवाचको जातः। तदभ्रंषः गोसांईशब्दः ब्राह्मणादिशब्दवदेकस्या जातेर्वाचको जातः। सुखदेवलालः आजन्मास्पृष्टगोशरीरः गवां धनमध्येऽपरिगणयिता हीनचरित्र इन्द्रियाणां क्रीतदासोऽपि स्वनामान्ते गोस्वामीति पदं लिखति। एवमेव गोमिन्शब्देऽपि अर्थपरिवर्तनं बलापसरणकारणाज्जातम्। प्रथमं गोमानित्यर्थः, ततः पूज्यार्थः, ततः गोमदन्वितवंशविशेषार्थोऽस्याभूत्। पाणिनि-चन्द्र-व्याकरणगतैतच्छब्दनिपातनरक्रिलगोमिन्नितिनामप्राण्येनैतदवगम्यते।

इत्थमस्य शब्दस्यार्थवैमत्यमुभयत्र दृश्यते।

धातुपाठस्य प्रथमगणस्य नाम भूवादिरिति दृश्यते चान्द्रे। पाणिनीये तु भ्वादिरिति वैमत्यमुभयत्र।

भूवादय इति सूत्रं चन्द्रेण संज्ञासूत्रत्वान्न कृतम्। किन्तु योगरूढस्य धातुशब्दस्य प्रयोगस्तेन क्रियते। तेन च प्रथमगणस्य 'भूवादय' इति नाम स्वीकृतम् त्रियम्बकमिति शब्दवत्। 'इकां यणभि र्व्यवधानं व्याडिगालवयोरिति मतं तेनाङ्गीकृतम्। तेन धातुसूत्राणि रचितानि अतः 'क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः' इत्यनुसारेण तत्क्रियावाचकानामेव भूप्रभृतीनां धातुत्वप्रयुक्तं कार्यं स्यात्। एवञ्च प्रथमगणस्य भूवादिरिति नामकरणे वैमत्यं दर्शनीयम्।

२६—**छात्रशब्दः छत्रशब्दाण्णे कृते सिद्ध्यति।** छत्रादिभ्यो णः (चा० ३।४।६३ पा० ४।४।६२) इति सूत्रद्वयमपि पाणिनीयचान्द्रव्याकरणोभयसाधारणम्। किन्त्वस्य शब्दस्य तात्पर्यनिर्धारणे भेदो दृश्यते। पाणिनीयाः "छत्रशब्दस्यात्र वृत्तिविषये दोषावरणरूपलक्ष्यार्थो ग्राह्यः; तेन गुरोर्दोषावरणं छत्रम् तच्छीलमस्येति छात्रः। यथा छत्रम् आतपादावरणं भवति तथा यः गुरो र्दोषावरणशीलो भवति, स छात्र उच्यते। भयाल्लोभाद्वा गुरोर्दोषावरको न छात्रपदवाच्यः" इति वदन्ति।

चान्द्रास्तु **छत्रमिव गुरोः सुखहेतुश्छात्रः।** सर्वतो जयमन्विच्छेत् शिष्यादिच्छेत् पराजयमिति प्रतिपादितेच्छावान् गुरुः स्वविद्यां शिष्यसंक्रान्तामथ च शिष्यं विनीतमुदारविचाराचरणं विलोक्य सुखीभवति।

ईदृशी छात्रशब्दव्याख्या चन्द्रस्यौदार्यं प्रकटीकरोति। स छात्रं गुरुदूषणावरणशीलं कर्तुं न वाञ्छति, बौद्धः दोषावरणशीलो न भवति। मानवस्वभावसिद्धं दूषणं स दूरीकृत्य निर्मलस्वभावो भवितुमिच्छति। तथा कृते एव स सुखमनुभवति। अतः 'वादे वादे जायते तत्वबोध' इत्यनुसारेण तत्वावबोधाय गुरोरधीततत्वस्य समालोचक एव तस्य सुखकारणम् इतीदृशो व्याख्याभेदः दीक्षितादेश्चन्द्रस्य च स्वभावभेदमाख्याति।

२७—देवानां प्रियः इति शब्दः महाराजस्याशोकस्य ख्यातविशेषणेष्वेकः। अतोऽयं शब्दः प्रशंसापरक एव। बौद्धमतानुयायिनोऽपि तस्य सर्वे देवाः प्रिया इति हेतोरुदारधार्मिकवृत्तित्वादशोकः सम्राट् साम्प्रतमपि प्रशस्यते।

परन्त्वस्य शब्दस्य दुर्दशा दृश्यते। बौद्धधर्मं प्रति द्वेषात् वैदिकादिधर्मरतै र्विद्वद्भिः शब्दोऽयं मूर्खार्थे प्रख्यापितः। प्रौढमनोरमायां 'देवानां प्रिय इति च मूर्खे' (पा० ६।३।२१ वा० २) इप्युपलभ्यते तस्याक्रोशस्य कुत्सित उद्गारः। यद्यपि भाष्येऽस्मिन् वार्तिके' मूर्खे इत्यंशो न दृश्यते तथापि षष्ठ्या आक्रोशे ६।३।२१ इति सूत्रस्य वार्तिकरूपेणोपन्यसनान्निन्दावाचित्वमस्य गम्यत एव। इत्थं सिद्धयति यत् कात्यायनकाले शब्दोऽयं मूर्खरूपाक्रोशवाचकत्वेन समाजविशेषे रूढः। बौद्धस्य तद्धर्मप्रचारकस्योपाधित्वेन प्रसिद्धः यत्र तत्र शिलालेखे लिखितः 'देवानां प्रियः' इतीदृश षष्ठ्यलुक् संज्ञाशब्द एव, मूर्खार्थबोधको न तु देवप्रिय इति स्पष्टं द्योतयत्यस्य शब्दस्यार्थापकर्षत्वे द्वेषो हेतुः।

तत्वबोधिनीकारस्तु मूर्खा देवानां प्रिया भवन्ति यागादिकर्मानुष्ठानरतत्वात्, ब्रह्मज्ञानिनस्तु न तथा, यगादयनुष्ठानाभावात् अतः गवादिस्थानापन्नत्वान्मूर्खा एव देवपशवः। देवपशुत्वात्ते देवानां प्रीतिं जनयन्तीति देवानां प्रिय इत्यस्य तात्पर्यमाहुस्तत्तु भाषेतिहासानभिज्ञत्वमेव तस्य सूचयति। उक्तव्याख्यानानुसारेण 'देवानां प्रियाः' इत्यत्र 'प्रियाः' शब्दोत्तरं बहुवचनेन भाव्यम्। 'देवप्रिय' इत्यत्रापि तादृशप्रियत्वसंभवात् मूर्खार्थः आपद्येत न च तथा। अतएवोच्यते अन्यत्र देवप्रिय इति।

अतः अशोकस्य बौद्धस्य तद्धर्मोन्नायकस्य कृते संज्ञावत् रूढस्यास्य तत्परत्वमेव कात्यायनस्याभिप्रेतम् द्वेषादित्येव स्वीकर्तव्यम्।

चन्द्राचार्यस्तु एतं शब्दं प्रति महान्तमादरं प्रकटीकरोति। अतएव शब्दो[1]ऽयं निपातनात् साधयति। तांस्तान् शब्दान् स निपातनात् साधयति यान् प्रति स श्रद्धालुरस्ति। एषा हि तस्य शैली। अत एव ईश्वर गोमिन् शालातुरीयादिशब्दास्तेन निपातिताः।

षष्ठ्या आक्रोशे (चा० ५।२।१२) इति सूत्रस्योदारणत्वेन तेन 'देवानां प्रियः' इति नोपन्यस्तं यथा किल कात्यायनेन स्वाक्रोशः प्रकटीकृतः।

अथ च 'भवद्दीर्घायुरायुष्मद्देवानांप्रियैस्तेऽन्याभ्यश्च (चा० सू० ४।३।१२) इति सूत्रे भवदादिशब्दैः समादरशुभाशंसादिपरकैः सह देवानांप्रियशब्दं पठित्वा अत्र भवान् ततो भवान् तत्र भवन्तं स दीर्घायुः तत्र दीर्घायुषम् इत्यादरशुभाशंसापरैरुदाहरणैः सह स देवानांप्रियः, तत्र देवानांप्रियम् इत्यादृयुदाहरणानि च दत्वा एतं शब्दं प्रति न केवलमाक्रोशाभावो दर्शितः अपि परमादरोऽपि प्रकटीकृतः।

---

१. कथं देवानां प्रियः ? देवानांप्रियै स्तेऽन्याभ्यश्च (४।३।१२) इति निपातनात् द्र० चा० सू० ५।२।१५ वृत्तिः।

अष्टमोऽध्यायः

प्रत्याहारे भ्रान्ति-तमिस्रा-नाशनदक्षश्चन्द्राचार्यः

व्याकरणजगति प्रत्याहारशब्दस्य प्रयोगः सर्वप्रथमं कात्यायनेन कृतः। तेनालेखिः—'प्रत्याहारेऽनुबन्धानां कथमज् ग्रहणेषु न'। पतञ्जलिना स्वमहाभाष्येऽयं[1] शब्दोऽनेकधा प्रयुक्तः। टीकाग्रन्थेषु अस्य शब्दस्य व्युत्पत्तिरपि दृश्यते प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा यत्रासौ प्रत्याहारः। अत्र बाहुलकादधिकरणे घञ् (कृत्) प्रत्ययः क्रियते। केचित्तु बाहुलकाश्रयणं शब्दस्य सिद्धये तुच्छमुपायं मत्वा प्रत्याहार इत्यत्र प्रत्याहरणं प्रत्याहार इति विग्रहे भाव एव घञ्-प्रत्ययं विधाय प्रत्याहारशब्दं संसाध्य ततो मत्वर्थीयाच्प्रत्ययं[2] कुर्वन्ति। इत्थं यत्र अण्अजादिषु वर्णानां प्रत्याहरणं वर्तते ते प्रत्याहारपदवाच्याः। व्याकरणे अकारेणापि अष्टादशानां वर्णाणां ग्रहणं भवति। इत्थं वर्णानां संक्षिप्तीकरणस्थाधिकरणम्, अथवा येन स्वल्पवर्णेनोच्चारितेन बहूनां वर्णानां बोधो भवेत् तद्यदि प्रत्याहारस्तर्हि अस्य च्वौ[3] इत्यादावुच्चारितोऽकारोऽपि प्रत्याहारः स्यात्। अतः प्रत्याहारपदं योगरूढं स्वीक्रियते। इत्थम् आदिऽरन्त्यनेत्यादि[4] सूत्रनिष्पन्नत्वे सति वर्णानां संक्षिप्तीकरणम् व्याकरणे प्रत्याहारः।

प्रत्याहारशब्दः मूलतो योगदर्शनस्य शब्दः। तत्रास्य तात्पर्यमासीत् चित्तस्येन्द्रियाणां च शब्दादिविषयेभ्यो निवारणम्। एतादृशतात्पर्यावगतये व्युत्पत्तिः कृता स्यात् प्रत्याहरणं प्रत्याहार इति। तत्र स उपायोऽपि प्रत्याहार उच्यते येन चित्तस्येन्द्रियाणां च विषयेभ्यो निवारणं प्रत्याहरणं विधीयते एतदर्थावबोधाय तत्र व्युत्पत्तिः दृश्यते प्रत्याह्रियन्ते इन्द्रियाणि चित्तं च येन अथवा प्रत्याहरणमस्त्यस्मिन् इति। इत्थं योगदर्शने प्रथमं प्रयुक्तोऽयं शब्दः पश्चाच्चान्यशास्त्रेष्विव व्याकरणेऽपि प्रयुक्त इति तर्क्यते।

योगस्याष्टौ अङ्गानि सन्ति। इमान्यष्टौ ते उपाया सन्ति यैरात्मनः शरीरे मनसि च पूर्णोऽधिकारः प्रतिष्ठापितो भवति।

इमान्यङ्गानि सन्ति यमनियमासनप्रणायामप्रत्याहारधारणाध्यानसमाधयः[5]। एषु प्रत्याहारः पञ्चमं स्थानं लभते। अष्टाङ्गयोगे प्रोच्यते—'चित्तेन्द्रियादेर्विषयेभ्यो निवारणं प्रत्याहारः'। पातञ्जलयोगसूत्रस्य साधनपादस्य

---

१. वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम्। प्रत्याहारो वृत्यर्थः नवा० महाभाष्य आ० १ पृ० ६५ कृञइति नेदं वर्णग्रहणं किंतर्हि-प्रत्याहारग्रहणम् कृच्वा० सू० म० भा० ३।१।४०।

२. 'अर्शआदिभ्योऽच् पा० ५।२।११७ चा० ४।२।१४७।

३. पा० ७।२।१०२ चा० ५।४।६८।

४. पा० १।१।७१ चा० १।१।१।
अधिकरणव्युत्पत्याऽर्शाद्यचा वा सिद्धयति प्रत्याहारशब्द इति उद्योते (पृ० ६५) नागेशः।

५. पातञ्जलयोगदर्शनम् साधनपादे सू० सं० १२९।

५४ तमे सूत्रे दृश्यते—' स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुसार इवेन्द्रियाणां प्रत्याहारः। प्राणायामस्याभ्यासेन सर्वासां बाह्यवृत्तीनामन्तर्मुखीकरणपूर्वको मनसि विलीनीकरणस्याभ्यास एव प्रत्याहारः। इत्थं तत्रेन्द्रियोपरि चित्त-विजयस्थापनोपाय एव प्रत्याहारो मतः। अलं प्रसक्तानुप्रसक्तविस्तरेण । अयमस्य निष्कर्षः—यथा योगदर्शने बहिर्मुखवृत्तीनामिन्द्रियाणां विषयव्यावर्तनपुरस्सरमन्तर्मुखीकरणप्रक्रियाप्रत्याहार उच्यते तत्र च यथेन्द्रियप्रत्याहरणमर्थो गृहीतस्तथैव व्याकरणेऽपि वर्णसंक्षिप्तीकरणमेतस्य कार्यमस्ति । अथ चात्र वर्णानां संयमननियमने तु भवत एव ततोऽप्यधिकं कार्यमिह प्रत्याहरणं भवति; अतएवात्र शास्त्रे अणादयः प्रत्याहारा उच्यन्ते ।

भरतस्य नाट्य[1]शास्त्रेऽपि प्रत्याहारशब्दः प्रयुक्त उपलभ्यते । तत्र पूर्वरङ्गानां 'बहुष्वङ्गेषु एकः प्रत्याहारोऽपि परिगणितः । तत्र तस्यार्थोऽस्ति कुतुपानामर्थात् वाद्ययन्त्राणां परिष्करण-संस्कार-सुसज्जीकरणपुरस्सरं क्रमशः नियम-विशेष-पालनपूर्वकं स्थापनम् । परवर्तिभिरलंकारशास्त्रिभिः पूर्वरङ्गस्थानेकेषामङ्गानामिव प्रत्याहारस्याप्यनिवार्य-कर्तव्यतामस्वीकृत्य केवलं नान्द्येव कर्तव्यकोटौ परिगणिता[2] । भरतस्य नाट्यशास्त्रे प्रयुक्तप्रत्याहारपदार्थस्य सूक्ष्मतो-ऽध्ययने विहिते तत्रापि प्रत्याहारपदार्थस्तादृश एव स्वीकृतो दृश्यते, यादृशः किल व्याकरणे अतो ज्ञायते योगादृगृहीतोऽयं शब्द उभयत्रसमानेऽर्थे प्रयुक्तोऽभूत् । नाट्यशास्त्रे वाद्यानां सक्रमविन्यास एव प्रत्याहारपदार्थः; व्याकरणस्य प्रत्याहारे-ऽपि वर्णानां क्रमपूर्णविन्यासो भवति । अतोऽद्य कथनमतिकठिनं यदयं प्रत्याहारशब्दः कदा कं कं सम्प्रदायमङ्गीचकार कस्य कस्य च तीर्थस्योदकेन स्नातः ।

इमं विवस्वते योगमित्यादिगीतावाक्येन योगदर्शनस्यातिप्राचीनत्वं प्रतिपादितम् । पातञ्जलयोगदर्शनन्तु तदधिकृत्य रचितमर्वाचीनम् । तथाचात्र प्रत्याहारशब्दस्य योगदर्शने प्रथमप्रयोगोक्तिर्न विरुद्धचतेऽस्य गीतागीतयोग-दर्शनस्यातिप्राचीनत्वात् तस्यैव च मम तात्पर्यवियत्वात् ।

'अइउण्' इत्यादि चतुर्दशसूत्राणां सामूहिकं नाम[3] अक्षरसमाम्नायः वर्णसमाम्नायो वोपलभ्यते । 'अस्या चतुर्दशसूत्र्याः कर्ता कः' एतस्य प्रश्नस्योत्तरविषयेऽपि विदुषां नैकमत्यम् । नन्दिकेश्वरादारभ्य नागेशान्ता वैयाकरणा इमां चतुर्दशसूत्रीं माहेश्वरीं मन्यन्ते । ते विश्वसन्ति-यदेषामुपलब्धिः पाणिनेर्महादेवाज्जाता । सनकादिसिद्धानां तपोभिः प्रसन्नो भूत्वा भगवान् शंकरो नटराजः नृत्तावसाने ढक्कां चतुर्दशकृत्वो नादयामास । तत एवाभिव्यक्तानी-मान्युपलब्धानि पाणिनिना । सनकादिसिद्धाः मुक्तेरुद्धारस्य वा कामनया तपस्यन्तआसन् । अतस्तस्मात् कल्पवृक्ष-स्वरुपाद् ढक्कानिनादात्तैर्मुक्तिरवाप्ता यतो ह्यत्र 'अइउण्' इत्यत्र अः 'परमात्मा', इम् मायाम् आश्रित्य, उः व्यापकोऽण् आसीत् 'इति व्याख्यानुसारेण नन्दिकेश्वरेण ब्रह्मपरकार्थाभिव्यक्तिरपि स्वीकृता । पाणिनिः व्याकरणं निर्मातुकाम-स्ततोऽव्यक्तनादात् अक्षरसमवायात्मकानि चतुर्दशसूत्राणि अवगतवान् । एतत्सर्वं प्रकटीकुर्वता नन्दिकेश्वरेण स्वग्रन्थे काशिकायां प्रोक्तम्:—

नृत्तावसाने नटराजराजो ननाद ढक्कां नव पञ्चवारम्
उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम् ।

---

१. प्रत्याहारोऽवतरणं तथाह्यारम्भ एव च—भरतनाट्यशास्त्रस्य ५ अ० श्लोक ६ ।

२. प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि तथाप्यवश्यं वक्तव्या नान्दी विघ्नोपशान्तये—(हरिदासीय साहित्यदर्पणषष्ठपरिच्छेदकारिका १०) ।

३. अइउण् सूत्र नवा० महाभाष्य आ० २ पृ० ७५—भवत्याक्षरसमाम्नायिकेन धात्वादिरुपस्य ग्रहणम्—१।१।१ सूत्रेऽपि पृ० १३५ आदेचोऽप्यक्षरसमाम्नाय उपदिष्टाः ।

भट्टोजिदीक्षितेन सिद्धान्तकोमुद्यामिमानि सूत्राणि लिखित्वा कथितम्—' इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि[1] । नागेशेन शब्देन्दु—[2] शेखरे "इकानि सूत्राणि साक्षाच्छ्रुतिः । अतएवैतत्कृते समाम्नायशब्दः प्रयुक्तः । आम्नायसमाम्नायशब्दौ वेदापरपर्यायौ । अतः श्रुतिवदिमानि सूत्राण्यपि श्रुतिपरम्परयैव पूर्वपूर्वेभ्यो यथोत्तरं मुनिभिरुपलब्धानि । महेश्वरादागतान्यत इमानि माहेश्वराण्युच्यन्ते । तत आगत इत्यण् प्रत्ययः । महेश्वरादागतानीत्यस्यापि महेश्वरप्रसादलब्धानीत्यर्थः । एवंचैवमानुपूर्विका श्रुतिरेवैषेत्युक्तम् । तेन स्वकथनं प्रमाणयितुं पाणिनीयशिक्षायाः ५७ तमः श्लोकः—

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः इत्युद्धृतः । इत्थम् अइउण् इत्यादि सूत्रगतानुपूर्वी न पाणिनीयकृतिः न वा माहेश्वरं निर्माणम् । केवलमनुबन्धाऽणादयो महेश्वरेण निबद्धाः । अतः नन्दिकेश्वरेण काशिकायामलेखिः—

अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम्
घात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये इति ।

यद्यप्यत्र कारिकायां 'समुपादिष्टम्' इत्यस्य कर्तुरुल्लेखो नास्ति । तथापि आक्षेपादुपदेशकर्ता महेश्वर एवानुबन्धानां कर्ता योजयिता चात्रेति स्वीकरणीयम् । महाभाष्यस्य पस्पशाह्निके पतञ्जलिनाऽपि लिखितम् अनुबन्धकरणार्थश्च वर्णानामुपदेशः अनेनानुबन्धानां सादित्वमन्यानुपूर्व्या अनादित्वं च सिद्धम् । तत्करणं च (अनुबन्धकरणं च) उपदेशकर्तृकर्तृकमेव प्रत्यासत्तेः । अक्षरसमाम्नायस्यानुबन्धेतराक्षरानुपूर्वी अनादिरनुबन्धाश्च महेश्वरकृताः । सूत्राणीमानि ब्रह्मोपदेशसक्षमत्वादेव सनकादीनामुद्धारकाणि सम्भवन्ति । ब्रह्मोपदेशपरकत्वे स्वीकृते समेषामेतेषामक्षरसमाम्नायत्वमर्थाद् वेदत्वं स्वतः सिद्धं जायते, इदमपि नागेशो मन्यते । यतस्तन्मतेन ब्रह्मोपदेशक्षमता श्रुतावेवास्ति; अतस्तेन लिख्यते—तच्च श्रुतित्वाभावे न संगच्छते 'श्रोतव्यः श्रुतिवाक्येभ्य' इत्युक्तेः । तेन स्वमतपुष्टये इतस्ततः संगृहीतानां कतिपयानां वाक्यानां यथेच्छं व्याख्यापि कृता—यथा ऋक्तन्त्रव्याकरणे शाकटायनस्य' इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽचार्या ऊचुः । 'ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्य, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशि' रिति वाक्ये ब्रह्मराशिपदस्य नागेशेन ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः कृतः । नागेशस्य विचारानुसारेण 'वृत्तिसमवायार्थो वर्णानामुपदेशः' इति महाभाष्यस्यापि 'पाणिनेर्लाघवेन शास्त्रप्रवृत्तिफलको यः समवायो वर्णानां क्रमेण सन्निवेशस्तदर्थ इति तात्पर्यमस्ति पाणिनिसूत्रेषु लाघवमाधातुं क्रमसन्निविष्टवर्णानामुपदेशः कृतः । अनेन ज्ञायते यदयमुपदेशः पाणिनीतरकर्तृकः । यथा मन्त्रोपदेशशब्दप्रयोगं श्रुत्वाऽवगम्यते यन्मन्त्रस्त्वनादिः, केवलं दीक्षादातुः सकाशात्स शिष्यैरवाप्यते । केवलं शिष्यकर्णकुहरप्रवेशमाध्यमत्वाद् गुरुः दीक्षादाता मन्त्रोपदेशकश्चोच्यते; तथैव महेश्वरः प्राप्तिमाध्यमत्वादेषां सूत्राणामुपदेशकत्वेन संमतः । अतः भाष्ये यत्र यत्र महेश्वरसूत्राणां संदर्भे उपदेशशब्दप्रयोगो दृश्यते, तत्र सर्वत्र मन्त्रोपदेशशब्दप्रयुक्तोपदेशशब्दवत्तस्यार्थो ऽवगन्तव्यः न तूपदेशआद्योच्चारणमिति । अक्षरसमाम्नायस्यास्य पारायणे समस्तवेदानां पारायणस्य फलं भवति । नागेशेनेदमपि मन्यते यत्" व्याकरणसन्दर्भे 'वेदानां वेदः' इति प्रोच्य छन्दोगश्रुतिर्यद्

---

१. पृ० १ ।
२. पृ० ६ सदीपक ल० शे० ।

व्याकरणं प्रशंसति तद्व्याकरणमप्यक्षरसमाम्नायमूलकं पाणिनीयव्याकरणमेवास्ति[1]। श्रुतिमूलकत्वात् पाणिनीयव्याकरणमेव वेदाङ्गं नान्यत्[2]। एतेषु सूत्रेषु श्रुतित्वे नागेशाभिमते स्वीकृते पतञ्जलिना सूत्राक्षराणां प्रयोजनजिज्ञासानिष्प्रयोजनमिति कृत्वा सूत्राक्षराणां कृतं प्रत्याख्यानमशोभनमिव प्रतीयते। एतस्य प्रश्नस्य समाधानाय नागेशेन स्वतीव्रप्रतिभयाऽदृष्टफलस्य कल्पनां कृत्वा भाष्यकृतप्रत्याख्यानवाक्यस्य तात्पर्यमित्थं प्रास्तौत्—अमङ्णनम्' 'इत्यत्र मकारप्रत्याख्यानपरं भाष्यन्तु किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं विचारपरम्। सर्वत्र प्रत्याख्यानमेवं परमेव। नागेशेन तर्क्यते, यदस्मिन् शास्त्रे किंचिद्दृष्टप्रयोजनमस्ति, किंचिच्चादृष्टप्रयोजनम्, किंचिच्च दृष्टादृष्टोभयप्रयोजनकम्। सर्वथा निष्प्रयोजनमनर्थकन्तु किमपि नास्ति। अतएव इकोयणचि सूत्रे महाभाष्यकारः—'सामर्थ्यद्योगान्नहि किंचिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्'।

'लण्' सूत्रे महाभाष्ये यत्र 'आचार्यप्रवृत्ति र्ज्ञापयतीति लिखितं दृश्यते तत्राचार्यपदेन महेश्वरो ग्राह्यः यतोऽनुबन्धाः महेश्वरकृताः।

अक्षरसमाम्नायस्य श्रुतित्वप्रतिपादनमनेन भाष्योद्धरणेनाऽपि क्रियते भट्ट नागेशेन—सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः[3] इति। उद्धरणमिदं व्याकुर्वता भर्तृहरिणाप्युक्तम् यथैवेदमव्युच्छिन्नं चन्द्रतारकादि एवमाक्षरसमाम्नायस्य न कश्चिदाधुनिकः कर्तास्ति। एवमेव वेदपारम्पर्येण स्मर्यमाण इति। अत्रापि नागेशेन 'आधुनिकः कर्ता इत्यस्य शरीरीत्यर्थः कृतः। तन्मतेनाक्षरसमाम्नायः पुष्पितः फलित इत्यस्य तात्पर्यमस्ति शब्दशास्त्रस्य निर्माणद्वारा विकासावाप्तिः शब्दप्रयोगरूपफलावाप्तिश्च।

इत्थं नन्दिकेश्वरादारभ्य नागेशपर्यन्तवैयाकरणानां मतानुसारेण सिद्धं भवति—यत

(१) इमानि चतुर्दशसूत्राणि अनादीनि

(२) इमानि श्रुतिः; अतएव अक्षरसमाम्नाय इत्युच्यते

(३) एषामन्तिमवर्णानां कर्ता शिव इति

आधुनिका विद्वांस इमानि सूत्राणि पाणिनिकृतानि मन्यन्ते। पाणिनिना सूत्रनिर्माणस्यावश्यकताविशेषं ध्यायं ध्यायमक्षराण्येवं क्रमविशेषविन्यस्तानि कृतानि। अतः एषानुपूर्वी पाणिनिकृता। अनुबन्धा अपि तन्निबद्धा एव। पाणिनिना शिवादिमानि न प्राप्तानि। एषां सूत्राणां शिवसूत्रत्वं महेश्वरसूत्रत्वमितीदृशः विचारो नातिप्राचीनः। विचारोऽयं न कात्यायनस्य, न वा पतञ्जले र्न वा भर्तृहरेरवगत इव प्रतिभाति। भट्टनागेशेन पतञ्जले र्भर्तृहरेश्चोद्धरणस्य कष्टकल्पनया निरङ्कुशवाक्याध्याहारैः स्वमतपरकत्वसाधनाय यथाशक्ति प्रयतितम्; परन्तु तत्थ्यन्त्विदमस्ति यत् पतञ्जलेः प्रसादशैल्यामेतादृशकष्टकल्पनाया अवसर एवादत्तप्रसरोऽस्ति। किंच कृतज्ञताज्ञायने परांकाष्टांगतेन येन पाणिनिना स्वसूत्रेषु पूजार्थपरका विभाषासूचकाश्च दश वैयाकरणा भारद्वाजादयः स्मृतास्तेन किं व्याकरणमूलभूतस्य महेश्वरस्य शिवस्य वा केनापि व्याजेन क्वापि स्मरणं कृत्वा तं प्रति कृतज्ञता न ज्ञाप्येत ? इति महच्चित्रम्।

अत एषां सूत्राणां श्रुतित्वसम्पादनप्रयासोऽत्यन्तापरकालिकः। अक्षरसमाम्नायस्य पाणिनिकर्तृत्वे बहुषु बाह्यसाक्ष्येषु कानिचिदिह प्रस्तूयन्ते :—

(क) व्याख्यानाच्च द्विरुक्तिः इति वार्तिकं व्याचक्षाणेन पतञ्जलिना लिख्यते 'एतच्च ज्ञापयत्याचार्यो

---

१. ल० शे० अइउण्सूत्रे।

२. पाणिनेःपूर्वं वेदानां षड्ङ्गत्वाभावापत्तेरिलिखित्वेदं तत्रैव टिप्पण्यां खण्डितम्।

३. (महाभाष्यस्याह्निके द्वितीये अन्तिमवाक्यम्।

भवत्येषा परिभाषा व्याख्यानतो विशेषप्रतिपत्ति र्नहि सन्देहादलक्षणम् । अत्राचार्यपदेन पाणिनिरेव शक्यते ग्रहीतुम् । महाभाष्ये सर्वत्राचार्यपदस्य सम्मानसूचकस्य पाणिनिकात्यायनयोः प्रतिपादनायैव पतञ्जलिना प्रयोगकरणात् । कात्यायनार्थं चेदं नात्रप्रयुक्तमिति परिशेषात्, आचार्यप्रवृत्तिरित्यस्य पाणिनिप्रवृत्तिरित्यर्थकरणस्यैवौचित्यात् ।

(ख) पस्पशाह्निकस्यान्ते कात्यायनस्य वृत्तिसमवायार्थ उपदेशः तथानुबन्धकरणार्थश्चेति वार्तिकद्वयस्य 'का पुनर्वृत्तिः शास्त्रप्रवृत्तिः समवायो वर्णानामानुपूर्व्येण सन्निवेशः' तदर्थः अनुबन्धकरणार्थश्च वर्णानामुपदेशः, अनुबन्धानासंख्यामीति वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थमिति महाभाष्यसन्दर्भस्यानुसारेण सिद्धयति यत् अक्षरसमाम्नायस्योद्देश्यमस्ति प्रत्याहारसिद्धिः, प्रत्याहारस्य चोपयोगो लाघवेन सूत्ररचना वर्तते । एतेनार्थोऽयं निर्गलति यत् पाणिनिना व्याकरणरचनायामिच्छाविषयीभूतायां सूत्रत्वं संक्षेपत्वं लाघव चानेतुं प्रत्याहारस्याश्रयोऽङ्गीकृतः, प्रत्याहारस्य च निष्पत्तये वर्णानां क्रमेण विन्यासविशेषः कृतः, तत्र चाभिमता अनुबन्धा अनुबद्धाः (पश्चाद् बद्धाः) । इत्थं कात्यायनपतञ्जलिमुनिद्वयविचारानुसारेण आनुपूर्वी अनुबन्धश्च पाणिनिकृतावेव ।

(ग) कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम् ? एतदनन्तरम् अक्षरसमाम्नायभाष्यं प्रारभ्यते । अतः पतञ्जलिविचारेण चतुर्दशसूत्री पाणिनिकृतेति सिद्धयति ।

(घ) भर्तृहरेरुद्धरणेन ज्ञायते 'यत्पाणिनेः प्रागयं समाम्नायः अर्थात् वर्णानामियमानुपूर्वी (क्रमपूर्वकसक्रमसन्निवेशः) नोपलभ्यते स्म । तेनेयं पाणिनीयस्वानुपूर्वीति निगदितम् । तेन लिखितम् 'न स्वेषां स्वरुपावधारणार्थ उपदेशः, किन्तु स्वानुपूर्व्यर्थः अनेनानुपूर्व्येण शास्त्रे किंचित्कुर्युः ।[1]

(ङ) प्रत्येकं प्रत्याहारसूत्रे काशिकाकारो लिखति (वस्तुतोनेदं मूलतः काशिकाकारस्य वाक्यम् अपितु चन्द्राचार्यस्य) इतं करोति प्रत्याहारार्थम् । इत्संज्ञासूत्रं पाणिनिकृतम् । सोऽन्तिमं वर्णमितं करोति अर्थात् एति गच्छतीति इत् इति व्युत्पत्या गमनशीलं विधाय प्रस्तौति । अनेनाक्षरसमास्नायस्य कर्तृत्वं पाणिनिं गच्छति ।

(च) वृद्धिसंज्ञासूत्रे पतञ्जलिर्लिखति 'कृतमनयोः साधुत्वम् ? कथम्, वृधिरस्मै अविशेषेणोपदिष्टः प्रकृतिपाठे तस्मात् क्तिन् प्रत्ययः । आदेचोऽप्यक्षरसमाम्नाये उपदिष्टा इति । अत्र 'कृतम्' 'उपदिष्टा' इत्यनयोः क्रिययोः प्रयोगः संकेतयति यत् वृधिधातोः क्तिन् प्रत्ययस्य "आतः ऐच्प्रत्याहारस्य चोपदेष्टा एक एव कश्चिद् वर्तत इति । स च पाणिनिरेव भवितुमर्हति यतः 'स्त्रियाम् क्तिन्' इति वृद्धिरादैजिति सूत्रं च सर्वे पाणिनीयं मन्यन्ते ।

(छ) हयवरट् सूत्रे 'एषा ह्याचार्यस्य शैली लक्ष्यते यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति—अचोऽक्षु हलो हल्सु इति महाभाष्यवाक्ये आचार्येति सम्मानितपदप्रयोगः पाणिनिमेवानुगच्छति न कात्यायनम् । महाभाष्ये च आचार्यपदं तदुभयोरेव कृते प्रयुक्तमिति विदुषां सम्मतिः । अतोऽक्षरसमाम्नायकर्ता पाणिनिरेव ।

(ज) ६८७ देशीये विक्रमसम्वति वर्तमानः स्कन्दस्वामी निरुक्तस्य (१।१) टीकायां प्रत्याहारसूत्राणि पाणिनीयानीति लिखति 'नापि अइउण् इति पाणिनीयप्रत्याहारसमाम्नायवत् इति ।[2]

(झ) प्रायः ११०० तमे विक्रमसम्वति वर्तमानः कुलशेखरवर्मा आश्चर्यमञ्जर्यां प्रत्याहारसूत्राणां पाणिनीयकर्तृत्वं संकेतयति—पाणिनीयप्रत्याहार इव महाप्राणझषाश्लिष्टः झषालकृतश्च ।[3]

---

१. पाणिनि कात्यायन एण्ड पतञ्जलिः पृ० ३३—के० माधवकृष्ण शर्मा ।

२. निरुक्तटीकां भागः १ पृ० ८ ।

३. सं० व्या० का इति० (मीमांसक) भा० १ पृ० २०५ ।

इत्थम् अक्षरसमाम्नायं पाणिनिकृतं मन्यमाना विद्वांसः स्वमतपुष्टये विविधानि प्रमाणानि अन्वैषयन् ।

इदं तु निश्चप्रचं यत् एषां सूत्राणां महेश्वरसूत्रत्वस्य शिवसूत्रत्वस्य च प्रतिपादनं नातिप्राचीनम् । अस्य विचारस्य शिलान्यासो नन्दिकेश्वरेण स्वकाशिकाग्रन्थे कृतः । सर्वप्रथमं वयं तत्रैव पठामः—नृत्तावसाने नटराज राजो ननाद—। पतञ्जलिभर्तृहर्यन्ता वैयाकरणा इमानि माहेश्वरसूत्राणि नोक्तवन्तः । अतः सिद्धचतीयमुद्भावना नन्दिकेश्वरस्यैवास्तीति । विचारपूर्वकं ससमीक्षं च नन्दिकेश्वरकृतकाशिकायास्तस्या उपमन्युकृतायाष्टीकायाः कश्मीरशैवागमेन सह तुलनात्मकेऽध्ययने कृते स्पष्टं प्रतीयते यदेषां शिष्टसूत्रत्वकल्पनायां शैवागमदर्शनस्यैव प्रभावः ।

शैवागमसूत्राणां साक्षात् शिवोपदिष्टत्वप्रतिपादनानन्तरं नन्दिकेश्वरेणेमानि सूत्राणि शिवकृतानीति साधितम् । शैवागमस्य शिवसूत्राणां सम्बन्धे कल्लटेन स्पन्दवृत्तौ प्रोच्यते यत् शिवसूत्राणामुपलब्धिर्भगवतः शङ्करादृ वसुगुप्तस्याऽभवत् ।

"लब्धं महादेवगिरौ महेशस्वप्नोपदिष्टाच्छिवसूत्रसिन्धोः ।
स्पन्दामृतं तद् वसुगुप्तपादैः श्री कल्लटस्तत्प्रकटीचकार"[1] ॥

वर्णानां रहस्यमयोत्पत्तेरुल्लेखः केषुचित्तन्त्रदर्शनग्रन्थेष्वपि तथैव प्राप्यते, यथा नन्दिकेश्वरकृतकाशिकायामुपलभ्यते । नन्दिकेश्वर उपमन्युश्चोभावपि कश्मीरे तस्मिन् युगे वर्तमानाआस्ताम्, यः किलाद्वैतशैवागमाय स्वर्णयुगत्वेन विख्यातोऽस्ति यत्र च शैवागमस्य स्वरः सर्वत्राश्रूयत ।

काशिकाया एकस्मिन् श्लोके नन्दिकेश्वरेण शक्तितत्त्वमपि व्याख्यातम् । इदं शक्तितत्त्वमपि तेनाद्वैतशैवागमसम्बद्धं तदीयविचारणीयप्रधानतत्वेषु प्रधानतमं च वर्णितम् । 'अइउण्' सूत्रं ब्रह्मतच्छक्तिस्वरूपं वर्णयता नन्दिकेश्वरेणोच्यते:—

"अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु ।
चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः ॥

नन्दिकेश्वरकृतकाशिकाया व्याख्याताऽभिमन्युः स्पष्टं लिखति स्वव्याख्यायाः प्रारम्भेः—

नमः शिवाय देवाय सर्वज्ञाय परात्मने
यस्योन्मेषनिमेषाभ्यां व्यक्ताव्यक्तमिदं जगत्
गुरुं शिवं कुमारं च शिवतत्वविशारदम्
प्रणम्य नन्दिकेशादीन् शिवभक्तान् मुहुर्मुहुः ।[2]

ग्रन्थस्य समाप्तौ च वदति-हकारः शिववर्णः स्यादिति शैवागमस्थितिः इति ।

अनेन सन्दर्भेण स्पष्टमवगम्यते यत् शैवागमस्थित्या तादात्म्यसम्पादनस्य महतो यत्नस्य फलस्वरूपाणीमानि सूत्राणि शिवसम्बद्धतामवापुः । उपमन्योरियं टीका विमर्शिनीत्युच्यते, कश्मीरशैवागममधिकृत्य लिखिता टीकाऽपि विमर्शिनी निगद्यते । इदं नामसाम्यमपि प्रमाणयति यदेषां सूत्राणां शिवतत्त्वीयव्याख्यायाम् एषां शिवसूत्रत्वस्वीकृतिप्रयासे च नन्दिकेश्वर एव मूलम् । तथा कर्तुं च तेन प्रेरणा, स्वसमयात् शैवागमस्य कृते स्वर्णयुगत्वेन विख्याताद् यदि गृहीता, तर्हि नात्र किमपि चित्रम् ।

---

१. के० एम० के० शर्मा—पा० का० पत० पृ० ३४ ।
२. श्री एम० के० शर्मा—पा० का० पत० ३५ ।

नैतावदेव, अपि तु काश्मीरशैवागमदर्शने व्याकरणदर्शने च साम्प्रतं यस्याः पराख्याया वाचोऽतीव महत्वं दीयते साऽपि पारस्परिकादानप्रदानपरिणामः। परा वाक् केन कस्मादधमर्णीकृतेति विषयान्तरचर्चाया नात्रावसरः। मया तु चर्चयाऽनयैतावदेव साधयितुमीह्यते यत् पारस्परिकमादानप्रदानं न केवलं सामाजिकक्षेत्रे एव सततं चलति किन्तु विद्याक्षेत्रेऽपि तन्निर्बाधं सक्रियं तिष्ठति। अतः शास्त्रेण दर्शनेन च मिथ एकेनान्यस्मात्प्रचुरं स्वं गृहीतम्। अत्रादानप्रदानपरम्परायां कमपि दर्शनविशेषं विचारविशेषं वा प्रति पक्षपातविशेषः विश्वासः श्रद्धा वा विद्वांसं यदा प्रेरयति स्म, तदा तेन विदुषा प्रतिभावता स्वपक्षस्य पुष्ट्यै कृतभगीरथप्रयत्नेन प्रमाणान्यप्युपन्यस्तानीति नाविदितं शास्त्रज्ञानां भवादृशाम्। एतादृशस्यैव प्रयासस्य परिणामोऽयं यत् यानि सूत्राणि केवलप्रत्याहारसूत्राण्यासन्, तानि श्रुतिरूपत्वेन विख्यापितानि, तेषां शिवसूत्रत्वं वेदानां वेदत्वं च निष्पादितम्।

एषां सूत्राणां मूलं नाम प्रत्याहारसूत्रमिति प्राचीनाष्टाध्यायीहस्तलेखे प्राप्यते। कात्यायनस्य 'प्रत्याहारेऽनुबन्धानां कथमज् ग्रहणेषु ने'ति वाक्येऽपि प्रत्याहारनामोपलभ्यते। शाब्दिकचिन्तामणौ हरदत्तः "प्रत्याहारोऽत्राक्षरसमाम्नायः इत्याह। अत्र 'समाम्नाय' शब्दे न समुपसर्गः किन्तु समानार्थकः समशब्दः तेनैषां सूत्राणामाम्नायसमानत्वं ध्वन्यते। आनुपूर्व्या उभयत्र वेदे एषु सूत्रेषु च महत्वस्वीकारात् एषां तावन्मात्रेणाम्नायसमानत्वं स्वीक्रियते चेत् स्वीक्रियताम्, सर्वतोभावेन वेदत्वाङ्गीकारस्तु निर्युक्तिक एव।

आधुनिका वैयाकरणा एषां सूत्राणामन्ते लिखन्ति—इति माहेश्वराणि सूत्राणि इति। पाणिनीयशिक्षायास्तृतीये श्लोके पठ्यते 'त्रिषष्टिश्च चतुष्यष्टिः वर्णाः शम्भुमते मताः'। कतिपयेषु पुस्तकेषु अत्रापि पाठ उपलभ्यते त्रिषष्टिश्च चतुष्षष्टिः वर्णाः सम्भवतो मताः। एतेन स्पष्टं यत् पाठपरिवर्तनद्वारमाश्रित्यापि एषां शम्भुकृतत्वसाधने संकोचो नाश्रितः।

प्रत्याहाराह्निकान्ते भर्तृहरिः केवलमेतावद् भणति 'एवमस्य वाग्व्यवहारस्य न कश्चित्कर्तास्तीति। तेनात्राक्षरसमाम्नायस्य चर्चा न कृता। परन्तु नागेशेन तस्य प्रतीकमादाय लिखितम्—हरिणास्याक्षरसमाम्नायस्य वाग्व्यवहारजनकस्य न कश्चित्कर्तास्ति इति मन्यत इति। एवमिदं स्पष्टं प्रतीयते परवर्तिवैयाकरणैः एषां सूत्राणां शिवसूत्रत्वसिद्धये बहवः प्रयासा विहिता स्तत्र च पतञ्जले रुद्धरणानि कष्टकल्पनया व्याख्याय प्रस्तुतानि।

केचिदीदृशा अपि वैयाकरणाः सन्ति ये पाणिनीयात् पूर्वं कस्यापि माहेश्वरव्याकरणस्य कल्पनां कुर्वन्ति तथेमानि सूत्राणि तत एव प्राप्तानीति वदन्ति। स्वमतं प्रमाणितं कर्तुम् धनञ्जयस्य श्लोकमेकमुद्धरन्ति, येन तस्य व्याकरणस्य समुद्रवत् विशालता तत्समक्षं पाणिनीयस्य व्याकरणस्य गोष्पदवल्लघुताऽपि प्रदर्श्यते।

यान्युज्जहार माहेशात् व्यासो व्याकरणार्णवात्
पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे।

परे तु पूर्वोक्तश्लोके माहेशादित्यस्य स्थाने माहेन्द्रादिति पाठं विलोक्यैन्द्रं व्याकरणं समुद्रवद् विशालं तत्तुलनायां पाणिनीयं गोष्पदवत्तुच्छं स्वीकुर्वन्ति।

इत्थं चिरकालात् चतुर्दशसूत्राणां कर्तृविषये मतवैविध्यं वैयाकरणानां कृते समस्या वर्तते।

दिष्ट्या बौद्धवैयाकरणकृतीनामध्ययनादनन्तरं प्रत्याहारसूत्रस्य कर्तुस्तस्यारम्भस्य च विषये बद्धमूलानां भ्रान्तीनां निराकरणं जातम्। सर्वे बौद्धा वैयाकरणा इमानि सूत्राणि प्रत्याहारसूत्रमात्रं मन्यन्ते; न तु शिवसूत्रं महेश्वरसूत्रम्वा। काशिकाकारेण जयादित्येन 'अथ शब्दानुशासनमितीदम् अष्टाध्याय्या प्रथमसूत्रं मत्वा अइउणित्यादि सूत्राणि ततः परत्वेनोल्लिखितानि।[1] अनेन सिद्धचति 'तेषां कर्ता स्मर्ता वा न महेश्वरः। रुपावतारस्य बौद्धो

१. काशिका भाग—१ पृ० ७।

लेखको वैयाकरणो [1]धर्मकीर्तिरपि इमानि प्रत्याहारसूत्राण्याह। अत एतानि शिवात् महेश्वराद्वा प्राप्तानीति मतं भ्रान्तं निरस्तं भवति।

चन्द्रगोमिना तु स्पष्टं स्वोणादिवृत्तावाख्यातम् प्रत्याहासूत्राणामुपसंहारं कुर्वता—प्रत्याहारास्तु पाणिनेः पूर्ववर्तिनामाचार्याणां व्याकरणेष्वपि दृश्यन्ते। किन्तूपलब्धेषु व्याकरणान्तरप्रत्याहारेषु पाणिनीयप्रत्याहारेषु चानुबन्धकृतं किमपि पार्थक्यं दृष्टं भवति। चान्द्रव्याकरणवृत्तौ फिट्सूत्राणि प्रमाणत्वेनोपन्यस्य प्रोक्तम् शान्तनवाचार्येण स्वसूत्रेषु स्वरवर्णानामवबोधाय अष् प्रत्याहारः प्रयुक्तः। चन्द्रगोमिना स्पष्टमुक्तं यत् यत्र शान्तनवतन्त्रे 'ऐऔष्' इति सूत्रमासीत् तत्र पाणिनिना ऐऔच् इति कृतम्। लघावन्ते द्वयोश्च बह्वषो गुरुः (२।१९) तृणधान्यानां द्व्यषामि २।४ इत्यनयो रष् प्रत्याहारः अच् स्थाने विलोक्यत एव। चान्द्रवृत्तावेतावन्तं संकेतं प्राप्य गवेषणादृष्ट्या फिट्सूत्रेष्वधीतेषु अन्येऽपि प्रत्याहारा स्तत्रोपलब्धाः ते सन्ति हय् इक् हस् प्रत्याहाराः 'हयादीनामसंयुक्तलान्तायामन्तः (२।२५) इगन्तानां द्व्यषाम् (२।२६) ईषान्तान्तस्य हसादि र्वा (३।३५) इत्यादौ क्रमशस्ते दृश्यन्ते। आपिशलिना अम् प्रत्याहारं निर्माय अमन्ताड्डः (१।१०७) इत्युणादि सूत्रं रचितम्। उणादि सूत्रेअमन्ताड्ड इत्यत्र अम् प्रत्याहारप्रयोगः सूचयति तत्सूत्रकारस्य 'अमङ्णनम्' इति सूत्रपरिज्ञानम्। उणादिसूत्राणाम् 'उणादयो बहुलम्' १।३।१ इति पाणिनिसूत्रेण स्वीकृतिरुणादेः पाणिनिपूर्ववर्त्तित्वस्य प्रबलं प्रमाणम्। पञ्चपाद्या उणादेर्युधिष्ठिरमीमासकेन पाणिनिसूत्रपूर्ववर्तित्वमापिशलीयरचनात्वञ्चस्वीकृते[2]। आपिशलेः 'वा सुप्यापिशलेः पा० ६।१।९२ इति पाणिनिसूत्रे नामग्रहणात् पाणिनिपूर्ववर्तित्वं सर्वैः स्वीकृतमेव। आपिशलेर्यत्र तत्रोपलब्धेषूद्धरणेष्वपि प्रत्याहारा उपलभ्यन्ते।

भाषावृत्तेः व्याख्याता सृष्टिधराचार्योऽप्यापिशलेः[2] श्लोकमुद्धरन् तस्य प्रथमे चरणे भष् प्रत्याहारमुल्लिलेख। 'तथाचापिशलिः[3]-दन्त्योष्टत्वाद् वकारस्य वह् व्यध् वृधां न भष् इति।

उणादिसूत्रस्य वृत्तिकारेणोज्ज्वलदत्तेन आपिशलीयव्याकरणे ऐच् प्रत्याहारस्य सद्भावं निदर्शयतोक्तम्-आपिशलिस्तु 'न्यङ्को नैंज् भावं शास्ति इति। पाणिनिना स्वपूर्ववर्तिन आपिशलव्याकरणाद् प्रचुरमवगतं गृहीतं च। पदमञ्जर्यां हरदत्तो लिखति-कथं पुनरिदमाचार्येण पाणिनिनावगतमेते साधव इति ? आपिशलेन पूर्वव्याकरणेनेति।

इत्थं निश्चप्रचं यत् प्रत्याहारः चतुर्दशसूत्री च न पाणिनिनोद्भावितौ। अनयो रादिकर्ता न पाणिनि र्नवा इमौ शैवौ माहेश्वरौ वा। कतिपयानामनुबन्धानां संयोजयिता पाणिनि र्भवितुमर्हति। एतस्य तत्थ्यस्य प्रकाशक आचार्यचन्द्रगोमी वर्तते। तेन चतुर्दशसूत्रेषु आदिमानां वर्णानामानुपूर्व्याश्च पूर्वाचार्यकर्तृत्वं केषांचिदनुबन्धानां च पाणिनि कर्तृत्वं स्वीकृतम्। अतएव तेनैतत्सूत्रसन्दर्भे सर्वत्र प्रोच्यते' अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम् इति। जयादित्यस्य काशिकायां यदीदृशं वाक्यं दृश्यते तच्चान्द्रव्याकरणस्यानुकरणम्। न तु जयादित्यस्य मूलतस्तद्वाक्यम् यथा किल श्री के० एम० के० शर्मणालिखितम्[4]।

चन्द्राचार्येण चतुर्दशसूत्राणां स्थाने त्रयोदश सूत्राणि कृतानि। हयवरट् लण् इत्युभे सूत्रे एकत्रीकृत्य हयवरलण् इतीह कृतम्। एतेन स्पष्टं यत् चन्द्राचार्यस्य विचारे नात्र शिवसूत्रत्वं न वा श्रुतित्वं नाथवैषु ब्रह्मप्रतिपादकत्वं न वा सनकाद्युद्धारकशक्तित्वमभ्युपगतम्। तेनात्र प्रत्याहारसम्पादनातिरिक्तं किमपि प्रयोजनं नाङ्गीकृतम्।

---

१. रूपावतार भाग—१ पृ० १।
२. सं० व्याक० शा० इतिहास भाग—२ पृ० १७७।
३. पदमंजरी भाग-१ पृ० ६ सं० व्या० का इति० पृ० १४२ भाग १।
४. पा० का० प० (पृ० ३३)।

चन्द्राचार्यस्य वृत्तौ[1] 'एष प्रत्याहारः पूर्वव्याकरणेष्वपि स्थित एव। अयं तु विशेषः ऐऔष् इति यदासीत् तद् ऐऔजिति कृतम् तथाहि 'लघायन्ते द्वयोश्च बह्वषो गुरुः (फिट् सू० २।१६) तृणधान्यानां च द्व्यषाम् (फिट् सूत्र (२।४) इत्युद्धरणे पूर्वव्याकरणेष्वित्यत्र बहुवचनप्रयोगः ध्यानदानयोग्यः। एतेन प्रतीयते यत् फिट्व्याकरणातिरिक्त व्याकरणेष्वपि प्रत्याहारस्य सत्ताऽऽसीत्। आपिशलिशिक्षासूत्रेष्वन्यतमं सूत्रमस्ति अमङणनाः स्वस्थानां नासिका-स्थानाः १।१६। अत्र प्रसिद्धवर्णवर्णक्रमं परित्यज्य प्रत्याहारसूत्रनिर्दिष्टक्रमग्रहणं साधयति स्थालीपुलाकन्यायेन, यत् आपिशलेरपि प्रत्याहारस्य परिज्ञानमासीत्।

फिट् सूत्राणि केचित् पाणिनीयव्याकरणानन्तरवर्तीनि मन्यन्ते प्रस्तुवन्ति च भट्टोजिदीक्षितस्य टीका-वाक्यमेक प्रमाणम्; परन्तु चन्द्रगोमिनो व्याकरणस्य प्रकाशे विलसते फिट्सूत्रं पाणिनीयाष्टाध्यायीपरवर्तिरचनां स्वीकर्तुं को भ्राम्येत्! चन्द्राचार्येण एष प्रत्याहारः पूर्वव्याकरणेष्वपि स्थित एवेति लिखित्वा फिट्सूत्राणामुदा-हरणान्युन्यस्तानि। एतेन फिट्सूत्रस्य पाणिनीयव्याकरणपूर्ववर्तित्वं स्फुटमेव।

नैतावदेव पाणिनीयानि बहूनि सूत्राणि फिट्सूत्राण्युजीव्यैव जीवन्ति; तथाहि—'वर्णादनुदात्तात्तोपधातो नः (पा० ४।१।३९) इति पाणिनीयस्य सूत्रस्यार्थोऽस्ति वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात् प्रातिपादिकात् वा ङीप् तकारस्य नकारादेशश्चेति तेन एनी एतेत्यादि सिद्धयति। पाणिनेरस्य सूत्रस्य प्रवृत्यै यानुदात्तान्ततोऽपेक्ष्यते तस्यानुदात्तस्येह विधानं पाणिनिना न कृतम्। तस्य विधानन्तु फिट्सूत्रेण वर्णानां 'तृणतिनितान्तानाम् ३।१३ इत्यनेन भवति। पाणिनिना फिट्सूत्राणि सन्त्येवेति कृत्वा तद्विधानं न कृतम्। सूत्रमिदम् 'एनी' 'एता' इत्यत्र विकल्पेन ङीब्नकारौ विदधाति, परन्तु श्वेता इत्यत्र वर्णवाचित्वे तान्तत्वे च सत्यपि सूत्रमिदं न प्रवर्तते, घृतादीनां च १।२१ त्येनेनात्रान्तोदात्तत्वात्। घृतादीनां चेतीदमपि सूत्रं फिट्सूत्रमेव। इत्थं ज्ञायते यथा पाणिनिना आङ् औङ् ण्यदर्थ-प्रथमादि-समास-तद्धित-प्रथममध्यमोत्तमवर्तमानानद्यतनादयः पूर्वाचार्योक्ताः पारिभाषिकाः शब्दा औदार्येण निःसंकोचं गृहीतास्तथैव फिट्सूत्राऽण्यपि स्वीकृतानि। इयं स्वीकृतिः फिट्सूत्राणां पाणिनिपूर्ववर्तित्वं प्रमाणयति। एवमेव कल्याणी सारङ्गीत्यनयोः 'अन्यतो ङीष्' इति प्रवृत्तये लघावन्ते द्वयोश्च बह्वषो गुरुरिति प्रथमं मध्योदात्तत्व विधानमावश्यकम्।

यत्तु दीक्षिता 'नक्षत्राणामाब्विषयाणाम् (फि० सू० १।१६) इति सूत्रे ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्त-त्वेन आद्युदात्तत्वे प्राप्ते वचनम् इति जेष्ठकनिष्ठयो र्वयसि (फि० सू० १।२२) इत्यत्र वयसि किम् ज्येष्ठः श्रेष्ठः कनिष्ठोऽल्पकः। नित्वादाद्युदात्त एवेति चेत्युक्त्वा पाणिनिसूत्रस्य ञ्नित्यादिर्नित्यमित्यस्य (६।१।१९९) पूर्वप्राप्तिं प्रदर्श्य पाणिनिसूत्राणां पूर्ववर्तितामुक्तवन्त स्तन्न पूर्वापरग्रन्थविरोधात्। फिट्सूत्रेषु प्रातिपदिकसर्वनामनपुंसकलुप् आदिसंज्ञानां कृते प्रयुक्तानां क्रमशः फिट् शिट् नप् स्फिग् आदिसंज्ञानां प्राचीनाचार्यकृतत्वस्य दीक्षितेन स्वय-मेवोक्तत्वात्[2]। एतेनैताः संज्ञाः पाणिनि पूर्ववर्त्याचार्यकृता इति सिद्धयति। यतो हि पाणिनेः पश्चादाधुनिकै र्याः सज्ञाः कृता स्तास्त्ववाचीनाचार्यकृताः। नक्षत्राणां वयसां च वाचका एव ज्येष्ठादिशब्दा अन्तोदात्ता इति ज्ञापनार्थमपि सूत्रद्वयं सार्थकतां गन्तुमर्हति।

व्याकरणे प्रत्याहारस्य प्रारम्भः काशकृत्स्नव्याकरणादनन्तरमभूदित्यनुमातुं शक्यते। काशकृत्स्न-व्याकरणस्य कानिचित्सूत्राण्युपलब्धानि बभूवुः। तेषां संख्या १४२ सन्ति। एषु सूत्रेषु प्रत्याहारस्य नितरामभावो

१. (चान्द्र व्या० वृत्तिः हल्सूत्रे)।

२. स्फिग् इति लुगः प्राचां संज्ञा २।२६ फि० सू० सिद्धान्त कौमुदी, शिट् सर्वनाम २।२९ नप्-नपुंसकम् २।३।

दृष्टिगोचरो भवति । यत्र प्रत्याहारस्य माध्यमेऽङ्गीकृतेऽत्यन्तलाघवसम्भव आसीत्तत्रापि प्रत्याहारानाश्रयणं "काशकृत्स्नं गुरुलाघव" मित्येवंरूपेण गुरुलाघवविचारप्रारम्भकत्वेन ख्याते तस्मिन् प्रत्याहारप्रयोगाभावः तत्कालपर्यन्तप्रत्याहारस्या प्रचलनं प्रत्याययति । संज्ञानां प्रयोगस्तत्रोपलभ्यते । तद्द्वारेणैव तत्र लाघवं सम्पादितम् । उदाहरणार्थमिदं निम्नाङ्कितं सूत्रं विलोक्यताम् यत्र किल प्रत्याहारप्रयोगस्य स्वर्णाविसरः सन्नपि स न समाश्रितः—'यजां यवराणां य्वृतः सम्प्रसारणं कानुबन्धे' (९९)[1] यजादिधातूनां यकारवकाररेफाणां क्रमश इकार उकार ऋकारश्च सम्प्रसारणं भवति ककारानुबन्धयुक्ते प्रत्यये परे इति तदर्थः, इष्टिः उक्तिः वृश्चति गृह्णातीत्यादयुदाहरणानि । यदि प्रत्याहाराणा-मुदयस्तत्कालं यावदभविष्यत् तर्हि काशकृत्स्नं गुरुलाघवं' त्रिकं काशकृत्स्नमिति ख्यात्यनुकूलं लाघवाय संक्षिप्तीकरणाय च विख्याते तादृशे व्याकरणे प्रत्याहारप्रयोगोऽवश्यमभविष्यत् । प्रत्याहारातिरिक्तो वरीयान् लाघवोपायो न दृश्यते श्रूयते वा । पूर्वोक्तसूत्रस्य स्थाने 'यजां यण इक् सम्प्रसारणं कानुबन्धे' इत्यकरणं प्रत्याहाराप्रचलनस्य स्पष्टसंकेतः ।

एवमेव **व्वृणां यवरास्तृचि** (१००)[2] स्रष्टा इत्याद्युदाहरणम् अस्य सूत्रस्य स्थाने 'इको यण् तृचि' इत्य-करणमपि प्रत्याहाराप्रचलनस्य ज्ञापकम् । अपृक्त एकाल् प्रत्यय (१०९) इति न कृत्वा अपृक्त एकवर्णः प्रत्यय इति लघुसूत्राकरणमपि तदभावद्योतकम् । इत्थमेव तत्रैकं सूत्रमस्ति **'नामिनो गुणः सार्वधातुकार्धधातुकयोः** (२२)[3] अत्र नामिनोऽर्थोऽस्ति 'इक्' अथवा 'इच्' । अत्र नामीति संज्ञा शब्दो वर्तते-'स्वरोऽवर्णवर्ज्यो नामी ति[4] सूत्रेणावर्णरहितस्य स्वरस्य नामीति संज्ञा क्रियते । यदि प्रत्याहारमिचमाश्रित्य इचो गुणः सार्वधातुकार्धधातुकयोः इति सूत्रं क्रियेत तदा मात्रालाघवेन सह संज्ञाविधानानावश्यकताजन्यमपि लाघवं भवेत् । 'ढोढे लोपः' **'पूर्वस्य समानस्य दीर्घः**[5] (२१) इति सूत्रे 'समानमिति काशकृत्स्नव्याकरणस्य पारिभाषिकः शब्दोऽस्ति[6] यस्यार्थोस्ति—अइ उ ऋलृ इतीमे पञ्च वर्णाः । **दश समानाः** १।१।३ इति कातन्त्रसूत्रेण दीर्घाणां स्वराणामपि समानसंज्ञा विधीयते तथापि दीर्घाणां दीर्घ-विधाने फलाभावात् पञ्चैवात्र गृहीताः । प्रत्याहारे समाश्रिते अण्शब्देन सलाघवं निर्वाहः सम्भाव्यते ।[7]

एतेन सिद्धयति यत् काशकृत्स्नव्याकरणस्य रचनाकालात् पश्चाद् व्याकरणे प्रत्याहारस्याश्रयणपरम्परा प्रचलिता । पाणिनिसूत्रेषु स्मृतानां वैयाकरणानां मध्ये काशकृत्स्नस्य नाम नायाति तथापि तस्य पाणिनिपूर्व-वर्तित्वं निम्नलिखितैः प्रमाणैः सर्वै रम्युपगतमेव ।

(१) पाणिनिना अहीरादि गणे (३।२।८०) काशकृत्स्नशब्दः पठितः ।
(२) उपकादि गणे (२।४।६९) कशकृत्स्नः पठितः ।
(३) महाभाष्यस्य पस्पशाह्निके त्रयो वैयाकरणाः स्मृताः पाणिनिना प्रोक्तम्
पाणिनीयम्, आपिशलम् काशकृत्स्नम् । अत्रत्यः क्रम उत्तरोत्तरस्य पूर्वकालवर्तित्वसूचकः । अतः पाणिनेः

---

१. मीमांसक कृत काश कृत्स्न धातु व्याख्यानम् पृ० ७१ ।
२. " " " ७१ ।
३. श्री मीमांसककृतकाशकृत्स्नधातुव्याख्यानम् पृ० ४३ ।
४. कातन्त्र व्याकरणम् १।१।१७ (४४) ।
५. काशकृत्स्न धातुव्याख्यानम् ४३ ।
६. कातन्त्र व्या० दश समानाः १।१।३ (४३) ।
७. का० कृ० धा० व्या० पृ० ४३ टिप्पणी ।

पूर्ववर्ती आपिशलिः तस्य च पूर्ववर्ती काशकृत्स्नः इति सिद्धयति। हरदत्तेनाप्यलेखि-पाणिनिना एते शब्दाः साधव-इत्यापिशलेनावगतम् आपिशलेन च स्वपूर्वाचार्येण शब्दसाधुत्वज्ञानमर्जितम्।[1]

पाणिनिस्तस्यैव सम्प्रदायस्याचार्य आसीत् यस्य सम्प्रदायस्य काशकृत्स्नः आपिशलिश्च। सज्ञासाम्यं सूत्र-रचनायां क्रमिकं विकासं च विलोक्य विचार्यते चेत् काशकृत्स्नः आपिशलिपाणिनिभ्यां प्राचीन आचार्यः सिद्धयति। पाणिनिना प्रत्याहारः आश्रितः आपिशलिना च, न तु काशकृत्स्नेन। यत्र काशकृत्स्नोऽनेकानि सूत्राणि रचयति।[2] तत्र पाणिनिः समेषां समानप्रकृतिकानां तत्वानामेकत्रैव समावेशं विधाय स्वशैलीगतं प्रौढत्वं प्रख्यापयति। काश-कृत्स्नेन 'पा घ्रा घ्मादयः पृथक् पृथक् सूत्रेषु उद्देश्यीकृताः पृथक् पृथक् सूत्रैश्च तेषां पिबाद्यादेशाः विहिताः किन्तु पाणिनीयतन्त्रे सर्वेषामेषामेकस्मिन्नेव सूत्रे संग्रन्थनम् दृश्यते।

चन्द्राचार्येण प्रत्याहारस्योपयोगविधातृत्वेन पूर्वाचार्याणां येषां संकेतः कृतस्ते आचार्या काशकृत्स्नानन्तर-कालिका आपिशल्यादयः।

इत्थं चान्द्रव्याकरणस्य बहुषु दानेष्वेकं महत्वपूर्णदानमस्ति प्रत्याहारसूत्रविषयकप्रसृतभ्रान्तिनिराकरण मित्यलं विस्तरेण।

प्रत्याहारो हि लाघवेन शास्त्रप्रवृत्यर्थः। वर्णानामुपदेशश्च प्रत्याहारार्थः। इत्थम् अइउण् इत्यादि-सूत्राणामुपदेशफलं प्रत्याहारनिर्माणम्। प्रत्याहारनिर्माणं च लाघवेन सूत्रनिर्माणतत्प्रवृत्तिफलकम्। अतश्चन्द्रगो-मिना प्रतिप्रत्याहारसूत्रम् येनानुबन्धेन येये प्रत्याहाराः स्वव्याकरणे तत्तत्सूत्रेषु निर्माय प्रयुक्ता स्तेषां संख्यानिर्देश-पूर्वकं सोदाहरणमुल्लेखः कृतः। प्रत्याहार-सूत्रेषु जातिपक्षश्चाश्रितः[3]। प्रत्याहारसूत्राणां चन्द्राचार्यलिखिता वृत्तिः काशिकावृत्या न केवलमर्थतः किन्तु शब्दतोऽपि तथा संवदते यथा काशिकाकारस्याऽत्र चान्द्रानुकृतिः स्पष्टं चकास्ति।

चान्द्रव्याकरणे ४२ प्रत्याहाराः प्रयुक्ताः। स्वयं चन्द्राचार्येण तत्तत्संग्राहकः श्लोकोऽपि वृत्तौ लिखितः।[4] पाणिनीयसूत्रे एकचत्वारिंशत् प्रत्याहाराः इति प्राञ्चः। दीक्षितस्तु पाणिनीयतन्त्रे ततोऽधिकान् प्रत्याहारानुत्प्रेक्ष्य

---

१. पदमञ्जरी भाग-१ पृ० ६।

२. सू० सं० ६०, ६१, २६-३५ काशकृत्स्नधातुव्याख्यानम्।

३. अइ उ ण् ।१।

अइउ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम्। तस्योच्चारणं भवत्येकेन-ऋको ऽणो रलौ इत्यकारेण। जातिनिर्देशश्चायम्।

४. णङञवाः स्युरेकस्माच्चतुर्भ्यश्च कचौ णषौ द्वाभ्यां ज्ञेयौ, पञ्चभ्योर्शभ्यः षड्भ्यो लस्तु विधीयते।

ण कारेण (अइउण्) सूत्रस्थेन	एकः अण् प्रत्याहारः
ङ कारेण	एकः एङ् ,,
ञकारेण	एकः यञ् ,,
वकारेण	एकः छव् ,,
ककारेण	चत्वारः अक् इक् उक् ऋक् रूपाः
चकारेण	चत्वारः अच् इच एच् ऐच् रूपाः
णकारेण (हरवरलण्) सूत्रस्थेन	द्वौ इण् यण् चेति

प्राचामाशयं व्याचक्षाण ऊचे चतुर्दशसूत्रीस्थैः हल्भिरिद्भिः कृता अष्टाध्याय्यां व्यवहृता प्रत्याहारा एकचत्वारिंशदेव । अतएव सुप्तिङादीनां रप्रत्याहारस्य 'चयो द्वितीयाः' इति वार्तिकस्थचय्प्रत्याहारस्य चाधिक्येऽप्यदोषः । पाणिनीय-सूत्रे चतुर्दशसूत्रीस्थैरिद्भि र्हल्भि निष्पन्नानां प्रत्याहाराणां संग्राहकः एकः श्लोकः काशिकारूपावतारप्रक्रिया-ग्रन्थेष्वपि चान्द्रव्याकरणमनुकृत्य रचित उपलभ्यते[1] । तत्र प्रत्याहाराणाम् ४१ संख्याः सन्ति । अष्टाध्याय्यां दृष्टा अट् अण् (परणकार सम्पादितः) ऋश् इति प्रत्याहारा श्चान्द्रव्याकरणे नोपलभ्यन्ते तत्तत्कार्याणामन्यथैव सम्पाद-नात्[2] चान्द्रव्याकरणे च ऋक् अम्, मम्, चय् इतीमे चत्वारः प्रत्याहाराः पाणिनीयसूत्रानुक्ता उपलभ्यन्ते[3] । तत्र चय् इति प्रत्याहारः कात्यायनोक्तः । कात्यायनवार्तिकनिर्दिष्टानामप्यर्थानां सूत्रेष्वेव कृतसंग्रहसंकल्पस्य चन्द्रगोमिनः सूत्रेषु वार्तिकोक्तस्य चय् प्रत्याहारस्यागमनस्य स्वाभाविकत्वम् । अम् प्रत्याहारो यद्यपि न पाणिनीयस्तथापि उणादि-सूत्रे तथा व्याघ्रभूतिकारिकायामुपलभ्यत एव । मम् ऋक् प्रत्याहारौ तु चान्द्रव्याकरण एवोपलभ्येते ।

रप्रत्याहारः पाणिनिना स्वीकृत इति कैय्यटदीक्षितादयः । बौद्धवैयाकरणेन रूपावतारकृताऽपि 'र' प्रत्याहारः स्वीकृतः । लपरत्वं वक्ष्यामीति भाष्यवार्तिकस्थ वक्ष्यामीत्यस्य व्याख्यास्यामि; तच्च रप्रत्याहारनिष्पादन-

---

षकारेण	द्वौ झष् भष् च
शकारेण	पञ्च अश् हश् वश् जश् बश् च
रेफेण	पञ्च यर् झर् खर् चर् शर् च
मकारेण	पञ्च अम् यम् अम् ङम् मम् च
यकारेण	पञ्च यय् मय् झय् खय् चय् च
लकारेण	षट् अल्, हल् वल् झल् शल् रल् च
	४२

१. एकस्मान् ङञ ण व टा, द्वाभ्यां ष स्त्रिभ्य एव करणमाः स्युः ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः ।

$$५+२+९+८+५+१२=४१$$

२. हयवरलण् इति मिश्रसूत्रं विधाय हरवरट् सूत्रस्य पार्थक्यं टकारानुबन्धं च प्रत्याख्यायाट्प्रत्याहार कार्यं यथाऽन्यथा सम्पादितं तथात्रैव प्रकरणे हरवरलण् सूत्रे वक्ष्यते २४१ तमे पृष्ठे ।

अणुदित् सवर्णस्येति सूत्रे एवाण् प्रत्याहारः परणकारेणेति पाणिनीयाः । प्रत्याहारसूत्रे जातिनिर्देशं स्वी-कृत्य सर्वेषाम् वर्णानां ग्रहणे सिद्धे चन्द्रेण अणुदित् सवर्णस्य चाप्रत्ययः १।१।६९ सूत्रस्य स्थाने उता सवर्गः १।१।२ इति सूत्रं कृत्वा अण् भागस्य परित्यागेन अण् प्रत्याहारो न स्वीकृतः । झलां जश् झशी त्यादौ झलीत्यनुवर्त्य झलो जश् ६।३।६७ इत्येव सूत्रं कृत्वा कार्यं निर्व्यूढम् ।

३. ऋकोऽणो रलौ १।१।१५ । अमि अम् वा ६।४।१४० । मम् प्रत्याहारनिर्माणस्य संकेतः अम ङ ण न म् इति सूत्र उपलभ्यते वृत्तौ, तत्र च विन्मतो र्मम् इति सूत्रमपि उदाहृतम् । परन्तु सूत्रमिदं न दृश्यते समुपलब्धे चान्द्रव्याकरणे । प्रायः सूत्रमिदं भाषाभागीयं नासीत् प्रायः वैदिकभागे आसीत् । तस्य भागस्यानुपलब्ध्या सूत्रमिदं नोपलभ्यते । चय् तु चयः शरि द्वितीयः ६।४।१५८ इत्यत्रोपलभ्यते । चान्द्र पञ्जिकायां 'मम्' प्रत्याहार घटितं सूत्र-संकेतचिह्नमुपलब्धम् ।

द्वारेति वार्तिकाऽभिप्रायमङ्गीकृत्य एतत्सामर्थ्यादेव क्वचिदनन्त्येनापि प्रत्याहारः, हकारादिष्वकारस्य सर्वत्रोच्चारणार्थत्वेऽपि लण्घटकाकारस्यानुनासिकत्वप्रतिज्ञापूर्वकमित्संज्ञेत्युभयं कल्पयित्वा रप्रत्याहारं संसाध्य उरण् रपर इति रपदेन रलयोर्बोधात् कृष्णद्धिरित्यत्र रपरवत् तवल्कार इत्यत्र लपरत्व सिद्धिः। अतएव भट्टोजिदीक्षितेनोच्यते प्रौढमनोरमायां रलयोरिति न्यूनम् सिद्धान्तकौमुद्यां च लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो-रलयोः संज्ञा इत्यादि।

नव्यवैयाकरणैर्नागेशभट्टादिभिस्तु रप्रत्याहारस्य पाणिनिस्वीकृतिर्नाभ्युपगम्यते। अतोलान्तस्येत्यत्र लकाररेफयो रूभयो र्ग्रहणात्। यदि र प्रत्याहारः पाणिन्यभिप्रेतो भवेत् तदा रान्तस्येति रप्रत्याहारमुखेनैव ब्रूयात्। 'र प्रत्याहाराङ्गीकारे वनो र च, रदाभ्यां निष्ठा तो न' इत्यादौ लकारग्रहणवारणाय प्रयत्नः कर्तव्यः स्यात्। इत्थम् उरण्रपर इत्यत्र र प्रत्याहाराश्रयणेन लाभः एकत्र लाघवम्, अनेकत्र चापत्तिः। अतः लपरत्वं वक्ष्यामीति वचनम् रपरसूत्रे स्वतन्त्रवार्तिकरूपेण स्वीकार्यम् इति नव्यानां नागेशादीनां मतं चन्द्राचार्यमतप्रभावितं दृश्यते। चन्द्राचार्येण नागेशात् सहस्राधिक वर्षपूर्वम् 'लपरत्वं वक्ष्यामीति वचनं स्वतन्त्र-वार्तिक रूपेणाङ्गीकृत्य वार्तिकोक्त ग्राह्याणामर्थानां सूत्रेष्वेव संग्रहाय कृतसंकल्पतया सूत्रं रचितम्ः—

ऋकोऽणोरलोः १।१।१५। अतएव पञ्चमप्रत्याहारसूत्रस्याहार सूत्रस्य वृत्तौ हकारादिषु अकारस्य सर्वत्रोच्चारणार्थत्वमुक्तम्। चन्द्राचार्येण प्रत्याहाराणां पूर्वव्याकरणस्थितत्वं प्रतिपाद्य नन्दिकेश्वरकृतकाशिकोक्तार्थे तुषारः पातितः। एतत्सर्वमनुपदमेव निरूपितम्।[1]

यरो ञमि ञम्वा, अचो रहाद्द्वे, अनुस्वारस्य ययियम् इति सूत्रेषु कृतेषु यरि ययि यमि च रेफस्य संग्रहात् प्रात र्नयतीत्यत्र ञम्[2] नदी ह्रद इत्यत्र द्वित्वं[3] नरं रथेन नयतीत्यत्र यम्[4] आपद्यते तथापि प्रत्यासन्नतरस्यैव स्थानिनः ञम्विधानात् स्थानतो गुणतश्च प्रत्यासन्नतराणां गकारादीनामेव स्थाने ङकारादयः स्युः। ये च न स्थानतो नापि गुणतः, स्थानमात्रेणगुणमात्रेण वा प्रत्यासन्ना स्ते सर्वे स्थानिनो निवर्तिता भवेयुः। इत्थं रेफस्य णकारो न भवति। रेफस्य द्वित्वं न, साक्षाच्छिष्टेन निमित्तभावेन रेफस्य कार्यित्वबाधात्। यमादेशोऽपि न, रेफस्य निमित्तस्यानुनासिकः प्रत्यासन्नतरो नास्ति। एतत् सर्वं चान्द्रवृत्तावुक्तम्[5]।

उपरि निर्दिष्टो विचारस्तु पातञ्जलमहाभाष्येऽप्युपलभ्यते किन्तु टकारानुबन्धप्रत्याख्यानमुभयोः पञ्चम-षष्ठयोः सूत्रयोरेकीकरणं च चान्द्रव्याकरणोद्भावनं नूतनम्।

पाणिनीयतन्त्रे टकारेण केवल एक एव प्रत्याहारो निर्माय प्रयुक्तः अट् इति। तस्य चाटः सूत्रचतुष्टये प्रयोगः उपलभ्यते दीर्घादटि समानपादे ८।३।९ आतोऽटि नित्यम् ८।३।३ अट् कुप्वाङ् नुम्व्यवायेऽपि ८।४।२ शश्छोऽटि ८।४।६३ इति।

तत्रादिमं सूत्रद्वयं छान्दसम्। छान्दसो भागश्चान्द्रव्याकरणस्य साम्प्रतमनुपलब्धः यद्यपि बाह्यान्तरङ्गसाक्ष्येण छान्दसभागस्य सत्तानुमीयतेऽत्र तथापि तदनुपलब्धेः निश्चप्रचतया न शक्यते वक्तुं चन्द्राचार्येणाटः स्थानेऽस्मिन् सूत्र-

---

१. पृ० २२८-२३८।
२. यरो ञमि ञम् वा ६।४।१४०।
३. अचो रहाद् द्वे ६।४।१४१।
४. अनुस्वारस्य ययि यम् ६।१।१५१
५. द्रष्टव्यताम् पृ० ४-५ चान्द्रवृत्तिः।

द्वये को नूत्नो यत्न आश्रित इति। सम्भाव्यते, चन्द्रगोमिना अट्प्रत्याहारस्य स्थानेऽज् ग्रहणं कृतं भवेत्। अत्राटि गृहीतेऽपि देवाँ अच्छा सुमती, महाँ इन्द्रो य ओजसा इत्यादिषु वेदे समुपलभ्यमानोदाहरणेषु अचि परे एव रुत्वानुनासिकयो र्दर्शनात् आदित्यान् याचियिष्यामहे इत्यत्र यकारे परे तयो र्वारणाय 'उभयथा' इत्यस्य 'उभयर्क्षु' ८।३।८ इत्यस्मात्पूर्वसूत्रादनुवृत्तिः क्रियते। 'अचि' इति कृते तु तत्र स्वत एव दोषाप्राप्त्या तद्वारणप्रयासोऽपि न करणीयो भवति। 'आतोऽटि नित्यम्' इति सूत्रन्तु यद्यपि निष्यमनुनासिकं विदधाति, तथापि निष्प्रयोजनमिव दृश्यते। **महाँ इन्द्र इत्यत्र तैत्तरीया अनुस्वार**मधीयते। एवंच लक्ष्यानुरोधादेव व्यवस्थासिद्धौ सूत्रं निष्प्रयोजनमेव। प्राञ्चस्त्वनुनासिकं विधाय व्यत्ययेनानुस्वारं साधयन्ति। विकल्पस्यैव व्यवस्थिततया प्रकृतसूत्रत्यागेन महल्लाघवम्, सूत्रारम्भे तु व्यत्ययोऽपि करणीय इति महान् क्लेशः। एतेन महान् हि स इति बह्वृचानां पाठोऽपि व्याख्यातः। सूत्रारम्भे तु इहापि स्यादित्युभयसूत्रं तत्रत्याट्ग्रहणं च निष्प्रयोजनम्, सूत्रे विनैव तत्राचीति करणेनैवेष्टसिद्धेरिति कृत्वा चन्द्राचार्यः अट्प्रत्याहारस्यैतत्सूत्रद्वयार्थमावश्यकत्वं न स्वीकृतवान् इति सम्भाव्यते।

'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रं चु टु तु लशर्व्यवाये नेति फलं द्राविडप्राणायामेन प्रकटीकरोति। छात्रा 'वर्तनेन' 'सरलेन' इत्यादौ णत्वाभावं काठिन्येनाऽवगच्छन्ति। अतः सारल्यस्य स्पष्टतायाश्चेच्छुकश्चन्द्राचार्यः सूत्रमिदं परित्यज्य तत्स्थाने चु टु तु ल श र्व्यवाये (चा० ६-४-१३२) इति सूत्रं कृत्वाऽट् प्रत्याहारं निरस्यति। छत्वममीति वाच्यम् तच्छ्मश्रुणा तच्छ्लोकेनेति प्रयोजनम्, इति वार्तिकम् वर्तते अतः 'शश्छोऽटि' इत्यस्य स्थाने वार्तिकार्थसंग्रहाय शश्छोऽमीति कृत्वाऽट्प्रत्याहारस्त्यक्तः।

यद्यपि महाभाष्ये—

'ञमङणानम्' 'झभञ्' इति सूत्रद्वयं संयोज्यैकत्रीकर्तुं विचारितम् मकारस्य च प्रत्याख्यानेन मकारसाध्यान् प्रत्याहारान् ञकारेण साधयितुं परामर्शो दत्तः। पाणिनिना मकारेण त्रयः प्रत्याहारा निर्मिताः यम् ञम् ङमिति च। तत्र हलो यमां यमां यमि लोपः (पा० ८।४।६४) इति सूत्रे हलो यञां यञि लोप इति करणेऽपि झकारभकारपरयो झकारभकारयोरभावात् लोपाप्राप्त्याऽदोषः। पुमः खय्यम्परे (८।३।६) इत्यत्राम्स्थाने अञ् करणेऽपि भकार-झकारपरस्य खयोऽभावाद् भकारझकारपरे खयि रोः स्वतोऽप्राप्तिः। ङम्—स्थाने ङञ् करणे ङमो ह्रस्वादचि ङमुण् नित्यम् ८।३।२२ इत्यादावदोषः झकारभकारयोः पदान्तयो र्लक्ष्येऽदर्शनात्। एवमपि पञ्चागमास्त्रय आगमिन इति वैषम्यात् १।३।१० सूत्रेण संख्यातानुदेशो न स्यादिति चेत्, मास्तु संख्यातानुदेशस्तथापि येषामागमानामागमिनः सन्ति तेषां भविष्यन्ति, झकारभकारयोः पदान्तयोरभावादागमौ न भविष्यतः इत्यादिरीत्या मकारप्रत्याख्यानं भाष्ये दृश्यते तथापि स्वच्छन्दप्रतिभेन चन्द्रगोमिना तत् प्रत्याख्यानं न विहितम् न वा मकारान्तप्रत्याहारा ञकारान्तीकृताः, यतो हि 'अस्त्यप्रयुक्त' इति सन्दर्भे भाष्ये शब्दप्रयोगाणामनन्तलोकशास्त्रविषयत्वमुत्प्रेक्ष्य 'अस्त्य प्रयुक्त" इति कथनस्य दुःसाहसमात्रत्वस्य व्यवस्थापितत्वात् 'एतादृशाः शब्दा न सन्ति अतः मकारेण निष्पादितानां प्रत्याहाराणां टकारेण निष्पादने दोषो न भविष्यतीति कथनमतितरां दुत्साहसपूर्णमिति कृत्वा चन्द्राचार्योऽत्र भाष्य मार्गं नानुससार। किंच चान्द्रव्याकरणे मकारान्ताः प्रत्याहाराः पञ्च सन्ति अम् यम् ङम् ञम् मम् चेति। पाणिनीयतन्त्रे त्वादिमा स्त्रय एवोपलभ्यन्ते। अन्तिमौ द्वौ तु यरो ञमि ञम् वा ६।४।१४८ विनमतो र्मम् इत्यादौ चान्द्र एवोपलभ्येते। तत्र यरो ञञ् ञञि वेति, करणे जगद् भाती त्यादौ दोषोऽपि स्यादिति हेतोश्चान्द्रव्याकरणे परित्यक्त एष संरम्भः।

णकार एवैकोऽनुबन्धेषु तथा वर्तते यः प्रत्याहारसूत्रेषु द्विरुपात्तः । एवं सत्यणिण्ग्रहणेषु सन्देहोऽपि जायते । पाणिनीयै द्विरुक्तेनानेन यथा साध्यते 'व्याख्यानतो विशेषप्रतिपत्ति र्न हि सन्देहादलक्षणम् 'तथा चन्द्रस्याप्यभिमत मिति प्रतिभाति, इश्यते च चान्द्रपरिभाषासूत्रेषु परिभाषाद्वयं व्याख्यानतो विशेषप्रतिपत्तिरिति नहि सन्देहादल-क्षणम् इति च । अत एव तेन सन्देहास्पदोप्ययनुबन्धो न परिवर्तितः । तत्र पाणिनीयैर्यथा सर्वत्राण् पूर्वेणकारेण किन्त्वणुदित् सूत्रेचाण् परेण णकारेण मन्यते, इण् तु सर्वत्र परेणैव व्याख्यानात् । तथा नास्माभि श्चान्द्रीयैरण्यपि द्वैधमाश्रीयते । **अत्राण् सर्वत्र पूर्वेण इण् तु सर्वत्र परेणैवेति वर्तते चान्द्रसिद्धान्ते एकरूपता । पाणिनीये तु अण्यस्ति द्वैधम् ।**

चान्द्रे अण् सर्वत्र पूर्वेण, नतु पाणिनीय इव अणुदिदित्यत्र परेण सर्वत्र च पूर्वेणेति इश्यते द्वैधम् ।

नवमोऽध्यायः

चान्द्रव्याकरणस्य नूतनानि सूत्राणि

पाणिनिर्यद्यपि प्रमाणभूत आचार्यो मुनिः। यस्य कृते महाभाष्यकारस्य महती श्रद्धा महाभाष्ये यत्र तत्रा तत्राभिव्यक्ता।[1]

चन्द्राचार्येणाऽपि पाणिनि महंता सम्मानेनाऽनेकत्र स्वग्रन्थे स्मृतः।२

तथापि स मनुष्य एवासीत्। मनुष्यस्य स्वभावे मातुर्दुग्धपानेन सह प्रमाद आगच्छति। अतो मुनिमपि तपस्विनमपि महाप्रयत्नवन्तमपि निर्दुष्टाष्टकरचनासावधानमपि तं यदि प्रमादोऽस्पृशन्नात्र किमपि वैचित्र्यम्। एतं मानवजन्मसिद्धस्वभावं प्रमादमुररीकृत्यैव मार्कण्डेयपुराणे व्यासेन शक्त्वा अन्यै रूपैः सह भ्रान्तिरपि नमस्कृता[3]।

भ्रान्तिस्वभावमानवजातिमत्पाणिनेरपि कृतौ बहवो दोषाः समागताः। तेषां दोषाणां तत्परिहाराणां चन्द्राच र्यकृतानां निरूपणं पृथगध्यायेऽस्यैव शोधप्रबन्धस्य कृतम्[4]। मानवजातिनैसर्गिकदोषात्प्रमादाद्रहित श्चन्द्रोऽपि न प्राभवदित्यपि निरूपितम् प्रबन्धेऽस्मिन्नेव।[5]

साम्प्रतम् पाणिनिनाऽदृष्टानामप्रदर्शितसिद्धयुपायानां प्रयोगाणां च साधनाय यानि सूत्राणि रचितानि, तान्यधोदीयन्ते, चन्द्रगोमिन इमानि उद्भावनास्वरूपाणि सूत्राणि समालोचकै र्बहुशः प्रशंसितानि—

चन्द्राचार्यः प्रथमो वैयाकरणः यः 'ष्ठीवनम्' 'सीवनम्' एवमादीनां पाणिन्यदृष्टानां लोकप्रचलितानां शब्दानां सिद्धये नूतनानि सूत्राणि रचयामास। अतश्चान्द्रव्याकरणं कात्यायनपतञ्जलिदर्शितानां परिवर्तनपरिवर्धनानां सूत्रेषु समावेशनमात्रम्; नात्र किमपि नूतनमिति कथनं चान्द्रव्याकरणस्याध्ययनमननाद्योतकमेव। ये किलैवं वदन्ति, ते स्वयं नावहितेन मनसा व्याकरणमिदमध्यैयत किन्तु कर्णाकर्णितयाऽऽकर्णितमेव व्याहार्षुरिति निश्चितम्। तानि नूतनानि सूत्राणीमानि सन्ति—

---

१. प्रमाणभूत आचार्यः दर्भपवित्रपाणिः शुचाऽवकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किम्पुनरियता सूत्रेण। वृद्धिरादैच् १-१-१ पा० महाभाष्यम्।

२. पूजा सम्माननम्। नयते पाणिनिर्व्याकरणे। अर्थात् व्याकरणनिर्माणात्पूजामधिगच्छति चा० १।४।८२ सू० वृ०।

३. या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता नमस्तस्यै (दुर्गासप्तशती ५।७४)

४. पृ० १९६-२०५

५. पृ० २०६-२१५।

६. चन्द्र गोमिन् की मौलिक और प्रधान देन ३५ सूत्रों की है। डा० भोला नाथ तिवारी-भाषाविज्ञान पृ० ५४०। (किन्तु मया तु ततोऽधिकानि सूत्राणि नूतनानि प्राप्तानि)।

रमाकान्त मिश्र व्या० शा० का संक्षिप्त इतिहास पृ० ८८ (इन्होंने ३५ सूत्रों को बढ़ा दिया है कैय्यट इन सूत्रों को अपाणिनीय कहता है)।

(१) ष्ठिवु सिवो दीर्घश्च चा० १।३।९८ अनेन ष्ठीव्यतेः सीव्यतेश्च ल्युट् क्रियते दीर्घश्च बहुलं विधीयते शिति ष्ठिवुधातो र्दीर्घो विहितः (ष्ठिवुक्लमुचमां शिति पा० ७।३।७५) तेन ष्ठीवति ष्ठीव्यति इत्यादि सिद्धयति। सीव्यतीत्यादिसाधनाय हलि चेति दीर्घः कृत एव। परन्तु ल्युटि लोकप्रचलितस्य ष्ठीवनसीवनेत्यादेः दीर्घसाधनाय न कोऽप्युपायो दर्शितः। पाणिनीयव्याकरणस्यैतस्या महत्यास्त्रुटेः परिहारश्चान्द्रे व्याकरणे प्राप्यते प्रथमतः। सरस्वती कण्ठाभरणेऽपि चान्द्रमनुकृत्य कृतं ष्टिवुसिवोर्दीर्घश्च २।४।१६७ इति सूत्रं दृश्यते। यद्यपि पाणिनीयैः पाणिनित्रुटि-निरसनपक्षपातपरैरत्र पृषोदरादीनि यथोपदिष्टम् ६।३।१०९ इति निपातनाद्दीर्घ उदीरितः। परन्तु पृषोदरादिगणे दृष्टातां पृषोदर, पृषोत्थान, बलाहक जीमूतश्मशान-उलूखलपिशाचवृसीमयूर इत्येषां शब्दानामाकृत्या ष्ठीवनम् सीवनमित्येता-दृशाः शब्दा न संवदन्ते। अतस्याकृतिगणत्वे स्वीकृतेऽपि कथं 'ष्ठीवनं सीवनमिति' दीर्घस्तेन सिद्धयतीति, त एव जानन्ति पक्षपातमलदूषितविवेका, नान्ये नीरक्षीरविवेकिनश्चन्द्रसदृशा विद्वांसः। यदि आकृतिगण इत्यस्य तस्मिन् गणे पठितानां शब्दानामाकृत्या सदृक्षाणां प्रयोगाणामेव गणना भूमिः इत्यर्थो न स्वीक्रियते; अपितु येषामा-कृतिस्तत्र पाठे स्वीकृते सिद्धिं यास्यति, नान्यथा; तेषामपि पाठस्थलमाकृतिगण इत्युच्यते तथाप्येतादृशकल्पनायां पाणिनि प्रत्यन्धश्रद्धैव हेतुरिति अगतिकगतिस्वरूपस्याकृतिगणनिवेशपूर्वक-रूपसाधनस्य दोषाच्छादनस्य निर्बलोपाय-त्वादनाश्रयणमेव श्रेयः। 'पृषोदरादित्वादगुणो दीर्घश्चेति' समाधानं निर्बलमिति कृत्वैव शरणदेवेन चन्द्राचार्य उद्धृतः (दुर्घटवृत्तिः सू० ७।३।८६)।

चान्द्रसूत्रं विना पृषोदरादिपाठकल्पनाया ष्ठीवनसीवनयोर्दीर्घेकारविशिष्टरूपयोः सिद्धावपि निष्ठेवनम् सेवनम् इत्यादि न सिद्धयेत्। इष्यते तूभयमतः चान्द्रव्याकरणसरणिरेवाश्रयणीया। कापथो नालम्बनीयः। अत्रेदं विचार्यते ष्ठिवुसिवो र्दीर्घश्च चा० १।३।९८ इति सूत्रस्य वृत्तौ ष्ठीव्यतेः सीव्यतेश्च ल्युड् भवति दीर्घश्च बहुलम् इति लिखित्वा सीव्यते दैवादिकस्य साहचर्यात् ष्ठीव्यतिरपि दैवादिक एव गृहीतः, न तु भौवादिकः। ष्ठीवनार्थे ष्ठीवतीति ष्ठीव्यतीतिशब्दापेक्षयाऽधिकप्रचलितः प्रयोगः। एवंच भ्वादे ष्ठीवतेरपि ष्ठीवनमिति प्रयोगेणावश्यं भवितव्यम्। साहचर्यं तु न सर्वत्र नियामकम्।

अत्रेदं विचार्यते—शरणदेवेन सूत्रमिदं द्विरुद्धृतम्। पुगन्तलघूपधस्य च ८।३।८३ इत्यत्र हलि च ८।२।७७ इत्यत्र[1] च। किन्तु तत्र सूत्रं ष्ठिविसिव्यो दीर्घश्चेत्युपलभ्यते चान्द्रव्याकरणपुस्तके च ष्ठिवुसिवो दीर्घश्च १।३।९९ इति। अनयोः कतरज्ज्याय इति पर्यालोचनायाम् चान्द्रव्याकरणस्थं सूत्रमेवेति पश्यामः। यदि हि सेकारनिर्दिष्टौ अत्र ष्ठिविसिवौ प्रयुक्तौ स्याताम् तदा ष्ठिविसिवे दीर्घश्चेत्येव सूत्रस्वरूपं स्यात् तादृशस्य निर्देशस्यैव चन्द्राचार्य-शैल्यनुगुणत्वात् चन्द्रेण हि प्राय एकवचनमेव द्विवचनबहुवचनस्थाने प्रयुक्तम् सूत्रेषु इति।

(२) 'कृञः कर्तरि' चा० १।३।९९ इति सूत्रमपि चान्द्रव्याकरणे नूतनं दृश्यते। सरस्वतीकण्ठाभरणेऽपि (स० क० २।४।१६८) सूत्रमिदमविकलमनुकृतम्। कर्तरि अर्थे कारणशब्दप्रयोगः लोकशास्त्रप्रसिद्धः। कुम्भकारः कारणमुच्यते, घटस्य कार्यस्य, कारकत्वात्। मृत्तिका-कपालद्वयसंयोगोऽपि च कारणम्। अतः कारणशब्दस्य करोतीति व्युत्पत्त्यावश्य भाव्यम्। कर्त्तर्यर्थे ल्युट्-प्रत्ययस्तु कृत्यल्युटो बहुलमिति बाहुल्यबलेन यथाकथंचित्सम्भवत्यपि

---

१. क—कथं 'ष्ठीवनं' 'सीवनम्' गुणसदभावात् पृषोदरादित्वादगुणो दीर्घश्च। चन्द्रगोमी त्वेतत्सिद्धये ष्ठिवुसिव्यो दीर्घश्चेति सूत्रं पठितवान् ७।३।८६ पुगन्त लघू०। दु० वृ०।

ख—हलिच ८।२।७७ कथं ष्ठीवनं सीवनम् हल् परत्वाभावात् उच्यते पृषोदरादित्वादगुणो दीर्घाभावश्च। ष्ठिविसिव्यो दीर्घश्चेति चान्द्रसूत्रम्। दु० वृ०।

किन्तु दीर्घस्तु पाणिनिनाऽसाध्य एव अकृतसूत्रत्वात् । चन्द्रेण तु 'कृञः कर्तरि' १।३।९९ इति सूत्रं कृत्वा कर्तरि ल्युटं दीर्घं च विधाय कारणमिति साधितम् । सूत्रेण कर्तर्य्येव दीर्घो विधीयते । अतः करणे ल्युटि करणमित्यत्र नाति-व्याप्तिः ।

(३) 'धारे र्धर् च' चा० १।२।३१ । इदमपि सूत्रं नूतनं प्रतिभाति । वसुन्धराशब्दः पृथिव्याः संज्ञान्तर-रूपेण लोके कोशे च प्रसिद्धः । अस्य साधनाय चन्द्राचार्येण पूर्वनिर्दिष्टसूत्रेण धारयतेः सुपः परात् खो विहितः धारेः स्थाने धरादेशश्च कृतः । मुम् तु विहित एव (५।२।७५) ।

पाणिनिना धारिधातोर्ण्यन्तात् खप्रत्ययस्तु विहितः किन्तु[1] धारिधटकस्य दीर्घाकारस्य ह्रस्वविधानाय न कोऽपि यत्नो दर्शितः । अस्या महत्यास्त्रुटेः परिहाराय चन्द्राचार्येण सूत्रमिदं नूतनं निर्मितम् ।

(३) डः ६।३।२७ सूत्रमेतदपि नवीनम् । अनेन डकारस्य वा लत्वं विधीयते । तेन वलभी, वडभी । नालः, नाडः । एतादृशस्थले डकारस्य लत्वविधायकं किमपि सूत्रं पाणिनीयतन्त्रे नोपलभ्यते । श्लेषालंकारज्ञाः सर्वदा डलयोः रलयोः बवयोः श्चैकत्वं स्वीकुर्वन्ति । ऋक्प्रातिशाख्येऽस्माभिः पठ्यते 'द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो लकारः इति ।

भट्टोजिदीक्षितेनापि 'पृतनासु साह्ला' इति प्रयोगसिद्धिमुपक्रम्योक्तम्—अचोर्मध्यस्थस्य ढस्य लः डस्य ह्लश्च प्रातिशाख्ये विहितः । आह हि श्लोकः—"द्वयो श्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो लकारः ।

ह्लमानेति स एव चास्य ढकारः सन्नूष्मणा सम्प्रयुक्तः" । इति । सर्वोऽयं नियमः वेदविषयकः लोके तु दृश्यमानस्य 'चूडा' 'चूला' 'चूडाकरण'—चौलसंस्कारेत्यादेः साधनायापि कोऽप्युपायो दर्शनीय इत्यस्य विचारः सर्व-प्रथमं चन्द्रगोमिनः स्वान्त उदभूत् ।

यद्यपि सूत्रे तथा संकेतो नास्ति तथापि स्वरद्वयान्तर्गतस्यैव डकारस्य लकारे परिवर्तनमनेन स्वीकृतमित्य-वश्यमन्तव्यम् अतएव भोजराजेनोक्तम्—"असंयुक्तादे र्डः ७।३।६१ तेनान्यदपि सूत्रमत्र समावेशयतोक्तम्—जपादीनां पो वः डो लो वा, लश्च **डः चूडा चूला, जडम् जलम्** । अतएव दण्डिना 'जडात्मा' इत्यस्य शब्दस्य जलात्मा जडात्मेत्युभयार्थे प्रयोगः कृतः ।[2]

गोयीचन्द्रेणापि चान्द्रव्याकरणस्येदं वैशिष्ट्यं मुक्तकण्ठेन स्वीकृतम्[3] ।

वैयाकरणा डलयोः मिथो विनिमयं स्वीकुर्वन्ति । य ा किल भट्टोजि दीक्षितेनाप्युक्तम्-लडति ललतीति साधयता विना सूत्रं कथमेतादृशः स्थान्यादेशभावः स्यात् । अतः पाणिणीय तन्त्रस्य महत्यव्याप्तिश्चन्द्रेण निराकृता ।

---

१. संज्ञायां भृ-तृ-वृ-जि-धारि-सहि-दपि-दमः ३।२।४६ ।

२: त्वं समुद्रश्च दुर्वारौ महासत्वौ सतेजसौ अयं तु युवयो र्भेदः स जडात्मा पटु र्भवान् (काव्यादर्श-२।१८५) ।

३. 'लश्च डः' इति लत्वविधौ चन्द्रसूत्रम् । पाणिनीये मुख्यलक्षणं नास्ति । डलयोरेकत्वस्मरणमिति वैयाकरणानां प्रसिद्धेः—संक्षिप्तसारटीकायां—गोयी चन्द्रः

(चान्द्रव्या० टिप्पणी—पृ० ३३८) ।

४. लडयो र्लंलयोश्चैकत्वष्यरणाल् ललतीतिस्वाभ्यादयः भ्वादि लड विलासे इति सि० कौ० पृ० ४२४ ।

(५) अस्मिन्नेव प्रकरणे चन्द्रस्य एकं सूत्रमस्ति कपिरिकादीनाम् (चा० ६।३।४६) इति। सूत्रमिदं कपिरिकादिगणपठितानां शब्दानामवयवीभूतस्य रेफस्य लत्वं विदधाति। यथा कपिरिका कपिलिका, तल्पिलिका तर्पिरिका, तिल्पिरिका, तिर्पिरिका। तिल्पिलीकः, तिर्पिलीकः। **लोमाणि, रोमाणि**। अङ्गुलिः, अङ्गुरिः। गलः, गरः। अलम्, अरम्। लघुः रघुः। मूरदेवः मूलदेवः। बालः, वारः। गणोऽयमाकृतिगणः। अतएव नरः, नलः, लोतहिः, रोहितः। पांसुलम्, पांसुरम्। तरुणः, तलुनः। करीलः, करीरः। मुकुलः, मुकुटः। रेखा, लेखा। इला, इरा। करमः कलमः, इत्यादि सिद्धम्। व्यवस्थितविभाषा चेयम्। इदमपि सूत्रमष्टाध्याय्यां न दृश्यते।

यद्यपि भाष्यकारेण कृपो रो लः ८।२।१८ इति इति सूत्रे एतादृशः संकेतो दत्तः; येन पूर्वोक्तानां शब्दानां सिद्धिविषये मार्गो दृश्यते, तथापि भाष्यकारोक्तमार्गो न प्रशस्तः तत्र लकारस्य स्थाने रेफादेशकल्पनात्। प्रयत्नलाघवमेव ध्वनिपरिवर्तनहेतुः, तच्च रेफं स्थानिनं साधयति, न लकारम्। साम्प्रतमपि दृश्यते बालैरशक्तैरमिधातृभीरघटितं रूपं लघटितं कृत्वोच्चार्यते यथा 'वर्मा', 'रामः' 'राघा', 'राघवः', 'रावणः', 'राक्षसः', 'रुद्राणीत्युच्चारणे 'वल्मा', 'लामः' लाघा, लाघवः लाक्षसः लावणः लुद्राणी चोच्चारिता जायन्ते न तु कदापि केनापि अशक्तेन उच्चारयित्रा लक्ष्मणः, लोकः, लज्जा बालिकादि शब्दाः रक्ष्मणः रोकः रज्जा, बारिकादिरूपेशोच्चारिताः। ब्रज भाषायाम् बालः 'बारो' कालः कारो यदुच्चार्यते तत्र न बालः प्रकृतिः न वा काल इति किन्तु बालकालयोः प्रकृतिभूतः बारः कारः इति शब्द एव। अतएव 'कल्पना, पलायनन्, निगलनम् पलिघः पल्यङ्क कलभ इत्यादौ यथा रस्यैव लकारः स्वीक्रियते आदेश स्तथा मूलतलुनीकरीलाऽऽदावपि रेफ एव प्रकृतित्वेन स्वीकार्यः। तुल्यन्यायात्, अर्वाजरतीकल्पनाया निर्मूलाया अनौचित्याच्च। इत्थमत्र 'बाल मूल लघ्वलम् अङ्गुलीनां वा लो रमापद्यते इति वक्तव्यम्। संज्ञा छन्दसो र्वा कपिलकादीनामिति वक्तव्यम्। कपिरकः, कपिलकः तिल्वरीकः, तिल्वलीकः। रोमाणि, लोमाणि। पांसुरम्, पांसुलम्, कर्म, कल्म, शुक्रः शुक्लः इति भाष्यम्[1] अनादृत्य चन्द्राचार्येण परे र्घाङ्योगेषु ६।३।४५ कपिरिकादीनाम् ६।३।४६ इति सूत्रे कृत्वा रेफस्य स्थाने एव लकारो विहितः। तस्यानुकर्ता भोजराजोऽपि ७।३।५९-७।३।६० सूत्रद्वये रेफमेव प्रकृतिं स्वीचकार[2]।

इत्थं यत्र पाणिनिः केवलं धाङ्योः शब्दयोः परयो रेफस्य लत्वं शास्ति तत्र चन्द्रः योगशब्दे परेऽपि रेफस्य लत्वमनुशास्ति। अतः परियोगः पलियोग इत्युभावपि प्रयोगौ भवतः अत्रापि चन्द्रस्यांऽशिकनवीनत्वं स्वीकरणीयम्।

(६) भुवो वा १।१।१५१ इत्यपि सूत्रं नूतनम्। भावः इति कर्तर्यर्थे न सिद्धचति पाणिनीयमतानुसारेण। भावशब्दश्च पदार्थार्थे विचारार्थे च लोकशास्त्रयोर्विख्यातप्रयोगः। भवशब्दोऽपि शिवसंसारार्थयोः प्रसिद्धः। तादृशार्थश्च भवतीति भावः भवश्चेति व्युत्पत्त्यैव लभ्यः। अतश्चान्द्राचार्येण पूर्वोक्तं सूत्रं कृतम्। एवंच णे परे (प्रत्यये) कृते भावः कर्तरि ण्वुल्तृजच इति चा० १।१;१३० अचि कृते भवश्च सिद्धचतः।

(७,८,९) अत एत्वप्रकरणे सूत्रत्रयं नवं दृश्यते—'दम्भश्रन्थग्रन्थाम्' (५।२।१२२) 'मनिपचिमचां नाम्नि' (५।३।१३३) 'नशोऽङि' (५।३।१२४) इति। देभतुः देभुः, श्रेथतुः श्रेथुः ग्रेथतुः ग्रेथुः इत्यादीन् एत्वघटितान् लोकप्रचलितान् प्रयोगान् पाणिनीया न निष्पादयितुम् प्रभवन्ति तेऽप्यत्र चान्द्रसरणिमाश्रयन्ति। एषां प्रयोगाणां साधनाय सर्वप्रथमं यत्नश्चन्दाचार्यैः कृतः। तमनुकृत्य काशिकाकारो जयादित्यो बौद्धः 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति

---

१. भाष्यम् ८।२।१८।

२. कपिरिका—तिप्परिका-ङ्गुरिक-रोम-पुरुष-तरुणसरिरारम्-मूर-करीर-कर्म-मुकुट-पांसुररेखारिक्षादीनाम्। इरातर्परकरभशरभवारखाररघुगरादीनामर्थभेदे (स० क० भ० ७।३।५९-६०)।

वक्तव्यम्' इत्याह। भट्टोजिदीक्षितेनापि 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वेति व्याकरणान्तरमिहाप्याश्रीयते' इत्युक्त्वा चान्द्रव्याकरणे काशिकायां चैत्वपरकं वचनं कित्वविधानपरकं स्वीचक्रे 'मेना' 'मेनका', 'पेचा' 'पेचका', मेचा मेचका इत्यादिसिद्धयर्थमप्येत्वं चान्द्रव्याकरणे विहितम्। पाणिनिना सर्वेऽमी प्रयोगा अदृष्टाः।

तृतीयं नूतनं सूत्रं विद्यते नशोऽङि ५।३।१२४ अनेन नशेरङि परत एत्वं विधीयते। तेन अनेशमित्यादि सिद्धयति। उत्तरसूत्रद्वयस्य मूलं भाष्यश्लोकवार्तिक उपलभ्यते।[1] अत्रेदं बोध्यं यद्यपि भाष्यश्लोकवाक्ये वेमानम-प्येत्वेन साधयितुं संरम्भो दर्शित स्तथापि पटस्य निमित्तकारणरूपेण प्रसिद्धे तूरीवेमादौ विद्यमानस्य वेमा इत्यस्य सिद्धिः वेञ् तन्तुसन्ताने इति धातोः सम्भवात् चन्द्रेण सूत्रे तस्य समावेशो न कृतः।

(१०) (११) 'दम्भः सनि च' (चा० ५।३।२६) स्वञ्जः (चा० ५।३।२७) इति सूत्रद्वयमपि नवम्। दम्भेः सकारादौ सनि लिटि चापिति परतो नलोपो विधीयते पूर्वेण; धिप्सति देभतुः देभुरित्यादौ। स्वञ्जे लिटि परतो नलोपो भवति उत्तरेण सूत्रेण। तेन परिषस्वजे इति सिद्धम्। उत्तर त्रसादौ सनीति नानुवर्तते चानुकृष्टं नोत्तर-त्रेति परिभाषासूत्रात्।

(१२) चान्द्रे नलोपविधायकम् लिटीन्धिश्रन्थग्रन्थाम् ५।३।२५ इदमपि सूत्रमधिकांशतो नवीनम्। केवल-मिन्धेः पाणिनीयतन्त्रे 'इन्धिभवतिभ्यां च' (पा० १।२।६) इति लिटः कित्वं विधीयते। अतस्तदतिक्तावयवेन सूत्र-मिदं नवीनमेव। एवंच 'समीधे' 'श्रेथतुः' 'श्रेथुः' ग्रेथतुः 'ग्रेथु' रित्यादि सिद्धयति। भट्टोजिदीक्षितेन श्रन्थिग्रन्थि-दम्भिलिटः कित्वंवेति व्याकरणान्तरमित्युच्यते, आश्रीयते च तद्वचनम्; मन्ये चान्द्रव्याकरणीयनलोपादिविधानपरं वचनं पाणिनीयव्याकरणसरण्या परिवर्त्य काशिकयामङ्गीकृतम्। काशिकायाः त्रिमुनिना प्रयुक्तं किमपि वचनं दृष्ट्वाऽन्यस्य व्याकरणस्य तदिति सम्भावनामात्रं प्रमाणीकृत्य दीक्षितेन व्याकरणान्तरस्य तद्वचनं कित्वसाधनपर-मित्यूचे' एतेन चन्द्रस्य मौलिकोद्भावनायां न कापि विप्रतिपत्तिरुदेति।

यद्यपि भाष्ये' इन्धेश्छन्दोविषयत्वाद् भुवो वुको नित्यत्वादिन्धि-भवतिभ्यां चेति सूत्रं प्रत्याख्यातम् तथापि चन्द्रेण इन्धिग्रहणं नलोपविधायके (५।३।२५) सूत्रे कृत्वा भाष्याद् वैमत्यं सूचितम्। तद् वैमत्यं भाषायामपि इन्धेः प्रयोगात्मकं भवेदिति संभाव्यते। इत्थं चन्द्रचार्यो न भाष्यस्यान्धानुकरणकर्तेति स्पष्टम्।

(१३,१४,१५,१६) लोप-विषयिका सूत्रचतुष्टय्यपि नूतनैषा। 'मांसस्य पचि घञ्ल्युटो र्लोपः' चा० सू० ५।२।८७ मांसस्य घञ् ल्युट्परकपचतौ परतो वा लोपो विधीयते। तेन मांस्पाकः मांसपाकः। मांस्पनी, मांसपचनीति सिद्धयति। पचीत्युक्तत्वान् मांसदाहः मांसदहनीत्यादौ, घञ्ल्युटोरित्युक्तेः मांसपक्तिरित्यादौ च नातिव्याप्तिः। यन्नीक्षणं मांस्पचन्या इति ऋक्संहितायामुपलभ्यते प्रयोगः (१।१६२।१३ ऋ० सं०)। भाष्ये तु मांस्पचन्या ऊपाया इति साधनाय' पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् इति वार्तिकमुपन्यस्य 'पदन्नो०' पा० ६।१।६३ इति सूत्रस्थं प्रभृतिग्रहणं प्रकारार्थं मत्वा शस् समानविभक्तौ तत्प्रवृत्तिमङ्गीकृत्य व्याख्यातम्। फलं च मांस्पाकः मांस्पचनीत्यादि सिद्धयती-त्युक्तम्।

मांसदाह इत्यादावादेशवारणाय न दृश्यते कोऽपि यत्नः पाणिनितन्त्रे। 'पदन्नो (पा० ५।१।६३) इत्यत्र प्रभृतिग्रहणस्य प्रकारार्थत्वे स्वीकृते यथा मांस्पचनीतीष्टं सिद्धयति तथा मांस्पक्तिरित्यनिष्टमपि प्राप्नोति। चन्द्रेण तु नूतनसूत्रनिर्माणद्वारा सकलमिष्टं संगृहीतमनिष्टं च निवारितम्।

---

१. अनेशं मेनके त्येतद् वेमानं लिङि पेचिरन् नशिमन्योरलिट्येत्वेम् श्लो० वा० ५।४।२०। चा० व्या० टिप्प० पृ० २१८ (भा०—१)

(१७) 'समस्तते' (चा० ५।२।८८) सूत्रमिदं समस्तते परतो वा लोपमनुशास्ति । तेन सततम् सन्ततमित्युभयं सिद्धयति । सहितम् संहितमिति तु 'उरोरूपमासहितसंहित० (चा० २।३।७९) इति निपातनात् सिद्ध्यत्यतो नात्र लोपानुशासनस्यावश्यकता चन्द्रेणानुभूता ।

(१८) 'तुमश्च काममनसोः' (चा० ५।२।८९) सूत्रेण तुमः समश्च मकारस्य कामे मनसि चोत्तरपदे नित्यं लोपो भवति । तेन भोक्तुकामः भोक्तुकामः भोक्तुमनाः सकामाः समना इत्यादि सिद्धयति ।

(१९) तव्यादिषट्केऽवश्यमः ५।२।९० इति चतुर्थं नवीनं सूत्रं पाणिन्यष्टाध्याय्यां वार्तिकपाठे चादृष्टम् । तव्यानीयर्केलिमर्क्यप्यत्यण्यदिति षट्के परेऽवश्यमिति शब्दस्य मकारस्य लोपोभवति । अवश्यकर्तव्यमवश्यकार्यमित्यादौ यथा ।

यद्यपि भाष्यकारेण पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् (पा० ६।१।६३।१) समो हिततत्तयो र्वा लोपः (पा० ६।१।१४४।१) समृतुमुनोः कामे मनसि चेति वक्तव्यम् (पा० ६।१।१४४।२) अवश्यमः कृत्ये (पा० ६।१।१४४।३) इति वाक्यानि लिखित्वा एतेषां नियमानां निर्माणाय यत्नो दर्शितस्तथापि सूत्रीकरणं चन्द्रस्यैवेति । 'लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि समो वा हिततत्तयो मांसस्य पचि युड्घञोः' इति काशिकाश्लोकस्तु चान्द्रसूत्राणामनुकरणम् । श्लोकप्रयुक्ते 'अवश्यमः कृत्ये' इत्यत्र 'तव्यादि षट्केऽवश्यमः' चा० ५।२।९० इत्यस्यैव पाणिनिसरणिशरणीकरणं दृश्यते । तुं काममनसोरपीत्यपि 'तुमश्च काममनसोः' (चा० ५।२।८९) इत्यस्यानुकृतिः प्रतीयते । एवं 'मांसस्य पचि युड्घञोः' अथ 'समो वा हिततत्तयोरित्यपि' मांसस्य पचि घञ्ल्युटोर्लोपः (चा० ५।२।८७) 'समस्तते' (चा० ५।२।-८८) सूत्रानुकृतिः, अक्षरसाम्यात् ।

(२०) 'माने मात्रट्' (चा० ४।२।३८) 'ऊर्ध्वं दघ्नड्द्वयसड् च' (चा० ४।२।३९) अस्य सूत्रद्वयस्याधारः यद्यपि 'प्रमाणे द्वयसज् दघ्नज्मात्रचः ५।२।३७ इति पाणिनीयाष्टकसूत्रम् । किन्तु चान्द्रे अनुबन्धकल्पनं नूतनम् मात्रटः दघ्नड्द्वयसडोश्च, प्रयोगवैशिष्ट्याद्योऽर्थभेदोऽनुभूयते; तस्य प्रदर्शनं तदर्थयोगविभागकल्पनं चात्र नूतनम् ।

एषां टित्वं प्रकल्प्य टित्वादेव ङीपं विधाय 'प्रादेशमात्री' 'जानुदघ्नी' 'जानुद्वयसी' ति संसाध्य टिड्ढेति सूत्रे द्वयसज् दघ्नज् मात्रज् ग्रहणं परित्यज्य चन्द्रेण लाघवं संसाधितम् । इत्थमत्रानुबन्धनूतनत्वं चन्द्रस्योद्भावनम् ।

द्वितीयं नूतनत्वमत्र 'प्रमाण' घटकप्रशब्दस्य परित्यागो वर्तते । 'प्र' पूर्वक 'मान' शब्देन प्रमाणरूपता-पन्नेन तस्य प्रकृष्टमानस्याभिव्यक्तिर्भवति यत् प्रमाणितं स्यात् । एवंच प्रमाणिते माने एव पाणिनीयं सूत्रं प्रवर्तेत । तथा च विंशतिमात्रा स्त्रिंशन्मात्रा वा पुरुषाः, जानुद्वयसमुच्छ्रयसं वा नदीजलमिति संशये कियन्मात्रं जलं विप्र इत्यादौ च ते न स्युः । पाणिनीयसूत्रे दोषमेतं विलोक्य चन्द्रेण' माने मात्रडितिसूत्रे मानग्रहणं कृतम् । तेन संशयिते, प्रमाणिते, प्रश्नात्मकेऽन्याद्दशे च माने प्रयुक्तानां मात्रादीनां विधानं सिद्धयति ।

तृतीयाऽत्र नवीनता वर्तते—मात्रस्य दघ्नद्वयसयोश्चार्थभेददर्शनम् । तत्र चान्द्रे व्याकरणे मात्रट् सामान्यमाने, दघ्नट् द्वयसट् च ऊर्ध्वमाने विहिताः । तेन जानुमात्रजला नदी इत्यस्य प्रयोगस्तदा भवति यदा नद्यां जलं जान्वव-धिकं भवति । जानुतोऽधिकजलायां नद्यां तु जानुदघ्नजला जादुद्वयसजलेति प्रयोगो यद्दृश्यते, तस्य समाधानं जातम् ।

सरस्वतीकण्ठाभरणेऽपि प्रघटितं पाणिनीयं सूत्रं सदोषं स्वीकृत्य चन्द्रपद्धतिं चानुकृत्य सूत्रं कृतम्—**'मानान् मात्रट्'** (स० क० ५।२।५९) 'ऊर्ध्वं दघ्नड् द्वयसट् च' (स० क० ५।२।६२) । इदमप्यत्र द्रष्टव्यम्—यद्यपि मात्रच् प्रभृति प्रत्ययत्रयं नित्यमेव भवति; तथापि यथा दाशरथिरित्यत्र तथाविवक्षायाम् 'अत इञ् पा० ४।१।९५) इतीञ् प्रत्ययो भवति अन्यथा च विवक्षायाम् 'दशरथपुत्र' इत्यपि रूपं साधु मन्यते, तथैव तथाविवक्षायां सत्यामेव ते

प्रत्यया: भवन्ति । एवंच प्रस्थ: परिमाणमस्येत्यर्थे प्रस्थमात्रमिति स्यात् । उपचरिताभेदविवक्षायान्तु प्रस्थो व्रीहि: द्रोणोव्रीहिरित्यपि भवति । विंशतिमात्रास्त्रिंशन्मात्रा वा पुरुषा:, जानुद्वयसमुरुद्वयसं वा नदी जलम् इत्यादौ ऊर्ध्वमानसंशयेऽपि मात्रडादयो भवन्त्येव; सूत्रे 'प्र' शब्दत्यागेन प्रमाणिता प्रमाणितादियथाकथंचिन्मानस्य ग्रहणात् ।

ननु वतुप्प्रत्ययोऽपि माने (परिमाणे) विधीयते यत्तदेततो वतुप् ४।२।४३ (चा० सू०) । यत्तदेतेभ्य: परिमाणे वतुप् ५।२।३९ (पा० सू०) इत्युक्ते: । तथाच मानस्य परिमाणस्य वा वतुपोक्तत्वात्, पुनर्मात्राप्राप्त्या तावन्मात्रम् तावद्द्वयसमित्यादिप्रयोगसिद्धये 'वत्वन्तात्स्वार्थे द्वयसज्मात्रचो बहुलम्' इति यथा भाष्ये वार्तिकं कृतम् यथा वा भोजराजेन 'वतो: स्वार्थे मात्रड्द्वयसटौ वा' (५।२।६८) इति सूत्रं कृतं तथा चान्द्रे न दृश्यते इति चेत; श्रूयताम् ।

तावत् परिमाणमस्येति वाक्यं यथा साधु भवति तथा तावन्मात्रम् तावद्द्वयसम् इत्यादौ वृत्तिरपि साधु: । यथा वाक्ये वतुपा प्रकटीकृतस्यापि परिमाणस्य 'द्विर्बद्धं सुबद्धं भवतीति न्यायेन सुदृढीकरणाय परिमाणशब्दप्रयोगो न दुष्यति; तथा वृत्तौ वतुपाभिहितस्य परिमाणस्य मात्रचा पुनरभिधानं न दोषावहम् ।

शब्दानुशासनम् शब्दान्वाख्यानम्वा व्याकरणम् । अतो लोकप्रचलितानां शब्दानां गतिश्चिन्तनीया । लोके च धनुर्ज्यामेघगर्जिताद्यर्थदार्ढ्याय पुनरुक्तता दृश्यत एव ।

(२१) अकोऽकि दीर्घ: चा० ५।१।१६० अक: सवर्णे दीर्घ: (पा० ६।१।१०१) असंज्ञके व्याकरणे स्वकीये सवर्णशब्दप्रयोगं विहाय प्रत्याहारमाश्रित्य संक्षेपेण प्रतिपाद्यप्रतिपादनमस्य न्यासस्य वैशिष्ट्यम् । न केवलमेतादृशे सूत्रे कृते मात्रालाघवम् किन्तु प्रक्रियालाघवमपि सवर्णसंज्ञाकरणात् । अक: सवर्णोऽ च्, अगेव । इत्थमीदृशे सूत्रे कृते द्रविडप्राणायामोऽपि न कृतो भवति । परन्त्वेतच्चित्रम् यत् 'सर्वत्र चान्द्रव्याकरणानुकारको भोजराजोऽत्र पाणिनीयसूत्रमेव स्वीकृतवान् अक: सवर्णे दीर्घ इति (६।१।१०१) ।

(२२) सन्धेरेव प्रकरणे 'यरोऽनुनासिकेऽनुनासिको वा' (पा० ८।४।४५) इति पा० सूत्रस्य स्थाने यरो ञमि ञम् वा ६।४।१४० इति प्रत्याहारमूलकलघुसूत्रकरणमपि चन्द्रस्य नूतनोद्भावना । पाणिनिनाऽनुनासिकशब्द प्रयोग: यो नो दूरे अररिवां अघायुरित्यादौ वकारोत्तरवर्तिनोनासिक्यस्याकारस्य तादृशस्यान्यस्य वा स्वरस्य कृते कृत:[1] यरोऽनुनासिकेऽनुनासिको वा इत्यादौ वर्गपञ्चमानां कृते स शब्द: प्रयुज्यते । अत: समुत्पन्नस्य सन्देहस्य निवारणाय व्याख्यानस्य शरणीकरणे गौरवम् । चन्द्रचार्येण तु चन्द्रबिन्दुस्वरूपलेखनप्रतीकविशिष्टस्यैव कृतेऽनुनासिक (अणोनुनासिक: चा० ६।४।१५०) शब्द: प्रयुक्त: । वर्गपञ्चमानां प्रत्यायनाय ञम् (यरो ञमि ञम् वा ६।४।१५१) प्रत्याहार: प्रयुक्त: । अतो नात्र संशयावकाश: । पाणिनिना ञम्प्रत्याहारस्य प्रयोगो नैव विहित: क्वापि । अत्र यद्यपि चन्द्रस्य सूत्रशरीरकल्पना पाणिनिसूत्रार्थमूला । तथापि प्रणाली नवीना ।

(२३) हयवरलण्—

सूत्रद्वयमिहैकत्र संयोज्य टकारानुबन्धं च प्रत्याख्याय चन्द्रेण किमपि विचित्रं बुद्धिवैभवं दर्शितम् । टकारेण एक एव प्रत्याहार: पाणिनिसूत्रे प्रयुक्त:—अडिति । अथ चाष्टमाध्याय एव सर्वाणि अट्प्रत्याहारघटितानि सूत्राणि वर्तन्ते:—तथाहि 'आतोऽटि नित्यम्' पा० ८।३।३ दीर्घादटि समानपादे पा० ८।३।९ अट्कुप्वाङ्नुम्व्यवायेऽपि (पा० ८।४।२) शश्छोऽटि (पा० ८।४।६३) इति । एषु प्रथमं द्वितीयं च वैदिकशब्दसिद्धिपरम् । तस्य भागस्य विविधै: प्रमाणै: सिद्धसत्ताकस्यापि साम्प्रतमनुपलब्धे: निश्चप्रचतया न शक्यते वक्तुम् चन्द्रेण तत्रोभयत्राट्स्थानेऽण्

१. आङोऽनुनासिकश्छन्दसि पा० ६।१।१२६, अणोऽप्रगृह्यस्यानुनासिक: पा० ८।४।५७ ।

प्रयुक्तोऽन्यो वा कोऽपि मार्ग आश्रितः; तथापि अनुमानप्रमाणेन शक्यते वक्तुम्, यदट्स्थानेऽणः प्रयोगे कृतेऽपि लकारे परे रुत्वस्यानुनासिकस्य चादर्शनात् अतिप्रसक्ति र्न स्यात् छन्दसि दृष्टानुविधित्वात् इति कृत्वाण् प्रयुक्तो भवेत् ।

अट्कुप्वाङ्नुम्व्यवायेऽपि (पा० ८।४।१) इति सूत्रे अट्स्थानेऽणः प्रयोगे 'विरलेन' 'तरसेन' 'सरलानाम्' इत्यादौ णत्वातिप्रसक्तिरापद्येत; किन्तु पूर्वोक्तणत्वविधायकसूत्रस्थाने चन्द्रेणान्यां रीतिमाश्रित्योक्तम् चुटुतुल शर्व्यवाये (चा० ६।४।१३२) । अत्र नेत्यनुवर्तते । तेनाट्प्रत्याहारं विनापि एतैर्व्यवाये णत्वनिषेधान्निर्वाहः ।

'शश्छोऽटि' पा० ८।४।६३ सूत्रे' छत्वममि' तच्छ्मश्रुणा तच्छ्लोकेनेति प्रयोजनम् इति वदन्तं कात्यायनमनुकृत्य चन्द्रेणोक्तम्:—शश्छोऽमि (चा० ६।४।१५७) । इत्थमट्प्रत्याहारं विना निर्वाहमार्गमवलोक्य तेन प्रत्याहारसूत्रे टकारानुबन्धः प्रत्याख्यातः । सूत्रद्वयंच संयोज्य चतुर्दशप्रत्याहारसूत्र स्थाने त्रयोदशप्रत्याहारसूत्राणि कृतानि ।

इत्थं व्याकरणसूत्राणां संक्षेपेण विस्तृतार्थप्रतिपादनसामर्थ्यसम्पादक-प्रत्याहारसूत्रेऽपि लाघव-प्रतिपादकचन्द्रस्य कुशाग्रबुद्धिः कं न चमत्करोति ।

(२४) ऋकोऽणो रलौ (चा० १।१।१५) ।

अनेन चन्द्रसूत्रेण 'ऊरण्रपरः (पा० १:१।५१) इति सूत्रस्य कार्यम् 'ऋलृ' स्थानिकस्याणो रेफलकारपरत्वं विधीयते । यथा कर्ता कल्प्ता इत्यादौ । पाणिनीयसूत्रमिदमतीव भ्रामकं; रपर इत्यत्र रेफमात्रोच्चारणात् । यद्यनेन रेफमात्रपरत्वविधानमङ्गीक्रियते तदा 'कल्पना' तवल्कार इत्यादौ लपरत्वं न सिद्धयेत् रपरलपरोभयविधानं तु न शक्यते स्वीकर्तुम्, सूत्रे रपरमात्रोच्चारणात् । अतोऽत्र वार्तिकं कृतं 'लपरत्वं वक्ष्यामीति' । अत्र कैयटादयः 'वक्ष्यामीति' त्यस्य व्याख्यास्यामीत्यर्थं स्वीकृत्य तच्च व्याख्यानं 'र'प्रत्याहारनिर्माणद्वारेत्यभ्युपगम्य लण् सूत्रघटकाकारमित्संज्ञकमनन्त्येनापि प्रत्याहारं चाङ्गीकृत्य रप्रत्याहारः साधितः । तेन रपरपदेन रपरलपरोभयबोधः । रदाभ्यां निष्ठातो नः पूर्वस्य च दः पा० ८।२।४२ इत्यादौ रपदेन न लकारबोधः । अतोल्रान्तस्य (पा० ७।२।२) इत्यत्र रलोभयग्रहणात् प्रत्याहारस्यास्यानित्यत्वज्ञापनात् । तेन प्रफुल्त इत्यादौ न तकारस्य नकारप्रसक्तिः ।

नागेशस्तु पाणिनेः रप्रत्याहारो नाभिप्रेतः । स अन्यथा 'अतो ल्रान्तस्येति रेफलकारोभयं नोच्चारयेत् । रप्रत्याहारस्वीकारे केवलमुरण् रपर इत्यत्र वार्तिकास्वीकारजन्यं लाघवम्, वनो र च (पा० ४।१।७), रषाभ्यां नो णः समानपदे, (पा० ८।४।१), रदाभ्याम् (पा० ८।२।४२) रात्सस्य (पा० ८।२।२४), रोरि (पा० ८।३।१४), ढ्रलोपे पूर्वस्य दीर्घोऽणः (पा० ६।३।१११), नन्द्राः संयोगादयः (६।१।३) इत्यादौ लकारातिप्रसक्तिवारणाय रप्रत्याहारोऽनित्य इति अतो ल्रान्तस्येति ज्ञापकेनाश्रयणे न केवलं गौरवमपि त्वनुचितमपि । रपदस्य रलोभयबोधकता त्वेकत्र, अबोधकता त्वनेकत्र अतोऽबोधकतैव सिद्धयति । कृञ् इति नेदं धातुग्रहणं किन्तर्हि प्रत्याहारग्रहणम् इति शैलीवत् र इति नेदं वर्णग्रहणं किन्तु प्रत्याहारग्रहणम् इति शैल्या अभावात् भाष्यकारस्यापि न प्रत्याहारः अभिमतः । किंचान्येषु प्रत्याहारेषु न क्वचिदबोधकतेति दृश्यते । अतः रपदं यदि पाणिनीयतन्त्रे बहुत्र रलोभयाबोधकं तर्हि तस्याभाव एव स्वीक्रियताम् । उरण् रपर इत्यत्र लपरत्वं 'लपरत्वं वक्ष्यामीत्यस्य स्वतन्त्र वार्तिकस्वीकृत्या सिद्धयतीत्याह ।

एवंच नागेशेन उरण् रपर इत्यत्राव्याप्तिदोषः स्वीकृतः ।

इत्थं दृश्यते पाणिनितन्त्रे सूत्रमिदमतीव विवादस्य विषयः सन्देहस्य च । अत श्चन्द्रेणास्य सूत्रस्य कायाकल्पो विहितः । तेनास्य सुन्दरं स्वस्थं च कलेवरमभवत्—ऋकोऽणो रलौ १।१।१५ इति । पाणिनितन्त्रे ऋक्प्रत्याहारो न दृश्यते । अत ऋक्प्रत्याहारकल्पनमपि नवीनमत्र । ऋलृ इत्येतयोः स्थाने योऽण् तस्मात्परौ रेफलकारौ वेदितव्यौ इति सूत्रार्थः ।

(२५) 'न शुभरुचः' चा० १।१।४४।

शुभिरुचिभ्यां यङ् न भवतीत्यर्थः। तेन अभीक्ष्णं शोभते, भृशं रोचते इत्यत्र यङ् न भवति।

भाष्यकारेण भृश रोचते शोभते इत्यत्र यङ्नेत्युक्तम्[1] यङ्गार्थस्य यत्रामिधानं संभवति तत्रैव यङ् उत्पद्यते इति भाष्यस्य तात्पर्यम्।

अत्र दीक्षितेन पौनःपुन्ये यङ् इष्यत एव। तन्मतेन भृशार्थे एव यङ् न स्यात्। पुनः पुना रोचते, पुनः पुनः शोभते इत्यत्र रोरुच्यते शोशुभ्यत इति भवत्येव।[2]

चन्द्राचार्यस्तु भृशार्थेऽभीक्ष्णार्थे चोभयत्र यङभावमिच्छति सूत्रस्य सामान्यतो निषेधकत्वाभ्युपगमात् तथैवोदाहरणदानाच्च (१।१।४४)।

सरत्वती कण्ठाभरणे तु 'न शुभरुचगृणातिभ्य इति सूत्रं द्वयोरप्यर्थयो र्यङ् निषेधपरकं दृश्यते (स० क० १।३।३५)।

इत्थमत्र भाष्यात् व्यापकार्थं प्रतिपादनान्नवीनत्वम्।

(२६) एकाचः ३।३।११० इदमपि सूत्रं नवीनमेव।

'वाङ्मयन्' 'मृन्मय' मित्यादौ नित्यं मयड् दृश्यते किन्तु न पाणिनिना नापि कात्यायनेन नियमो निमितो मयड्विधानाय, सर्वप्रयममत्र चान्द्रे नियमो दृश्यते। तदनुकृत्य काशिका वदति एकाचो नित्य मयटमिच्छन्ति (४।३।१४४)।

चान्द्रे ३।३।१०९ इत्यनेन मयट विधाय पुनः ३।३।११० इत्यनेन विधानसामथ्यादेव नित्यत्वे सिद्धे नित्यग्रहणस्यानावश्यकता दर्शिता।

यत्तु गोश्च पुरीषे (पा० ४।३।१४५) इति सूत्रं कृत्वा विकारे मयट् साध्यते गोमयशब्दे चान्द्रे, तदपीह न कृतम् वा गोमये ३।२।४४ इति निपातनेन तस्य सिद्धेः।

(२७) तिङश्च रूपप् ४।३।५३।

पाणिनिना प्रशंसायां रूपम् ५।३।६६ इत्युक्तम्। तत्र प्रातिपदिकादित्युवृत्तेः। 'पचतिरुपम्' इत्यादौ रूपब् न स्यादिति चन्द्रचार्येण पूर्वोक्तसूत्रं कृतम्। काशिकायान्तु प्रशंसायां रुपबित्यत्र तिङश्चेत्यनुवर्तते इति यदुक्तम् तच्चन्द्रं दृष्ट्वैव।

(२८) वध एरी च १।२।२०।

यद्यप्यस्य मूलं पाणिनीयं सूत्रं दृश्यते 'मान वध दान०० ३।१।६ इत्यत्र, तथापि तेनाभ्यासस्य दीर्घो विधीयते अनेन एरी चेति विधानं नवम् सूत्ररचनाक्रमश्च नवीनः।

(३९) 'वेणुकादिभ्यश्छण्' (चा० ३।२।६१) इदमपि सूत्रं नवीनम्। गणोऽपि चान्द्रः। गणेऽस्मिन् वेणुकवेत्रकोत्तरपदकमध्यमकप्रस्थक शब्दाः पठ्यन्ते। तेन वैणुकीयः वैत्रकीयः औत्तरपदकीयः माध्यमकीयः प्रास्थिकीय इत्यादयः सिद्धयन्ति। काशिकाकारः गहादिभ्यश्च (पा० ४।२।१३८) इति सूत्रस्य गणसूत्रं प्रकल्प्य गहादिगणसमाप्त्यनन्तरं गणमिममाकृतिगणमाह। परन्तु सर्वमिदं कल्पनं चान्द्रमाधारीकृत्यैव।

---

१. क्रियमाणेऽपि ह्येकाज्झलादिग्रहणे यत्रैकाचो हलादे श्चापद्यमानेन यङ्गार्थस्याऽभिधानं न भवति, न भवति तत्रोत्पत्तिः तद् यथा भृशं शोभते भृशं रोचते। महाभाष्यम् ३।१।२२।

२. सिद्धान्तकौमुदी-यङन्त प्रक्रिया—सू० ७।४।८२।

(३०) चूडारिभ्योऽण् (चा० ४।१।१३०) नूतनं सूत्रम्। चूडा प्रयोजनमस्य चौडम्। श्रद्धा प्रयोजकमस्येति श्राद्धम्। अत्र भाष्ये 'अग्नि पदादिभ्यश्चेति वक्तव्यम् इत्युक्तम्। अत्र गणे अग्निपद,पीलुमूलप्रयासोपवासेति चतुरः शब्दान् पठित्वा गणोऽयमाकृतिगणत्वेन निर्धारितः।

काशिकायां चूडादिभ्य उपसंख्यानम् इत्युक्तम् तत्तु चान्द्रव्याकरणमूलकमेव।

भोजस्तु सूत्रितवान्—चूडाश्रद्धादिभ्योऽण् (स० क० ५।१।१२१)।

(३१) **लघोरिकोऽकवेः** (चा० ४।१।१४७)।

इदमप्यंशतो नूतनं सूत्रम्। इगन्ताच्च लघुपूर्वात् (५।१।१३१) इति पा० सूत्रे कवेरनुपादानात्।अतएव काशिकायामुक्तम् ब्राह्मणादिषु कविशब्दो द्रष्टव्य इति।

(३२) नैकाचः (चा० ४।२।१२०) सूत्रमिदमकारान्तादेकाच इनिठनोर्निषेधकम्। तेन स्ववान् खवानित्यादौ मतुवेव, नेनूठनौ।

(३३) सप्तम्याम् (चा० ४।२।१२१) सप्तम्यर्थेऽपि अदन्तादिनिठनौ न भवत इत्यर्थः। दण्डवद् गृहमित्यत्र दण्डि गृहं दण्डिकं वा गृहम् इति न भवति।

इदमपि सूत्रं चन्द्ररचितम्। यद्यप्यस्य सूत्रद्वयस्य मूलं एकाक्षरात् कृतो जातेः सप्तम्यां च न तौ स्मृतौ इति ५।२।११५ सूत्रस्य[1] श्लोकवार्तिक उपलभ्यते तथापि सूत्ररूपतादानं चन्द्रस्यैव।

(३४) 'भागाद् यच्च' (चा० ४।४।२६) इदं सूत्रं नूतनम्। भागशब्दात् भागरूपनामभ्यो धेयः (पा० ५।४।३६।२) इति वार्तिकेन धेयो विहितः। तेन भागधेयमिति तु सिद्धचति। भाग्यमिति प्रसिद्धः शब्दस्तेन न निष्पद्यते। चन्द्राचार्येण सम्बन्ध (अन्वय) शुद्धये सर्वप्रथमं योगविभागः कृतः। नामरूपाद्धेय इति (चा० ४।४।२५) ततः भागाद् यच्च ४।४।२६ तेन नामरूपशब्दाभ्यां नामधेयं रूपधेयम् इति रूपद्वयं सिद्धम्। भागशब्दाच्च भाग्यं भागधेयमिति रूपद्वयं साधितम्।

(३५) अक्षेन्द्रे (चा० ५।१।१२३) अक्षे इन्द्रे च परतो गोरवङ् भवति। नित्यमिदं, पुनर्विधानात्। गवाक्षः गवेन्द्रः। इदमपि सूत्रमंशतो नवीनमेव इन्द्रे च नित्यम् (पा० ६।१।१२४) इत्येवाष्टाध्याय्यां दृश्यते, भाष्येऽपि पुनर्विधानादेव नित्यत्वे सिद्धे नित्यग्रहणं प्रत्याख्यातं तेन इन्द्रे चेत्यस्यैव सूत्रस्योपलब्धि र्भवति। अतोऽत्र 'अक्ष' शब्दे परे ऽवङ् विधानं नूतनमेव।

पूर्वसूत्रे अवङ् स्फोटानयस्येत्यत्र (पा० ६।१।१२३) यद्यपि स्फोटायनग्रहणं पूजार्थम् तथापि पूर्वसूत्रात् सर्वत्र विभाषा गोः (६।१।१२२) इत्यतः अनुवृत्तस्य विभाषेत्यस्य व्यवस्थितविभाषास्वीकारात् गवाक्ष इति सिद्धेरुपायस्य दर्शनात् चन्द्रस्य अक्षघटितसूत्रनिर्माणं व्यर्थमिति न वाच्यम्, न तत्र व्यवस्थितविभाषा, "इन्द्रे च नित्यमिति सूत्रप्रणयनात् भाष्ये च केवलनित्यग्रहणप्रत्याख्यानात्। अन्यथा व्यवस्थितविभाषयैव गवेन्द्र इत्यत्र नित्यमवङ् सिद्धे सूत्रमेव व्यर्थंस्यात्। न च 'देवत्रातो गलो ग्राह इति योगे च सद्विधिः, मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः" इति व्यवस्थितविभाषाया नियमनात् गवेन्द्र इत्यस्य तत्र समावेशो न स्यादिति वाच्यम्, उक्तवचनस्य लक्ष्याणि दृष्ट्वा भाष्यकारेणैव निर्मितत्वेन वेदवाक्याभावात्। भाष्यकारेण स्वयं स्वदत्तस्यैवोदाहरणस्य समादरणीयत्वाभावः 'नचोदाहरणमादरणीयम् किंचित्स्वयमप्युह्यम् इत्यत्र प्रतिपादितः।

अतएव सरस्वती कण्ठाभरणे नित्यमिन्द्रे, अक्षे च संज्ञायाम् (६।१।१३७।१३८) इतिसूत्रद्वयं कृतम्।

(३६) क्वचिद् वा ५।१।१२४।

---

१. चा० ४।२।१२० सू० टिप्पणी।

प्लुतस्य क्वचिद् विकल्पेन विधानमवश्यस्वीकर्तव्यम् । अन्यथा पुत्रेति तन्मयतया तरवोभ्यनेदुरित्यादौ सन्धिकार्यस्य सम्पादनमशक्यमेव स्यात् । अतश्चन्द्रेण पूर्वोक्तं नवीनं सूत्रं कृतम् । अतः 'अस्तु ही ३ इत्यब्रवीत्, अस्तु हीत्यब्रवीत्', 'चिनु ही३इदम्, चिनु हीदम्, वशा ३ इ इयम्, वशेयम् इत्यादि सिद्धम् : तेन च ई ३ चाक्रवर्मणस्य (पा० ६।१।१३०) इदमपि सूत्रं चन्द्रेण परित्यक्तम् ।

न च गुरोरनृतोऽनृतस्याप्येकेकस्य प्राचाम् पा० ८।२।८६ इत्यत्र प्राचामिति योगविभागेन सर्वः प्लुतः विकल्प्यते इति कल्पनादेव तत्सिद्धिरिति वाच्यम् योगविभागस्यागतिकगतित्वेन कुमार्गत्वात् । पणिनेस्तादृशो योग-विभागो नाभिमत इति प्रतीयते, ई चाक्रवर्णस्य (पा० ६।१।१३०) इति विकल्पसूत्रारम्भात् । यदि योगविभाग स्तस्याभिप्रेतः स्यात्तदा तेनैव चिनुही ३ इदम् चिनुहीदमिति विकल्पे सिद्धे वैकल्पिकविधानसंगतं स्यात् । 'ई ग्रहणेन नार्थः, अविशेषेण चाक्रवर्मणस्याचार्यस्याप्लुतवत् भवतीत्येव वक्तव्यम् इदमपि सिद्धं भवति वशा ३ इयम् वशेयम् इति भाष्येणापि योगविभागस्याप्रामाण्यं सिद्धचति । अन्यथा भाष्यकारेण "सूत्रेण नार्थः योगविभागादेव सिद्धत्वा" दित्येव वक्तव्यं स्यात्" ।

किंच 'सर्वः प्लुतो विकल्प्यते' इति स्वीकारे सर्वत्ररूपद्वयापत्तिः । तथाच प्रत्यभिवादेऽशूद्रे पा० ८।२।८३ इत्यादीनामपि वैकल्पिकत्वं स्यात् । अतः 'क्वचिद् वा' इत्यवश्यकरणीयं सूत्रं चान्द्रे दृश्यते ।

(३७) मध्यन्दिनम् इति यद्यपि पदद्वयमपि स्वीकर्तुं शक्यते परन्तु माध्यन्दिनी शाखा इति प्रसिद्धस्य तद्धितान्तशब्दस्य सिद्धये मध्यंदिनमित्येकं समस्तपदं मन्तव्यम् । तत्र पूर्वस्य पदस्य रात्रिचरादिशब्द इव मुम् विधाय-कस्य सूत्रस्य निर्माणं न पाणिनिना कृतम् न वा कात्यायनेन ! चन्द्रेणात्र सूत्रं निर्मितम् मध्यस्य दिने (चा० ५।२।८३)।

श्लोकवार्तिके तु 'मध्यमध्यं दिनण् चास्मात्' (चा० ५।२।८३ टिप्पणी) इत्युपलभ्यते । किन्तु तेन तद्धित-प्रत्ययसंयोगेन मध्यं पूर्वपदे निपात्य दिनण्विधीयते । अतः माध्यन्दिनीति मात्रं सिद्धयति । 'मध्यन्दिने तपत्यर्कः' इत्यादिप्रयोगस्तु तेन नैव साधितः स्यात् ।

(३८) जपिवमः (चा० ५।४।१४३)

'जपिवमिभ्यां परस्य त-तवतोरिड् वा न भवति तेन जपितः जप्तः वमितः वान्त इति सिद्धयति । अत्र जप्तवमितेति रूपद्वयमपाणिनीयं लोके प्रचलितं चन्द्रेणैव निष्पादितम् ।

(३९) व्याङः श्वसः (चा० ५।४।१४४) इदमपि नवीनमेव सूत्रं विश्वस्तविश्वसिताश्वस्ताश्वसितेत्यत्र विकल्पेन इडभावबोधकम् । व्याङः इत्युच्यते तेन निश्वसितः उच्छ्वसित इत्यादौ नित्यमेवेट् ।

सरस्वतीकण्ठाभरणे सूत्रद्वयमेकत्र संयोज्योक्तम् ।[1]

(६०) यतोऽपतेर्वा ५।४।१४० ।

यस्मादिड् वा विहितस्ततः पतिवर्जितात् परयोस्ततवतोरिड् न भवति, सूतः सूतवानित्युदाहरणे ।

यत्र पाणिनीयं सूत्रं वर्तते यस्य विभाषा (पा० ७।२।१५) यस्य क्वचिद् विभाषयेड्विहितस्ततः परस्य निष्ठाप्रत्ययस्येड्निषेधकमिदं सूत्रम् । अत्रेयं त्रुटिः, पत्धातोः सनि[2] विभाषयेड्विधानात् पतित इत्यत्रेड्निषेध-

१. जपिवम्याश्वसिविश्वसिभ्यः (स० क० ६।४।१५६) ।

२. तनिपति दरिद्रातिच्यः सनो वेड् वाच्यः
(सि० कौमुदी-सन् प्रकरण-७।२।४६) ।

आपद्यते अतः सूत्रे पतति विहायेति निवेशः कर्त्तव्यः। द्वितीयाश्रितातीतपतितेतिनिपातनाद्विडागमः इति काशिकायाः कल्पनाऽपि चान्द्रसूत्रं दृष्ट्वैव। अत इदमपि सूत्रमंशतो नवीनम्।

(४१. ४२) सिधि बुधि स्विदि मनि युष श्लिषः श्यना (चा० ५।४।१३१) विदेरलुकः (चा० ५।४।१३२) सूत्रद्वयमपि रचनादृष्ट्या नवीनम्; परन्तु अस्य मूलमनिटां धातूनां परिगणने वर्तते। तत्रेमे धातवः श्यना निर्दिष्टाः। अतः दैवादिका एवेमेऽनिटः।

विद्धातुरदादिः सेट्। अन्ये सर्वेऽनिटः, इत्यपि ज्ञायते। तस्मिन् परिगणनप्रकरणे विन्दिविद्यतीतिनिर्देशात्। इत्थमिमे आधारदृष्ट्या प्राचीने अपि सूत्ररचनादृष्ट्या नवीने एव।

(४३, ४४) यरलाद् भः (चा० ५।४।१३३) यरनगान्मः (चा० ५।४।१३४) सूत्रद्वयं नवीनम्। अनिट्धातूनामध्यनेनैतत् सामान्यतो दृष्टं भवति यत् यकाररेफलकारपरो भकारः येषु धातुषु यभ् रभ् लभ् इत्येतेषु वर्तते तेऽनिटः। एवमेव यरनगेभ्यः परवर्तिमकारवन्तोऽपि धातवो यम रम नम गमयोऽनिटः। अतश्चन्द्रेण सूत्रद्वयं विहितम्।

सरस्वतीकण्ठाभरणेऽपि सूत्रद्वयमविकलमनुकृतम्।

(४५) स्वार्थे (चा० ५।४।१३८)।

इदमपि नूतनं सूत्रम्। स्वार्थिकस्य सनो धातोरित्यविहितत्वेन आर्धधातुकत्वाभावाद् वलादिलक्षणेऽभावं साधयन्ति पाणिनीयाः। चान्द्रास्तु असंज्ञकव्याकरणरचनाऽभिनिवेशा आर्धधातुकसंज्ञां विना निर्वाहं कुर्वन्तो जुगुप्सते इत्यादौ इडभावाय साक्षात् सूत्रं स्वीकुर्वन्ति 'स्वार्थे इति तेन स्वार्थिकस्य सन इडभावः सिद्धयति।

किंच पाणिनीयानामिदं कथनमसमञ्जसमेव भाति यत् धातोरित्यविहितत्वात् सनोऽत्र नार्धधातुकत्वम्। मन्ये स्वार्थिकः सन् धात्वधिकारे न विहितः; किन्तु धातुपाठपठितेभ्यो गुप्तिज्प्रभृतिभ्यो विहित एव। एवंचात्रधातुविहितोऽपि धातोरविहितोऽयं सन् इति विरोधाभासः पाणिनीयस्वीकृतः कं न चमत्करोति। चन्द्रस्तु स्पष्टं सर्वं वक्तुमिच्छतीति वैशिष्ट्यम्।

महाभाष्यस्य वार्तिकं वचनं वाधारीकृत्य कानिचित् सूत्राणीह दृश्यन्ते—

(४६) कृपो रो लोऽकृपणादीनाम् ६।३।४१ सूत्रेऽस्मिन् अकृपणादीनामित्यंश एव नूतनः पूर्वांशस्याष्टाध्याय्यां श्रुतत्वात् (पा० ८।१।१८) तेन कृपणः कृपाणः, कृपीटम्, कर्पट इत्यादि सिद्धम्। अस्य मूलम् भाष्ये दृश्यते—

कृपणादीनां प्रतिषेधो वक्तव्यः ८।२।१८ इति कृपणः कृपाणः कृपीटम् इति भाष्योदाहरणे 'कर्पटो' न वर्तते। चान्द्रस्य व्याकरणस्य कृपणादिगणे चत्वारः पूर्वनिर्दिष्टाः शब्दा एव पठिताः दृश्यन्ते। सरस्वतीकण्ठाभरणे चन्द्रमनुकृत्योक्तम्—कृपो रोलोऽकृपणकृपाणकर्पटकृपीटकर्परकर्पूरकृपादीनान् ७।३।५४।

(४७) 'द्वित्वे' (चा० ६।३।११०) धातो र्यौरेफवकारावनचपरौ तयोः परभूतयोरिको दीर्घो न भवति द्वित्वे सतीति सूत्रार्थः। तेन रीधातोर्लिटि प्रथमपुरुषद्विवचनबहुवचनयो रिर्यतुः रिर्युः व्येञ् धातोश्च विव्यतुः विव्युरित्यादौ न दीर्घः।

पाणिनिनार्वोरुपधाया दीर्घ इकः (८।२।७६-८।२।७७) हलि चेति सूत्रद्वयप्राप्तस्य दीर्घस्य निषेधाय 'न भकुर्छुराम्' (पा० ८।२।७९ इति सूत्रं कृतम्। तेन धुर्यः, दिव्यः, कुर्यात्, कुर्वः, छुर्यात् इत्यादौ दीर्घवारणेऽपि रिर्यतुः विव्यतुरित्यादौ दीर्घवारणं न स्यात्।

चन्द्रेण दीर्घविधायकसूत्रद्वयस्थाने धातोर्वोरनचीको दीर्घः (६।६।१०८) इत्येकमेव सूत्रं कृतम् परन्तु असंज्ञके व्याकरणे भस्य प्रयोगायोग्यत्वात् पाणिने रेकं निषेधसूत्रं द्विधा विभक्तम् ' न सुपि यचि (चा० ६।३।१०९

'कुरुच्छुरोः' चा० ६।३।१११ । पूर्वसूत्रेण पाणिनेः सर्वे भत्वाद्दीर्घाभावविषयाः संगृहीताः उत्तरं तु कुरुच्छुरोर्दीर्घ-निषेधकम् । किन्तु पाणिनिनाऽप्रोक्तस्य रिर्यंवुरित्यादौ दीर्घाभावस्य साधकं 'द्वित्वे' इति सूत्रं नवीनमेव ।

(४८) ऋते द्वितीया च २।१।८४ ।

ऋतेशब्दयोगे काव्यादौ द्वितीयाऽपि दृश्यते । वाल्मीकिरामायणे सुन्दरकाण्डे हनुमतः सीतामुद्दिश्य कथिते वाक्ये द्वितीयोपलभ्यते त्रिमुनिव्याकरणे द्वितीयाविधानाय किमपि सूत्रं न विलोक्यते रचितम् । अतः पञ्चम्यैव भवति ।

चान्द्रे एतदर्थं सूत्रमस्ति—'ऋते द्वितीया च' २।१।१८० अत्र चकारात् पञ्चम्यनुकृष्यते । तेन ऋते-शब्देन योगे द्वितीया भवति पञ्चमी च । एवंच ऋते पार्थम् ऋते पार्थादिति सिद्धम् ।

दुर्घटवृत्तकारेण शरणदेवेन 'पुरुषाराधनमृते' (श्लो० २०) इति महिम्नः प्रयोगे द्वितीयासाधनाय अन्याराद् (२।३।२६) इत्यत्र ऋते इति योगविभागः स्वीकृतः (दुर्घटवृत्तिः २-३-२) । परन्तु एतादृशो योगविभागो न क्वापि दृष्टः । अन्यारादितर इति प्रथमो योगः निर्विभक्तिकः पञ्चमीविधायकः । तत ऋते इति द्वितीयो योगोऽपि विभक्ति-रहितः द्वितीयापञ्चमी-विधायकः । तदनन्तरम् दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इति तृतीयो योगः पञ्चमी विधायकः । अतः शरणदेवस्य श्रद्धा एवेदं सर्वं स्वीकर्तुं शक्नोति ।

तेन च स्वयं स्वयोगविभागात्मकसमाधानेनासन्तुष्यता-चान्द्रं सूत्रमुदाहृतम् ऋते द्वितीया च (चा० २।१।८४) ।

सरस्वतो कण्ठाभरणेऽपि चान्द्रसूत्रस्याविकलं कलेवरं प्रतिष्ठापितं दृश्यते-ऋते द्वितीया च (स० क०-३।१।१४६) ।

(४६) अयि रः (चा० ५।१।५) इति नवीनं सूत्रम् । यत्र नन्द्राः संयोगादयः (पा० ६।१।३) इति सूत्रं पाणिनीयव्याकरणे एकं वर्तते; तत्र चान्द्रे सूत्रद्वयं कृतं प्रयोजनविशेषाय । प्रथमं सूत्रं वर्तते नन्द्रवो हलि ५।१।४ अचः पराः नकारदकारबकारा हलि परतो न द्विरुच्यन्ते इति तदर्थः । पाणिनिमतेन उब्जिजिषति इत्यत्र बकारस्य द्वित्ददारकं किमपि सूत्रं नास्ति । अतोऽत्र उद्जधातु र्मन्यते तस्य च भुजन्युब्जौ पा० ७।३।६१ इति निपातकात् दकारस्य बकारः क्रियते । अतः दकारं मत्वा द्वित्वनिषेधो जायते । चन्द्रेण स्पष्टमेव बकारः पठितः तादृश-निपातनादि क्लेशपरिहाराय ।

ततो द्वितीयं सूत्रमस्ति 'अयि रः' (चा० ५।१।५) यकार भिन्ने हलि परतो रेफो न द्विरुच्यते । यकारात्मके हलि परे नु रेफस्य द्वित्वं भवत्येव तेन अर्चिचिषति इत्यत्र रेफस्य द्वित्वनिषेधेऽपि अरार्यते इत्यादौ रेफस्य द्वित्वं भवत्येव ।

(५०) गन्धशब्दस्य बहुव्रीहिसमासान्तपदत्वे इकारान्तादेशः भाषाया एका समस्या वर्तते । अत्र विषये पाणिनिना सूत्रत्रयं विहितम्—गन्धस्येदुत्पूतिसुसुरभ्यः' 'अल्पाख्यायाम्' 'उपमानाच्च' ५।४।१३५-१३७ तत्र प्रथमेन 'उत् पूति सु सुरभिः' परस्य गन्धस्येकारोन्तादेशः बहुव्रीहौ सामान्येन विहितः । गन्धशब्दो हि गुणवाची द्रव्यवाची च । पृथिव्यां गन्धइति प्रथमस्य, 'वहति जलमियं पिनष्टि गन्धान्'[1] इति द्वितीयस्य चोदाहरणम् । 'गन्धस्तु सौरभे

---

१. एतत्ते देवि सदृशं पत्न्यास्तस्य महात्मनः
का ह्यन्या त्वामृते देवि ब्रूयाद् वचनमीदृशम् ।
वा० रा० सुन्दर काण्ड सर्गः ३८ श्लो० ५ ।

२. मुद्राराक्षसप्रस्तावना-श्लोकः ।

नृत्ये गन्धके गर्वलेशयोः। स एव द्रव्यवचनः सन् बहुत्वे पुंसि च स्मृतः 'इति कोशाद् गन्धशब्दस्योभयवचनत्वं प्रमाणितमेव। तत्र पाणिनिः कस्य गन्धशब्दस्योदादिपूर्वस्येकारान्तादेशो विहितः ? इति विषये न स्पष्टः। कात्यायनेन गन्धस्येत्वे तदेकान्तग्रहणम् (५।४।१३५।१) इति वार्तिकं निर्मिय गुणवाचिन एवात्र सूत्रे गन्धस्य ग्रहणं न तु द्रव्यवाचिन इत्याख्यातुं प्रयतितम्। किन्तु तस्येदं वार्तिकं न स्पष्टार्थम् एकान्तशब्दस्य अस्फुटार्थकस्य प्रयोगात्। दीक्षितेनं वार्तिक विवृण्वतोक्तम्—एकान्त एकदेश इव अविभागेन लक्ष्यमाण इत्यर्थः। तेन 'सुगन्धि पुष्पम्' सुगन्धि सलिलं चेत्यादौ गन्धस्य अविभागेन लक्ष्यमाणत्वादित्वं भवति। गन्धाश्रयाणां तत्संसृष्टानां परमाणूनां वा विभागापन्नानामेव ग्रहणम् तेन सुगन्धि जलमित्यादौ च सूत्रप्रवृत्तिः। शोभना गन्धाः द्रव्याण्यस्य सुगन्ध आपणिक इत्यत्र तु गन्धानां विभागेन लक्षितत्वान्नेत्वम्। एतेन सिद्धं यत् प्रथमे **सूत्रे गुणवाचिन एव गन्धस्य ग्रहणं न तु द्रव्यवाचिन इति**।

केचित्तु 'गन्धस्येत्वे' इति पूर्वोक्तवार्तिके तदेकान्तशब्देन स्वाभाविकत्वं विवक्षितम्; एकान्तशब्दस्याव्यभिचरिते तात्पर्यात्। तेनागन्तुकस्य नेत्वम्। तथाच भट्टिः "आघ्रायि वान् गन्धवहः सुगन्धः" इति। वान् (वहन्) वायुः आघ्रायि (आघ्रातः) इति तदर्थः। यत्र यत्र पुष्पं तत्र तत्र गन्धः इति व्याप्तिग्रहसत्वात् पुष्पे स्वाभाविकत्व गन्धस्य सत्वात् तत्रेत्वेन सुगन्धि पुष्पमिति भविष्यति किन्तु वायौ गन्धस्य स्वाभाविकत्वाभावात् सुगन्धः गन्धवह इत्येव स्यादित्याहुः। भट्टि-श्लोकं पूर्वनिर्दिष्टं जयमङ्गलायां व्याख्यातवान् 'गन्धस्येत्यादिना इकारः समासान्तो न, तदेकान्तग्रहणमिति वचनात् सुगन्ध आपणिक इति यथा। अतएव '[1]क्रान्तकान्तवदनप्रतिबिम्बे

भग्नबालसहकारसुगन्धौ' इत्यादीनां प्रामादिकत्वं दुर्घटवृत्तावुक्तम्।[2]

वस्तुतस्तु पूर्वोक्तमाघप्रयोगात् महीरुहः पुष्पसुगन्धिरादे इति भारविप्रयोगाच्च आगन्तुकस्य गन्धस्य न ग्रहणमिति कथनं दुस्साहसमात्रम्।

आगन्तुकस्य गन्धस्य ग्रहणे 'आघ्रायि वान् गन्धवहः सुगन्धः 'इतिभट्टिप्रयोगे इत्वाभावः कथम् ? लक्ष्यपरतन्त्रत्वाद् व्याकरणस्य पूर्वोक्तोभयविधशिष्टप्रयोगसाधनायाकृतप्रयत्नो वैयाकरणोऽवश्यं गर्हणीयः।

चान्द्रव्याकरणे गन्धस्येत्वविषये उभयतस्पाशाया रज्ज्वा विमोचनोपायः प्रदर्शितः। तेन प्रथमं सूत्रं क्रियते—

सूत्पूतिसुरभेर्गन्धस्येत् (चा० ४।४।१२३) पाणिनितन्त्रे इतो मध्ये प्रयोगात् विधेयस्योद्देश्यात् पूर्वनिर्देशात् यो विधेयाविमर्शः, सोऽपि परिहृतः सोरुतश्च प्रत्यासत्या (सन्धिना) सूत्रशरीरलाघवं, शब्दयोः समानधर्मणोः सहपाठात् सहचरानुगुण्यमपि साधितम्। अस्योदाहरणान्यपि नितरामुपयुक्तानि दत्तानि सुगन्धि चन्दनम्, उद्गन्धि कुसुमम्, गन्धि शरीरम्, सुरभिगन्धि केसरमिति। अत्रपूतिगन्धि शरीरमित्युदाहरणम् बौद्धेन दत्तत्वात् प्रभावविशेषसम्पन्नम्।

ततः द्वितीयं सूत्रं कृतम्—'आगन्तो र्वा (चा० ४।४।१२४)। इदमस्य नूतनं सूत्रम् सूत्पूतिसुरभिभ्यः परस्यागन्तो र्गन्धस्येद् वा भवतीत्यर्थकम्। तेन सुगन्धि रापणः सुगन्धश्च। उद्गन्धिरुद्गन्धः, पूतिगन्धिः पूतिगन्धिः, सुरभिगन्धिः सुरभिगन्धो वा गन्धवह इति सिद्धम्। विकल्पेनागन्तोर्गन्धस्येत्वविधानात् माघभारविप्रयोगे इत्वसद्भावः भट्टिप्रयोगे इत्वाभावश्च सुसाध्यः।

---

१. शिशुपालवध; १०।३।

२. शरणदेव दुर्घटवृत्तिः ५।४।१३५।

यद्यपि चन्द्रस्य परवर्तिनां भट्टि-भारविमाघानां पूर्वनिर्दिष्टाः प्रयोगा दृष्ट्यगोचरीभूता इति संभाव्यते तथाप्येतादृशाः प्रयोगास्तेन शास्त्रे लोके च प्रचलिता अवश्यं दृष्टा इति निश्चप्रचम्; एतादृशसूत्रप्रणयनात् ।

तत्र पूर्वसूत्रं यत्र गन्धस्य स्वाभाविकत्वं तत्र नित्यमित्वविधानार्थम्, द्वितीयं तु सूत्रं यत्र गन्धस्यागन्तुकत्वं तत्र विकल्पेनेत्वविधायकम् । अत्र पाणिनिना न किमपि मुखत उक्तम् । अतएव न शक्यते वक्तुम् किन्तु एतन्निश्चितं यत् तत्सूत्रं न सर्वाणि लक्ष्याणि व्याप्नोति यच्च कात्यायनेनान्येन च पाणिनेः श्रद्धालुना तत्र परिवर्धितम् तदपि न गन्धस्य बहुव्रीहिसमासान्तस्येत्वसमस्यासमाधायकम्, अतोऽत्र चन्द्रः प्रशस्यः भूरिशः ।

इत्थं पाणिनीय तन्त्रस्य दूषणानि दर्शयन्नपि चन्द्राचार्यः मुनित्रयं प्रति परमादरं प्रस्तौति—

१. नयते पाणिनिर्व्याकरणे (उदा० १।४।८२) पूजामधिगच्छतीत्यर्थः ।
२. ख्यातौ पाणिनेः ख्यातिः, इतिपाणिनि (उदा० २।२।२) ।
३. नयते कात्यायनो व्याकरणे प्रमेयं निश्चिनोतीत्यर्थः (उदा० १।४।८२) ।
४. वदते पतञ्जलिर्व्याकरणे ज्ञानपूर्वकं वदतीत्यर्थः (उदा० १।४।९३) ।

एवं च चन्द्रः 'दोषा वाच्या गुरोरपीति' मतानुयायी दोषगुणपरीक्षकोऽपि परमविनम्रः' ।

दशमोऽध्यायः

चान्द्र पञ्जिका किं किं दधते ?

चान्द्रव्याकरणे चन्द्रस्य स्वोपज्ञवृत्तिं विहाय न किमप्यन्यद् भाष्यटीकादिकं प्रकाशितमुपलभ्यते । त्रिविष्टपात् (तिब्बत) महापाण्डितेन राहुलसांकृत्यायनमहाभागेन एकस्याश्चान्द्रव्याकरणटीकाया लेख-चित्रं समुपलब्धम् । तत्र लिखितमस्ति देवनागरीलिप्याम् स्थूलैरक्षरैश्चान्द्रव्याकरणटीकेति प्रतिपत्रम् । परन्तु तस्यैव लेखचित्रस्य प्रथमे (डी) पत्रे अतिसूक्ष्मदेवनागरी लिपौ लिखितं दृश्यते चान्द्रपञ्जिकेति । पुष्पिकायामपि पञ्जिकाशब्द एव प्रयुक्तो वर्तते ।

अत इदं निश्चप्रचम् यदस्या चान्द्रव्याकरणटीकाया नाम 'चान्द्रपञ्जिकेत्येवास्ति ।

पञ्जिका शब्दोऽयं टीकार्थे बौद्धसम्प्रदाये प्रसिद्धः । बोधिसत्वदेशीयजिनेन्द्रबुद्धिना लिखिताया 'न्यास'-नाम्ना विख्याताया: काशिकावृत्तिटीकाया अपि नाम काशिकाविवरणपञ्जिकैव वर्तते । 'पञ्जिका शब्दस्यार्थे पञ्चिकेत्यपि शब्दः साम्प्रतं प्रचलितो दृश्यते । कोशादौ 'पञ्जिका' 'पञ्चिके' त्युभावपि शब्दावुपलभ्येते । पाणिनीयधातु-पाठे पजिधातुः पञ्जिधातु र्वा नास्ति । अतः 'पञ्जिका' शब्दसाधनाय पाणिनीयै र्महत्कष्टमनुभूय शब्दोऽयं 'पृषोदरादीनि यथोपदिष्टम्' पा० ६।३।१०९ इति सूत्रेण निपातनेन साध्यते । **पच्यन्ते व्यक्तीक्रियन्तेऽर्था** अनया इति पञ्चिका । पचि व्यक्ती करणे (भ्वा० आ० से० सि० कौ० पृ० ४१९) धातोर्णकच् प्रत्यये निपातनेन चकारस्य जकारे टापि 'प्रत्ययस्थात्कात्००' पा० ७।३।४४ इतीत्वे पञ्जिका—शब्दः सिद्धयति । तथाचोक्तम् हेमचन्द्राचार्येण[1] पञ्जिका पदभञ्जिका । पच्यन्ते व्यक्तीक्रियन्ते पदार्था अनया इति । पञ्जिका नाम्नि पुंसि चे' इति णकः पृषोदरादित्वाज्जत्वे पञ्जिका । विषमाण्येव पदानि भनक्ति पदभञ्जिकेति ।

काव्यमीमांसायां राजशेखरोऽप्येवमेवाह विषमपदभञ्जिका पञ्जिका[2] तट्टीकाकारेण मधुसूदनमिश्रेणाप्येवमेवोक्तम् 'पच्यन्ते व्यक्तीक्रियन्तेऽर्था अनया इति पृषोदरादित्वात् साधुः ।[3] टीकायां पञ्जिकायां च यदर्थगतसूक्ष्मार्थ-पार्थक्यं वर्तते तत्प्रतिपादयता हेमचन्द्रेणोक्तम्—

"टीका निरन्तरव्याख्या,[4] पञ्चिका पदभञ्जिकेति ।

एवंच पूर्वोक्तव्युत्पत्या अर्थाभिव्यक्ति र्यथा भवति सा व्याख्या पञ्जिकेति सिद्धयति । भानुजिदीक्षिता-दयस्तु **पिञ्ज्यते (भाष्यते) अर्थोऽ** स्यामिति विग्रहे पिजि र्भाषार्थः (चु० उ० से० कौ० पृ० ४८८) धातोः गुरोश्च हलः

---

१. अभि० चि० २।१७० सकलपद पञ्जिका अ० को० रामाश्रमी टी० पृ० ६४४ टिप्पणी ।

२. काव्यमीमांसा० अ० २७ चौ० प्र० ।

३. तत्रैव टीकायाम् ।

४. शब्दकल्पद्रुमस्य भाग ३ पृ० १७) उद्धरणम् ।

(पा० ३।३। १०३) इत्यः पृषोदरादित्वात् (पा० ६।३।१०९) इकारस्य (पिघटकस्य) अकारः स्वार्थे कन् (पा० ५।-४।५) टाप् कात् पूर्वस्याकारस्य 'प्रत्ययस्थात्——पा० ७:३।४४ इतीत्वम् पञ्जिका इति सिद्धयति अथवा पिञ्ज-यति वा पिञ्जिका क्वुन् (उ० २।३२) प्रत्यये वोरकादेशे पृषोदरादित्वादिकारस्याकारे पूर्ववट्टाबादिकार्ये रूप-सिद्धिरित्याहुः ।[1]

इत्थं पचि धातोः पजि धातोः वा पृषोदरादित्वाद्रूपसिद्धिसंभावनायां कुत्रचित् काशिकापुस्तके न्यासस्य पञ्चिकेति चकारशोधनप्रयासो मुधैव, पञ्जिकेति जघटितस्यापि पाणिनीयत्वसिद्धेः ।

चान्द्रधातुसूत्रेऽपि पजिधातु र्नास्ति । तत्रापि पञ्चयते[2] पिञ्जयते[3] वा पृषोदरादित्वादेव पञ्जिका शब्दः साधनीयः पूर्ववत् ।

वस्तुतस्तु 'पञ्जिका शब्दः काशकृत्स्नव्याकरणेन सरलतया सिद्धयति । तत्र प्रथमे गणे (भ्वादि० २१३) **पजि धातुः हिंसायां गतौ च पठ्यते धातुसूत्रे** (१।२१३) तत्रैव टीकायां चन्नवीरकविकृतायामुदाहरणं दृश्यते पञ्जति प्रकाशते इत्यर्थः पञ्जुः महाद्वीपः पञ्जरम्-गृहम् इति अस्माद्धातोः विना कष्ट-कल्पनं पञ्जिका शब्दः अस्थिपञ्जर घटक 'पञ्जर शब्दश्च सिद्धयतः । हिंसाकर्थत्वात् 'भञ्जनार्थलाभात् पञ्जिका पदभञ्जिका' इमि विषयस्थलभञ्जि-केति च संगच्छते । अनयाऽर्थगतक्लिष्टताया भञ्जनं जायते । क्लिष्टता-हिंसनादर्थप्रकाशनम् सुतरां स्यादेव ।

शब्दकोशे[4] पञ्जधातोः सर्वधातुभ्यः इन् उ० ४।१२४ इतीन्प्रत्यये कृदिकारादक्तिनः ४।१।४५ वा० १ इति ङीषि पञ्जीति संसाध्य पंजी एव पञ्जिका इत्यर्थे क' प्रत्ययेन पञ्जिका शब्दो निष्पादितो वर्तते ।

अयं पूर्व निर्दिष्टः कोशदृष्टः पञ्जिकाशब्दसिद्धि-प्रकारः काशकृत्स्नव्याकरणरीत्यैव समर्थनार्हः ।

इत्थं पञ्जिकायाः कार्यसिद्धयति—अर्थव्यक्तीकरणम् अर्थप्रकाशनम् वा । योऽर्थो न गूढः स तु व्यक्त एव । अतएव तस्य प्रकाशनं प्रयोजनशून्यं पिष्टपेषणं च । अतः कठिनार्थस्यैव व्यक्तीकरणं फलवद् भवतीति विचार्य लक्षण-कारेण लक्षणं कृतम् 'विषमपदभञ्जिका पञ्जिका इति ।

किन्तु चान्द्र 'पञ्जिकायामस्यां सरलतमानामपि शब्दानां व्याख्या वर्तते । किंच काशिकावृत्ते विवरण पञ्जिकायामपि सरलानामपि शब्दानां व्याख्या दृश्यते । अतः विषयपदमात्रभञ्जिकात्वाभावात् पञ्जिकाशब्दोऽत्र भाषार्थक-पञ्जि धातो र्निष्पन्नोऽभिप्रेत इति ज्ञायते । तथैव चामरकोशव्याख्याकारेण भानुजिदीक्षितेन रामाश्रमीटीकायां व्याख्यातमित्यनुपदमेवोक्तम् । एवंच भाषाटीकावत् या टीका सरलशब्दा विषमस्थलभञ्जिका च भवेत्, सा टीका पञ्जिकेति निर्गलितोऽर्थः ।

नूतनहस्तलेखस्वरूपेयं चान्द्रव्याकरणपञ्जिका त्रिविष्टपे (तिब्बते) मिलितेत्युक्तम् । टीकेयं केनापि बौद्धेन लिखितेति ज्ञायते । तत्र प्रमाणानिः—१. पञ्जिका प्रारम्भे **'नमो बुद्धाय**[5]' इति गद्यवाक्ये बुद्धः प्रणतः पञ्जिका-कारेण । २. ततः[6]·····**वदाताय अनन्तगुणशालिने'**

---

१. अमरको० ३।५।७ श्लो०रामाश्रमी व्याख्या पृ० ६४३-६४४ ।
२. (चा० धा० सू० चु० ६०) ।
३. (चा० धा० सू०) (चु० २०) ।
४. शब्दकल्पद्रुमभाग ३ पृ० १७ एवं आप्टे सं० हि० को० ।
5. Manuscript Photo-Stet copy Page IB, Line I परिशिष्ट चित्र सं० १ ।
6. Manuscript photo-stet copy Page IB, Line I „ „ सं० १ ।

परानुग्रहदक्षाय बुद्धायास्तु नमः सदा'

इति मङ्गलश्लोकेऽपि स एव भगवान् बुद्धः प्रणतः ।

पञ्जिकाकारस्य नाम पूर्णचन्द्र इति प्रतीयते; यतो हि मङ्गलश्लोकानन्तरं लिखिते श्लोके पूर्णचन्द्रेति नामोपलभ्यते । श्लोकः स इत्थमस्तिः—

[1]**जयति ख्यात सत्कीर्तिपुत्रो'**
लक्ष्मण (पक्ष्मण) रत्नभूः
पूर्णचन्द्रः···वाचस्पतिरिवापरः

पञ्जिका समाप्तौ पुष्पिकायां च दृश्यते लिखितम् ।

[2]**पूर्णायां पूर्णचन्द्रविरचितायां पंजिकायां ।**
षष्ठोऽध्यायः समाप्तः' इति ।

अत्र पूर्णचन्द्रेति नाम्नः स्पष्टोल्लेखो वर्तते ।

निर्दिष्टश्लोकेन सम्भाव्यते तस्य पितुर्नाम लक्ष्मणरत्नः पक्ष्मणरत्नो वा प्रथमाक्षरस्य स्पष्टताऽभावेन संदिग्धत्वात् । मातुर्नाम सत्कीर्तिरासीदित्यपि तेनैव श्लोकेन गम्यते ।

पुष्पिकाग्रन्थेन प्रतीयते यत् पञ्जिकायाः एतस्या नाम 'पूर्णा' वर्तते ।

चान्द्रपञ्जिकेयमाषष्ठाध्यायसमाप्त्येवोलभ्यते । पञ्जिकैषा' चयः शरि द्वितीयः (चा० ६।४।१५८) इतीदं चान्द्रव्याकरणस्य षष्ठाध्यायस्यान्तिमं सूत्रं तद् वृत्तिं च विवृत्य समाप्ता । तत्र यत् पुष्पिकावाक्यम्'[3] पूर्णायां पूर्णचन्द्रविरचितायां पंजिकायां षष्ठोऽध्यायः समाप्तः' इत्युपलभ्यते तेनैतन्निर्णेतुं न शक्यते यदियं पञ्जिका भाषाभागमात्रमधिकृत्य कृताऽऽसीत्; पञ्जिकायाः समाप्तेरसूचनात् । किंच पञ्जिकायां षष्ठोऽध्यायः[4] समाप्तः इत्यनेन षष्ठाध्यायसमाप्तिरेव सूच्यते न तु व्याकरणस्य न वा वृत्तेर्न वा पञ्जिकायाः । यथा वाल्मीकिरामायणे सुन्दरकाण्डे द्वितीयः सर्गः समाप्तः इति वाक्येन द्वितीयसर्गमात्रस्य समाप्तिरवगता भवति तथा पञ्जिकायां षष्ठोऽध्यायः समाप्त इति वाक्येन षष्ठाध्यास्य समाप्तिरेव सूच्यते । अतो नानेन निर्णेतुं शक्यते यत् सप्तमाष्टमाध्याययोश्छान्दसयोः पूर्णा पञ्जिकाऽऽसीन्नवेति । अस्यां चान्द्रपञ्जिकायां स्वरेवैदिकप्रक्रियासूत्राण्युद्धृतानि दृश्यन्ते, अतश्चान्द्रव्याकरणे स्वरवैदिकसत्ता निश्चिता भवत्यनया पञ्जिकया परन्तु सा छान्दसभागीया पञ्जिका नेदानीमुपलभ्यते । अतो यद्यपि कथनमिदमतीव कठिनं यत्पूर्णचन्द्रेण तत्र पञ्जिका लिखिता न वा । लिखिताऽपि सा चान्द्रव्याकरणस्य छान्दसभागवदुपेक्षया लुप्तेति । तथापि लिखितायास्तस्या लोपो जात इति पक्ष एव बलवत्तरो दृश्यते । यदि पूर्णा नाम्नी पञ्चिकाऽप्यत्रैव समाप्ता स्यात्तदा तत्समाप्तिसूचकं वाक्यं' समाप्ता चेयं पंजिकेत्यवश्यमेव लिखितं स्यात् । पश्यति च पूर्णचन्द्रः अग्रेऽपि पञ्जिका लिखितव्याऽस्तीति तस्याः समाप्तिबोधकं वाक्यं स न लिखति । अथवा छान्दसभागे लिखिताऽपि सा बौद्धैर्लेखकैर्न प्रतिलिपीकृता, अनावश्यकत्वात् । अथवा येन कारणेन स्वरवैदिकप्रक्रियाभागसम्बद्धं चान्द्रव्याकरणं विलुप्तं, तेनैव कारणेन तत्सम्बद्धा 'चान्द्रपञ्जिका'ऽपि विलुप्ता । नमो विलोपमूलप्रकृत्यै उपेक्षायै भगवत्यै ।

---

१. Manuscript Photo-stete copy Pag IB Line I—2 ,, ,, ,, १ ।
२. Manuscript Photo-stete copy Fage 26B, ending line. ,, ,, ,, २ ।
३-४. लेख चित्र पृ० २६ बी अन्तिमतालपत्रस्यान्तिमा पङ्क्तिः । परिशिष्ट चि० सं० २ ।

कालविषपे नात्र किमपि स्पष्टं लिखितं दृश्यते । तथापि लिपिविकासविशेषज्ञैरेतादृशस्य लिपिस्वरूपस्य कालः खिष्टस्याष्टमी नवमी वा शताब्दीति मन्यते । अत एवेयं पञ्जिका खिष्टस्याष्टम्यां नवम्यां वा शताब्द्यां लिखिता, ततः पूर्वस्यां शताब्द्यां च निर्मिता भवेदिति सम्भाव्यते ।

चान्द्रवृत्तिपञ्जिकेयमधस्तनेनान्तःसाक्ष्येण न्यासात् प्राचीनतरेति सिद्धचतिः—तथाहि

'भृशं शोभते' 'भृशं रोचत' इत्यत्र अनभिधानाद् यङो निवारणं भाष्यकारेण कृतम् । तथाचोक्तम् 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (पा० ३।१।२२) इति सूत्रस्य महाभाष्ये—क्रियमाणेऽपि ह्येकाज्भलादि ग्रहणे यत्रैयकाचो हलादे श्चोत्पाद्यमानेन यङाऽर्थस्याभिधान न भवति, न भवति तत्रोत्पत्तिः । तद् यथा भृशं रोचते, भृशं शोभते इति ।

तदेवानुसृत्य काशिका[1]कारेण निर्दिष्टम् —

भृशं शोभते, भृशं रोचते इत्यत्र नेष्यते, अनभिधानात् ।

अत्र न्यासकारः 'व्यवस्थितविभाषया यङो वारणं कृतवान्' । उक्तंच तेन 'भृशं रोचते भृशं शोभत इत्यत्र नेष्यत' इति काशिकाप्रतीकमधिकृत्य न्यासे[2] 'तदर्थं वेत्यनुवृत्तस्य व्यवस्थितविभाषात्वं व्याख्येयम' इति ।

काशिका सर्वत्र चन्द्राचार्यदर्शितां पाणिनीय व्याकरणत्रुटिं पाणिनीयपद्धत्या समाधातुं यतते ।

'भृशं शोभते' भृशं रोचते इत्यत्र प्राप्तस्य यङो वारणाय पाणिनिना किमपि सूत्रं न रचितम् इति पाणिनीय व्याकरणदोषपरिहाराय चन्द्राचार्येण सूत्रं निर्मितं स्वव्याकरणे **'न शुभरुचः'** (चा० सू० १।१।४४) इति । काशिकाकारेण भाष्योक्तमनभिधानादनिष्टवारणात्मकं समाधानमनूदितम् । न्यासकारेण च लक्षणैकचक्षुष्कानां लक्षणमुखेन प्रवृत्तानां प्रयोगेऽनिष्टत्ववारणाय अनभिधानस्यापि शास्त्रसम्मतत्वप्रतिपादनाय व्यवस्थितविभाषाऽऽश्रिता ।

चान्द्रव्याकरणदर्शितपाणिनीयव्याकरणदोषसमाधानाय कशिकाकारेण यदनभिधानबलमाश्रितं तद् दूषितं दृश्यते चान्द्रपञ्जिकायामिह—([3]फोटो स्टेट कौपी नं० २ ए पंक्ति-६-७) तद् यथा न० शु० यङित्येव एकाच इत्यादिनाति प्रक्रम्य यङः प्रतिषेध उच्यते । शुभ शुम्भ[4] शोभार्थे । रुच[5] दीप्तौ । तङाना यथा पाठमिति[6] तङ् । लघो[7] रूपान्त्यस्येत्यदेङ् । अभीक्ष्णं [8]शोभते । पुनः पुनः शोभत इत्यर्थः । भृशं [9]रोचते । अत्यर्थं दीप्यत इत्यर्थः । ०००००००००।०००००००० **नानाभिधानमाश्रयितुं युक्तम् । अन्यथा शास्त्रारम्भवैफल्यं, विनापि शास्त्रेण प्रयोगाननुसरन्नविषये विधि र्न प्रवर्तत इति ।**

इदं हि चान्द्रपंजिकाकारस्य तात्पर्यं यद् विधेरनिष्टप्रसरो यदूयनभिधानेनैव वार्येत, तदा सकलानि निषेधसूत्राण्यपार्थकानि स्युः । अतः अभीक्ष्णं शोभते । भृशं रोचते इत्यादौ यङः प्रसक्तिवारणाय 'न शुभरुचः' (चा० १।१।-

---

१. काशिका (न्या० प०) ६।१।२२ ।
२. का० (न्या० प०) भाग-२ पृ० ३८२ ।
३. परिशिष्ट लेखचित्र सं० ३ ।
४. ६।३५ (चा० धा० सू०) ।
५. १।४६६ (चा० धा० सू०) ।
६. १-४-४६ (चा० सू०) ।
७. ६।२।४ (चा० सू०) ।
८. चा० वृ० प्रतीकः ।
९. चा० वृ० प्रतीकः ।

४४) इति सूत्रमारम्भणीयमेव। यथा विधिप्रसरवारणाय 'न भूसूधियोः' पा० ६।४।८५ इत्यादीनि सूत्राणि पाणिनिना कृतानि तथा यङः प्रसक्तिवारणाय पूर्वनिर्दिष्टमपि सूत्रं कर्तव्यमेव।

मन्ये, न्यासकारेण कशिकाग्रन्थसमर्थनबद्धपरिकरेण चान्द्रपञ्जिकाप्रोक्तं खण्डनं मनसि निधाय व्यवस्थितविभाषाश्रयणात्मकं समाधानं दत्तम्। एतेन सिद्धम् यत् 'न शुभरुचः' (चा० १।१।४४) इतीदृशस्य सूत्रस्य नूतनस्य नास्त्यावश्यकता सूत्रे 'वा' शब्दस्यानुवृत्तस्य व्यवस्थितविभाषास्वीकारेणापि सूत्रनिर्माणसमकक्षस्योपायस्योपलब्धेः।

इत्थं ज्ञायते यत् चान्द्रवृत्तिपञ्जिका न्यासात्प्राचीनतरा तद्दर्शिताया आपत्ते र्न्यासे समाधानाय प्रयतनात्।

आस्याश्चान्द्रपञ्जिकेति नाम श्लिष्टं वर्तते। एकतस्त्वेषा चान्द्रव्याकरणतद्वृत्त्योः पञ्जिकात्वादिदं नाम दधाति, अन्यतस्तु पूर्णचन्द्रेण निर्मितत्वाच्चान्द्रपञ्जिकेति कर्तृसम्बन्धित्वमपि स्वस्याः प्रकटीकरोति।

अस्याः शैली जिनेन्द्र बुद्धिरचित-काशिका-विवरणपञ्जिकावत् प्रसादगुणसम्पन्ना। प्रतीकावलम्बनं तद्रहस्यस्फोटनायावतरणविन्यासश्चोभयत्र समाने।

परन्तु प्रतीकग्रहण क्रमे चान्द्र पाञ्जिकायामेकं यद् वैलक्षण्यं दृश्यते तन्न्यासे न दृश्यते। न्यासकारेण जिनेन्द्रबुद्धिना वृत्तेः सम्पूर्णं सार्थकं च पदमेव प्रतीकरूपेण गृहीतम्। सूत्रं तु तेन प्रायः सम्पूर्णमेव प्रतीकीकृतम्; किन्तु चान्द्रवृत्ति-पञ्जिकायां पूर्णचन्द्रेण वृत्तेः पदं पदांशः पदांशांशो वर्णो वा यथावसरं सर्वं किमपि प्रतीकत्वेन गृहीतम्। सूत्रस्य तु तेन आदिमोलघिष्ठएवांशः प्रतीकीकृतः।

एतादृशस्य वर्णात्मकस्य प्रतीकस्योपादानात् झटिति विषयोपस्थितेरभावाच्चान्द्रसूत्रवृत्तिभ्यां पृथगवस्थिताया अस्याः पञ्जिकाया अध्ययने कष्टमपि भवति। यदीयमपि चान्द्रसूत्रवृत्तिभ्यां सह प्रकाशिता स्यात्तदेदं कष्टं न स्यात्। एतेनास्याः प्राचीनतरत्वं सिद्धचति; यतो हि प्रतीकग्रहणरीतावत्र तथा विकासो न दृश्यते यथा न्यासे। अनुस्वारलेखोऽत्र बहुत्र लेखक-प्रमादं सूचयति, अवसाने (पूर्णविरामस्थले) अनुस्वारलेखात्।

२. उदाहरणप्रत्युदाहरणानां ससूत्रनिर्देशसिद्धिरप्युभयत्र समा। न्यासकारेण यत् पाणिनीयसूत्राणि विन्यस्तानि चान्द्रपञ्जिकाकारेण च चान्द्रसूत्राणि समुपस्थापितानि। चान्द्रपञ्जिकायामुपस्थापितानां सूत्राणां संख्या भूयसी वर्तते। प्रायः चान्द्रसूत्राणां प्राचुर्येण प्रचाराभाव इति कृत्वा पूर्णचन्द्रः सर्वत्र सूत्राणि प्रास्तौत्।

पूर्वत्र वर्णिता साधनप्रक्रिया यदुत्तरत्र प्रयोगे प्रयोगेषु वा तुल्या तदा पूर्ववदिति संक्षिप्तीकरणमपि कृतम्।

३. न्यासोऽपि वर्तते सरलः किन्तु चान्द्रपञ्जिकेयं सरलतायामद्वितीयः। यत्पदमतिगूढं तदेव नात्र व्याख्यातं चान्द्रपञ्जिकायाम्, अपितु सरलातिसरलमपि यथायथं पर्यायदानेन लक्षणकरणेन विवृत्या वाक्यशेषेण वा नितरां स्पष्टीकृतम्।[1]

४. सपदकृत्यैषा पञ्जिका.

इत्थमस्याः पञ्जिकाया वैशिष्ट्यदमस्ति।

१. पञ्जिकेयमतिसरलशैल्या लिखितास्ति।

२. अर्थप्रतिपादनपद्धतिरतिप्रौढाऽस्याः।

३. वृत्तिनिष्ठजिज्ञास्यानामर्थानामवतरणसहितव्याकृतिकारिकेयम्।

४. प्रतिपदकृत्यज्ञापिका।

५. अधिगमितयाथातथ्या च वर्तते।

---

१. द्रष्टव्यम्—२६३ संख्यके पृष्ठे गति र्गमनं, कुटिलस्य भावः कौटिल्यमित्यादि चान्द्रपञ्जिकाविवरणम्। परिशि० (चित्र सं० ३।

चान्द्र पञ्जिकायां पदव्याकृतिकाले प्रकृतिरूपेण ये धातवोनिर्दिष्टा स्तेषां च येऽर्थाः प्रोक्तास्ते सर्वे चान्द्र-धातुसूत्रेपठिताः। इत्थं पञ्जिकेयं चान्द्रव्याकरणस्य सम्पूर्णतायाः स्पष्टं शब्दचित्रमुपस्थापयति।

पूर्वोक्तानां तत्थ्यानामधिगमनाय न्यासे चान्द्रवृत्तौ चास्यां प्रतिपादितस्य तत्समकक्षस्यान्यस्य च वैलक्षण्यस्य च परिज्ञानायाधस्ताद् वृत्तिद्वयस्य केचन गद्यभागा उपन्यस्यन्तेः—

नित्यं कौटिल्ये गतौ पा० ३।१।२३ सूत्रस्य (न्यासः) काशिकाविवरणपञ्जिकेत्थमस्ति[1]।

नित्यं कौटिल्ये गतौ। धातोरित्येव। गताविति, प्रकृतिविशेषणमेतत्। गतौ वर्तमानाद्धातोरित्यर्थः। अमुमेवार्थं पर्यायान्तरेणाचष्टे-गति-वचनाद्धातोरिति। चंक्रम्यते, दंद्रम्यत इति। 'क्रमु पाद विक्षेपे' 'द्रम हम्म मीमृ गतौ' 'नुगतोऽनुनासिकान्तस्य' इति नुगागमः। योऽल्पीयस्यध्वनि गतागतानि करोति स कुटिलां गतिं सम्पादयन् चंक्रम्यते दंद्रम्तत इति चोच्यते। अथ नित्यग्रहणं किमर्थम्, यावताऽनभिधानादेवात्र वाक्यं न भविष्यति ? न हि चंक्रम्यते इति वृत्तेरर्थं कुटिलं क्रामतीति वाक्यं शक्नोति गमयितुम्। तथाहि कुटिलं क्रामतीति वाक्यात् संशयो भवति-किं गतिकौटिल्यम् ? उत मनःकौटिल्यमिति। चक्रम्यत इति वृत्तौ त्वसंशयं गतिकौटिल्यमेव गम्यते, इत्याह नित्यग्रहणमित्यादि। गतिकौटिल्यं विषयः। तत्र यङो नियमोऽर्थः प्रयोजनं यस्य

चान्द्रपञ्जिका (फोटो स्टेट कौपी शीट सं० २-ए भा० १ पंक्ति १-३)।

गत्यर्थात् कौटिल्य एव (चा० सू० १।१।४३) **गति र्गमनं**[2]। **गतिरर्थो यस्येति गत्यर्थः। कुटिलस्य भावः**[3] **कौटिल्यं। वक्रगमनं। कौटिल्यादन्यत्र यङ् निषेधार्थमेवकारकरणमित्याहुः।** 'न भृशाभीक्ष्ण्यमात्र[4] इति। अन्यथैवकारं विनाऽधिकविधानार्थम् विज्ञायते। तथा च कौटिल्यादावपि भृशाभीक्ष्ण्यमात्रे पूर्वेण यङ् स्यात्। चङ्क्रम्यते[5]। क्रमु[6] पादविहरणे। कुटिलं क्रामतीति पदं। द्विवचनादि **पूर्ववत्**। ०००००। दंद्रम्यते। अम[7]द्रमहम्य मीमृ गतौ। ०००००००। अन्यत्रेति।[8] कौटिल्यात्[9]। पुनः पुनः क्रामतीत्याभीक्ष्ण्यमाह। कर्तरि[10] शप्। क्रमोऽनङान[11] इति दीर्घः[a]।

(२) लुप-सद-चर-जप-जभ-दह-दश-गृभ्यो भावगर्हायाम् (पा० ३।१।२४) सूत्रस्य न्यासः—

लुप सद चर जप जभ दह दश गृभ्यो भावगर्हायाम्। 'लुप्लृ छेदने', 'सद्लृ विशरणगत्यवसादनेषु', 'अभ्र-बभ्रचरगत्यर्थाः' 'जप जल्प व्यक्तायां 'वाचि', 'जभ जृभी गात्र विनामे' 'दह भस्मी करणे' दंश दंशने' गृ निगरणे। धात्वर्थं[12] गर्हायामित्यनेन भावगर्हायामित्यस्यार्थमाह। गर्हितं लुम्पतीति।[13] गर्हितमिति क्रियाविशेषणमेतत्। तेन

---

१. न्यासपदमञ्जरीसहिता काशिका (भाग २ पृ० ३८३-३८४)।
२. गमनम् इति मकारान्तेन भाव्यम् हल्परत्वाभावात्' हलि मः चा० ६।४।८ इत्यस्याप्राप्तेः)।
३. कौटिल्यं। पूर्णविरामचिह्नतः पूर्वमनुस्वारो लेखकप्रभावात्। एवमन्यत्रापि बोध्यम्।
४. वृत्तिप्रतीक एषः।
५. एषोऽपि वृत्ति प्रतीकः।
६. चा० धा० सू० १।१५७।
७. चा० धा० सू० १।१५५।
८. वृ० प्र०।
९. वाक्यशेषप्रत्यायकमेतत्।
१०. चा० १।१।८१।
११. चा० ६।१।१०४।
१२. का० प्रती०।
१३. का० प्रती०।
a. परिशिष्टलेख सं० ३।

भावगर्हात्र गम्यते। गर्हितत्व छेदनस्य, निरर्थकत्वात्, दोषदुष्टत्वाच्च। एवमुत्तरत्रापि गर्हितत्वं वेदितव्यम्। चंचूर्यते 'चरफलोश्च'[1] इति नुक्। उत्परस्यात[2] इत्युत्वम्। 'हलि[3] च' इति दीर्घः। जंजप्यते। जप जभ इत्यादिना नुक्। दंशेरनुनासिकलोपं कृत्वा निर्देशो ज्ञापयति यङ् लुक्यप्यनुनासिकलोपो भवति। दंदशीति निजेगिल्यत[4] इति। 'ऋत [5]इद्धातोः' इतीत्वम्, रपरत्वम्, द्विर्वचनम्, गिर्य शब्दस्य रेफयकारबोस्तु हलादिशेषेण निवृत्तिः, पूर्ववत् गुणः, 'ग्रोयङि[6]' इति लत्वम्।

साधु[7] जयतीति। नात्र धात्वर्थस्य गर्हा किं तर्हि ? प्रशंसा। मन्त्रं[8] जपति वृषल इति। अत्र साधनस्य वृषलस्य गर्हा गम्यते; वृषलस्य—शूद्रस्ये वैदिकमन्त्रजाप्यं प्रत्यन[9]धिकारात्।

लुप्-सद-चर-गृ-जप-जभ-दह-दशो-गर्ह्यात् चा० १।१।४३ सूत्रस्य **चान्द्रवृत्तिपंजिका यथा (क) लुप्० यङि त्येव।** लुप्लृ छेदने ६।६। सद्लृ विसरणे ६।१२० (चा० धातुसूत्रपाठे अवसादे इति दृश्यते)। अभ्र वभ्र मभ्र चर गत्यार्थाः १।१६०। गृ निगरणे ६।१०६। रप लप जप जल्प वचने १।१३८। **जभ** जृभीगात्रविनामे[10]। दह भस्मीकरणे १।३०३। दंश दशने १।३०१ गर्ह्यार्थमिदं यङ् लुक्यपि यथा स्यात्। दंदशीति। गर्हणीयं (निन्द्यं) कुत्सितमिति यावत्। एतद् द्वयं (गर्ह्यादेवेति च) लुपादिप्रकृते विशेषणं[11]। छेदादे**रनर्थकत्व-दोष** दुष्टत्वादिना गर्हा। यदापि दुष्टेनाभिसन्धिना जपादिः क्रियते तदापि तद्दुष्टाभिसन्धिनि गर्हात्वात्। गर्हायामेवेति भावग्रहणं संक्रन्द्यम्। ००० संग्रहो यथा स्यादिति न क्रियते। लोलुप्यते[12]। ङ्कितीत्यदेङभावः[13]। चंचूर्यत[14] इति। चरफलो[15]रिति नुक्।

---

१. पा० ७।४।८७।

२. पा० ७।४।८८।

३. पा० ८।३।७७।

४. का० प्रती०।

५. पा० ७।१।१००।

६. ८।२।२०।

७. का० प्रती०।

८. का० प्रती० ३।१।२४।

९. का० न्या० पद० भाग २ पृ० ३८४-८५।

१०. "जभ जभी गात्र विनामे" इति न दृश्यते चा० धातुपाठे। जभ धातुः पा० धातु पाठेऽपि नोपलभ्यते। जभी तु तत्र वर्तते भ्वादौ। एतेन ज्ञायते पूर्णचन्द्रेण दृष्टमिदं धातुसूत्रमिदानीं विलुप्तम्।

११. अत्राप्यनुस्वारः लेखकप्रमादात्।

१२. ११, ७ चा० वृ० पञ्जिका प्रतीकाः।

१३. चा० ६।२।११।

१४. (क) चान्द्र पञ्जिकायां सूत्रप्रतीकमुभयत एकैकं वर्तुलविन्दुस्वरूपं चिह्नं दृश्यते।

१५. चा० ६।२।१३६।

ति[1] चोदत इत्युत्वम् । धातो[2] र्वो रनचीको दीर्घः । निजेगिल्यते । ऋत[3] इद्धातोः । रपरत्वम् । ग्रो [4] यङीति लत्वम् । जंजप्यते । जपजभदह[5] दशभञ्जपशामिति नुक् । लुम्पति । लुम्मात्रस्य विवक्षितत्वान्नात्र गर्हा । [6] तुदादिभ्यः शः । शे [7] मुचादीना मिति नुम् । नश्चा[8] नन्त्यस्य झलीत्यनुस्वारः । अनुस्वारस्य[9] ययि यम् । ०००००० भृशाभीक्ष्ण्यमात्रवृत्तिभ्यः । जपति वृषलः । वृषलत्वं साधनस्य गर्हा (फोटो स्टेट[b] कापी शीट सं० २ ए भाग-१ पंक्ति ३।६) ।

पूर्वोक्तानि सर्वाणि वैशिष्ट्यानि, मन्ये, ऊपरि निर्दिष्टोद्धरणसन्दर्भद्वये समागतानीति ।

अवतरणमुखेन शङ्कासमाधानरीत्या च सूत्र-रहस्यस्फोटनस्याप्येकमुदाहरणमधस्तादीयमानं विलोक्यताम्—

चान्द्रसूत्रवृत्तिपञ्जिकेयम् (लेख चित्र सं० २ ताल 'पत्र सं०२ पङ्क्ति ३-८) ॥प्रयो०॥ णिजित्येव । प्रयुङ्क्त इति प्रयोजकः । प्रयुज्यमानश्च क्रियाया योग्यो निवर्तको वा । सर्वकर्तृत्वं नातिक्रामतीति सामर्थ्यात् कर्तु-व्यापारयिता प्रयोजक इत्याह कर्तारमित्यादि । तद्व्यापार इति प्रयोजकव्यापारे प्रेषणा ०षणादिलक्षणेणिच् भवतीति णिचोऽसमर्थनिर्देशो न प्रकृतिविशेषणमि···। डुकृञ् करणे हृञ् हरणे । कर्तुं प्रयुङ्क्त इति णिच् । इत्यादौ तु रपरः । लडादि पूर्ववत् । कर्तापि करणादीन् प्रयुंजानः प्रयोजको भवतीति प्रसंगं चोदयन्नाह-ननु चेत्यादि । तद्-व्यापारेऽपीति कर्तृव्यापारेऽपि परिहाराय प्रयोजक इत्यादि । प्रयोजकमात्रग्रहणे व्यापार इत्येव णिच्विषयः स्यात् किम्प्रयोजकग्रहणेन । तत्क्रियमाणं विशिष्टविषयं विज्ञायते । यो लोके प्रयोजकत्वेन रूढः स इह प्रयोजकः कर्तु-व्यापारयिता कर्ता तु करणादीन् प्रयुंजानोऽपि कर्तृतयैव प्रसिद्ध इति तद्व्यापारे णिज् भविष्यति । इतश्च कर्तृ-व्यापारेऽप्यनेन णिज्विधौ चोरणादिव्यापारस्य कर्तृसम्बन्धित्वाच्चुरादीनामप्यनेन णिचि सिद्धे पृथक् चुरादिभ्यो-णिजिति वचनमनर्थकं स्यात् । इति ।

इत्थमत्र करणादीनां प्रयोजकत्वात् कर्तुः प्रयोजकत्वेऽपि तद्व्यापारे णिचोऽति प्रसक्तिः कया सरलशैल्या दर्शितवारितेति ।

शङ्कासमाधान पुरस्सरवृत्तिरहस्यस्फोटनं चान्द्रपञ्जिकायां कियत्कीदृशं च सरलं बालावबोधक्षममिति न प्रमाणान्तरमपेक्षते, अनुभववेद्यत्वात् ।

स्वरवैदिकप्रकरणे चान्द्रव्याकरणे नास्तामिति डा० वेल्वाल्कर डा० एस० के० दे० प्रभृतिमहोदयानां

---

१. चा० ६।२।१३७ ।
२. चा० ६।३।१०८ ।
३. चा० ५।४।७ ।
४. चा० ६।३।४३ ।
५. चा० ६।२।१३५ ।
६. चा० १।१।९२ ।
७. चा० ५।४।११ ।
८. चा० ६।४।९ ।
९. चा० ६।४।१५१ ।

B. परिशिष्ट लेख चित्र सं० ३ ।
C. ,, ,, चित्र सं ४ ।

मतम्, बौद्धत्वाच्चन्द्रगोमिना स्वरवैदिकप्रकरणे न रचिते। अतएव चान्द्रव्याकरणं षष्ठाध्यायपर्यन्तमेव प्राप्यते। षष्ठाध्यायान्ते लिखितं च दृश्यते समाप्तं चेदं चान्द्रव्याकरणं शुभम् इति तेषामभिप्रायः।

वृत्तौ च चान्द्रव्याकरणे स्वरवैदिकप्रकरणसद्भावानुमापकानेकप्रमाणान्युपलभ्यन्ते, बाह्यसाक्ष्याण्यपि यत्र तत्र दृश्यन्तेऽतोऽमुमीयते स्म स्वरवैदिकप्रकरणसत्ताऽस्माभिः। एतस्य विस्तरेण विवेचनमत्रैव प्रबन्धे स्वतन्त्रताध्याये कृतम्।[1]

इत्थमनुमीयमानतदाभ्यायद्वयसत्ताऽप्यनया टीकयाऽऽप्तवाक्यैरपि प्रमाणीकृता। अत्र हि तदाध्यायद्वयस्य सूत्राण्यपि प्राप्यन्तेः तथाहि—

तव्यानीयरकेलिमरः (चा० सू० १।१।१०५) इति सूत्र वृत्तौ 'तव्यस्य वा स्वरितत्वं वक्ष्यामः'[2] इति प्रतीकमधिकृत्य प्रोक्तम् पञ्जिकायां पूर्णायां पूर्णचन्द्रेण कृतायाम्—"तव्यस्य तकारानुबन्धकोऽपि स्वरितो यथा स्यादितीष्टः। स कथं स्यादित्याह—तव्येत्यादि—**ड्यतव्यौ स्वरितावित्यनेन**'।[3]

चन्द्रेण वामदेव्यम् इति साधनाय 'वामदेव्यम्' ३।१।९ इति सूत्रं स्वीक्रियते। तेन च निपातनेन 'वामदेव' शब्दात् केवलं 'ड्य प्रत्ययो विधीयते। पाणिनिना ४।२।८ वामदेवाड् ड्यड्ड्यौ इति सूत्रं निर्माय प्रत्ययद्वयं विहितम्। तत्रैकस्तकारडकारानुबन्धविशिष्टः; अपरस्तकारानुबन्धरहितः डकारमात्रानुबन्धसहितः, डानुबन्धस्य फलमकारलोपस्तकारानुबन्धस्तु स्वरितत्वविधानार्थः। वामदेव्यमित्यत्र यदा ड्यप्रत्यय स्तदा स स्वरितत्वरहितः, यदा तु स ड्यत्प्रत्ययेन सिद्धस्तदा तित्स्वरितम् पा० ६।१।१८५ इति स्वरितत्वसहितः। एवं कर्तव्यमित्यत्र तव्य-प्रत्यय-निष्पन्ने स्वरितत्वाभावस्तव्यता निष्पन्ने च स्वरितत्वम् सिद्धयति पाणिनीयतन्त्रे।

चन्द्राचार्येण तु ड्यतव्यावेव प्रत्ययौ विहितौ। तकारानुबन्धप्रयुक्तकार्यस्य स्वरितत्वस्य विधानाय नूतनं सूत्रं रचितम्—'ड्यतव्यौ स्वरितौ' इति। विकल्पप्रकरणेऽस्य सूत्रस्य पाठात्' 'वा' नुवृत्त्याऽस्य विकल्पत्वं सिद्धयति। तथा चोक्तम्—वृत्तौ तव्यस्य 'वा' स्वरितत्वं वक्ष्यामः इत्यत्र वेति। एवंच वामदेव्यशब्दे कर्तव्यादितव्यप्रत्ययान्तेषु च शब्देषु स्वरितत्वास्वरितत्वयोरुभयोरपि सिद्धिः सम्पादिता।

वृत्ति वाक्येन[2] स्वरितत्वविधायकस्य सूत्रस्य केवलमनुमानमासीदिदानीमधीतेन पञ्जिका[3]ग्रन्थेन **ड्यतव्यौ स्वरितौ** इति सूत्रस्वरूपमपि साक्षात्कृतम्। सूत्राङ्कलिखनस्य प्रथा प्राचीनसंस्कृतपण्डितेषु नासीत्। अतः पञ्जिकायामध्यायपादाङ्कादिकं न लिखितमस्ति।

अन्यापि स्वरसूत्रत्रयी चान्द्रपञ्जिकायामस्यामुपलब्धा। तथाहि पुशकितकिचतियतिशसिसहियजः (चा० १।१।१०८) सूत्रस्य जनिवधोरिगुपान्तानां च स्वरं वक्ष्यामः, 'इति वृत्तिवाक्तगतं' जनिवधोरिति प्रतीकमादाय स्वशैल्यनुसारेण स्वरविधायकं सूत्रत्रयम्' **इगुपान्त्य-तृ-वृ-समु दुह-जन वधोण्यतः** इति**यावदुपात्तस्य** इति **तित्** इति च लिखितम्। उक्तं च तेन इगुपान्त्य तृ वृ समु दुह जन वधो ण्यत इत्यादुदात्तम्। यावदुपात्तस्येति नियमादादुदात्तनिवृत्या तिदिति स्वरितत्व वक्ष्यतीति।[4]

---

१. द्र० अस्यैव शोधप्रबन्धस्य द्वितीयभागस्थः चतुर्थाध्यायस्य 'ख' भागः।
२. तव्यस्य वा स्वरितत्वं वक्ष्यामः (चा० १।१।१०५ सू० वृत्तिः)।
३. पा० लेखचित्र पृ० २ बी० तालपत्र सं० ९ पंक्ति ३ परिशिष्टचित्र सं० ५।
४. पाण्डुलेखचित्र पृ० २ बी तालपत्र ९ पंक्ति-५ परिशिष्टचित्र सं० ५।

एतेन ग्रन्थेन स्वराध्यायस्य चान्द्रव्याकरणे सत्ताऽऽसीत्, चन्द्राचार्येण स्वरसूत्राणि लिखितानीति सर्वं सिद्धचति।

चान्द्रवृत्तौ (अमङ्णनम् चा० प्र० सू० ६) मकारेण पञ्चप्रत्याहाराश्चान्द्रव्याकरणे निर्मिता जायन्ते अम्, यम्, अम्, मम् ङम् इति तत्र मम् प्रत्याहारस्योदाहरणरूपेण विनूमतो र्मम् इति सूत्रमुपन्यस्तम्। भाषाभागे तत्सूत्रमन्विष्यापि नाप्यते। अतोऽनुमीयते यदिदं सूत्रं वैदिकभागस्य (सप्तमाध्यायस्य) भवेदिति।

एतदपि सूत्रं चान्द्रपञ्जिकायां दृष्टिगोचरं जातम्। 'मम्'[1] इति प्रतीकमादाय पञ्जिकाकारेण स्वप्रतिपादनपद्धत्यनुसारेण स प्रयोगो लिखितः यत्र 'विनूमतो र्मम्' विधानं जातम्। तस्य सूत्रस्य च सम्पूर्णशरीरमपि प्रस्तुतं यस्य' विन् मतो र्मम्, इति भागोऽस्ति। 'मम्' इति प्रतीकस्तु स्पष्टतया पठितः किन्तु स प्रयोगस्तच्च सूत्रं बहु प्रयस्यापि अस्पष्टलेखचित्रत्वात्साम्प्रतं यावत् पाठ्ये न जाते। अतएव तयोः स्वरूपमत्र न दीयते। पठन-प्रयासश्चलत्यखण्डम्। यदाऽस्या श्चान्द्रपञ्जिकायाः सम्पूर्णलेखचित्रं स्पष्टं पठितं स्यात् तदा न केवलं चान्द्रव्याकरणस्यैव बहूनि रहस्यान्यपि तु अन्येषामपि व्याकरणानामनेकविधानि तिरोहितानि तत्वानि ज्ञातानि भविष्यन्ति।

---

१. पाण्डुलेख चित्र शीट नं० १ डी० तालपत्र-८ पङ्क्ति-३। परिशिष्ट चित्र सं० ६

एकादशोऽध्यायः

उपसंहारः

चन्द्रगोमिनः प्रभावः परिवर्तिषु सर्वेषु वैयाकरणेषु यथायथं दृश्यते। काशिकाकारादौ पतितः स प्रभावः पूर्वाध्यायेषु निरूपितः। चान्द्रव्याकरणस्य सर्वाधिकः प्रभावो यत्र दृश्यते तदस्ति, भोजराजरचितं सरस्वतीकण्ठाभरणम्। प्रायोऽत्र चान्द्रव्याकरणस्य सर्वविधं संशोधनमात्मसात्कृतं विलोक्यते[1]। यद्यपि भोजराजेन पाणिनीयसंज्ञाः[2] स्वव्याकरणान्न निष्कासितास्तथापि तासु कासांचित्स्थाने संज्ञि[3]प्रयोग इहोपलभ्यत एव। सर्वत्राधिसूत्रमेव वार्तिकादिनिर्दिष्ट-शब्दानां समावेशस्य या पद्धतिश्चन्द्रेणोद्घाटिता साऽत्र तुन्दिलत्वं गता[4]। सरस्वती-कण्ठाभरणे परिभाषालिङ्गानुशासनोणादि-गणपाठाः सूत्रेष्वेव समाविष्टाः। समाविष्टगण[5] पाठानि तत्तत्सूत्राण्यस्य व्याकरणस्य कण्ठस्थीकरणकठिनानि जातान्यवश्यं, तथापि गणपाठाध्यायने विद्यमानोपेक्षाया दूरीकरणोपायः स एव। समाविष्टगणपाठानां बहूनां सूत्राणामतिदीर्घशरीरत्वदोषपरिहाराय भोजेन प्रायस्तथाविधस्यैकस्य सूत्रस्य स्थाने द्वित्राणि ततोऽप्यधिकानि वा सूत्राणि[6] कृतानि। इदमत्र चान्द्रव्याकरणस्य संक्षिप्तीकरणशैलीविपरीतं दृश्यते। चन्द्राचार्येण विशालकलेवराणां सूत्राणां तनूकरणाय नूतनो नूतनो गणः कल्पितः (चान्द्रगणपाठशीर्षकेऽध्याये सर्वमिदं निरूपितम्) किन्तु भोजेन पाणिनीयचान्द्रोभयगणपाठघटितसूत्राणां स्थाने प्रातिस्विकरूपेण तत्तच्छब्दनिवेशाद् विशालशरीराणि सूत्राणि निर्मितानि। इत्थमत्र सूत्रशैल्यां व्यासशैली तद्व्याकरणद्वयीतोऽतिरिच्यते। सरस्वतीकण्ठाभरणेऽपि धातुगणावलम्बितानि सूत्राणि अपरिवर्तितान्येव दृश्यन्ते यथा तुदादिभ्यः शः (स० क० १।३।११६ स्वादिभ्यः श्नुः १।३।११९ इत्यादिषु। अतः एतेन शब्दानुशासनात् पृथग् रचनीयो धातुपाठो रचितः। चान्द्रव्याकरणवदिहापि अर्थवद्ग्रहण इत्यादयः परिभाषा अपि सूत्ररूपेणैव पठिताः। किन्तु चान्द्रपरिभाषावर्णोणादिधातुसूत्राणां संख्याः शब्दानुशासनसूत्र-संख्यायां न मिश्रिता, सरस्वतीकण्ठाभरणे तु धातुपाठं विहाय सकलव्याकरणज्ञानोपयोगितत्वानां सूत्ररूपेण संग्रन्थनं तेषामष्टाध्याय्यां समावेशनं च दृश्यते। इत्थमत्र ६४११ सूत्राणि दृश्यन्ते।

---

१. द्रष्टव्यानि (स० क० १।२।३४, ३५, ३७।१।३।२, २७, ३५, ३६, ७१, ७६, ८० इत्यादीनि परश्शतानि सूत्राणि।

२. स० क० ६।१।१४३, ६।१।१७, ६।१।११५, ३।१।४ इत्यादिषु पाणिनीय संज्ञा एव व्यवहृताः।

३. स० क० १।३।७८ इत्यत्र घुसंज्ञा स्थाने चा० सू० १।१।६२ इत्यत्र दाधासंज्ञिप्रयोगः।

४. स० क० ३।१।७१ स० क० १।३।३५।

५. द्रष्टव्यानि स० क० ३।४।२-१३,४।२।११३-१३६, ४।३।५८-६४ इत्यादीनि सूत्राणि।

६. यथा (पा० सू० १।४।७४ चा० २।२।३६) सूत्रस्यैकस्य स्थाने स० क० १।१।१५१-१५३ इति सूत्रत्रयम्। (चा० सू० ३।१।३७) अस्य स्थाने (स० क० ४।२।४५-५३) सप्त सूत्राणि।

प्रत्याहारसूत्रसहितानां पाणिनीयसूत्राणां संख्या ३९९५ वर्तते[1] । उपलब्धचान्द्रव्याकरणस्य सूत्राणां संख्या ३०९९ दृश्यते । तुलनायां भोजनव्याकरणसूत्रासंख्याऽतिभूयसी । अस्यां संख्यावृद्धौ कारणं शब्दानुशासनोपयोगि सकलवचनानां सूत्रेषु सख्यानन्त्वस्त्येव, चान्द्रसंशोधनस्वीकरणमप्यस्ति ।

सरस्वतीकण्ठाभरणेऽष्टावध्यायाः प्रत्यध्यायं च चत्वारः पादाः सन्ति । अत्र च स्वरवैदिकप्रक्रियाऽष्टमाध्याये दृश्यते । अनेन तुलनात्मकसमीक्षणेन ज्ञायते यत् सरस्वतीकण्ठाभरणे शब्दानुशासनोपयोगिसकलरचनानां सूज्ञीकरणपद्धतीश्चान्द्रव्याकरणानुभावः अन्तिमाध्याये छान्दसविधिनिवेशेऽपि चन्द्र एव प्रेरकः । सूत्ररचना प्रकरणविच्छेदादिविधौ भोजेन यथा चान्द्रव्याकरण[2]माश्रितं न तथा पाणिनीयम् । पाणिनीयशब्दानुशासनस्याध्ययनं चान्द्राव्याकरणसरस्वतीकण्ठाभरणयोस्तुलनात्मकाध्ययनाभ्यामेव प्रतिष्ठितं भवतीत्यालोचकानां[3] कथनं यथार्थम् ।

व्यापकत्वादनन्त[4]प्रयोगविषयत्वाद् [5]ब्रह्मपदवीमधिगच्छतः शब्दस्य समस्तं स्वरूपं न केनाप्येकेन व्याकरणेनाधिगमयितुं प्रभूयतेः मिलितेनान्योन्यपूरकेण व्याकरणवृन्देन माध्यमीकृतेनैव तत्स्वरूपस्य निकटं यथाकथंचिद् गन्तुं शक्यते जिज्ञासुभिरिति दिक् ।

---

१. चतुस्सहस्री सूत्राणां पञ्चसूत्रीविवर्जिता अष्टाध्यायी पाणिनीया सूत्रैर्महेश्वरैस्सहः—स्वर-सिद्धान्तचन्द्रिका—सि० कौ० (तत्त्व०) पृ० ७८० ।

२. रुधादीनां श्नम् (चा० १।१।९३ स० क० १।३।११७) तनादिभ्य उः (चा० १।१।९४ स० क० १।३।११८) अदादिभ्यो लुक् (चा० १।१।८३ स० क० १।३।१०८) इत्यादीनि सूत्राणि चान्द्रे सरस्वती कण्ठाभरणे च समानानि । पाणिनीयसूत्राणि तु अत्र सन्तिः 'रुधादिभ्यः श्नम्' (पा० ३।१।७८) तनादिकृञ्भ्य उ० पा० (३।१।७९) अदि प्रभृतिभ्यः शपः २।४।७२ इति ।

३. सं० व्या० शा० का इति० भा० १ पृ० ५५६ ।

४. महान् शब्दस्य प्रयोग विषयः—महाभाष्यपस्पशा० पृ० ५२ ।

५. वाक्यपदीयम्—का०—१ ।

उद्धृतानां मुख्यग्रन्थानां सूची

ग्रन्थनामानि — प्राप्तिस्थानानि

१. अभिधान चिन्तामणि-कोशः—मोतीलाल बनारसीदासः दिल्ली ।

२. अमरकोषः (रामाश्रमी टीका)—„ „ „ ।

३. अष्टाध्यायी—चौखम्बा संस्कृत सिरीज, वाराणसी ।

४. इत्सिंग की भारत यात्रा—किताब महल, दिल्ली ।

५. उद्योत टीका (महाभाष्यस्य)—चौखम्बा प्र० वाराणसी ।

६. A History of Sanskrit Literature—Varadachari.

७. औचित्यविचारचर्चा—चौखम्बा सं सिरीज, वाराणसी-१९६४ ।

८. काव्यालङ्कारः—भामहः, चौखम्बा प्र० वाराणसी ।

९. काव्यप्रकाशः—भाण्डारकर इंस्टिट्युट, पूना १९६५ विश्वेश्वराचार्य टीका ज्ञानमण्डल, काशी, १९६० ।

१०. कुवलयानन्दः—अप्पय्यदीक्षितः डा० भोलाशङ्करव्यासकृतटीकः चौखम्बा वाराणसी, १९६३ ।

११. किरातार्जुनीयम्—निर्णयसागर, बम्बई ।

१२. काशिका (भूमिका संहिता)—चौखम्बा प्रकाशन, वाराणसी ।

१३. कुमारसम्भवम्—वेंकटेश्वर प्रेस, बम्बई ।

१४. काव्यमीमांसा (राजशेखर) मोतीलाल बनारसीदासः, दिल्ली ।

१५. काशिका (न्यासपदमञ्जरीसंहिता) तारा पब्लिकेशन, वाराणसी ।

१६. काशकृत्स्नधातुव्याख्यानम्—श्री युधिष्ठिर मीमांसकः, भारतीय प्रा० वि० प्र० अजमेर ।

१७. Gana-Ratna-Mahodadhi of Vardhaman By Julizs Eggeling Motilal B. Delhi.

१८. चान्द्रव्याकरणम् भाग-१-२ Deccan college pcst graduate and Research Institute, poona 1953.

१९. चान्द्रव्याकरणम् (जोधपुर प्रका०) वेचरदास सम्पादितम्, राजस्थानराज्यविद्याप्रतिष्ठान, जोधपुर—(राजस्थान) ।

२०. जैनेन्द्र व्याकरणम्—पूज्यपाददेवनन्दी, १९६७ ।

२१. तन्त्रप्रदीपः धातुप्रदीपश्च—मैत्रेयरक्षितः—राजकीय पुस्तकालय, दरभगा ।

२२. दुर्गासप्तशती—गीताप्रेस, गोरखपुर ।
२३. न्यायसिद्धान्तमुक्तावली—किरणावलीसंहिता, स्वामिनारायण ग्रन्थमाला, बनारस सिटी १९४० ।
२४. नाट्य शास्त्रम्—भरताचार्यः—मोतीलाल वनारसीदास बेंगलो रोड जवाहर नगर, दिल्ली ।
२५. पाणिनीय कालीन भारतवर्ष—डा० वासुदेव शरण—प्राप्तिस्थान—मोतीलाल बनारसीदास, दिल्ली ।
२६. प्रौढमनोरमा (शब्दरत्न सहिता) भैरवी सरला टीकोपेता (चौखम्बा प्रकाशन) वाराणसी ।
२७. पाणिनि शिक्षा (श्लोकात्मिका) सिं कौ० मध्य प्रकाशिता ।
२८. पातञ्जल योगदर्शनम्—चौखम्बा प्रकाशन, वाराणसी ।
२९. पाणिनि कात्यायन एण्ड पतंजलि—के० माधवकृष्ण शर्मा, Sanskrit Vidyapeett, Delhi).
३०. परिभाषावृत्तिः ज्ञापकसमुच्चयः कारकचक्रम्-पुरुषोत्तम देवः (राजशाही प्रकाशन) ।
३१. परिभाषेन्दुशेखरः नागेशः—(१) वृहच्छास्त्रार्थकलासहितः चौखम्बा प्र० वाराणसी (२) विजया सहितः तीर-भुक्तिप्रकाशन, प्रयाग १९६८ ।
३२. बालावबोधः—भिक्षुकाश्यपः ।
३३. बौद्धसंस्कृतिः—राहुल सांकृत्यायन, प्र० आधुनिक पुस्तक भवन ३०-३१ कलाकर स्ट्रीट कलकत्ता ।
३४. भाषावृत्तिः (पुरुषोत्तम देवः) मोतीलाल बनारसीदास, दिल्ली ।
३५. भागवृत्तिसंकलनम्—श्री युधिष्ठिर मीमांसकः—भारतीयप्राच्यविद्याप्रतिष्ठानम् ३१।१४४ अलवर गेट अजमेर ।
३६. भारतीय साहित्य शास्त्र—बलदेव उपाध्याय शारदा मन्दिर, वाराणसी ।
३७. भाषा विज्ञान—डा० भोलानाथ तिवारी, किताब महल, जीरो रोड, इलाहाबाद ।
३८. मेनुस्क्रुप्ट फोटो स्टेट कापी—जायसवाल रिसर्च इंस्टिट्यूट (पटना) के सौजन्य से प्राप्त ।
३९. मुद्राराक्षस—चौखम्बा प० वाराणसी ।
४०. माघः (शिशुपालवधम्) निर्णय सागर, बम्बई ।
४१. महाभाष्यम्—मोतीलाल बनारसीदास, दिल्ली १-३ भाग १९६७ ।
४२. सौन्दरानन्द काव्यम्—सं० भवन कठौतिया, पो० काझा जि० पूर्णिया (बिहार) ।
४३. लघुशब्देन्दुशेखरः (नित्यानन्द टीकोपेतः) चौखम्बा प्र० वाराणसी ।
४४. व्याकरण शास्त्र का संक्षिप्त इतिहास—रमाकान्त मिश्र, चौखम्बा प्रकाशन, बनारस ।
४५. वैयाकरण सिद्धान्त कौमुदी—तत्वबोधिनी सहिता (निर्णयसागर बम्बई प्रकाशन) ।
४६. वाक्यपदीयम्—चौखम्बा प्र० वाराणसी ।
४७. वाल्मीकिरामायणम् (सुन्दर काण्ड) निर्णयसागर बम्बई ।
४८. रघुवंश महाकाव्यम् ,,
४९. रूपावतारः—धर्मकीर्तिः, भागद्वयम् म. रङ्गाचार्यसम्पादितम्, The Banglore Press, Lake view, Mysore Road, Bangtore city 1927.

५०. राजतरङ्गिणी-कल्हण ।

५२. सरस्वती कण्ठाभरणम् (व्या० भाग)—भोज राजः ।

५३. System of Sanskrit Grammar—Belvalkar.

५४. संस्कृत साहित्य का संक्षिप्त इतिहास—गैरोला—चौखम्बा प्रकाशन वाराणसी (प्रतीक) सं० सा० का इ०) ।

५५. संस्कृतव्याकरण शास्त्र का इतिहास—श्री युधिष्ठिर मीमांसक भाग-१-१ और २ ।

५६. संस्कृत साहित्य का इतिहास—श्री बलदेव उपाध्याय, शारदा मन्दिर वाराणसी ।

५७. संस्कृत का भाषा शास्त्रीय अध्ययन (डा० भोलाशंकर व्यास) भारतीय ज्ञानपीठ, काशी ।

५८. साहित्यदर्पणः (हरिदास टीका सहितः) प्र० हेमचन्द्र तर्क वागीश, भट्टाचार्य, सिद्धान्त विद्यालय, देवलेन, कलकत्ता ।

५९. शब्दकल्पद्रुमः—चौखम्बा प्रकाशन वाराणसी १९६७ ।

६०. शब्दकौस्तुमः भट्टोजिदीक्षितः चौखम्बा, वाराणसी १९५५ ।

६१. शिक्षासूत्राणि (आपिशलशिक्षासूत्रपाणिनीयशिक्षासूत्र-चान्द्र वर्णसूत्र संग्रहरूपाणि)—श्री युधिष्ठिर मीमांसकः, प्राच्य वि० प्रतिष्ठानम् अजमेर ।

६२. हिन्दी विश्व कोश—नागरी प्रचारिणी सभा काशी १९६५ ।

—०—०—